गंगम्' इत्यादि अव्ययीभाव समासमें पूर्वपदार्थके प्रधानत्वका अभाव है, 'अतिमाला' इत्यादि । तत्पुरुष समासमें उत्तरपदार्थके प्रधानत्वका अभाव है, 'दंतोष्ठम्' इत्यादि । द्वन्द्व समासमें समूहके प्रधान होनेसे उभय पदार्थके प्रधानत्वका अभाव है । तत्पुरुषका विशेष कर्मधारय समास और कर्मधारयका विशेष द्विगु समास है । अनेकपदत्व केवल द्वन्द्व और बहुव्रीहि समासको ही है । और तत्पुरुषका कहीं ही अनेकपदत्व है । और

"सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा ।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥"

अर्थात् सुबन्तके साथ सुबन्तका समास, जैसे–राजपुरुषः । तिङन्तके साथ सुबन्तका समास, जैसे–पर्यभूषत् । नामके साथ सुबन्तका समास, जैसे–कुंभकारः । धातुके साथ सुबन्तका समास, जैसे–कटप्रूः । अजस्रम् । तिङन्तके साथ तिङन्तका समास, जैसे–पिबतखादता । खादतमोदता । सुबन्तके साथ तिङन्तका समास, जैसे–कृन्त विचक्षणेति यस्यां क्रियायां सा कृन्तविचक्षणा, यहां "एहीडादयोऽन्यपदार्थे" इस गणसूत्रसे मयूरव्यंसकादि गणके मध्यमें पाठ होनेके कारण समास हुआ ॥

॥ इति सर्वसमासशेषप्रकरणम् ॥

अथ समासान्तप्रकरणम् ।

९४० ऋक्पूरब्धूःपथामानक्षे ५।४।७४॥

अ अनक्षे इति च्छेदः । ऋगाद्यन्तस्य समासस्य अ प्रत्ययोऽन्तावयवः स्यात् । अक्षे या धूस्तदन्तस्य तु न । अर्द्धर्चः ॥ अनृचबह्वृचावध्येतर्येव । नेह । अनृक्साम । बह्वृक् सूक्तम् । विष्णोः पूः विष्णुपुरम् । क्लीबत्वं लोकात् । विमलापं सरः ॥

९४०–'आनक्षे' इस स्थलमें 'अ अनक्षे' ऐसा पदच्छेद है । ऋक्शब्दान्त, पूर्शब्दान्त, अप्शब्दान्त, धुर्शब्दान्त और पथिन्शब्दान्त जो समास उसका अन्तावयव अ प्रत्यय हो, परन्तु शकटका अक्षबोधक जो धुर् शब्द है तदन्त समाससे अ प्रत्यय नहीं हो, 'अर्द्धर्चः' यहां "अर्द्धर्चाः पुंसि च २।४।३१" इस सूत्रसे पुंस्त्व हुआहै । अनृच और बह्वृच यह दोनों पद अध्ययनकर्ता ही अर्थमें अप्रत्ययान्त होंगे, अन्यार्थमें अप्रत्ययान्त नहीं होंगे, यथा–अनृक् साम । बह्वृक् सूक्तम् । विष्णोः पूः=विष्णुपुरम्, इस स्थलमें लोकमें नपुंसकका ही प्रयोग होनेके कारण क्लीबत्व हुआ, इसी प्रकार 'विमलापं सरः' इत्यादि प्रयोग जानने ॥

९४१ द्व्यन्तरुपसर्गेभ्योऽप ईत् ६।३।९७।

अप इति कृतसमासान्तस्यानुकरणम् । षष्ठ्यर्थे प्रथमा । एभ्योऽपस्य ईत् स्यात् । द्विर्गता आपो यस्मिन्निति द्वीपम् । अन्तरीपम् । प्रतीपम् । समीपम् । समापो देवयजनमिति तु समा आपो यस्मिन्निति बोध्यम् । कृतसमासान्तग्रहणान्नेह । स्वप्, स्वपी ॥ अवर्णान्ताद्वा ॥*॥ प्रेपम् । परेपम् । प्रापम् । परापम् ॥

९४१–अप यह कृतसमासान्तका अनुकरण है, इससे षष्ठ्यर्थमें प्रथमा है । द्वि, अन्तर् और उपसर्ग इनके परे स्थित अप शब्दके अकारके स्थानमें ईत् हो, जैसे–द्विर्गता आपो यस्मिन्=द्वीपम् । अन्तर्गता आपो यस्मिन्=अन्तरीपम् । इसी प्रकार प्रतीपम्, समीपम्, इत्यादि । 'समापो देवयजनम्' इस स्थलमें 'समा आपो यस्मिन्' इस विग्रहमें उपसर्गपूर्वक न होनेके कारण ईत् नहीं हुआ । कृतसमासान्तके ग्रहणके कारण 'स्वप्, स्वपी' इत्यादिमें ईत् आदेश नहीं हुआ ।

अवर्णान्त उपसर्गके उत्तर अप् शब्दके अकारके स्थानमें विकल्प करके ईत् हो * जैसे–प्रेपम्, विकल्प पक्षमें–प्रापम् । परेपम्, पक्षे–परापम् ॥

९४२ ऊदनोर्देशे । ६ । ३ । ९८ ॥

अनोः परस्यापस्य ऊत्स्याद्देशे । अनूपो देशः । राजधुरा । अक्षे तु अक्षधूः । दृढधूरक्षः । सखिपथो रम्यपथो देशः ॥

९४२–देश अर्थ होनेपर 'अनु' इस उपसर्गके परे स्थित जो कृतसमासान्त अप् शब्द उसके अकारके स्थानमें ऊत् हो, जैसे–अनूपो देशः । राज्ञो धुरा=राजधुरा । जिस स्थानमें धुर् शब्द अक्षवाचक है वहां अ प्रत्यय नहीं होगा, जैसे–अक्षधूः । दृढधूः अक्षः । सखिपथः । रम्यपथो देशः ॥

९४३ अच् प्रत्यन्ववपूर्वात्सामलोम्नः । ५ । ४ । ७५ ॥

एतत्पूर्वात्सामलोमान्तात्समासादच् स्यात् । प्रतिसामम् । अनुसामम् । अवसामम् । प्रतिलोमम् । अनुलोमम् ॥ कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते ॥ कृष्णभूमः । उदग्भूमः । पाण्डुभूमः । द्विभूमः प्रासादः ॥ संख्याया नदीगोदावरीभ्यां च ॥ पञ्चनदम् । सप्तगोदावरम् । अजिति योगविभागादन्यत्रापि । पद्मनाभः ॥

९४३–प्रति, अनु और अवपूर्वक सामन् और लोमन् शब्दान्त समासके उत्तर अच् प्रत्यय हो जैसे–प्रतिसामम् । अनुसामम् । अवसामम् । प्रतिलोमम् । अनुलोमम् । अवलोमम् ।

कृष्ण, उदक्, पांडु और संख्यावाचकशब्दपूर्वक भूमि शब्दके उत्तर समासान्त अच् प्रत्यय हो, जैसे–कृष्णभूमः । उदग्भूमः । पांडुभूमः । द्विभूमः प्रासादः ।

संख्यावाचक शब्दके परे स्थित नदी और गोदावरी शब्दके उत्तर समासान्त अच् प्रत्यय हो, जैसे–पञ्चनदम् । सप्तगोदावरम् । 'अच्' ऐसा भिन्न सूत्र करनेके

कारण एतद्भिन्न स्थलमें भी अच् प्रत्यय होगा, जैसे-पद्मनाभः ॥

९४४ अक्ष्णोऽदर्शनात् । ५ । ४ । ७६॥

अचक्षुःपर्यायादक्ष्णोऽच् स्यात्समासान्तः । गवामक्षीव गवाक्षः ॥

९४४-चक्षुःपर्याय न हो ऐसे अक्षि शब्दके उत्तर समासान्त अच् प्रत्यय हो, गवामक्षीव=गवाक्षः ॥

९४५ अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तन्दिवरात्रिन्दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः । ५ । ४ । ७७ ॥

एते पञ्चविंशतिरजन्ता निपात्यन्ते । आद्यास्त्रयो बहुव्रीहयः । अविद्यमानानि चत्वार्यस्य अचतुरः । विचतुरः । सुचतुरः ॥ त्र्युपाभ्यां चतुरोऽजिष्यते ॥ त्रिचतुराः । चतुर्णां समीपे उपचतुराः । तत एकादश द्वन्द्वाः । स्त्रीपुंसौ । धेन्वनडुहौ । ऋक्सामे । वाङ्मनसे । अक्षिणी च भ्रुवौ च अक्षिभ्रुवम् । दाराश्च गावश्च दारगवम् । ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवम् । निपातनाट्टिलोपः । पदष्ठीवम् । निपातनात्पादशब्दस्य पद्भावः । नक्तं च दिवा च नक्तन्दिवम् । रात्रौ च दिवा च रात्रिन्दिवम् । रात्रेर्मान्तत्वं निपात्यते । अहनि च दिवा च अहर्दिवम् । वीप्सायां द्वन्द्वो निपात्यते । अहन्यहनीत्यर्थः। सरजसमिति साकल्येऽव्ययीभावः । बहुव्रीहौ तु सरजः पंकजम् । निश्चितं श्रेयो निश्श्रेयसम् । तत्पुरुष एव । नेह । निश्श्रेयान् पुरुषः । पुरुषस्यायुः पुरुषायुषम् । ततो द्विगू । द्व्यायुषम् । त्र्यायुषम् । ततो द्वन्द्वः । ऋग्यजुषम् । ततस्त्रयः कर्मधारयाः । जातोक्षः । महोक्षः । वृद्धोक्षः । शुनः समीपम् उपशुनम् । टिलोपाभावः सम्प्रसारणं च निपात्यते । गोष्ठे श्वा गोष्ठश्वः ॥

९४५-अचतुरादि पचीस शब्द अच्प्रत्ययान्त निपातन होतेहैं । उनमें पहिलेके तीन बहुव्रीहि हैं, जैसे-अविद्यमानानि चत्वारि अस्य=अचतुरः । विचतुरः । सुचतुरः ।

त्रि और उपपूर्वक चतुर् शब्दके उत्तर अच् प्रत्यय हो, जैसे-त्रिचतुरः । 'चतुर्णां समीपे' ऐसे विग्रहमें उपचतुराः॥

इसके पश्चात् और ग्यारह शब्द द्वन्द्व हैं, जैसे-स्त्रीपुंसौ । धेन्वनडुहौ । ऋक्सामे । वाङ्मनसे । 'अक्षिणी च भ्रुवौ च' इस विग्रहमें अक्षिभ्रुवम्, दाराश्च गावश्च=दारगवम् । ऊरू च अष्ठीवन्तौ च=ऊर्वष्ठीवम्, इस स्थलमें निपातनसे टिलोप हुआ और 'पदष्ठीवम्' यहां निपातनहीसे पाद शब्दके स्थानमें पद्भाव हुआहै । नक्तञ्च दिवा च=नक्तन्दिवम् । रात्रौ च दिवा च=रात्रिन्दिवम्, इस स्थानमें रात्रि शब्दका मान्तत्व निपातनसिद्ध है । अहनि च दिवा च=अहर्दिवम्, इस स्थानमें वीप्सा अर्थमें द्वन्द्व निपातनसिद्ध है अर्थात् 'अहन्यहनि' ऐसा जानना चाहिये । सरजसम्, यहां साकल्यार्थमें अव्ययीभाव समास है, परन्तु बहुव्रीहि समासमें 'सरजः पङ्कजम्' ऐसा होगा । निश्चितं श्रेयः=निःश्रेयसम्, यह तत्पुरुष समासहीमें हो, इससे तत्पुरुष समास नहीं होनेपर 'निःश्रेयान् पुरुषः' यहां नहीं हुआ, 'पुरुषस्यायुः' इस वाक्यमें पुरुषायुषम् । पश्चात् दो द्विगु हैं, जैसे-द्व्यायुषम् । त्र्यायुषम् । पश्चात् एक द्वन्द्व है, जैसे-ऋग्यजुषम् । पश्चात् तीन कर्मधारय हैं, जैसे-जातोक्षः । महोक्षः । वृद्धोक्षः । 'शुनः समीपम्' इस वाक्यमें 'उपशुनम्' इस स्थानमें टिके लोपका अभाव और संप्रसारण निपातनसिद्ध है । 'गोष्ठे श्वा' इस वाक्यमें गोष्ठश्वः ॥

९४६ ब्रह्महस्तिभ्यां वर्चसः ।५।४।७८॥

अच् स्यात् । ब्रह्मवर्चसम् । हस्तिवर्चसम् । पल्यराजभ्यां चेति वक्तव्यम् ॥ * ॥ पल्यवर्चसम् राजवर्चसम् ॥

९४६-ब्रह्मन् और हस्तिन् शब्दके परे स्थित वर्चस् शब्दके उत्तर अच् हो, जैसे-ब्रह्मवर्चसम् । हस्तिवर्चसम् ।

पल्य और राजन् शब्दके परे स्थित वर्चस् शब्दके उत्तर भी अच् प्रत्यय हो * जैसे-पल्यवर्चसम् । राजवर्चसम् । मांसको पल्य कहतेहैं ॥

९४७ अवसमन्धेभ्यस्तमसः ।५।४।७९॥

अवतमसम् । सन्तमसम् । अन्धयतीत्यन्धं पचाद्यच् । अन्धं तमः अन्धतमसम् ॥

९४७-अव, सम्, और अन्धपूर्वक तमस् शब्दके उत्तर अच् प्रत्यय हो, जैसे-अवतमसम् । अन्धयतीति=अंधः, पचादित्वके कारण अच्, अन्धं तमः=अन्धतमसम् ॥

९४८ श्वसो वसीयश्श्रेयसः ।५।४।८०॥

वसुशब्दः प्रशस्तवाची तत ईयसुनि वसीयः । श्वस्शब्द उत्तरपदार्थप्रशंसामाशीर्विषयतामाह । मयूरव्यंसकादित्वात्समासः । श्वोवसीयसम् । श्वःश्रेयसं ते भूयात् ॥

९४८-वसु शब्द प्रशस्तवाचक है, उसके उत्तर ईयसुन् प्रत्यय करके वसीयः, यह पद हुआहै । श्वस् शब्दसे आशीर्वादविषय जो उत्तरपदार्थप्रशंसा सो जानना । श्वस् शब्दके परे स्थित वसीयस् और श्रेयस् शब्दके उत्तर अच् प्रत्यय हो । 'श्वोवसीयसम्, श्वःश्रेयसं ते भूयात्' इस स्थलमें मयूरव्यंसकादित्वके कारण समास हुआहै ॥

९४९ अन्ववतप्ताद्रहसः ।५।४।८१॥

अनुरहसम् । अवरहसम् । तप्तरहसम् ॥

९४९–अनु, अव और तप्तशब्दपूर्वक रहस् शब्दके उत्तर समासान्त अच् प्रत्यय हो, जैसे–अनुरहसम्। अवरहसम्। तप्तरहसम् ॥

९५० प्रतेरुरसः सप्तमीस्थात्।५।४।८२॥

उरसि प्रति प्रत्युरसम्। विभक्त्यर्थेऽव्ययीभावः॥

९५०–प्रतिपूर्वक सप्तम्यन्त उरस् शब्दके उत्तर अच् प्रत्यय हो, जैसे–उरसि प्रति=प्रत्युरसम्, इस स्थानमें विभक्त्यर्थमें अव्ययीभाव हुआहै ॥

९५१ अनुगवमायामे। ५। ४। ८३ ॥

एतन्निपात्यते दीर्घत्वे। अनुगवं यानम्। यस्य चायाम इति समासः॥

९५१–दीर्घ अर्थ होनेपर अनुपूर्वक गो शब्दके उत्तर अच् प्रत्ययका निपातन हो, जैसे–अनुगवं यानम्, इस स्थलमें "यस्य चायामः ६७०" इस सूत्रसे अनु शब्दके साथ गो शब्दका समास हुआहै ॥

९५२ द्विस्तावा त्रिस्तावा वेदिः। ५। ४। ८४ ॥

अच् प्रत्ययष्टिलोपः समासश्च निपात्यते। यावती प्रकृतौ वेदिस्ततो द्विगुणा त्रिगुणा वाऽश्वमेधादौ तत्रेदं निपातनम्। वेदिरिति किम्। द्विस्तावती त्रिस्तावती रज्जुः॥

९५२–'द्विस्तावा' और 'त्रिस्तावा' इनमें अच् प्रत्यय, टिका लोप और समास निपातनसे हों। प्रकृतिमें जितनी बडी वेदि विहित है, उसकी अपेक्षा दुगनी अथवा तिगुनी अश्वमेधादिमें होतीहै, वहां यह पनिपातन है। वेदिसे भिन्न अर्थमें पूर्वोक्त रूप न होंगे, जैसे–द्विस्तावती, त्रिस्तावती रज्जुः ॥

९५३ उपसर्गादध्वनः। ५। ४।८५ ॥

प्रगतोऽध्वानं प्राध्वो रथः॥

९५३–उपसर्गके परे स्थित अध्वन् शब्दके उत्तर अच् प्रत्यय हो, जैसे–प्रगतोऽध्वानम्=प्राध्वः, अर्थात् रथ ॥

९५४ न पूजनात्। ५। ४। ६९ ॥

पूजनार्थात्परेभ्यः समासान्ता न स्युः। सुराजा। अतिराजा॥ स्वतिभ्यामेव॥ *॥ नेह। परमराजः। पूजनात्किम्। गामतिक्रान्तोऽतिगवः। बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवायं निषेधः। नेह। सुसक्थः। स्वक्षः॥

९५४–पूजनार्थ शब्दके परे स्थित शब्दोंसे समासान्त प्रत्यय न हों, जैसे–सुराजा। अतिराजा।

पूजानार्थ सु और अति शब्दसे ही परे स्थित शब्दके उत्तर समासान्त प्रत्यय न हों * इसी कारण 'परमराजः' इस स्थलमें निषेध नहीं हुआ।

पूजनार्थसे परे न होनेपर जैसे–गामतिक्रान्तः=अतिगवः, इस स्थलमें टच् प्रत्यय हुआ है। "बहुव्रीहौ सक्थ्यक्ष्णोः० ८५२" इस सूत्रके पूर्व सूत्रोंसे विहित समासान्त प्रत्ययोंका ही यह निषेधक सूत्र है, इस कारण सुसक्थः, स्वक्षः, इस स्थलमें निषेध नहीं हुआ ॥

९५५ किमः क्षेपे। ५। ४। ७० ॥

क्षेपे यः किंशब्दस्ततः परं यत्तदन्तात्समासान्ता न स्युः। कुत्सितो राजा किंराजा। किंसखा। किंगौः। क्षेपे किम्। किंराजः। किंसखः। किंगवः॥

९५५–निन्दाबोधक किम् शब्दके परे स्थित शब्दोंके उत्तर समासान्त प्रत्यय न हो, जैसे–'कुत्सितो राजा' इस वाक्यमें–किंराजा। किंसखा। किंगौः।

निंदा न होनेपर समासान्त होगा, जैसे–किंराजः। किंसखः। किंगवः। यहां किम् शब्द प्रश्नमें है, षष्ठीसमास वा कर्मधारय जानना ॥

९५६ नञस्तत्पुरुषात्। ५। ४। ७१ ॥

समासान्तो न। अराजा। असखा। तत्पुरुषात्किम्। अधुरं शकटम्॥

९५६–नञ्तत्पुरुष समासके उत्तर समासान्त प्रत्यय न हो, जैसे–अराजा। असखा।

तत्पुरुष कहनेसे 'अधुरं शकटम्' इस स्थलमें समासान्त हुआ है ॥

९५७ पथो विभाषा। ५। ४। ७२ ॥

नञ्पूर्वात्पथो वा समासान्तः। अपथम्। अपन्थाः। तत्पुरुषादित्येव। अपथो देशः। अपथं वर्त्तते॥ ॥ इति समासान्ताः॥

९५७–नञ्पूर्वक पथिन् शब्दके उत्तर विकल्प करके समासान्त प्रत्यय हो। 'अपथम्'यहां "नस्तद्धिते ६।४।१४४" इससे टिलोप और "अपथन्नपुंसकम् २। ४। ३०" इससे नपुंसकत्व हुआ है। अपंथाः।

इस सूत्रमें भी 'तत्पुरुषात्' इसकी अनुवृत्तिसे नञ्पूर्वक पथिन् शब्दान्त तत्पुरुषसे ही समासान्त विकल्प करके होगा, इस कारण 'अपथो देशः, अपथं वर्त्तते' इत्यादि स्थलोंमें बहुव्रीहि समास होनेके कारण नित्य समासान्त हुआहै ॥

॥ इति समासान्तप्रकरणम् ॥

अथालुक्समासप्रकरणम्।

९५८ अलुगुत्तरपदे। ६। ३। १ ॥

अलुगधिकारः प्रागानङ उत्तरपदाधिकारस्त्वा पादसमाप्तेः॥

९५८–आनङ् (९२१) के पूर्वपर्यन्त अलुक्का अधिकार और पादसमाप्तिपर्यन्त उत्तरपदका अधिकार चलेगा ॥

९५९ पञ्चम्याः स्तोकादिभ्यः।६।३।२॥

एभ्यः पञ्चम्या अलुक् स्यादुत्तरपदे। स्तोकान्मुक्तः। एवमन्तिकार्थदूरार्थकृच्छ्रेभ्यः। उत्तरपदे

किम्। निष्क्रान्तः स्तोकान्निःस्तोकः । ब्राह्मणाच्छंसिन उपसंख्यानम् ॥ * ॥ ब्राह्मणे विहितानि शस्त्राणि उपचाराद्ब्राह्मणानि तानि शंसतीति ब्राह्मणाच्छंसी ऋत्विग्विशेषः । द्वितीयार्थे पञ्चम्युपसंख्यानादेव ॥

९५९-उत्तरपद परे रहते स्तोकादि शब्दके उत्तर पञ्चमीका अलुक् अर्थात् लुक् न हो, जैसे-स्तोकान्मुक्तः । ऐसे ही उत्तरपद परे रहते अन्तिकार्थ शब्द, दूरार्थ शब्द और कृच्छ्र शब्दके उत्तर पञ्चमीका लुक् नहीं होगा । जिस स्थानमें उत्तरपद परे न होगा, उस स्थानमें निष्क्रान्तः स्तोकात्=निःस्तोकः, ऐसा ही होगा ।

(ब्राह्मणाच्छंसिन उपसंख्यानम् *) शंसिन् शब्द परे रहते ब्राह्मण शब्दके उत्तर पञ्चमीका अलुक् हो, जैसे-'ब्राह्मणे विहितानि शस्त्राणि उपचारात् ब्राह्मणानि, तानि शंसति' इस विग्रहमें 'ब्राह्मणाच्छंसी' अर्थात् ऋत्विग्विशेष । उक्त स्थानमें उपसंख्यानके ही कारण द्वितीयाके अर्थमें पञ्चमी हुई है, यह जानना चाहिये ॥

९६० ओजःसहोऽम्भस्तमसस्तृतीयायाः । ६ । ३ । ३ ॥

ओजसा कृतमित्यादि ॥ अञ्जस उपसंख्यानम् ॥ * ॥ अञ्जसा कृतम् । आर्जवेन कृतमित्यर्थः ॥ पुंसानुजो जनुषान्ध इति च॥ * ॥ यस्याग्रजः पुमान् स पुंसानुजः । जनुषान्धो जात्यन्धः ॥

९६०-उत्तरपद परे रहते ओजस्, सहस्, अम्भस् और तमस् शब्दसे परे तृतीया विभक्तिका अलुक् हो, जैसे-ओजसाकृतम्-इत्यादि ।

अञ्जस् शब्दके परे भी तृतीयाका अलुक् हो * जैसे-अञ्जसाकृतम्, अर्थात् ऋजुताद्वारा किया हुआ ।

अनुज शब्द परे रहते पुमस् शब्दसे और अन्ध शब्द परे रहते जनुस् शब्दसे विहित तृतीया विभक्तिका अलुक् हो* जैसे-यस्याग्रजः पुमान् सः=पुंसानुजः । जनुषांधः, अर्थात् जातान्ध ॥

९६१ मनसः संज्ञायाम् । ६ । ३ । ४॥

मनसागुप्ता ॥

९६१-उत्तर पद परे रहते संज्ञा अर्थमें मनस् शब्दके उत्तर विभक्तिका अलुक् हो, जैसे-मनसागुप्ता ॥

९६२ आज्ञायिनि च । ६ । ३ । ५ ॥

मनस इत्येव । मनसा आज्ञातुं शीलमस्य मनसाज्ञायी ॥

९६२-आज्ञायिन् शब्द परे रहते मनस् शब्दके उत्तर तृतीया विभक्तिका अलुक् हो, जैसे-मनसा आज्ञातुं शीलमस्य=मनसाज्ञायी ॥

१ "स्तोकान्तिकदूरार्थकृच्छ्राणि०" इस सूत्रमें पठित स्तोकादि हैं॥

९६३ आत्मनश्च । ६ । ३ । ६२ ॥

आत्मनस्तृतीयाया अलुक् स्यात् ॥ पूरण इति वक्तव्यम् ॥ * ॥ पूरणप्रत्ययान्ते उत्तरपदे इत्यर्थः । आत्मनापञ्चमः । जनार्दनस्त्वात्मचतुर्थ एवेति बहुव्रीहिर्बोध्यः । पूरणे किम्। आत्मकृतम् ॥

९६३-पूरणप्रत्ययान्त* उत्तरपद परे रहते आत्मन् शब्दके परे तृतीया विभक्तिका अलुक् हो, जैसे-आत्मनापञ्चमः । 'जनार्दनस्त्वात्मचतुर्थः' इस स्थानमें 'आत्मा चतुर्थो यस्य' ऐसा बहुव्रीहि समझना । पूरणप्रत्ययान्त परे न रहते लुक् होगा, जैसे-आत्मकृतम् ॥

९६४ वैयाकरणाख्यायां चतुर्थ्याः । ६ । ३ । ७ ॥

आत्मन इत्येव । आत्मनेपदम् । आत्मनेभाषा । तादर्थ्ये चतुर्थी । चतुर्थीतियोगविभागात्समासः ॥

९६४-व्याकरणसंबंधी संज्ञा होनेपर आत्मन् शब्दके परे चतुर्थीका अलुक् हो, जैसे-आत्मनेपदम् । आत्मनेभाषा । उक्त स्थलमें तादर्थ्यमें चतुर्थी हुई है, और "चतुर्थी तदर्था०" इस सूत्रमें 'चतुर्थी' इस योगविभागसे समास हुआहै ॥

९६५ परस्य च । ६ । ३ । ८ ॥

परस्मैपदम् । परस्मैभाषा ॥

९६५-व्याकरणकी संज्ञा होनेपर पर शब्दके परे स्थित चतुर्थी विभक्तिका अलुक् हो, जैसे-परस्मैपदम् । परस्मैभाषा ॥

९६६ हलदन्तात्सप्तम्याः संज्ञायाम् । ६ । ३ । ९ ॥

हलन्तादन्ताच्च सप्तम्या अलुक् संज्ञायाम् । त्वचिसारः ॥

९६६-संज्ञा होनेपर हलन्त और अकारान्त शब्दके परे स्थित सप्तमी विभक्तिका अलुक् हो, जैसे-त्वचिसारः ॥

९६७ गवियुधिभ्यां स्थिरः ।८।३।९५ ॥

आभ्यां स्थिरस्य सस्य षः स्यात् । गविष्ठिरः । अत्र गवीति वचनादेवाऽलुक् । युधिष्ठिरः । अरण्येतिलकः । अत्र संज्ञायामिति सप्तमीसमासः ॥ हृद्द्युभ्यां च ॥ * ॥ हृदिस्पृक् । दिविस्पृक् ॥

९६७-गवि और युधि इन दो पदोंके परे स्थित स्थिर शब्दके सकारको षत्व हो, जैसे-गविष्ठिरः । इस सूत्रमें 'गवि' ऐसा कहनेसे ही सप्तमी विभक्तिका अलुक् हुआ । युधिष्ठिरः । अरण्येतिलकः । इस स्थानमें "संज्ञायाम् ७२१" इस सूत्रसे सप्तमीतत्पुरुष समास हुआ ॥

१ "आत्मनश्च पूरणे" ऐसे विशिष्ट सूत्रका काशिकामें पाठ है॥

हृद् और दिव् शब्दके परे सप्तमीका अलुक् हो * जैसे-हृदिस्पृक्। दिविस्पृक् ॥

९६८ कारनाम्नि च प्राचां हलादौ। ६।३।१०॥

प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हलदन्तात्सप्तम्या अलुक्। मुकुटेकार्षापणम्। दृषदिमाषकः। पूर्वेण सिद्धे नियमार्थम्। कारनाम्न्येव प्राचामेव हलादावेवेति। कारनाम्नि किम्। अभ्याहितपशुः। कारादन्यस्यैतद्देयस्य नाम। प्राचां किम्। यूथपशुः। हलादौ किम्। अविकटोरणः। हलदन्ताकिम्। नद्यां दोहः नदीदोहः ॥

९६८-वणिक्, पशुपालक और कृषकादिके निकटसे राजा जो धन ग्रहण करे उसका नाम कर है, उसको ही कार भी कहतेहैं, पूर्व देशमें जो कारनाम, वहां हलादि उत्तरपद परे रहते हलन्त और अदन्तसे परे सप्तमीका अलुक् हो, जैसे-मुकुटेकार्षापणम्। दृषदिमाषकः। यद्यपि "हलदन्तात् सप्तम्याः० ६।३।९" इस सूत्रसे अलुक् सिद्ध है, तथापि यह सूत्र नियमके निमित्त है, किस प्रकार नियम है सो दिखाते हैं, जैसे-हलन्त और अदन्त शब्दके परे सप्तमीका अलुक् हो, किन्तु यदि प्राचीन देशप्रसिद्ध कारनामक हलादि पद परे हो तो। कारनाम शब्दके ग्रहण करनेसे यह हुआ कि, 'अभ्याहितपशुः' इस स्थलमें अलुक् नहीं हुआ। प्राचीन देश कहनेसे 'यूथपशुः' इस स्थानमें अलुक् नहीं हुआ। हलादि कहनेसे 'अविकटोरणः' इस जगहमें अलुक् नहीं हुआ। हलन्त और अदन्त कहनेसे 'नद्यां दोहः' इस विग्रहमें नदीदोहः, इस स्थलमें भी अलुक् नहीं हुआ ॥

९६९ मध्याद्गुरौ। ६।३।११॥

मध्येगुरुः ॥ अन्ताच्च ॥ * ॥ अन्तेगुरुः ॥

९६९-गुरु शब्द परे रहते मध्य शब्दके परे सप्तमी विभक्तिका अलुक् हो, जैसे-मध्येगुरुः।

(अन्ताच्च *) गुरु शब्द परे रहते अन्त शब्दके परे भी सप्तमीका अलुक् हो, जैसे-अन्तेगुरुः ॥

९७० अमूर्द्धमस्तकात्स्वाङ्गादकामे। ६।३।१२॥

कण्ठेकालः। उरसिलोमा। अमूर्द्धमस्तकात्किम्। मूर्द्धशिखः। मस्तकशिखः। अकामे किम्। मुखे कामोऽस्य मुखकामः ॥

९७०-काम शब्दसे भिन्न शब्द परे रहते मूर्द्ध और मस्तक शब्दसे भिन्न स्वाङ्गवाचक शब्दके परे सप्तमीका अलुक् हो, जैसे-कंठेकालः। उरसिलोमा। मूर्द्ध और मस्तक शब्दसे भिन्न कहनेसे 'मूर्द्धशिखः', 'मस्तकशिखः' इस स्थानमें अलुक् नहीं हुआ। 'अकामे' ऐसा कहनेके कारण 'मुखे कामोऽस्य' इस विग्रहमें 'मुखकामः' इस स्थानमें भी अलुक् नहीं हुआ है ॥

९७१ बन्धे च विभाषा। ६।३।१३॥

हलदन्तात्सप्तम्या अलुक्। हस्तेबन्धः। हस्तबन्धः। हलदन्तेति किम्। गुप्तिबन्धः ॥

९७१-बंध शब्द परे रहते हलन्त और अदन्त शब्दके परे सप्तमीका विकल्प करके अलुक् हो, जैसे-हस्तेबन्धः। पक्षमें-हस्तबंधः। हलन्त और अदन्त कहनेसे 'गुप्तिबंधः' इस स्थानमें अलुक् नहीं हुआ ॥

९७२ तत्पुरुषे कृति बहुलम्। ६।३।१४॥

स्तम्बेरमः। स्तम्बरमः। कर्णेजपः। कर्णजपः। क्वचिन्न। कुरुचरः ॥

९७२-तत्पुरुष समासमें कृत्प्रत्ययान्त शब्द परे रहते हलन्त और अदन्त शब्दके परे सप्तमीका बहुल करके अलुक् हो, जैसे-स्तम्बेरमः, स्तम्बरमः। कर्णेजपः, कर्णजपः। बहुलग्रहणसे कहीं नहीं भी होगा, जैसे-कुरुचरः ॥

९७३ प्रावृट्शरत्कालदिवां जे ६।३।१५॥

प्रावृषिजः। शरदिजः। कालेजः। दिविजः। पूर्वस्यायं प्रपञ्चः ॥

९७३-ज शब्द परे रहते प्रावृट्, शरद्, काल, दिव्, इन शब्दोंके परे सप्तमीका अलुक् हो, जैसे-प्रावृषिजः। शरदिजः। कालेजः। दिविजः। यह सूत्र पूर्व सूत्रका प्रपञ्च है॥

९७४ विभाषा वर्षक्षरशरवरात् ६।३।१६॥

एभ्यः सप्तम्या अलुक् जे। वर्षेजः। वर्षजः। क्षरेजः। क्षरजः। शरेजः। शरजः। वरेजः। वरजः ॥

९७४-ज परे रहते वर्ष, क्षर, शर, वर, इन शब्दोंके परे सप्तमीका विकल्प करके अलुक् हो, जैसे-वर्षेजः, वर्षजः। क्षरेजः, क्षरजः। शरेजः, शरजः। वरेजः, वरजः ॥

९७५ घकालतनेषु कालनाम्नः। ६।३।१७॥

सप्तम्या विभाषा लुक् स्यात्। घे। पूर्वाह्णेतरे। पूर्वाह्णतरे। पूर्वाह्णेतमे। पूर्वाह्णतमे। काले। पूर्वाह्णेकाले। पूर्वाह्णकाले। तने। पूर्वाह्णेतने। पूर्वाह्णतने ॥

९७५-घसंज्ञक, कालशब्द और तन शब्द परे रहते कालवाचक शब्दसे परे विकल्प करके सप्तमीका अलुक् हो। (तरप् और तमप् प्रत्ययकी घ संज्ञा है) घ-पूर्वाह्णेतरे, पूर्वाह्णतरे। पूर्वाह्णेतमे, पूर्वाह्णतमे। काल-पूर्वाह्णेकाले, पूर्वाह्णकाले। तन-पूर्वाह्णेतने, पूर्वाह्णतने ॥

९७६ शयवासवासिष्वकालात् ६।३।१८।

खेशयः। खशयः। ग्रामेवासः। ग्रामवासः। ग्रामेवासी। ग्रामवासी। हलदन्तादित्येव। भूमिशयः ॥ अपो योनियन्मतुषु ॥ * ॥ अप्सुयोनिरुत्पत्तिर्यस्य सोऽप्सुयोनिः। अप्सु भवोऽप्सव्यः। अप्सुमन्तावाज्यभागौ ॥

९७६-शय, वास और वासिन् शब्द परे रहते कालवाचक शब्दसे भिन्न शब्दके परे विकल्प करके सप्तमीका अलुक् हो, जैसे-खेशयः, खशयः। ग्रामेवासः, ग्रामवासः। ग्रामेवासी, ग्रामवासी। "हलदन्तात्० ६। ३। ९" इस सूत्रसे इस स्थानमें हलन्त और अदन्तकी अनुवृत्ति होनेसे हलन्त और अदन्त शब्दके उत्तर ही सप्तमीका अलुक् होगा, इससे 'भूमिशयः' यहां अलुक् न हुआ।

योनि शब्द, यत् प्रत्यय और मतुप् प्रत्यय परे रहते अप् शब्दके परे सप्तमीका अलुक् हो* जैसे-'अप्सु योनिरुत्पत्तिर्यस्य' इस विग्रहमें अप्सुयोनिः। 'अप्सु भवः' इस विग्रहमें अप्सव्यः। अप्सुमन्तावाज्यभागौ॥

९७७ नेन्सिद्धबध्नातिषु च। ६।३।१९॥

इन्नन्तादिषु सप्तम्या अलुम्न। स्थण्डिलशायी। सांकाश्यसिद्धः। चक्रबन्धः॥

९७७-इन्प्रत्ययान्त सिद्ध शब्द और बन्धार्थक बन्ध धातु परे रहते सप्तमीका अलुक् न हो, जैसे-स्थंडिलशायी। सांकाश्यसिद्धः। चक्रबन्धः॥

९७८ स्थे च भाषायाम्। ६। ३।२०॥

सप्तम्या अलुम्न। समस्थः। भाषायां किम्। कृष्णोऽस्याखरेष्ठः॥

९७८-स्थ शब्द परे रहते भाषामें सप्तमीका अलुक् नहीं हो, जैसे-समस्थः। भाषा न होनेपर अलुक् होगा, जैसे-कृष्णोऽस्याखरेष्ठः॥

९७९ षष्ठ्या आक्रोशे। ६। ३। २१॥

चौरस्यकुलम्। आक्रोशे किम्। ब्राह्मणकुलम्॥ वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु॥ *॥ वाचोयुक्तिः। दिशोदण्डः। पश्यतोहरः॥ आमुष्यायणाऽऽमुष्यपुत्रिकाऽऽमुष्यकुलिकेति च॥ ॥ *॥ अमुष्यापत्यम्। आमुष्यायणः। नडादित्वात् फक्। अमुष्य पुत्रस्य भावः आमुष्यपुत्रिका। मनोज्ञादित्वाद्वुञ् एवमामुष्यकुलिका॥ देवानांप्रिय इति च मूर्खे॥ *॥ अन्यत्र देवप्रियः॥ शेपपुच्छलांगूलेषु शुनः॥ *॥ शुनःशेपः। शुनःपुच्छः। शुनोलांगूलः॥ दिवश्च दासे॥ *॥ दिवोदासः॥

९७९-आक्रोश अर्थात् निन्दा गम्यमान होनेपर षष्ठीका अलुक् हो, जैसे-चौरस्यकुलम्। आक्रोश न होनेपर, जैसे-ब्राह्मणकुलम्, इस स्थानमें अलुक् नहीं हुआ।

युक्ति, दंड और हर शब्द परे रहते वाच्, दिश् और पश्यत् शब्दके परे षष्ठीका अलुक् हो * जैसे-वाचोयुक्तिः। दिशोदण्डः, पश्यतोहरः॥

आयन प्रत्यय, पुत्रिका शब्द और कुलिका शब्द परे रहते 'अमुष्य' इसमें षष्ठी विभक्तिका अलुक् हो * जैसे-'अमुष्यापत्यम्' इस विग्रहमें 'आमुष्यायणः' इस स्थानमें नडादित्वप्रयुक्त फक् प्रत्यय हुआ। 'अमुष्य पुत्रस्य भावः' इस विग्रहमें 'आमुष्यपुत्रिका' यहां मनोज्ञादित्वके कारण वुञ् प्रत्यय हुआहै। ऐसे ही 'आमुष्यकुलिका' में भी जानना॥

मूर्ख अर्थ होनेपर 'देवानांप्रियः' इस स्थलमें षष्ठी विभक्तिका अलुक् हो * जैसे-देवानांप्रियः अर्थात् पशुके समान मूर्ख[1]। जिस स्थानमें मूर्ख अर्थ न होगा उस स्थानमें देवप्रियः, ऐसा होगा।

शेप, पुच्छ और लांगूल शब्द परे रहते श्वन् शब्दके परे षष्ठीका अलुक् हो * जैसे-शुनःशेपः। शुनःपुच्छः। शुनोलाङ्गूलः।

दास शब्द परे रहते दिव शब्दके परे षष्ठी विभक्तिका अलुक् हो * जैसे-दिवोदासः॥

९८० पुत्रेऽन्यतरस्याम्। ६। ३। २२॥

षष्ठ्याः पुत्रे परेऽलुग्वा निन्दायाम्। दास्याः पुत्रः दासीपुत्रः। निन्दायां किम्। ब्राह्मणीपुत्रः॥

९८०-निन्दा अर्थ होनेपर पुत्र शब्द परे रहते षष्ठी विभक्तिका विकल्प करके अलुक् हो, जैसे-दास्याः पुत्रः= दासीपुत्रः। जिस स्थानमें निन्दा न होगी उस स्थानमें लुक होगा, जैसे-ब्राह्मणीपुत्रः॥

९८१ ऋतो विद्यायोनिसम्बन्धेभ्यः। ६। ३। २३॥

विद्यासंबन्धयोनिसंबंधवाचिन ऋदन्तात्षष्ठ्या अलुक्। होतुरन्तेवासी। होतुःपुत्रः। पितुरन्तेवासी। पितुःपुत्रः॥ विद्यायोनिसंबन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणम्॥ *॥ नेह। होतृधनम्॥

९८१-विद्यासम्बन्ध और योनिसंबन्धवाचक ऋदन्त शब्दके परे षष्ठीका अलुक् हो, जैसे-होतुरन्तेवासी। होतुःपुत्रः। पितुरन्तेवासी। पितुःपुत्रः। विद्या और योनिसंबंधवाचक ऋदन्त शब्दसे परे षष्ठीका विद्यायोनिसम्बन्धवाचक ही उत्तरपद परे रहते अलुक् हो, ऐसा कहना चाहिये* इससे होतृधनम्, पितृधनम्, इस स्थलमें अलुक् नहीं हुआ॥

९८२ विभाषा स्वसृपत्योः। ६।३।२४॥

ऋदन्तात्षष्ठ्या अलुग् वा स्वसृपत्योः परयोः॥

९८२-स्वसृ और पति शब्द परे रहते ऋदन्त शब्दके परे विकल्प करके षष्ठीका अलुक् हो-॥

९८३ मातुःपितुर्भ्यामन्यतरस्याम्। ८। ३। ८५॥

---

१ जैसे-दुग्धादिप्रदानद्वारा गवादि पशु मनुष्यकी प्रीतिको उत्पन्न करतेहैं, वैसे ही संसारी मनुष्य भी यागादिके अनुष्ठानद्वारा देवताओंकी प्रीतिको उत्पन्न करतेहैं, इसलिये पशुसदृश होनेसे संसारी ही मूर्ख हैं, तत्त्वज्ञानी तो यागादिका अनुष्ठान नहीं करतेहैं, इसलिये वे पशुसदृश नहीं होनेसे मूर्ख नहीं हैं॥

आभ्यां परस्य स्वसुः सस्य षो वा स्यात् समासे । मातुःष्वसा । मातुःस्वसा । पितुःष्वसा । पितुःस्वसा । लुक्पक्षे तु ॥

९८३-समासमें मातृ शब्द और पितृ शब्दसे परे जो स्वसृ शब्द उसके सकारको विकल्प करके षत्व हो, जैसे-मातुःष्वसा, मातुःस्वसा । पितुःष्वसा, पितुःस्वसा । लुक् पक्षमें-किस प्रकार होगा वह आगे कहतेहैं-॥

९८४ मातृपितृभ्यां स्वसा ।८।३।८४॥

आभ्यां परस्य स्वसुः सस्य षः स्यात्समासे । मातृष्वसा । पितृष्वसा । असमासे तु । मातुः स्वसा । पितुः स्वसा ॥

॥ इत्यलुक्समासः ॥

९८४-समासमें मातृ और पितृ शब्दके परे स्वसृ शब्दके सकारको षत्व हो, जैसे-मातृष्वसा । पितृष्वसा । जिस स्थानमें समास न होगा उस स्थानमें पितुः स्वसा । मातुः स्वसा ॥

॥ इत्यलुक्समासः ॥

अथ समासाश्रयविधिप्रकरणम् ।

९८५ घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः ।६।३।४३॥

भाषितपुंस्काद्यो ङी तदन्तस्याऽनेकाचो ह्रस्वः स्याद्धरूपकल्पप्प्रत्ययेषु परेषु चेलडादिषु चोत्तरपदेषु । ब्राह्मणितरा । ब्राह्मणितमा । ब्राह्मणिरूपा । ब्राह्मणिकल्पा । ब्राह्मणिचेली । ब्राह्मणिब्रुवा । ब्राह्मणिगोत्रेत्यादि । ब्रूञः पचाद्यचि वच्यादेशगुणयोरभावोपि निपात्यते । चेलडादीनि वृत्तिविषये कुत्सनवाचीनि तैः कुत्सितानि कुत्सनैरिति समासः । ङ्यः किम् । दत्तातरा । भाषितपुंस्कात्किम् । आमलकीतरा । कुवलीतरा ॥

९८५-घसंज्ञक, रूपप् और कल्पप् प्रत्यय तथा चेलड्, ब्रुव, गोत्र, मत, हत, इतने शब्द परे रहते उक्तपुंस्क शब्दके परे जो ङी तदन्त जो अनेकाच् उसको ह्रस्व हो, जैसे-ब्राह्मणितरा । ब्राह्मणितमा । ब्राह्मणिरूपा । ब्राह्मणिकल्पा । ब्राह्मणिचेली । ब्राह्मणिब्रुवा । ब्राह्मणिगोत्रा-इत्यादि । 'ब्रुव' इस स्थलमें ब्रूञ् धातुके उत्तर पचादित्वके कारण अच् प्रत्यय होनेपर ब्रू धातुके स्थानमें वच् आदेश और गुणका अभाव निपातनसे सिद्ध हुआहै । चेलड् आदि शब्द वृत्तिविषयमें निन्दावाची हैं, इन चेलडादिके साथ "कुत्सितानि कुत्सनैः ७३२" इस सूत्रसे समास हुआहै । ङी कहनेसे दत्तातरा, इस स्थानमें ह्रस्व नहीं हुआ। उक्तपुंस्क शब्दके उत्तर कहनेसे 'आमलकीतरा', 'कुवलीतरा' इस स्थानमें ह्रस्व नहीं हुआ ॥

९८६ नद्याः शेषस्याऽन्यतरस्याम् ।६।३।४४॥

अङ्यन्तनद्या ङ्यन्तस्यैकाचश्च घादिषु ह्रस्वो वा स्यात्॥ ब्रह्मबन्धुतरा । ब्रह्मबन्धूतरा। स्त्रितरा। स्त्रीतरा ॥ कृन्नद्या न ॥ * ॥ लक्ष्मीतरा ॥

९८६-घसंज्ञक प्रत्यय, रूपप् प्रत्यय और कल्पप् प्रत्यय, चेलड् , ब्रुव, गोत्र, मत, हत, शब्द परे रहते अङ्यन्त नदीसंज्ञक शब्दको और ङ्यन्त एकाच्को विकल्प करके ह्रस्व हो, जैसे-ब्रह्मबंधुतरा, ब्रह्मबन्धूतरा । स्त्रितरा, स्त्रीतरा ।

(कृन्नद्या न *) कृत्प्रत्ययान्त नदीसंज्ञक शब्दको ह्रस्व न हो, जैसे-लक्ष्मीतरा ॥

९८७ उगितश्च । ६ । ३ । ४५ ॥

उगितः परा या नदी तदन्तस्य घादिषु ह्रस्वो वा स्यात् । विदुषितरा । ह्रस्वाभावपक्षे तु तसिलादिष्विति पुंवत् । विद्वत्तरा। वृत्त्यादिषु विदुषीतरेत्यप्युदाहृतं तन्निर्मूलम् ॥

९८७-घ आदि परे रहते उगित्के परे जो नदीसंज्ञक शब्द तदन्तको विकल्प करके ह्रस्व हो,जैसे-विदुषितरा।ह्रस्वाभाव पक्षमें तो "तसिलादिषु०-८३६" इस सूत्रसे पुंवद्भाव होगा,जैसे-विद्वत्तरा । वृत्त्यादि ग्रन्थमें 'विदुषीतरा' ऐसा भी उदाहरण है (अर्थात् कोई २ कहतेहैं पुंवद्भाव नहीं होगा), परन्तु वह अमूलक है ॥

९८८ हृदयस्य हृल्लेखयदण्लासेषु । ६ । ३ । ५० ॥

हृदयं लिखतीति हृल्लेखः । हृदयस्य प्रियं हृद्यम् । हृदयस्येदं हार्दम् । हृल्लासः । लेखेत्यणन्तस्य ग्रहणम् । घञि तु हृदयलेखः । लेखग्रहणमेव ज्ञापकम् उत्तरपदाधिकारे तदन्तविधिर्नास्तीति॥

९८८-लेख शब्द, यत् प्रत्यय, अण् प्रत्यय और लास शब्द परे रहते हृदय शब्दके स्थानमें हृद् आदेश हो, जैसे-'हृदयं लिखति' इस वाक्यमें-हृल्लेखः । हृदयस्य प्रियम्=हृद्यम् । हृदयस्य इदम्=हार्दम् । हृल्लासः । लेख यह अणन्तका ग्रहण है । घञ् परे रहते तो 'हृदयलेखः' ऐसा होगा । लेखग्रहणसे ही उत्तरपदाधिकारमें तदन्तविधि नहीं है, यह विदित होताहै ॥

९८९ वा शोकष्यञ्रोगेषु ।६।३।५१॥

हृच्छोकः । हृदयशोकः । सौहार्द्यम् । सौहृदय्यम् । हृद्रोगः । हृदयरोगः । हृदयशब्दपर्यायो हृच्छब्दोऽप्यस्ति । तेन सिद्धे प्रपञ्चार्थमिदम् ॥

९८९-शोक शब्द, ष्यञ् प्रत्यय और रोग शब्द परे रहते हृदय शब्दके स्थानमें विकल्प करके हृद् आदेश हो, जैसे-हृच्छोकः, पक्षमें हृदयशोकः । सौहार्द्यम्, सौहृदय्यम् । हृद्रोगः, हृदयरोगः । हृदय शब्दका पर्याय हृद् शब्द भी है, इससे यह सम्पूर्ण पद सिद्ध होनेपर भी यह सूत्र शास्त्रविस्तरके निमित्त है ॥

९९० पादस्य पदाज्यातिगोपहतेषु । ६ । ३ । ५२ ॥

एषूत्तरपदेषु पादस्य पद इत्यदन्त आदेशः स्यात् । पादाभ्यामजतीति पदाजिः । पदातिः । अज्यतिभ्यां पादे चेतीण् प्रत्ययः । अजेर्व्यभावो निपातनात् । पदगः । पदोपहतः ॥

९९०-आजि, आति, ग और उपहत शब्द परे रहते पाद शब्दके स्थानमें पद ऐसा अदन्त आदेश हो, जैसे-'पादाभ्यामजति' इस विग्रहमें पदाजिः । पदातिः । उक्त स्थानमें "अज्यतिभ्यां पादे च" इस उणादिसूत्रसे इण् प्रत्यय हुआ है । और अजको वि आदेशका अभाव निपातनसे हुआहै। पदगः । पदोपहतः ॥

९९१ पद्यत्यतदर्थे । ६ । ३ । ५३ ॥

पादस्य पत्स्यादतदर्थे यति परे [पादौ विध्यन्ति पद्याः शर्कराः । अतदर्थे किम् । पादार्थमुदकं पाद्यम् । पादार्घाभ्यां चेति यत् ॥ इके चरतावुपसंख्यानम् ॥ * ॥ पादाभ्यां चरति पदिकः । पर्पादित्वात् ष्ठन् ॥

९९१-अतदर्थमें विहित यत् प्रत्यय परे रहते पाद शब्दके स्थानमें पद् आदेश हो, जैसे-पादौ विध्यन्ति पद्याः, अर्थात् शर्करा । जिस स्थानमें अतदर्थक यत् न होगा उस स्थानमें 'पादार्थमुदकम्=पाद्यम्' ऐसा होगा, इस स्थानमें "पादार्घाभ्यां च २०९३" इस सूत्रसे यत् प्रत्यय हुआहै ।

'चरति' अर्थमें विहित इक् शब्द परे रहते पाद शब्दके स्थानमें पद् आदेश हो* जैसे='पादाभ्यां चरति' इस विग्रहमें 'पदिकः' इस स्थानमें पर्पादित्वके कारण ष्ठन् प्रत्यय हुआ है ॥

९९२ हिमकाषिहतिषु च । ६ । ३ । ५४ ॥

पद्धिमम् । पत्काषी । पद्धतिः ॥

९९२-हिम, काषि और हति शब्द परे रहते पाद शब्दके स्थानमें पद् आदेश हो, जैसे-पद्धिमम् । पत्काषी । पद्धतिः ॥

९९३ ऋचः शे । ६ । ३ । ५५ ॥

ऋचः पादस्य पत्स्याच्छे परे । गायत्रीं पच्छः शंसति । पादम्पादमित्यर्थः । ऋचः किम् । पादशः कार्षापणं ददाति ॥

९९३-श शब्द परे रहते मंत्रसम्बन्धी पाद शब्दके स्थानमें पद् आदेश हो, जैसे-गायत्रीं पच्छः शंसति, अर्थात् एक २ चरण करके पढता है । मंत्रसम्बन्धी पाद शब्दका ग्रहण करनेसे 'पादशः कार्षापणं ददाति' इस स्थानमें पद् आदेश नहीं हुआ ॥

९९४ वा घोषमिश्रशब्देषु । ६ । ३ । ५६ ॥

पादस्य पत् । पद्घोषः । पादघोषः । पन्मिश्रः । पादमिश्रः । पच्छब्दः । पादशब्दः ॥ निष्के चेति वाच्यम् ॥ * ॥ पन्निष्कः । पादनिष्कः ॥

९९४-घोष, मिश्र और शब्द शब्द परे रहते पाद शब्दके स्थानमें विकल्प करके पद् आदेश हो, जैसे-पद्घोषः, पक्षमें पादघोषः । पन्मिश्रः, पक्षमें-पादमिश्रः । पच्छब्दः, पादशब्दः ।

निष्क शब्द परे रहते भी पाद शब्दके स्थानमें विकल्प करके पद् आदेश हो * जैसे-पन्निष्कः, पादनिष्कः ॥

९९५ उदकस्योदः संज्ञायाम् । ६ । ३ । ५७ ॥

उदमेघः ॥ उत्तरपदस्य चेति वक्तव्यम् ॥ * ॥ क्षीरोदः ॥

९९५-संज्ञामें उदक शब्दके स्थानमें उद् आदेश हो, जैसे-उदमेघः ।

उदक शब्दके उत्तरपदस्थ होनेपर भी उसके स्थानमें उद आदेश हो * जैसे-क्षीरोदः ॥

९९६ पेषं वासवाहनधिषु च । ६ । ३ । ५८ ॥

उदपेषं पिनष्टि । उदवासः । उदवाहनः । उदधिर्घटः । समुद्रे तु पूर्वेण सिद्धम् ॥

९९६-पेषम्, वास, वाहन और धि शब्द परे रहते उदक शब्दके स्थानमें उद आदेश हो, जैसे-उदपेषम्पिनष्टि । उदवासः । उदवाहनः । उदधिर्घटः । जिस स्थानमें उदधि शब्दसे समुद्रका ग्रहण हो, उस स्थानमें पूर्व सूत्रसे ही संज्ञामें उक्त पद सिद्ध होगा ॥

९९७ एकहलादौ पूरयितव्येऽन्यतरस्याम् । ६ । ३ । ५९ ॥

उदकुम्भः । उदककुम्भः । एकेति किम् । उदकस्थाली । पूरयितव्येति किम् । उदकपर्वतः ॥

९९७-पूरयितव्य अर्थमें एकमात्र हल् आदिमें है जिसके ऐसे पद परे रहते उदक शब्दके स्थानमें विकल्प करके उद आदेश हो, जैसे-उदकुम्भः, उदककुम्भः । एकमात्र हल् आदिमें न होनेपर अर्थात् अनेक हल् आदिमें रहते 'उदकस्थाली' इस स्थलमें उद आदेश नहीं हुआ । पूरयितव्य अर्थ न होनेपर 'उदकपर्वतः' यहां उद आदेश न हुआ ॥

९९८ मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च । ६ । ३ । ६० ॥

उदमन्थः । उदकमन्थः । उदौदनः । उदकौदनः ॥

९९८-मन्थ, ओदन, सक्तु, बिन्दु, वज्र, भार, हार, वीवध और गाह शब्द परे रहते उदक शब्दके स्थानमें विकल्प करके उद आदेश हो, जैसे-उदमन्थः, उदकमन्थः । उदौदनः, उदकौदनः-इत्यादि ॥

९९९ इको ह्रस्वोऽङ्यो गालवस्य । ६ । ३ । ६१ ॥

इगन्तस्याङ्यन्तस्य ह्रस्वो वा स्यादुत्तरपदे ।

ग्रामणिपुत्रः । ग्रामणीपुत्रः । इकः किम् । रमापतिः । अङ्यः इति किम् । गौरीपतिः । गालवग्रहणं पूजार्थम् । अन्यतरस्यामित्यनुवृत्तेः ॥ इयङुवङ्भाविनामव्ययानां च नेति वाच्यम् ॥ * ॥ श्रीमदः । भ्रूभङ्गः । शुक्लीभावः ॥ अभ्रुकुंसादीनामिति वक्तव्यम् ॥ * ॥ भ्रुकुंसः । भ्रुकुटिः । भ्रूकुंसः । भ्रूकुटिः । अकारोऽनेन विधीयत इति व्याख्यान्तरम् ॥ भ्रकुंसः । भ्रकुटिः । भ्रुवा कुंसो भाषणं शोभा वा यस्य सः स्त्रीवेषधारी नर्तकः । भ्रुवः कुटिः कौटिल्यम् ॥

९९९–उत्तरपद परे रहते इगन्त जो अङ्यन्त शब्द उसको विकल्प करके ह्रस्व हो, जैसे–ग्रामणिपुत्रः, ग्रामणीपुत्रः । इगन्त शब्द न होनेपर जैसे–रमापतिः । अङ्यन्त न होनेपर ह्रस्व नहीं होगा, जैसे–गौरीपतिः । पूर्व सूत्र(६।३।५९) से 'अन्यतरस्याम्' इस पदकी अनुवृत्ति होनेसे विकल्प अर्थ हो ही जाता, फिर गालवग्रहण सूत्रमें पूजार्थ है ।

इयङ् और उवङ्स्थानी और अव्ययको ह्रस्व न हो* जैसे–श्रीमदः । भ्रूभङ्गः । शुक्लीभावः ।

(अभ्रुकुंसादीनाम्० *) भ्रुकुंसादि शब्दके ह्रस्वका निषेध न हो अर्थात् भ्रुकुंसादि शब्दको विकल्प करके ह्रस्व हो, जैसे–भ्रुकुंसः, भ्रूकुंसः । भ्रुकुटिः, भ्रूकुटिः । इस वार्त्तिकसे भ्रुकुंसादिके इक्को अकार आदेश विधान होताहै, यह व्याख्यान्तर है, इससे 'भ्रकुंसः, भ्रकुटिः' यह सिद्ध हुए । भ्रूसे कुंस–सम्भाषण वा शोभा है जिसकी वह भ्रुकुंस कहाताहै अर्थात् स्त्रीवेषधारी पुरुष । 'भ्रुवः कुटिः कौटिल्यम्' अर्थात् भ्रूकी कुटिलता (टेढपनी) ॥

१००० एकतद्धिते च । ६ । ३ । ६२ ॥

एकशब्दस्य ह्रस्वः स्यात्तद्धिते उत्तरपदे । एकस्या आगतम् एकरूप्यम् । एकक्षीरम् ॥

१०००–तद्धित प्रत्यय परे रहते एक शब्दको ह्रस्व हो जैसे–एकस्या आगतम्=एकरूप्यम् । 'एकस्याः क्षीरम्' इस विग्रहमें–एकक्षीरम् ॥

१००१ ङ्यापोः संज्ञाछन्दसोर्बहुलम् । ६ । ३ । ६३ ॥

रेवतिपुत्रः । अजक्षीरम् ॥

१००१–संज्ञा और वेदमें ङ्यन्त और आबन्त शब्दको ह्रस्व हो, बहुल करके अर्थात् कहीं हो, कहीं नहीं हो । रेवतिपुत्रः । अजक्षीरम् ॥

१००२ त्वे च । ६ । ३ । ६४ ॥

त्वप्रत्यये ङ्यापोर्वा ह्रस्वः । अजत्वम् । अजात्वम् । रोहिणित्वम् । रोहिणीत्वम् ॥

१००२–त्व प्रत्यय परे रहते ङ्यन्त और आबन्त शब्दको विकल्प करके ह्रस्व हो, जैसे–अजत्वम्, अजात्वम् । रोहिणित्वम्, रोहिणीत्वम् ॥

१००३ ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे । ६ । १ । १३ ॥

ष्यङन्तस्य पूर्वपदस्य संप्रसारणं स्यात्पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे ॥

१००३–तत्पुरुष समासमें पुत्र और पति शब्द परे रहते ष्यङ्प्रत्ययान्त पूर्वपदको संप्रसारण हो ॥

१००४ संप्रसारणस्य । ६ । ३ । १३९ ॥

संप्रसारणस्य दीर्घः स्यादुत्तरपदे । कौमुदगन्ध्यायाः पुत्रः कौमुदगन्धीपुत्रः । कौमुदगन्धीपतिः । व्यवस्थितविभाषया ह्रस्वो न । स्त्रीप्रत्यये चानुपसर्जने नेति तदादिनियमप्रतिषेधात् । परमकारीषगन्धीपुत्रः । उपसर्जने तु तदादिनियमान्नेह । अतिकारीषगन्ध्यापुत्रः ॥

१००४–उत्तरपद परे रहते संप्रसारणको दीर्घ हो, जैसे–'कौमुदगन्ध्यायाः पुत्रः' इस विग्रहमें कौमुदगन्धीपुत्रः (कुमुदगन्धेरपत्यं स्त्री=कौमुदगन्ध्या "तस्यापत्यम्" इत्यणि कृते "अणिञोः०" इति ष्यङादेशः "यङश्चाप्")। कौमुदगन्धीपतिः । इन दोनों स्थानोंमें व्यवस्थित विकल्पके कारण ह्रस्व नहीं हुआ । 'स्त्रीप्रत्यये चानुपसर्जने न' इस परिभाषासे तदादिनियमके प्रतिषेधके कारण 'परमकारीषगंधीपुत्रः' इस स्थानमें भी संप्रसारण हुआ और उपसर्जनमें तदादि नियमके कारण 'अतिकारीषगन्ध्यापुत्रः' इस स्थानमें संप्रसारण नहीं हुआ ॥

१००५ बन्धुनि बहुव्रीहौ । ६ । १ । १४ ॥

बन्धुशब्दे उत्तरपदे ष्यङः संप्रसारणं स्याद्बहुव्रीहौ । कारीषगन्ध्या बन्धुरस्येति कारीषगन्धीबन्धुः । बहुव्रीहाविति किम् । कारीषगन्ध्याया बन्धुः कारीषगन्ध्याबन्धुः । क्लीबनिर्देशस्तु शब्दस्वरूपापेक्षया ॥ मातज्मातृकमातृषु वा ॥ * ॥ कारीषगन्धीमातः । कारीषगन्ध्यामातः । कारीषगन्धीमातृकः । कारीषगन्ध्यामातृकः । कारीषगन्धीमाता । कारीषगन्ध्यामाता । अस्मादेव निपातनान्मातृशब्दस्य मातजादेशः कब्विकल्पश्च । बहुव्रीहावेवेदम् । नेह । कारीषगन्ध्याया माता कारीषगन्ध्यामाता । चित्स्वसामर्थ्याच्चित्स्वरो बहुव्रीहिस्वरं बाधते ॥

१००५–बहुव्रीहि समासमें बन्धु शब्द उत्तरपद परे रहते ष्यङ्प्रत्ययान्तको संप्रसारण हो, जैसे–'कारीषगन्ध्या बन्धुरस्य' इस विग्रहमें कारीषगन्धीबन्धुः । जिस स्थानमें बहुव्रीहि न होगा उस स्थानमें 'कारीषगन्ध्यायाः बन्धुः' इस विग्रहमें 'कारीषगन्ध्याबन्धुः' ऐसा होगा । सूत्रमें 'बन्धुनि' ऐसा क्लीबनिर्देश शब्दस्वरूपकी अपेक्षासे जानना ।

मातज्, मातृक और मातृ शब्द परे रहते विकल्प करके

घ्यङ्प्रत्ययान्तको संप्रसारण हो * जैसे—कारीषगन्धीमातः, कारीषगन्ध्यामातः । कारीषगंधीमातृकः, कारीषगन्ध्यामातृकः । कारीषगन्धीमाता, कारीषगन्ध्यामाता । इसी निपातनके कारण मातृ शब्दके स्थानमें मातच् आदेश और कप् प्रत्यय विकल्प करके होताहै । बहुव्रीहि समासमें ही यह सम्प्रसारण होगा अन्यत्र नहीं होगा, इस कारण 'कारीषगन्ध्याया माता' इस विग्रहमें 'कारीषगन्ध्यामाता' यहां नहीं हुआ । मातच् आदेशमें चित्त्वसामर्थ्यके कारण चित्स्वर बहुव्रीहिस्वरको बाध करताहै ॥

१००६ इष्टकेषीकामालानां चिततूलभारिषु । ६ । ३ । ६५ ॥

इष्टकादीनां तदन्तानां च पूर्वपदानां चितादिषु क्रमादुत्तरपदेषु ह्रस्वः स्यात् । इष्टकचितम् । पक्वेष्टकचितम् । इषीकतूलम् । मुञ्जेषीकतूलम् । मालभारी । उत्पलमालभारी ॥

१००६–चित शब्द, तूल शब्द और भारिन् शब्द परे रहते इष्टका, इषीका और माला शब्दको ह्रस्व हो, जैसे—इष्टकचितम् । पक्वेष्टकचितम् । इषीकतूलम् । मुञ्जेषीकतूलम् । मालभारी । उत्पलमालभारी (मालां बिभर्ति "सुप्यजातौ०" इति णिनिः) ॥

१००७कारे सत्यागदस्य । ६।३।७० ॥

मुम् स्यात् । सत्यङ्कारः । अगदङ्कारः ॥ अस्तोश्चेति वक्तव्यम् ॥ * ॥ अस्तुङ्कारः ॥ धेनोर्भव्यायाम् ॥ * ॥ धेनुम्भव्या ॥ लोकस्य पृणे ॥ * ॥ लोकम्पृणः । पृण इति मूलविभुजादित्वात्कः ॥ इत्येऽनभ्याशस्य ॥ * ॥ अनभ्याशमित्यः । दूरतः परिहर्तव्य इत्यर्थः ॥ भ्राष्ट्राग्न्योरिन्धे ॥ * ॥ भ्राष्ट्रमिन्धः । अग्निमिन्धः ॥ गिलेऽगिलस्य ॥ * ॥ तिमिङ्गिलः । अगिलस्य किम् । गिलगिलः ॥ गिलगिले च ॥ * ॥ तिमिङ्गिलगिलः ॥ उष्णभद्रयोः करणे ॥ * ॥ उष्णङ्करणम् । भद्रङ्करणम् ॥

१००७–कार शब्द परे रहते सत्य और अगद शब्दको मुम्का आगम हो, जैसे—सत्यंकारः । अगदंकारः ।

कार शब्द परे रहते अस्तु शब्दको मुम् हो* जैसे—अस्तुंकारः ।

भव्या शब्द परे रहते धेनु शब्दको मुम् हो * जैसे—धेनुम्भव्या ।

पृण शब्द परे रहते लोक शब्दको मुम् हो * जैसे—लोकम्पृणः । 'पृणः' इसमें मूलविभुजादित्वके कारण क प्रत्यय है ।

इत्य शब्द परे रहते अनभ्यास शब्दको मुम् हो * जैसे—अनभ्यासमित्यः (दूरसे त्याग करनेके योग्य) ।

इन्ध शब्द परे रहते भ्राष्ट्र और अग्नि शब्दको मुम् हो* जैसे—भ्राष्ट्रमिन्धः । अग्निमिन्धः ।

गिल शब्द परे रहते गिलभिन्न शब्दको मुम् हो * जैसे—तिमिङ्गिलः । जिस स्थानमें गिलभिन्न शब्द नहीं है वहां 'गिलगिलः' ऐसा होगा ।

गिलगिल शब्द परे रहते गिलभिन्न शब्दको मुम् हो*जैसे—तिमिङ्गिलगिलः ।

करण शब्द परे रहते उष्ण और भद्र शब्दको मुम् हो* जैसे—उष्णंकरणम् । भद्रंकरणम् ॥

१००८ रात्रेः कृति विभाषा । ६।३।७२ ॥

रात्रिञ्चरः । रात्रिचरः । रात्रिमटः । रात्र्यटः । अखिदर्थमिदं सूत्रम् । खिति तु अरुर्द्विषदिति नित्यमेव वक्ष्यते । रात्रिमन्यः ॥

१००८–कृत्प्रत्ययान्त शब्द परे रहते रात्रि शब्दको विकल्प करके मुम् हो, जैसे—रात्रिञ्चरः, रात्रिचरः । रात्रिमटः, रात्र्यटः । यह सूत्र अखिदर्थ है । खित् परे रहते तो "अरुर्द्विषत्० ६ । ३ । ६७" इस सूत्रसे नित्य ही मुम् कथित होगा, जैसे—रात्रिम्मन्यः ॥

१००९ सहस्य सः संज्ञायाम् । ६।३।७८ ॥

उत्तरपदे । सपलाशम् । संज्ञायां किम् । सहयुध्वा ॥

१००९–संज्ञा होनेपर सह शब्दके स्थानमें स आदेश हो, जैसे—सपलाशम् । संज्ञा न होनेपर, जैसे—'सहयुध्वा' इस स्थानमें स आदेश नहीं हुआ ॥

१०१० ग्रन्थान्ताऽधिके च । ६।३।७९ ॥

अनयोरर्थयोः सहस्य सः स्यादुत्तरपदे । समुहूर्तं ज्योतिषमधीते । सद्रोणा खारी ॥

१०१०–ग्रन्थान्त और अधिक अर्थमें उत्तरपद परे रहते सह शब्दके स्थानमें स आदेश हो, जैसे—समुहूर्त्तं ज्योतिषमधीते । सद्रोणा खारी ॥

१०११ द्वितीये चानुपाख्ये । ६।३।८० ॥

अनुमेये द्वितीये सहस्य सः स्यात् । सराक्षसीका निशा । राक्षसी साक्षादनुपलभ्यमाना निशयानुमीयते ॥

१०११–अनुमेयार्थक द्वितीय पद परे रहते सह शब्दके स्थानमें स आदेश हो, जैसे—सराक्षसीका निशा । इस स्थानमें राक्षसी साक्षात् उपलभ्यमान नहीं होतीहै, परन्तु निशासे अनुमित होतीहै ॥

१०१२ समानस्य च्छन्दस्यमूर्द्धप्रभृत्युदर्केषु । ६ । ३ । ८४ ॥

समानस्य सः स्यादुत्तरपदे न तु मूर्द्धादिषु । अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्यः । यो नः सनुत्यः । तत्र भव इत्यर्थे सगर्भसयूथसनुताद्यत् । अमूर्द्धादिषु किम् । समानमूर्द्धा । समानप्रभृतयः । समानोदर्काः । समानस्येति योगो विभज्यते । तेन सपक्षः साधर्म्यं सजातीयमित्यादि सिद्ध-

मिति काशिका। अथ वा सहशब्दः सदृशवचनोक्ति। सदृशः सख्या ससखीति यथा। तेनायमस्वपदविग्रहो बहुव्रीहिः। समानः पक्षोऽस्येत्यादि॥

१०१२–वेदमें उत्तरपद परे रहते समान शब्दके स्थानमें स आदेश हो, परन्तु मूर्द्ध प्रभृति और उदर्क शब्द परे रहते नहीं हो, जैसे–अनुभ्राता सगर्भ्यः। अनुसखा सयूथ्यः। यो नः सनुत्यः। इन सब स्थलोंमें 'तत्र भवः' इस अर्थमें सगर्भ, सयूथ और सनुत शब्दके उत्तर यत् प्रत्यय हुआ है।

मूर्धादि शब्द परे रहते समान शब्दके स्थानमें स आदेश न होगा, जैसे–समानमूर्द्धा। समानप्रभृतयः। समानोदर्काः।

इस सूत्रमें 'समानस्य' यह योगविभाग (भिन्न सूत्र) करनेसे 'सपक्षः, साधर्म्यम्, सजातीयम्' इत्यादि पद सिद्ध होतेहैं, यह काशिकाकारने कहाहै।

अथवा सह शब्द सदृशवाचक भी है, जैसे–सदृशः सख्या='ससखि' यहां, इस कारण 'सपक्ष' इत्यादिमें 'समानः पक्षोऽस्य' इत्यादि अस्वपद विग्रहमें बहुव्रीहि जानना॥

१०१३ ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु। ६। ३। ८५॥

एषु द्वादशसूत्तरपदेषु समानस्य सः स्यात्। सज्योतिः। सजनपद इत्यादि॥

१०१३–ज्योतिष्, जनपद, रात्रि, नाभि, नाम, गोत्र, रूप, स्थान, वर्ण, वयस्, वचन और बंधु यह बारह शब्द परे रहते समान शब्दके स्थानमें स आदेश हो, जैसे–सज्योतिः सजनपदः–इत्यादि॥

१०१४ चरणे ब्रह्मचारिणि। ६। ३। ८६॥

ब्रह्मचारिण्युत्तरपदे समानस्य सः स्याच्चरणे समानत्वेन गम्यमाने। चरणः शाखा, ब्रह्म वेदः। तदध्ययनार्थं व्रतमपि ब्रह्म तच्चरतीति ब्रह्मचारी। समानः सः सब्रह्मचारी॥

१०१४–ब्रह्मचारिन् शब्द परे रहते समान शब्दके स्थानमें स आदेश हो, समान रूपसे वेदका चरण गम्यमान हो तो। चरण शब्दसे शाखा जानना और ब्रह्म शब्दसे वेद जानना। वेदाध्ययनार्थ व्रतविशेषको भी ब्रह्म कहतेहैं। ब्रह्म चरति, इस वाक्यमें–ब्रह्मचारी, 'समानो ब्रह्मचारी' इस विग्रहमें समान शब्दके स्थानमें स आदेश होनेपर 'सब्रह्मचारी' यह सिद्ध हुआ॥

१०१५ तीर्थे ये। ६। ३। ८७॥

तीर्थे उत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य सः स्यात्। सतीर्थ्याः एकगुरुकः। समानतीर्थेवासीति यत्प्रत्यय॥

१०१५–तीर्थ शब्द परे रहते यकारादि प्रत्यय विवक्षित होनेपर समान शब्दके स्थानमें स हो, जैसे–सतीर्थ्यः, अर्थात् एक गुरुका छात्र। इस स्थानमें समान तीर्थमें वसनेवाला इस अर्थमें यत् प्रत्यय हुआहै॥

१०१६ विभाषोदरे। ६। ३। ८८॥

यादौ प्रत्यये विवक्षिते इत्येव। सोदर्यः। समानोदर्यः॥

१०१६–यादि प्रत्यय विवक्षित होनेपर उदर शब्द परे रहते समान शब्दके स्थानमें विकल्प करके स हो, जैसे–समानोदर्यः, सोदर्यः ("समानोदरे शयित० $\frac{४।४।१०८}{१६५९}$" इति यत् प्रत्ययः)॥

१०१७ दृग्दृशवतुषु। ६। ३। ८९॥

सदृक्। सदृशः॥ दृक्षे चेति वक्तव्यम्॥*॥ सदृक्षः। वतुरुत्तरार्थः॥

१०१७–दृक्, दृश शब्द परे रहते समान शब्दके स्थानमें स हो, जैसे–सदृक्। सदृशः।

दृक्ष शब्द परे रहते भी समान शब्दके स्थानमें स हो * जैसे–सदृक्षः।

इस सूत्रमें वतुग्रहण उत्तरार्थ है॥

१०१८ इदंकिमोरीश्की। ६। ३। ९०॥

दृग्दृशवतुषु इदम ईश् किमः की स्यात्। ईदृक्। ईदृशः। कीदृक्। कीदृशः। वतूदाहरणं वक्ष्यते॥ दृक्षे चेति वक्तव्यम्॥*॥ ईदृक्षः। कीदृक्षः। आ सर्वनाम्नः। दृक्षे च। तादृक्। तादृशः। तावान्। तादृक्षः। दीर्घः। मत्वोत्वे। अमूदृशः। अमूदृक्। अमूदृक्षः॥

१०१८–दृक्, दृश और वतु प्रत्यय परे रहते इदम् शब्दके स्थानमें ईश् और किम् शब्दके स्थानमें की हो, जैसे–ईदृक्। ईदृशः। कीदृक्। कीदृशः। वतु प्रत्ययका उदाहरण पश्चात् कहेंगे।

दृक्ष शब्द परे रहते इदम् शब्दके स्थानमें ईश और किम् शब्दके स्थानमें की आदेश हो * जैसे–ईदृक्षः। कीदृक्षः।

दृक्, दृश, वतु और दृक्ष शब्द परे रहते सर्वनामके अकार आदेश होकर, जैसे–तादृक्। तादृशः। तावान्। तादृक्षः। दीर्घ, मत्व और उत्व करके अमूदृक्। अमूदृशः। अमूदृक्षः। इतने पद सिद्ध हुए हैं॥

१०१९ समासेऽङ्गुलेः सङ्गः। ८।३।८०॥

अंगुलिशब्दात्सङ्गस्य सस्य मूर्द्धन्यः स्यात्समासे। अंगुलिषंगः। समासे किम्। अंगुलेः संगः॥

१०१९–समासमें अंगुलि शब्दके परे सङ्ग शब्दके सकारके स्थानमें ष हो, जैसे–अंगुलिषङ्गः। समास न होनेपर 'अंगुलेः सङ्गः' ऐसा होगा॥

१०२० भीरोः स्थानम्। ८। ३। ८१॥

भीरुशब्दात् स्थानस्य सस्य मूर्द्धन्यः स्यात्समासे। भीरुष्ठानम्। असमासे तु। भीरोः स्थानम्॥

१०२०–समासमें भीरु शब्दके परे स्थान शब्दके सकारको

षत्व हो, जैसे—भीरुष्ठानम् । समास न होनेपर, जैसे—'भीरोः स्थानम्' इस स्थानमें षत्व नहीं हुआ ॥

१०२१ ज्योतिरायुषः स्तोमः।८।३।८३॥

आभ्यां स्तोमस्य सस्य मूर्द्धन्यः समासे । ज्योतिष्टोमः । आयुष्टोमः । समासे किम् । ज्योतिषः स्तोमः ॥

१०२१—समासमें ज्योतिष् और आयुष् शब्दके परे स्तोम शब्दके सकारको षत्व हो, जैसे—ज्योतिष्टोमः । आयुष्टोमः । समास न होनेपर षत्व नहीं होगा, जैसे—ज्योतिषः स्तोमः । आयुषः स्तोमः ॥

१०२२ सुषामादिषु च । ८ । ३ । ९८ ॥

सस्य मूर्धन्यः । शोभनं साम यस्य सुषामा। सुषन्धिः ॥

१०२२—सुषामादि शब्दमें सकारको षत्व हो, जैसे—शोभनं साम यस्य=सुषामा । सुषंधिः—इत्यादि ॥

१०२३ एति संज्ञायामगात् ।८।३।९९॥

सस्य मूर्द्धन्यः । हरिषेणः । एति किम् । हरिसक्थम् । संज्ञायां किम् । पृथुसेनः । अगकारात्किम् । विष्वक्सेनः । इणकोरित्येव । सर्वसेनः ॥

१०२३—संज्ञामें एकार परे रहते गकारसे भिन्नके परे स्थित सकारको षत्व हो, जैसे—हरिषेणः ।

एकार परे न होनेसे, यथा—हरिसक्थम् ।

संज्ञा न होनेपर, पृथुसेनः ।

गकारसे परे होनेसे यथा—विष्वक्सेनः ।

इण्,कवर्गसे परे ही सकारको षत्व होताहै इससे 'सर्वसेनः' यहां षत्व न हुआ ॥

१०२४ नक्षत्राद्वा । ८ । ३ । १०० ॥

एति सस्य संज्ञायामगकारान्मूर्द्धन्यो वा । रोहिणीषेणः । रोहिणीसेनः । अगकारात्किम् । शतभिषक्सेनः । आकृतिगणोऽयम् ॥

१०२४—संज्ञामें नक्षत्रवाचक शब्दके उत्तर गकारके परे न हो ऐसे सकारको विकल्प करके षत्व हो एकार परे रहते, जैसे—रोहिणीषेणः, रोहिणीसेनः । गकारके परे होनेपर, जैसे—शतभिषक्सेनः, षत्व न हुआ । यह (सुषामादि) आकृतिगण है ॥

१०२५ अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु । ६ । ३ । ९९ ॥

अन्यशब्दस्य दुगागमः स्यादाशीरादिषु परेषु । अन्यदाशीः । अन्यदाशा । अन्यदास्था । अन्यदास्थितः । अन्यदुत्सुकः । अन्यदूतिः । अन्यद्रागः । अन्यदीयः । अषष्ठीत्यादि किम् । अन्यस्याऽन्येन वाशीः।अन्याशीः॥ कारके छे च नायं निषेधः । अन्यस्य कारकः अन्यत्कारकः । अन्यस्यायमन्यदीयः । गहादेराकृतिगणत्वाच्छः ॥

१०२५—आशिष्, आशा, आस्था; आस्थित, उत्सुक, ऊति, कारक और राग शब्द और छ प्रत्यय परे रहते षष्ठ्यन्त और तृतीयान्तसे भिन्न जो अन्य शब्द उसको दुगागम हो, जैसे—अन्यदाशीः । अन्यदाशा । अन्यदास्था । अन्यदास्थितः । अन्यदुत्सुकः । अन्यदूतिः । अन्यत्कारकः । अन्यद्रागः । अन्यदीयः ।

षष्ठ्यन्त और तृतीयान्तसे भिन्न कहनेसे 'अन्यस्यान्येन वाशीः' इस वाक्यमें 'अन्याशीः' ऐसा हुआहै ।

कारक और छ प्रत्यय परे रहते षष्ठ्यन्त और तृतीयान्त अन्य पदको दुगागमका निषेध नहीं होताहै । 'अन्यस्य कारकः' इस विग्रहमें अन्यत्कारकः । अन्यस्यायम्=अन्यदीयः । गहादिके आकृतिगणत्वके कारण छ प्रत्यय करके 'अन्यदीयः' पद सिद्ध हुआहै ॥

१०२६ अर्थे विभाषा । ६ । ३ । १०० ॥

अन्यदर्थः । अन्यार्थः ॥

१०२६—अर्थ शब्द परे रहते अन्य शब्दके उत्तर विकल्प करके दुगागम हो, जैसे—अन्यदर्थः, अन्यार्थः (अन्य—द्—अर्थः=अन्यदर्थः) ॥

१०२७ कोः कत्तत्पुरुषेऽचि।६।३।१०१॥

अजादावुत्तरपदे । कुत्सितोऽश्वः कदश्वः । कदन्नम् । तत्पुरुषे किम् । कूष्ट्रो राजा ॥ त्रौ च ॥ * ॥ कुत्सितास्त्रयः कत्त्रयः ॥

१०२७—तत्पुरुष समासमें अजादि उत्तरपद परे रहते कु शब्दके स्थानमें कत् आदेश हो, जैसे—कुत्सितोऽश्वः=कदश्वः । कदन्नम् ।

तत्पुरुष समास न होनेपर, जैसे—कूष्ट्रो राजा ।

(त्रौ च *) त्रि शब्द परे रहते कु शब्दके स्थानमें कत् आदेश हो, जैसे—कुत्सितास्त्रयः=कत्त्रयः ॥

१०२८ रथवदयोश्च । ६ । ३ । १०२॥

कद्रथः । कद्वदः ॥

१०२८—रथ और वद शब्द परे रहते कु शब्दके स्थानमें कत् आदेश हो, जैसे—कद्रथः । कद्वदः ॥

१०२९ तृणे च जातौ । ६ । ३।१०३॥

कत्तृणम् ॥

१०२९—जाति होनेपर तृण शब्द परे रहते कु शब्दके स्थानमें कत् आदेश हो, जैसे—कत्तृणम् ॥

१०३० का पथ्यक्षयोः ।६।३।१०४॥

कापथम् । काक्षः । अक्षशब्देन तत्पुरुषः । अक्षिशब्देन बहुव्रीहिर्वा ॥

१ "एति संज्ञायामगात्" और "नक्षत्राद्वा" यह दोनों गणसूत्रोंका पाणिनीय सूत्रपाठमें किसीने प्रक्षेप कियाहै ॥

१०३०-पथिन् और अक्षि शब्द परे रहते कु शब्दके स्थानमें का आदेश हो, जैसे-कापथम् । काक्षः । इस स्थानमें अक्ष शब्दके साथ तत्पुरुष समास अथवा अक्षि शब्दके साथ बहुव्रीहि समास जानना ॥

१०३१ ईषदर्थे । ६ । ३ । १०५ ॥

ईषज्जलं काजलम् । अजादावपि परत्वात्कादेशः । काम्लः ॥

१०३१-ईषत् अर्थ होनेपर कु शब्दके स्थानमें का आदेश हो, जैसे-'ईषज्जलम्' इस वाक्यमें-काजलम् । अजादि शब्द परे रहते भी परत्वके कारण कु शब्दके स्थानमें का आदेश होगा, जैसे-काम्लः ॥

१०३२ विभाषा पुरुषे । ६ । ३ । १०६ ॥

कापुरुषः । कुपुरुषः । अप्राप्तविभाषेयम् । ईषदर्थे हि पूर्वविप्रतिषेधान्नित्यमेव । ईषत्पुरुषः कापुरुषः ॥

१०३२-पुरुष शब्द परे रहते कु शब्दके स्थानमें विकल्प करके का आदेश हो, जैसे-कापुरुषः, कुपुरुषः । यह अप्राप्तविभाषा है । ईषदर्थमें तो पूर्वविप्रतिषेधके कारण नित्य ही का आदेश होगा, जैसे-ईषत्पुरुषः=कापुरुषः ॥

१०३३ कवं चोष्णे । ६ । ३ । १०७ ॥

उष्णशब्दे उत्तरपदे कवं का च वा स्यात् । कवोष्णम् । कोष्णम् । कदुष्णम् ॥

१०३३-उष्ण शब्द परे रहते किम् शब्दके स्थानमें विकल्प करके कव और का आदेश हो, जैसे-कवोष्णम्, कोष्णम्, कदुष्णम् ॥

१०३४ पृषोदरादीनि यथोपदिष्टम् । ६ । ३ । १०९ ॥

पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युः । पृषद् उदरं पृषोदरम् । तलोपः । वारिवाहको बलाहकः । पूर्वपदस्य बः उत्तरपदादेश्च लत्वम् ॥

भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् ।
गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम् ॥ १ ॥

दिक्शब्देभ्यस्तीरस्य तारभावो वा ॥ * ॥ दक्षिणतारम् । दक्षिणतीरम् । उत्तरतारम् । उत्तरतीरम् ॥ दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वं च ॥ * ॥ दुःखेन दाश्यते दूडाशः । दुःखेन नाश्यते दूणाशः । दुःखेन दभ्यते दूडभः । खल् त्रिभ्यः । दम्भेर्नलोपो निपात्यते । दुःखेन ध्यायतीति दूढ्यः । आतश्चेति कः । ब्रुवन्तोऽस्यां सीदन्तीति बृसी । ब्रुवच्छब्दस्य बृ आदेशः । सदेरधिकरणे डट् । आकृतिगणोऽयम् ॥

१०३४-पृषोदरादि शब्द शिष्टगणकर्तृक जिस प्रकार उच्चारित हुएहैं उस प्रकार ही साधु हों, जैसे-पृषत्+उदरम्=इस विग्रहमें तकारका लोप करके 'पृषोदरम्' यह पद सिद्ध हुआ । 'वारिवाहकः' इसमें वारि इस पूर्वपदके स्थानमें ब और उत्तरपदके आदिको ल आदेश होकर 'बलाहकः' पद सिद्ध हुआ।

वर्णागमके कारण अर्थात् हन् धातुके उत्तर पचादित्वके कारण अच् प्रत्यय और सगागम करके 'हंसः' पद सिद्ध हुआ । हिंसि धातुके उत्तर पचादित्वके कारण अच् प्रत्यय करके हकार और सकारके स्थानमें विपर्ययके कारण 'सिंहः' पद सिद्ध हुआ । वर्णकी विकृतिके कारण अर्थात् आत्मन् शब्दके आकारके स्थानमें उकार करके 'गूढोत्मा' पद सिद्ध हुआ । वर्णके विनाश अर्थात् 'पृषत्' इस पदके तकारके लोपके कारण 'पृषोदरम्' यह पद सिद्ध हुआ ।

दिग्वाचक शब्दके उत्तर तीर शब्दके स्थानमें विकल्प करके तार आदेश हो * जैसे-दक्षिणतारम्, दक्षिणतीरम् । उत्तरतारम्, उत्तरतीरम् ।

(दुरो दाशनाश० *) दाश, नाश, दभ और ध्य शब्द परे रहते दुर् शब्दको उत्व हो और उत्तर पदके आदि वर्णको ष्टुत्व हो, जैसे-'दुःखेन दाश्यते' इस विग्रहमें-दूडाशः । 'दुःखेन नाश्यते' इस वाक्यमें-दूणाशः । दुःखेन दभ्यते= दूडभः । दाश, नाश और दभ इन तीन शब्दोंके उत्तर खल् प्रत्यय हुआहै । दंभ् धातुके नकारका लोप निपातनसे सिद्ध हुआहै । 'दुःखेन ध्यायति' इस वाक्यमें दूढ्यः, यहां "आतश्च० २८९८" इस सूत्रसे क प्रत्यय हुआहै ।

'ब्रुवन्तोऽस्यां सीदन्ति' इस वाक्यमें ब्रुवत् शब्दके स्थानमें बृ आदेश और सद् धातुके उत्तर अधिकरणमें डट् प्रत्यय करके 'बृसी' पद सिद्ध हुआहै । बृसी शब्दसे व्रतियोंका और मुनियोंका कुशादि निर्मित आसन जानना । यह (पृषोदरादि) आकृतिगण है ॥

१०३५ संहितायाम् । ६ । ३ । ११४ ॥

अधिकारोऽयम् ॥

१०३५-यह संहिताधिकार सूत्र है ॥

१०३६ कर्णे लक्षणस्याऽविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य । ६ । ३ । ११५ ॥

कर्णशब्दे परे लक्षणवाचकस्य दीर्घः । द्विगुणाकर्णः । लक्षणस्य किम् । शोभनकर्णः । अविष्टादीनां किम् । विष्टकर्णः । अष्टकर्णः । पञ्चकर्णः । मणिकर्णः । भिन्नकर्णः । छिन्नकर्णः । छिद्रकर्णः । स्रुवकर्णः । स्वस्तिककर्णः ॥

१०३६-संहिताविषयमें कर्ण शब्द परे रहते लक्षणवाचक शब्दको दीर्घ हो, परन्तु विष्ट, अष्टन्, पञ्चन्, मणि, भिन्न, छिन्न, छिद्र, स्रुव और स्वस्तिक शब्दको दीर्घ न हो, जैसे-द्विगुणाकर्णः ॥

लक्षणवाचक न होनेपर दीर्घ नहीं होगा, जैसे—शोभनकर्णः । विष्टाद शब्दको भी दीर्घ नहीं होगा, जैसे—विष्टकर्णः । अष्टकर्णः । पञ्चकर्णः । मणिकर्णः । भिन्नकर्णः । छिन्नकर्णः । छिद्रकर्णः । स्रुवकर्णः । स्वस्तिककर्णः ॥

१०३७ नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ । ६ । ३ । ११६ ॥

क्विबन्तेषु परेषु पूर्वपदस्य दीर्घः । उपानत् । नीवृत् । प्रावृट् । मर्मावित् । नीरुक् । अभीरुक् । ऋतीषट् । परीतत् । क्वाविति किम् । परिणहनम् । विभाषा पुरुष इत्यतो मण्डूकप्लुत्या विभाषानुवर्तते सा च व्यवस्थिता । तेन गतिकारकयोरेव । नेह । पटुरुक् । तिग्मरुक् ॥

१०३७—क्विप्प्रत्ययान्त नह्, वृत्, वृष्, व्यध्, रुच्, सह् और तन् धातु परे रहते पूर्वपदको दीर्घ हो, जैसे—उप-नह्—क्विप्=उपानत् । निवर्तते इति=नीवृत् । प्रवर्षति इति=प्रावृट् । मर्माणि विध्यति इति=मर्मावित् । नीरुक् । अभीरुक् । ऋतिं सहते=ऋतीषट् । परितनोति=परीतत् ।

क्विप्रत्ययान्त न होनेपर दीर्घ नहीं होगा, जैसे—परिणहनम् । "विभाषा पुरुषे १०३२" इस सूत्रसे मंडूकप्लुतिद्वारा विभाषाकी अनुवृत्ति होतीहै, वह व्यवस्थित विभाषा है, इस कारण गति और कारक इन दोनोंको ही दीर्घ होगा, इससे पटुरुक् । तिग्मरुक्—इत्यादि स्थलमें दीर्घ नहीं हुआ॥

१०३८ वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् । ६ । ३ । ११७ ॥

कोटरादीनां वने परे किंशुलुकादीनां गिरौ परे दीर्घः स्यात्संज्ञायाम् ॥

१०३८—संज्ञा होनेपर वन शब्द परे रहते कोटरादि शब्दोंको और गिरि शब्द परे रहते किंशुलुकादि शब्दोंको दीर्घ हो ॥

१०३९ वनं पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः । ८ । ४ । ४ ॥

वनशब्दस्योत्तरपदस्य एभ्य एव णत्वं नान्येभ्यः । इह कोटरान्ताः पञ्च दीर्घविधौ कोटरादयो बोध्याः । तेषां कृतदीर्घाणां णत्वविधौ निर्देशो नियमार्थः । अग्रेशब्दस्य तु विध्यर्थः । पुरगावणम् । मिश्रकावणम् । सिध्रकावणम् । सारिकावणम् । कोटरावणम् । एभ्य एवेति किम् । असिपत्रवनम् । वनस्याग्रे अग्रेवणम् । राजदन्तादिषु निपातनात्सप्तम्या अलुक् । प्रातिपदिकार्थमात्रे प्रथमा । किंशुलुकागिरिः ॥

१०३९—पुरगा, मिश्रका, सिध्रका, सारिका, कोटरा और अग्रे शब्दके परे ही उत्तरपदभूत वन शब्दके नकारको णत्व हो, अन्यके उत्तर होनेपर णत्व न हो । इस सूत्रमें कोटरापर्यन्त पांच शब्द दीर्घ विधि(१०३८) में कोटरादि जानने । कृतदीर्घ इन शब्दोंका णत्वविधिमें निर्देश नियमके निमित्त है, और अग्रे शब्दका विध्यर्थ है, जैसे—पुरगावणम् । मिश्रकावणम् । सिध्रकावणम् । सारिकावणम् । कोटरावणम् । एतद्भिन्न शब्दोंके उत्तर वन शब्दके नकारको णत्व न हो, जैसे—असिपत्रवनम् । वनस्याग्रे=अग्रेवणम्, यहां राजदन्तादि गणके मध्यमें निपातनसे सप्तमीका अलुक् हुआहै और प्रातिपदिकार्थ मात्रमें प्रथमा हुई है । किंशुलुकागिरिः । आदि शब्दसे 'अञ्जनागिरिः' इत्यादि पद सिद्ध हुएहैं । किंशुलुकादि न होनेपर, जैसे—कृष्णगिरिः । रामगिरिः ॥

१०४० वले । ६ । ३ । ११८ ॥

वलप्रत्यये परे दीर्घः स्यात्संज्ञायाम् । कृषीवलः ॥

१०४०—संज्ञामें वल प्रत्यय परे रहते प्रातिपदिकको दीर्घ हो, जैसे—कृषीवलः ॥

१०४१ मतौ बह्वचोऽनजिरादीनाम् । ६ । ३ । ११९ ॥

अमरावती । अनजिरादीनां किम् । अजिरवती । बह्वचः किम् । व्रीहिमती । संज्ञायामित्येव । नेह । वलयवती ॥

१०४१—मतुप् प्रत्यय परे होनेपर अजिरादि शब्दोंसे भिन्न अनेकाच् प्रातिपदिकको दीर्घ हो, यथा—अमरावती । अजिरादि शब्दोंको दीर्घ न होनेसे यथा—अजिरवती । बहुत अच् न होनेपर, यथा—व्रीहिमती । संज्ञामें ही दीर्घ होताहै, इससे वलयवती यहां दीर्घ न हुआ ॥

१०४२ शरादीनां च । ६ । ३ । १२० ॥

शरावती ॥

१०४२—मतुप् प्रत्यय परे रहते शर आदि प्रातिपदिकको दीर्घ हो, जैसे—शरावती ॥

१०४३ इको वहेऽपीलोः । ६ । ३ । १२१ ॥

इगन्तस्य दीर्घः स्याद्वहे । ऋषीवहम् । कपीवहम् । इकः किम् । पिण्डवहम् । अपीलोः किम् । पीलुवहम् ॥ अपील्वादीनामिति वाच्यम् ॥ * ॥ दारुवहम् ॥

१०४३—वह शब्द परे रहते पीलु शब्दसे भिन्न अन्य इगन्त शब्दको दीर्घ हो, जैसे—ऋषीवहम् । कपीवहम् । इगन्त न होनेपर दीर्घ नहीं होगा, जैसे—पिण्डवहम् । पीलु शब्दको दीर्घ नहीं होगा, जैसे—पीलुवहम् ।

पीलु आदि कितने एक शब्दोंको दीर्घ न हो ऐसा कहना चाहिये * जैसे—दारुवहम् ॥

१०४४ उपसर्गस्य घञ्यमनुष्ये बहुलम् । ६ । ३ । १२२ ॥

उपसर्गस्य बहुलं दीर्घः स्याद्घञन्ते परे न

तु मनुष्ये । परीपाकः । परिपाकः । अमनुष्ये किम् । निषादः ॥

१०४४–घञन्त शब्द परे रहते उपसर्गको बहुल करके दीर्घ हो मनुष्य वाच्य रहते नहीं हो, जैसे–परीपाकः, परिपाकः । मनुष्यवाचक होनेपर दीर्घ नहीं होता, जैसे–निषादः ॥

१०४५ इकः काशे । ६ । ३ । १२३ ॥

इगन्तस्योपसर्गस्य दीर्घः स्यात्काशे । वीकाशः । नीकाशः । इकः किम् । प्रकाशः ॥

१०४५–काश शब्द परे रहते इगन्त उपसर्गको दीर्घ हो, जैसे–वीकाशः । नीकाशः । इगन्त न होनेपर दीर्घ न होगा, जैसे–प्रकाशः ॥

१०४६ अष्टनः संज्ञायाम् ।६।३।१२५॥

उत्तरपदे दीर्घः । अष्टापदम् । संज्ञायां किम् । अष्टपुत्रः ॥

१०४६–संज्ञामें उत्तरपद परे रहते अष्टन् शब्दको दीर्घ हो, जैसे–अष्टापदम् । संज्ञा न होनेपर दीर्घ न होगा, जैसे–अष्टपुत्रः ॥

१०४७ चितेः कपि । ६ । ३ । १२७ ॥

एकचितीकः ॥

१०४७–कप् प्रत्यय परे रहते चिति शब्दके इकारको दीर्घ हो, जैसे–एकचितीकः ॥

१०४८ नरे संज्ञायाम् ।६ ।३ ।१२९ ॥

विश्वानरः ॥

१०४८–नर शब्द परे रहते संज्ञामें पूर्वपदको दीर्घ हो, जैसे–विश्वानरः ॥

१०४९ मित्रे चर्षौ । ६ । ३ । १३० ॥

विश्वामित्रः । ऋषौ किम् । विश्वमित्रो माणवकः ॥ शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्यः ॥ * ॥ श्वादन्तः इत्यादि ॥

१०४९–ऋषिवाच्य रहते, मित्र शब्द परे रहते पूर्वपदको दीर्घ हो, जैसे–विश्वामित्रः । ऋषि वाच्य न होनेपर दीर्घ न होगा, जैसे–विश्वमित्रो माणवकः ।

दन्त, दंष्ट्रा, कर्ण, कुन्द, वराह, पुच्छ और पद शब्द परे रहते श्वन् शब्दको दीर्घ हो * जैसे–श्वादन्तः–इत्यादि ॥

१०५० प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि ।८।४।५॥

एभ्यो वनस्य णत्वं वा स्यात् । प्रवणम् । कार्ष्यवणम् । इह षात्परत्वात् णत्वम् ॥

१०५०–संज्ञा न होनेपर भी प्र, निर्, अन्तर्, शर, इक्षु, प्लक्ष, आम्र, कार्ष्य, खदिर और पीयूक्षा शब्दके परे स्थित वन शब्दके नकारको णत्व हो, जैसे–प्रवणम् । कार्ष्यवणम्, इस स्थानमें षकारके परे होनेके कारण णत्व हुआ है ॥

१०५१ विभाषौषधिवनस्पतिभ्यः । ८ । ४ । ६ ॥

एभ्यो वनस्य णत्वं वा स्यात् । दूर्वावणम् । दूर्वावनम् । शिरीषवणम् । शिरीषवनम् । द्व्यच्त्र्यज्भ्यामेव ॥ * ॥ नेह । देवदारुवनम् ॥ इरिकादिभ्यः प्रतिषेधो वक्तव्यः ॥ * ॥ इरिकावनम् । मिरिकावनम् ॥

१०५१–ओषधि और वनस्पतिवाचक शब्दके उत्तर वन शब्दके नकारको विकल्प करके णत्व हो, जैसे–दूर्वावणम्, दूर्वावनम् । शिरीषवणम्, शिरीषवनम् ।

दो और तीन अचोंसे युक्त शब्दके उत्तर ही वन शब्दके नकारको णत्व हो * इससे तदतिरिक्त अर्थात् चार आदि अचोंसे युक्त शब्दके उत्तर होनेपर णत्व नहीं होगा, जैसे–देवदारुवनम् ।

इरिकादि शब्दोंके उत्तर वन शब्दके नकारको णत्व नहीं हो * जैसे–इरिकावनम् । मिरिकावनम् ॥

१०५२ वाहनमाहितात् ।८ । ४ । ८॥

आरोप्य यदुह्यते तद्वाचिस्थान्निमित्तात्परस्य वाहननकारस्य णत्वं स्यात् । इक्षुवाहणम् । आहितात्किम् । इन्द्रवाहनम् । इन्द्रस्वामिकं वाहनमित्यर्थः । वहतेर्ल्युटि वृद्धिरिहैव सूत्रे निपातनात् ॥

१०५२–जो उठाकर लेजायाजाय तद्वाचिस्थ निमित्तके परे वाहन शब्दके नकारको णत्व हो, जैसे–इक्षुवाहणम् । आहित न होनेपर णत्व न होगा, जैसे–इन्द्रवाहनम्, अर्थात् इन्द्रस्वामिक वाहन । 'वाहनम्' इसमें वह धातुके उत्तर ल्युट् प्रत्यय होनेपर इसी सूत्रमें निपातनसे वृद्धि हुईहै ॥

१०५३ पानं देशे । ८ । ४ । ९ ॥

पूर्वपदस्थान्निमित्तात्परस्य पानस्य नस्य णत्वं स्याद्देशे गम्ये । क्षीरं पानं येषां ते क्षीरपाणा उशीनराः । सुरापाणाः प्राच्याः । पीयते इति पानम् । कर्मणि ल्युट् ॥

१०५३–देश गम्य होनेपर पूर्वपदस्थ निमित्तके परे पान शब्दके नकारको णत्व हो, जैसे–क्षीरं पानं येषां ते=क्षीरपाणाः उशीनराः । सुरापाणाः प्राच्याः (पीयते इति पानम् । पा+कर्मणि ल्युट्) ॥

---

१ मनुष्यादि वाच्य रहते दीर्घ नहीं हो ऐसा कहना चाहिये * जैसे–प्रसेवः । प्रसारः । प्रहारः । कृत्रिम होनेपर साद और कार शब्द परे रहते उपसर्गको दीर्घ हो * यथा एषोऽस्य प्रासादः । एषोऽस्य प्राकारः । इस वार्तिमें कृत्रिम शब्द किमर्थ है, तो–एषोऽस्य प्रसादः, प्रकारः । प्रतिवेशादि शब्दोंको विकल्प करके दीर्घ हो * जैसे–प्रतीवेशः, प्रतिवेशः । प्रतीकारः, प्रतिकारः । यह सब बहुलग्रहणका ही फल है ॥

१०५४ वा भावकरणयोः ।८।४।१०॥

पानस्येत्येव । क्षीरपाणम् । क्षीरपानम् ॥ गिरिनद्यादीनां वा ॥ * ॥ गिरिणदी । गिरिनदी । चक्रणितम्बा । चक्रनितम्बा ॥

१०५४–पूर्वपदस्थ निमित्तके परे भाव और करणमें विहितल्युट्प्रत्ययान्त पान शब्दके नकारको विकल्प करके णत्व हो, जैसे–क्षीरपाणम्, क्षीरपानम् ।

गिरिनद्यादि शब्दोंको भी विकल्प करके णत्व हो* जैसे–गिरिणदी, गिरिनदी । चक्रणितम्बा, चक्रनितम्बा ॥

१०५५ प्रातिपदिकान्तनुम्विभक्तिषु च । ८ । ४ । ११ ॥

पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णो वा स्यात् । प्रातिपदिकान्ते । माषवापिणौ । नुमि । व्रीहिवापाणि । विभक्तौ । माषवापेण । पक्षे माषवापिनावित्यादि । उत्तरपदं यत्प्रातिपदिकं तदन्तस्यैव णत्वम् । नेह । गर्गाणां भगिनी गर्गभगिनी । अत एव नुम्ग्रहणं कृतम् । अङ्गस्य नुम्विधानात्तद्भक्तो हि नुम् न तूत्तरपदस्य । किंच । प्रहिण्वन्नित्यादौ हिवेर्नुमो णत्वार्थमपि नुम्ग्रहणम् । प्रेन्वनमित्यादौ तु क्षुभ्नादित्वान्न ॥ युवादेर्न ॥ * ॥ रम्ययूना । परिपक्वानि । एकाजुत्तरपदे णः । नित्यमित्युक्तम् । वृत्रहणौ । हरिं मानयतीति हरिमाणी । नुमि । क्षीरपाणि । विभक्तौ क्षीरपेण । रम्यविणा ॥

१०५५–पूर्वपदस्थ निमित्तके परे प्रातिपदिकान्त, नुम् और विभक्तिमें स्थित नकारको विकल्प करके णत्व हो । प्रातिपदिकान्तमें जैसे–माषवापिणौ । नुम्में जैसे–व्रीहिवापाणि । विभक्तिमें जैसे–माषवापेण । विकल्प पक्षमें जैसे–माषवापिनौ, इत्यादि । उत्तरपद जो प्रातिपदिक तदन्त नकारको ही णत्व होताहै, इस कारण ' गर्गाणाम् भगिनी= गर्गभगिनी' इस स्थलमें णत्व नहीं हुआ, इस निमित्त ही नुम्का ग्रहण कियाहै । अङ्गको नुम्विधानके कारण अङ्गावयव नुम् होताहै, परन्तु उत्तरपदसंबन्धी नुम् नहीं होताहै, अथवा प्रहिण्वन्–इत्यादि स्थलमें हिविधातुसंबन्धी जो नुम् उसको भी णत्वविधानके निमित्त इस स्थानमें नुम्ग्रहण है । प्रेन्वनम्–इत्यादिमें तो क्षुभ्नादित्वके कारण णत्व नहीं होताहै ।

युवादिको, अर्थात् युवन्, पक्व इत्यादिको णत्व नहीं हो* जैसे–रम्ययूना । परिपक्वानि ।

''एकाजुत्तरपदे णः ३०७''इस सूत्रसे नित्य णत्व उक्त हुआ है, जैसे–वृत्रहणौ । ' हरिं मानयति' इस वाक्यमें हरिमाणी । नुम्में जैसे–क्षीरपाणि । विभक्तिमें जैसे–क्षीरपेण । रम्यविणा ॥

१०५६ कुमति च । ८ । ४ । १३ ॥

कवर्गवत्युत्तरपदे प्राग्वत् । हरिकामिणौ । हरिकामाणि । हरिकामेण ॥

१०५६–कवर्गयुक्त उत्तरपद परे रहते पूर्वके समान हो, अर्थात् पूर्वपदस्थ निमित्तके परे प्रातिपदिकान्त, नुम् और विभक्तिस्थ नकारको णत्व हो, जैसे–हरिकामिणौ । हरिकामाणि । हरिकामेण ॥

१०५७ पदव्यवायेऽपि । ८ । ४ । ३८ ॥

पदेन व्यवधानेऽपि णत्वं न स्यात् । माषकुम्भवापेन । चतुरङ्गयोगेन ॥ अतद्धित इति वाच्यम् ॥ * ॥ आर्द्रगोमयेण । शुष्कगोमयेण ॥

१०५७–मध्यमें किसी पदसे व्यवधान रहते भी पूर्वपदस्थ निमित्तसे परे प्रातिपदिकान्त, नुम् और विभक्तिमें स्थित नकारको णत्व न हो, जैसे–माषकुंभवापेन । चतुरङ्गयोगेन ।

तद्धितप्रत्ययान्त पदसे व्यवधान रहते निषेध नहीं हो * जैसे–आर्द्रगोमयेण । शुष्कगोमयेण ॥

१०५८ कुस्तुम्बुरूणि जातिः ६ । १ । १४३ ।

अत्र सुण्निपात्यते । कुस्तुम्बुरुर्धान्याकम् । क्लीबत्वमतन्त्रम् । जातिः किम् । कुतुम्बुरूणि । कुत्सितानि तिन्दुकीफलानीत्यर्थः ॥

१०५८–जातिवाचक होनेपर कुस्तुम्बुरु शब्दमें निपातनसे सुट् हो, जैसे–कुस्तुम्बुरुः धान्याकम् । सूत्रमें क्लीबनिर्देश अविवक्षित है । जातिवाचक न होनेपर सुट् नहीं होगा, जैसे–कुतुम्बुरूणि, अर्थात् कुत्सित तौंबीके फल ॥

१०५९ अपरस्पराः क्रियासातत्ये । ६ । १ । १४४ ॥

सुण्निपात्यते । अपरस्पराः सार्था गच्छन्ति । सततमविच्छेदेन गच्छन्तीत्यर्थः । क्रियेति किम् । अपरपरा गच्छन्ति । अपरे च परे च सकृदेव गच्छन्तीत्यर्थः ॥

१०५९–क्रियासातत्य होनेपर ' अपरस्पराः ' इस स्थलमें निपातनसे सुट्का आगम हो, जैसे–अपरस्पराः सार्था गच्छन्ति, अर्थात् निरंतर अविच्छेदसे गमन करतेहैं । क्रियाकी निरंतरता न होनेपर सुट् न होगा, जैसे–अपरपरा गच्छन्ति । (अपरे च, परे च सकृत् एव गच्छन्ति) ॥

१०६० गोष्पदं सेवितासेवितप्रमाणेषु । ६ । १ । १४५ ॥

सुट् सस्य षत्वं च निपात्यते । गावः पद्यन्तेऽस्मिन्देशे स गोभिः सेवितो गोष्पदः । असेविते । अगोष्पदान्यरण्यानि । प्रमाणे । गोष्पदमात्रं क्षेत्रम् । सेवितेत्यादि किम् । गोः पदं गोपदम् ॥

१०६०–सेवित, असेवित और प्रमाण अर्थ होनेपर गोष्पद शब्दमें निपातनसे सुट् और सुट्के सकारको षत्व हो । सेवित अर्थमें जैसे–गावः पद्यन्तेऽस्मिन् देशे सः–गोभिः सेवितः= गोष्पदः । असेवित अर्थमें जैसे–अगोष्पदान्यरण्यानि । प्रमा-

ण अर्थमें जैसे–गोष्पदमात्रं क्षेत्रम् । सेवितादि अर्थ न होनेपर सुट् और षत्व नहीं होंगे, जैसे–गोः प-दम्=गोपदम् ॥

१०६१ आस्पदं प्रतिष्ठायाम् ६।१।१४६॥

आत्मयापनाय स्थाने सुट् निपात्यते । आस्पदम् । प्रति किम् । आपदापदम् ॥

१०६१–अपने शरीररक्षाके निमित्त जो स्थान सो वाच्य रहते 'आस्पदम्' इसमें निपातनसे सुट् हो, जैसे–आस्पदम् । प्रतिष्ठा अर्थ न होनेपर 'आपदापदम्' ऐसा होगा ॥

१०६२ आश्चर्यमनित्ये ।६।१।१४७॥

अद्भुते सुट् । आश्चर्यं यदि स भुञ्जीत । अनित्ये किम् । आचर्यं कर्म शोभनम् ॥

१०६२–अद्भुत अर्थ होनेपर 'आश्चर्यम्' इसमें निपातनसे सुट् हो, जैसे–आश्चर्यं यदि स भुञ्जीत ("चरेराङि चागुरौ" इति यत्)। अद्भुत अर्थ न होनेपर सुट् नहीं होगा, यथा–आचर्यम्, अर्थात् शोभन कर्म ॥

१०६३ वर्चस्केऽवस्करः ।६।१।१४८॥

कुत्सितं वर्चः वर्चस्कमन्नमलं तस्मिन् सुट् । अवकीर्यत इति अवस्करः । वर्चस्के किम् । अवकरः ॥

१०६३–कुत्सित वर्च्चस्को वर्च्चस्क, अर्थात् अन्नमल (विष्ठा) कहते हैं, वर्च्चस्क अर्थ होनेपर अवस्कर शब्दमें निपातनसे सुट्का आगम हो, जैसे='अवकीर्य्यते' इस वाक्यमें अव+स् (सुट्)+कॄ (कर्ममें)+अण्=अवस्करः, यह पद सिद्ध हुआहै । अवस्कर शब्दसे विष्ठा जानना । वर्च्चस्क अर्थ न होनेपर सुट् नहीं होगा, जैसे–अवकरः, अर्थात् जञ्जाल ॥

१०६४ अपस्करो रथाङ्गम् ।६।१।१४९॥

अपकरोऽन्यः ॥

१०६४–रथाङ्ग अर्थ होनेपर अपस्कर शब्दमें निपातनसे सुट् हो, जैसे–अपस्करः । अन्य अर्थमें सुट् न होगा, जैसे–अपकरः ॥

१०६५ विष्किरः शकुनिर्विकिरो वा । ६ । १ । १५० ॥

पक्षे विकिरः । वावचनेनैव सुड्विकल्पे सिद्धे विकिरग्रहणं तस्यापि शकुनेरन्यत्र प्रयोगो मा भूदिति वृत्तिस्तत्र । भाष्यविरोधात् ॥

१०६५–शकुनि अर्थ होनेपर विकिर शब्दमें निपातनसे विकल्प करके सुट् हो । विष्किरः । पक्षमें विकिरः । सूत्रस्थ वा शब्दसे ही सुट्का विकल्प सिद्ध है फिर विकिर शब्दका ग्रहण करनेसे विकिर शब्दका भी शकुनिसे भिन्न अर्थमें प्रयोग नहीं होगा, यह वृत्तिकारका अभिप्राय है, परन्तु यह भाष्यविरुद्धताके कारण युक्त नहीं है ॥

१०६६ प्रतिष्कशश्च कशेः ।६।१।१५२॥

कश गतिशासनयोरित्यस्य प्रतिपूर्वस्य पचाद्यचि सुट् निपात्यते षत्वं च । सहायः पुरोयायी वा प्रतिष्कश इत्युच्यते । कशेः किम् । प्रतिगतः कशां प्रतिकशोऽश्वः । यद्यपि कशेरेव कशा तथापि कशेरिति धातोर्ग्रहणमुपसर्गस्य प्रतेर्ग्रहणार्थम् । तेन धात्वन्तरोपसर्गान्न ॥

१०६६–कश धातुसे गति और शासन जानना । प्रतिपूर्वक कश धातुके उत्तर पचादित्वके कारण अच् प्रत्यय करनेपर निपातनसे सुट्का आगम और सुट्के सकारको षत्व हो, जैसे–प्रतिष्कशः । सहाय अथवा अग्रवर्त्ती लोकको प्रतिष्कश कहते-हैं । सूत्रमें 'कशेः' यह धातुनिर्देश क्यों किया ? तो प्रतिगतः कशाम्=प्रतिकशः, अर्थात् अश्व, यहां सुट् और षत्व न हों, यद्यपि 'कशा' यह कश् धातुसे ही बनाहै, तथापि 'कशेः'यह धातुग्रहण उपसर्ग प्रतिके ग्रहणके निमित्त है, अर्थात् कश् धातुके योगमें जहां उपसर्ग संज्ञा प्रतिकी हुई हो वहां ही सुट् षत्व हों, इसलिये प्रतिगतः कशाम्=प्रतिकशोऽश्वः, इस स्थलमें गम् धातुके योगमें प्रतिकी उपसर्ग संज्ञा होनेके कारण कश् धातुके योगमें प्रतिको उपसर्गत्व नहीं है, इससे सुट्, षत्व, नहीं हुए ॥

१०६७ प्रस्कण्वहरिश्चन्द्रावृषी । ६ । १ । १५३ ॥

हरिश्चन्द्रग्रहणममन्त्रार्थम् । ऋषीति किम् । प्रकण्वो देशः । हरिचन्द्रो माणवकः ॥

१०६७–ऋषि वाच्य होनेपर प्रस्कण्व और हरिश्चन्द्र इन दो शब्दोंमें निपातनसे सुट् हो । मंत्र होनेपर "ह्रस्वाच्चंद्रोत्तरपदे मंत्रे ६ । १ । १५१ " इससे सुट्का आगम सिद्ध ही था, फिर हरिश्चंद्रके ग्रहण करनेकी क्या आवश्यकता थी, इस शंकापर कहतेहैं कि, इस सूत्रमें हरिश्चंद्र ग्रहण अमंत्रार्थ है, अर्थात् मंत्रसे भिन्न स्थलमें भी सुट् होनेके कारण सूत्रमें हरिश्चन्द्र शब्दका ग्रहण कियाहै, जैसे–प्रस्कण्वः । हरिश्चन्द्रः, अर्थात् ऋषिविशेष हैं । ऋषि न होनेपर सुट् नहीं होगा, जैसे–प्रकण्वः, अर्थात् देश । हरिचन्द्रः, अर्थात् माणवक ॥

१०६८ मस्करमस्करिणौ वेणुपरिव्राजकयोः । ६ । १ । १५४ ॥

मकरशब्दोऽव्युत्पन्नस्तस्य सुडिनिश्च निपात्यते। वेण्विति किम् । मकरो ग्राहः । मकरी समुद्रः ॥

१०६८–वेणु और परिव्राजक अर्थ होनेपर मस्कर और मस्करिन् यह दो पद निपातसे सिद्ध हों मकर शब्द अव्युत्पन्न, अर्थात् व्युत्पत्तिसिद्ध नहीं है, उसको निपातनसे सुट् और इन् प्रत्यय होकर मस्करिन् शब्द सिद्ध हुआहै । वेणु और परिव्राजक अर्थ न होनेपर सुट्का आगम नहीं होगा, जैसे–मकरः, अर्थात् ग्राह (जलजन्तुविशेष) मकरी, अर्थात् समुद्र (मकरयुक्त) ॥

१०६९ कास्तीराजस्तुन्दे नगरे । ६ । १ । १५५ ॥

ईषत्तीरमस्यास्तीति कास्तीरं नाम नगरम् । अजस्येव तुन्दमस्येति अजस्तुन्दं नाम नगरम् । नगरे किम् । कातीरम् । अजतुन्दम् ।

१०६९–नगर अर्थ होनेपर कास्तीर और अजस्तुन्द इन दो शब्दोंमें निपातनसे सुट् हो, जैसे–'ईषत्तीरम् अस्यास्ति' इस विग्रहमें 'कास्तीरम्' यह सिद्ध हुआ, इसका अर्थ नगर है । 'अजस्येव तुन्दमस्य' इस विग्रहमें–अजस्तुन्दम्, अर्थात् नगरविशेष । नगर अर्थ न होनेपर सुट् नहीं होगा, जैसे–कातीरम् । अजतुन्दम् ॥

१०७० कारस्करो वृक्षः । ६ । १ । १५६ ॥

कारं करोतीति कारस्करो वृक्षः । अन्यत्र कारकरः । केचित्तु कस्कादिष्विदं पठन्ति न सूत्रेषु ॥

१०७०–वृक्ष अर्थ होनेपर कारस्कर शब्दमें निपातनसे सुट् हो, जैसे–'कारं करोति' इस वाक्यमें 'कारस्करः' (वृक्षविशेष) यह पद सिद्ध हुआ । वृक्ष अर्थ न होनेपर सुट् नहीं होगा, जैसे–कारकरः । किसी२ने सूत्रमें इसका पाठ न करके कस्कादि गणमें पाठ कियाहै ॥

१०७१ पारस्करप्रभृतीनि च संज्ञायाम् । ६ । १ । १५७ ॥

एतानि ससुट्कानि निपात्यन्ते नाम्नि । पारस्करः । किष्किन्धा ॥ तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च ॥ * ॥ तात्पूर्वं चत्वेंन दकारो बोध्यः । तद्बृहतोर्दकारतकारौ लुप्येते । करपत्योस्तु सुट् । चोरदेवतयोरिति समुदायोपाधिः । तस्करः । बृहस्पतिः ॥ प्रायस्य चित्तिचित्तयोः ॥ * ॥ प्रायश्चित्तिः । प्रायश्चित्तम् । वनस्पतिरित्यादि । आकृतिगणोऽयम् ॥

॥ इति समासाश्रयविधयः ॥

१०७१–संज्ञा अर्थ होनेपर पारस्करादि शब्दको निपातनसे सुट् हो, जैसे–'पारं करोति' इस विग्रहमें "कृञो हेतुताच्छील्य०" इससे ट प्रत्यय हुआ, पश्चात् सुट्–पारस्करः । 'किमपि धत्ते' इस विग्रहमें "आतोऽनुपसर्गे कः" इससे क, टाप्, निपातनसे किम्को द्वित्व, पूर्व मको लोप, सुट्, षत्व–किष्किन्धा ।

(तद्बृहतोः० *) चोर और देवता अर्थ होनेपर कर और पति शब्द परे रहते तद् और बृहत् शब्दको सुट्का आगम हो और तद् शब्दके दकारका और बृहत् शब्दके तकारका लोप हो, जैसे–तस्करः, अर्थात् चोर । बृहस्पतिः, अर्थात् देवता ॥

चित्ति और चित्त शब्द परे रहते प्राय शब्दको सुट्का आगम हो, जैसे–प्रायश्चित्तिः । प्रायश्चित्तम् । वनस्पतिः–इत्यादि पारस्करादि । आकृतिगण है ॥

॥ इति समासाश्रयविधयः ॥

अथ तद्धितप्रकरणम् ।

१०७२ समर्थानां प्रथमाद्वा । ४ । १ । ८२ ॥

इदं पदत्रयमधिक्रियते । प्राग्दिश इति यावत् । सामर्थ्यं परिनिष्ठितत्वम् । कृतसन्धिकार्यमिति यावत् ॥

१०७२–"प्राग्दिशो विभक्तिः १९४७" इस सूत्रपर्यन्त समर्थानाम्, प्रथमात् और वा, इन तीन पदोंका अधिकार होताहै । सामर्थ्यसे परिनिष्ठितत्व, अर्थात् कृतसंधिकार्यत्व जानना ॥

१०७३ प्राग्दीव्यतोऽण् । ४ । १ । ८३ ॥

तेन दीव्यतीत्यतः प्रागणधिक्रियते ॥

१०७३–"तेन दीव्यति" इस सूत्रके पूर्वपर्यन्त अण् प्रत्ययका अधिकार होताहै ॥

१०७४ अश्वपत्यादिभ्यश्च । ४ । १ । ८४ ॥

एभ्योऽण् स्यात् प्राग्दीव्यतीयेष्वर्थेषु । वक्ष्यमाणस्य ण्यस्यापवादः ॥

१०७४–प्राग्दीव्यतीय प्रकरणमें जिस २ अर्थमें प्रत्यय होतेहैं, उस २ अर्थमें अश्वपत्यादि शब्दोंके उत्तर अण् प्रत्यय हो । इस अण् प्रत्ययको वक्ष्यमाण (ण्य) प्रत्ययका अपवाद जानना ॥

१०७५ तद्धितेष्वचामादेः । ७ । २ । ११७ ॥

ञिति णिति च तद्धिते परेऽचामादेरचो वृद्धिः स्यात् ॥

१०७५–ञित् और णित् तद्धित प्रत्यय परे रहते अचोंके मध्यमें आदि अच्को (पूर्वस्वरको) वृद्धि हो ॥

१०७६ किति च । ७ । २ । ११८ ॥

किति तद्धिते च तथा । अश्वपतेरपत्यादि आश्वपतम् । गाणपतम् । गाणपत्यो मन्त्र इति तु प्रामादिकमेव ॥

१०७६–ककार इत् हो जिसमें ऐसा तद्धित प्रत्यय परे रहते अचोंके मध्यमें आद्यच्का वृद्धि हो, जैसे–अश्वपतेरपत्यम्, इत्यादि वाक्यमें अश्वपति+अण्=आश्वपतम् । गणपतेरपत्यम्, इत्यादि वाक्यमें गणपति+अण्=गाणपतम् । गाणपत्यः, अर्थात् मंत्रविशेष, यह पद प्रामादिक (भ्रममूलक) है । देवतावाचक अणन्तके उत्तर चतुर्वर्णादिके आकृतिगणत्वके कारण ष्यञ प्रत्यय करके तादृश पद भी सिद्ध हो सकताहै ऐसा जानना ॥

१०७७ दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः । ४ । १ । ८५ ॥

दित्यादिभ्यः पत्युत्तरपदाच्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यादणोऽपवादः । दैत्यः । अदितेरादित्यस्य वा आदित्यः । प्राजापत्यः ॥ यमा-

श्चेति काशिकायाम् ॥ याम्यः ॥ पृथिव्या ञाञौ ॥ * ॥ पार्थिवा । पार्थिवी ॥ देवाद्यञञौ ॥ * ॥ दैव्यम् । दैवम् ॥ बहिषष्टिलोपो यञ्च ॥ * ॥ बाह्यः ॥ ईकक्च ॥ * ॥ बाहीकः ॥ स्थाम्नोऽकारः ॥ * ॥ अश्वत्थामः । पृषोदरादित्वात्सस्य तः॥भवार्थे तु लुग्वाच्यः ॥* अश्वत्थामा । लोम्नोऽपत्येषु बहुष्वकारः ॥ * ॥ बाह्वादीञोऽपवादः । उडुलोमाः । उडुलोमान् । बहुषु किम् । औडुलोमिः । गोरजादिप्रसङ्गे यत् ॥ * ॥ गव्यम् ॥ अजादिप्रसङ्गे किम् । गोभ्यो हेतुभ्य आगतं गोरूप्यम् । गोमयम् ॥

१०७७–प्राग्दीव्यतीय प्रकरणमें जिस २ अर्थमें प्रत्यय होतेहैं, उसी २ अर्थमें दिति, अदिति, आदित्य और पतिशब्दान्त शब्दके उत्तर ण्य प्रत्यय हो,यह सूत्र अण् प्रत्ययका विशेषक है, जैसे–दितेरपत्यं पुमान्, इत्यादि वाक्योंमें दिति+ण्य=दैत्यः । अदितेः आदित्यस्य वा अपत्यम्,इत्यादि वाक्योंमें अदिति, आदित्य+ण्य=आदित्यः । प्रजापतेः अपत्यम्,इत्यादि विग्रहोंमें प्रजापति+ण्य–प्राजापत्यः ।

(यमाच) यम शब्दके उत्तर भी ण्य प्रत्यय हो, यह काशिकासे अभिहित होताहै, जैसे–यमस्यापत्यम्, इस वाक्यमें यम+ण्य=याम्यः ।

पृथिवी शब्दके उत्तर ञ और अञ् प्रत्यय हों * जैसे–पार्थिवा । पार्थिवी ।

देव शब्दसे यञ् और ञ हों * जैसे–दैव्यम् । दैवम् ।

बहिष् शब्दकी टिका लोप हो और उसके उत्तर यञ् प्रत्यय हो * जैसे–बाह्यः ।

बहिष् शब्दकी टिका लोप हो और उसके उत्तर ईकक् प्रत्यय भी हो * जैसे–बाहीकः ।

स्थामन् शब्दके उत्तर अकार प्रत्यय हो * जैसे–अश्वत्थामः । अश्वस्येव स्थामा स्थितिर्यस्य, इस वाक्यमें बहुव्रीहि समास होनेपर पृषोदरादित्वके कारण स्थामन् शब्दके सकारके स्थानमें तकार करके 'अश्वत्थामः' यह पद सिद्ध हुआ ।

भवार्थमें स्थामन् शब्दके उत्तर प्रत्ययका लुक् हो * जैसे–अश्वत्थामा ।

अपत्य अर्थमें लोमन् शब्दके उत्तर बहुवचनमें अकार प्रत्यय हो * केवल लोमन् शब्दके अपत्ययोगके अभावके कारण लोमनशब्दान्त पदके विषयमें ही यह विधि जाननी चाहिये । यह सूत्र बाहु आदि शब्दके उत्तर जो इञ् प्रत्यय होताहै, उसका अपवाद (विशेषक) है, जैसे–उडुलोमाः । उडुलोमान् । बहुवचन न होनेपर अकार नहीं होगा, जैसे–औडुलोमिः ।

गो शब्दके उत्तर अजादिप्रसङ्गमें यत् प्रत्यय हो * जैसे–गो+य=गव्+य+अम्=गव्यम् । इस वार्तिकसे केवल अपत्यार्थमें ही नहीं होताहै, किन्तु प्राग्दीव्यतीय प्रकरणमें जो २ अर्थ हैं, उन २ अर्थोंमें होताहै, अर्थात् गोरिदम्, गवि भवम्, गौर्देवतास्य, इत्यादि वाक्योंमें 'गव्यम्' यह पद होगा । जिस स्थानमें अजादिप्रसंग नहीं होगा, उस स्थानमें गोभ्यो हेतुभ्य आगतम्, इस वाक्यमें 'गोरूप्यम्' 'गोमयम्' ऐसे पद होंगे ॥

१०७८ उत्सादिभ्योऽञ् । ४ । १ । ८६ ॥

औत्सः ॥ अग्निकलिभ्यां ढग्वक्तव्यः ॥ * ॥ अग्नेरपत्यादि आग्नेयम् । कालेयम् ॥

इत्यपत्यादिविकारान्तार्थसाधारणाः प्रत्ययाः ॥

१०७८–उत्सादि शब्दके उत्तर अञ् प्रत्यय हो, जैसे–उत्स+अञ् (अ)=औत्सः (१०७५) ।

अग्नि और कलि शब्दके उत्तर ढक् हो । अग्नेरपत्यादि, इस वाक्यमें आग्नेयम् । ४७४ सूत्रसे ढको एय होताहै, कालेयम् । अपत्यादि ऐसा कहनेसे अग्नेः आगतम्, अग्नौ भवम्, अग्निना दृष्टं साम, अग्नेरिदम्, इन संपूर्ण वाक्योंका ग्रहण जानना चाहिये ॥

यह अपत्यादिविकारान्तार्थ साधारण प्रत्यय हैं ॥

१०७९ स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् । ४ । १ । ८७ ॥

धान्यानां भवन इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः । स्त्रैणः । पौंस्नः । वत्यर्थे न । स्त्री पुंवच्चेति ज्ञापकात् । स्त्रीवत् । पुंवत् ॥

१०७९–"धान्यानां भवने० १८०२" इस सूत्रके पूर्वपर्यन्त जिस २ अर्थमें प्रत्यय हों, उसी २ अर्थमें स्त्री और पुंस् शब्दके उत्तर क्रमसे नञ् और स्नञ् प्रत्यय हों, जैसे–स्त्री+न=(१०७५ । १९७) स्त्रैणः । पुंस्+न=पौंस्नः । "स्त्री पुंवच्च" इस सूत्रनिर्देशके कारण वतिके अर्थमें उक्त प्रत्यय नहीं होताहै, जैसे–स्त्रीवत् । पुंवत् ॥

१०८० द्विगोर्लुगनपत्ये । ४ । १ । ८८ ॥

द्विगोर्निमित्तं यस्तद्धितोऽजादिरनपत्यार्थः प्राग्दीव्यतीयस्तस्य लुक् स्यात् । पञ्चसु कपालेषु संस्कृतः पुरोडाशः । पञ्चकपालः । द्विगोर्निमित्तस्येति किम् । पञ्चकपालस्येदं खण्डं पाञ्चकपालम् । अजादिः किम् । पञ्चगर्गरूप्यम् । अनपत्ये किम् । द्वयोर्मित्रयोरपत्यं द्वैमित्रिः ॥

१०८०–द्विगु समासका निमित्त जो तद्धित प्रत्यय हो, वह यदि अजादि और अनपत्यार्थमें हो, तो प्राग्दीव्यतीय तद्धित प्रत्ययका लुक् हो, जैसे–पञ्चसु कपालेषु संस्कृतः, इस वाक्यमें पञ्चकपालः पुरोडाशः । द्विगु समासका निमित्तीभूत तद्धित प्रत्यय न होनेपर लुक् नहीं होताहै, जैसे–पञ्चकपालस्य इदं खण्डं=पाञ्चकपालम् । अजादि क्यों कहा ? तो अजादि न होनेपर लुक् न हो, जैसे–पञ्चगर्गरूप्यम् । अपत्यार्थ न होनेपर लुक् नहीं होगा, जैसे–द्वयोर्मित्रयोरपत्यम्, इस वाक्यमें द्वैमित्रिः ॥

१०८१ गोत्रेऽलुगचि । ४ । १ । ८९ ॥

अजादौ प्राग्दीव्यतीये विवक्षिते गोत्रप्रत्यस्याऽलुक् स्यात् । गर्गाणां छात्राः वृद्धाच्छः ॥

१०८१–अजादि प्राग्दीव्यतीय प्रत्यय विवक्षित होनेपर गोत्र प्रत्ययका अलुक् हो, जैसे–गर्गाणां छात्राः, इस विग्रहमें "वृद्धाच्छः १३३७" इस नक्ष्यमाण सूत्रसे छ प्रत्यय होकर–

१०८२ आपत्यस्य च तद्धितेऽनाति । ६ । १ । १५१ ॥

हलः परस्यापत्ययकारस्य लोपः स्यात्तद्धिते परे न त्वाकारे । गार्गीयाः । प्राग्दीव्यतीये किम् । गर्गेभ्यो हितं गर्गीयम् । अचि किम् । गर्गेभ्य आगतं गर्गरूप्यम् ॥

१०८२–तद्धित प्रत्यय परे रहते, व्यञ्जन वर्णके परे स्थित अपत्यार्थक प्रत्ययके यकारका लोप हो, परन्तु आकार परे रहते न हो, जैसे--गर्ग+यञ्+छ–ईय्=गार्गीयाः । प्राग्दीव्यतीय अर्थ कहनेसें गर्गेभ्यो हितम्, इस वाक्यमें गर्गीयम् , इस स्थलमें यञ् प्रत्ययका लोप हुआ । अजादि प्राग्दीव्यतीय प्रत्यय विवक्षित हो, ऐसा कहनेसे 'गर्गेभ्य आगतम्' इस वाक्यमें गर्गरूप्यम्,इस स्थानमें यञ्का लोप हुआ। (सब प्रोक्त प्रत्युदाहरणोंमें उक्त सूत्रसे 'य' का लोप न होकर "यञिञोश्च" से यञ्का लोप होनेसे वृद्धि नहीं होतीहै) ॥

१०८३ यूनि लुक् । ४ । १ । ९० ॥

प्राग्दीव्यतीये अजादौ प्रत्यये विवक्षिते युवप्रत्ययस्य लुक् स्यात् । ग्लुचुकस्य गोत्रापत्यं ग्लुचुकायनिः । वक्ष्यमाणः फिन् । ततो यून्यण् । ग्लौचुकायनः । तस्य च्छात्रोऽपि ग्लौचुकायनः। अणो लुकि वृद्धत्वाभावाच्छो न॥

१०८३–प्राग्दीव्यतीय अजादि प्रत्यय विवक्षित होनेपर युवप्रत्ययका लुक् हो, जैसे–ग्लुचुकस्य गोत्रापत्यम्, इस वाक्यमें ग्लुचुकायनिः । वक्ष्यमाण सूत्रसे (१०८७) फिन् प्रत्यय करके पश्चात् युवार्थमें अण् प्रत्यय होकर ग्लौचुकायनः । उसके छात्र होनेपर भी ग्लौचुकायनः । अण्का लुक् करनेपर वृद्धत्वके अभावके कारण छ प्रत्यय नहीं हुआ*॥

१०८४ पैलादिभ्यश्च । २ । ४ । ५९ ॥

एभ्यो युवप्रत्ययस्य लुक् । पीलाया वेत्यण् । तस्मादणो द्व्यच इति फिञ् । तस्य लुक् । पैलः पिता पुत्रश्च ॥ तद्राजाच्चाणः ॥ द्व्यञ्मगधेत्यणन्तादाङ्गशब्दादणो द्व्यच इति फिञो लुक् । आङ्गः पिता पुत्रश्च ॥

१०८४–पैलादि शब्दके उत्तर युवप्रत्ययका लुक् हो। "पीलाया वा ११२१" इस सूत्रसे अण् प्रत्यय करके 'पैल' पद सिद्ध हुआहै, इस कारण "अणो द्व्यचः ११८०" इस सूत्रसे फिञ्, उसका प्रस्तुत सूत्रसे लुक् होताहै, जैसे–पैलः पिता पुत्रश्च । "तद्राजाच्चाणः" इससे " द्व्यञ्मगध० " इस सूत्रसे–अणन्त आङ्ग शब्दके उत्तर "अणो द्व्यचः ११८०" इस सूत्रसे विहित फिञ्का लुक् होताहै, जैसे–आङ्गः पिता पुत्रश्च ॥

१०८५ इञः प्राचाम् । २ ।४।६०॥

गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुक् स्यात् तच्चेद्गोत्रं प्राचां भवति । पन्नागारस्यापत्यम् । अत इञ् । यञिञोश्चेति फक् । पान्नागारिः पिता पुत्रश्च । प्राचां किम् । दाक्षिः पिता । दाक्षायणः पुत्रः ॥

१०८५–गोत्र अर्थमें विहित जो इञ् प्रत्यय, तदन्तसे परे युव प्रत्ययका लुक् हो, यदि यह गोत्र प्राचीनोंका हो तो,नहीं तो लुक् नहीं हो,जैसे--पन्नागारस्यापत्यम्, इस विग्रहमें "अत इञ्१०९५" से इञ् होकर पश्चात् "यञिञोश्च ११०३"इस सूत्रसे फक् प्रत्यय हुआ, तब प्रस्तुत सूत्रसे फक्का लुक्, जैसे–पान्नागारिः, पिता–पुत्रश्च । प्राचीनोंका न होनेपर 'दाक्षिः पिता, दाक्षायणः पुत्रः' इस स्थानमें लुक् न होकर ऐसा ही होताहै ॥

१०८६ न तौल्वलिभ्यः । २ । ४ । ६१॥

तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य लुक् न स्यात् । पूर्वेण प्राप्तः । तुल्वलः । तत इञि फक् । तौल्वलिः पिता । तौल्वलायनः पुत्रः ॥

१०८६–तौल्वल्यादि शब्दके उत्तर युव प्रत्ययका लुक् न हो । पूर्व सूत्रसे लुक् प्राप्त है, उसका यह निषेधक है । तुल्वल शब्दसे इञ् और फक् प्रत्यय हुआहै, जैसे–तौल्वलिः पिता, तौल्वलायनः पुत्रः । यहां प्रस्तुत सूत्रसे निषेधके कारण लुक् न हुआ ॥

१०८७ फक्फिञोरन्यतरस्याम् । ४ । १ । ९१ ॥

यूनि लुगिति नित्ये लुकि प्राप्ते विकल्पार्थं सूत्रम् । कात्यायनस्य च्छात्राः कातीयाः कात्यायनीयाः । यस्कस्यापत्यं यास्कः । शिवाद्यण् । तस्यापत्यं युवा यास्कायनिः । अणो द्व्यच इति फिञ्। तस्य च्छात्राः यास्कीयाः यास्कायनीयाः॥

१०८७–फक् और फिञ् प्रत्ययका विकल्प करके लुक् हो । "यूनि लुक्" इस सूत्रसे नित्य लुक्की प्राप्ति होनेपर यह केवल विकल्प विधानके निमित्त है, जैसे–कात्यायनस्य छात्राः=कातीयाः, कात्यायनीयाः । यस्कस्यापत्यम्=यास्कः । "शिवादिभ्योऽण्" इस सूत्रसे अण् प्रत्यय करके तस्यापत्यं युवा, इस विग्रहमें यास्कायनिः । "अणो द्व्यचः ११८०" इससे

* अजादि ऐसा नहीं कहते तो 'ग्लौचुकायनरूप्यम्' यहां भी रूप्य प्रत्यय परे रहते अण्का लुक् होजाता । प्राग्दीव्यतीय ऐसा नहीं कहते तो 'ग्लौचुकायनीयम् ("तस्मै हितम्" इससे छ प्रत्यय हुआ है) यहां भी अण्का लुक् होजाता ॥

फिञ् । उसके छात्र, इस अर्थमें यास्कीयाः, यास्कायनीयाः । विकल्पसे लुक् ॥

१०८८ तस्यापत्यम् । ४ । १ । ९२ ॥

षष्ठ्यन्तात् कृतसन्धेः समर्थादपत्येर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः । उपगोरपत्यम् औपगवः । आदिवृद्धिरन्त्योपधावृद्धी बाधते ।

तस्येदमित्यपत्येऽपि बाधनार्थं कृतं भवेत् ।
उत्सर्गः शेष एवासौ वृद्धान्यस्य प्रयोजनम् ॥१॥

योगविभागस्तु । भानोरपत्यं भानवः । कृतसन्धेः किम् । सौत्थितिः । अकृतव्यूहपरिभाषया सावुत्थितिर्मा भूत् । समर्थपरिभाषया । नेह । वस्त्रमुपगोरपत्यं चैत्रस्य । प्रथमात्किम् । अपत्यवाचकात्षष्ठ्यर्थे मा भूत् । वाग्रहणाद्वाक्यमपि । दैवयज्ञीति सूत्रादन्यतरस्यांग्रहणानुवृत्तेः समासोऽपि । उपग्वपत्यम् । जातित्वान्ङीष् । औपगवी । आश्वपतः । दैत्यः । औत्सः । स्त्रैणः । पौंस्नः ॥

१०८८–षष्ठ्यन्त और कृतसन्धि (कृत है सन्धिकार्य्य जिसमें ऐसे) प्रथमपदबोध्य समर्थ प्रातिपदिकके उत्तर अपत्यार्थमें जो प्रत्यय उक्त हुए हैं वह सम्पूर्ण प्रत्यय और वक्ष्यमाण प्रत्यय विकल्प करके हों, जैसे–उपगोरपत्यम्, इस विग्रहमें औपगवः ।

आदिवृद्धि परत्वके कारण अन्त्यवृद्धि और उपधावृद्धि इन दोनों वृद्धियोंका बाध करतीहै ।

"तस्येदम् ४ । ३ । १२०" इससे "तस्यापत्यम् ४ । १ । ९२" इसके कार्यकी प्राप्ति ही है, फिर "तस्यापत्यम्" "अत इञ्" यह योगविभाग "तस्येदम् ४ । ३ । १२०" इस सूत्रके बाधकभूत "वृद्धाच्छः ४ । २ । ११४" इस सूत्रके बाधके निमित्त है । यदि कहो कि, "वृद्धाच्छः" इस सूत्रके शेषाधिकारविषयत्व होनेसे अपत्यार्थमें छकी प्राप्ति नहीं, फिर योगविभाग क्यों किया ? तो, सो नहीं कह सकते, क्योंकि, अदन्त दशरथादि शब्दसे इञ् प्रत्यय करनेपर दाशरथ्यादि शब्दसे अपत्य अर्थ उक्त होनेपर भी इकारान्त तथा उकारान्तादि हरि भान्वादि प्रकृतिकसे अपत्य अर्थ अनुक्त ही है, इसलिये उक्त (४ । २ । ११४) सूत्रकी हरेः अपत्यं, भानोरपत्यम्, इत्यादि विग्रहमें प्राप्ति हैही, यदि कोई कहै कि, "तस्यापत्यम्" इस सूत्रारम्भके सामर्थ्यसे ही "वृद्धाच्छः" इसका बाध होजाता फिर योगविभाग क्यों किया ? तो सो ठीक नहीं, कारण कि 'तस्यापत्यम्' इससे भिन्न अर्थमें "अत इञ्" यह प्रवृत्त न हो, इस कारण सूत्रारम्भ तो आवश्यक ही है ।

भानोरपत्यम्, ऐसा विग्रह कर ' भानवः ' इस स्थलमें अण् प्रत्ययके निमित्त योगविभाग कियाहै । कृतसन्धिसे न होनेपर ' सौत्थितिः ' ऐसा पद न होगा, किन्तु " अकृतव्यूह० " परिभाषासे ' सावुत्थितिः ' ऐसा पद होजायगा ।

" समर्थः० " से समर्थकी अनुवृत्ति होनेके कारण वस्त्रमुपगोः अपत्यं चैत्रस्य, इस विग्रहमें अण् प्रत्यय नहीं हुआ ।

"समर्थानां प्रथमाद्वा" इस सूत्रसे 'प्रथमात्' इस पदका ग्रहण करनेके कारण अपत्यवाचक शब्दके उत्तर षष्ठ्यर्थमें अण् प्रत्यय नहीं होताहै ।

वा शब्दके ग्रहणके कारण वाक्य भी होगा ।

"दैवयज्ञि० १२०१" इस सूत्रसे विकल्पकी अनुवृत्तिके कारण समास भी विकल्प करके होगा ।

उपग्वपत्यम्, इस विग्रहमें अण् प्रत्यय होकर जातित्वके कारण ङीष् करके 'औपगवी' पद सिद्ध हुआहै । ऐसे ही ' आश्वपतः । दैत्यः । औत्सः । स्त्रैणः । पौंस्नः' इत्यादि पद सिद्ध हुए ॥

१०८९ अपत्यं पौत्रप्रभृति गोत्रम् । ४ । १ । १६२ ॥

अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात् ॥

१०८९–अपत्यत्वसे विवक्षित पौत्रादिकी गोत्र संज्ञा हो ॥

१०९० जीवति तु वंश्ये युवा । ४ । १ । १६३ ॥

वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव न गोत्रसंज्ञम् ॥

१०९०–वंशमें पिता आदिके जीवित रहते पौत्रादिका जो चतुर्थादि अपत्य है, उसकी युव संज्ञा हो, गोत्र संज्ञा न हो ॥

१०९१ भ्रातरि च ज्यायसि । ४ । १ । १६४ ॥

ज्येष्ठे भ्रातरि जीवति कनीयान् चतुर्थादियुवा स्यात् ॥

१०९१–ज्येष्ठ भ्राताके जीवित रहते चतुर्थादि कनिष्ठकी अर्थात् कनिष्ठ पौत्रादिके अपत्यकी युव संज्ञा हो ॥

१०९२ वान्यस्मिन्त्सपिण्डे स्थविरतरे जीवति । ४ । १ । १६५ ॥

भ्रातुरन्यस्मिन्सपिण्डे स्थविरतरे जीवति पौत्रप्रभृतेरपत्यं जीवदेव युवसंज्ञं वा स्यात् । एकं जीवतिग्रहणमपत्यस्य विशेषणं द्वितीयं सपिण्डस्य । तरब्निर्देश उभयोरुत्कर्षार्थः । स्थानेन वयसा चोत्कृष्टे पितृव्ये मातामहे भ्रातरि वा जीवति । गार्ग्यस्यापत्यं गार्ग्यायणः । गार्ग्यो वा । स्थविरेति किम् । स्थानवयोन्यूने गार्ग्य एव । जीवतीति किम् । मृते मृतो वा गार्ग्य एव ॥ वृद्धस्य च पूजायामिति वाच्यम् ॥ * ॥ गोत्रस्यैव वृद्धसंज्ञा प्राचाम् । गोत्रस्य युवसंज्ञा पूजायां गम्यमानायाम् । तत्रभवान् गार्ग्या-

यणः । पूजेति किम् । गार्ग्यः ॥ यूनश्च कुत्सायां गोत्रसंज्ञेति वाच्यम् ॥ * ॥ गार्ग्यो जाल्मः । कुत्सेति किम् । गार्ग्यायणः ॥

१०९२–यदि भ्रातासे अन्य स्थविरतर सपिंड जीवित हो तो पौत्रादिके जीवित अपत्यकी अर्थात् चौथी पीढीवाले प्रपौत्र आदि सन्तानकी युव संज्ञा हो, गोत्र संज्ञा न हो । प्रथम 'जीवति' पद अपत्यका विशेषण है, दूसरा सपिंडका । दोनोंके उत्कर्षार्थमें तरप्प्रत्ययान्त करके निर्देश हुआ है । यदि स्थान और वयःक्रमसे उत्कृष्ट, पितृव्य और मातामहका भ्राता जीवित रहे तो पौत्रादिके अपत्यकी विकल्प करके युव संज्ञा हो । इस स्थलमें मातामहभ्राताके ऐसा कहनेसे मातृ-सपिंडका ग्रहण हुआहै, कहीं भ्राताका भी ग्रहण जानना, जैसे–गर्गस्यापत्यम्, इस विग्रहमें गार्ग्यायणः (फक् वा) । गार्ग्यः (यञ्) ।

स्थविरतर कहनेके कारण तद्भिन्न स्थलमें अर्थात् स्थान और वयःक्रमकी न्यूनताके स्थलमें 'गार्ग्यः' ऐसा होगा ।

जीवित पद कहाहै, जीवित न होनेपर अर्थात् स्थविर सपिंडकी मृत्यु हो, अथवा पौत्रादिका अपत्य मृत हो, तो 'गार्ग्यः' ऐसा होगा ।

पूजा अर्थ होनेपर वृद्धकी भी युव संज्ञा होगी, क्योंकि, प्राचीनोंके मतमें गोत्रकी ही वृद्ध संज्ञा है और पूज्य अर्थ होनेपर गोत्रकी युव संज्ञा है * जैसे–तत्रभवान् गार्ग्यायणः । पूज्य अर्थ न होनेपर उक्त संज्ञा नहीं होगी, जैसे–गार्ग्यः ।

कुत्सा अर्थात् निन्दा अर्थ होनेपर युवसंज्ञक प्रत्ययकी गोत्र संज्ञा हो * जैसे–गार्ग्यो जाल्मः । जिस स्थानमें निन्दा नहीं होगी, उस स्थानमें उक्त संज्ञा नहीं होगी, जैसे–गार्ग्यायणः ॥

१०९३ एको गोत्रे । ४ । १ । ९३ ॥

गोत्रे एक एवापत्यप्रत्ययः स्यात् । उपगोर्गोत्रापत्यम् औपगवः । गार्ग्यः । नाडायनः ॥

गोत्रे स्वैकोनसंख्यानां प्रत्ययानां परम्परा ।
यद्वा स्वद्व्यूनसंख्येभ्योऽनिष्टोत्पत्तिः प्रसज्यते १॥
अपत्यं पितुरेव स्यात्ततः प्राचामपीति च ।
मतभेदेन तद्धान्यै सूत्रमेतत्तथोत्तरम् ॥ २ ॥

पितुरेवापत्यमिति पक्षे हि उपगोस्तृतीये वाच्ये औपगवादिञ् स्यात् । चतुर्थे त्वजीवज्ज्येष्ठे मृतवंश्ये औपगवेः फक् । इत्थं फगिञोः परम्परायां मूलाच्छततमे गोत्रे एकोनशतं प्रत्ययाः स्युः । पितामहादीनामपीति मुख्यपक्षे तु तृतीये वाच्ये उपगोरणा इष्टे सिद्धेपि अण्णन्तादिञपि स्यात् । चतुर्थे फगिति फगिञोः परम्परायां शततमे गोत्रेऽष्टनवतेरनिष्टप्रत्ययाः स्युः । अतो नियमार्थमिदं सूत्रम् । एवमुत्तरसूत्रेप्यूह्यम् ॥

१०९३–गोत्रविषयमें एकमात्र अपत्यार्थक प्रत्यय हो, जैसे–उपगोर्गोत्रापत्यम्, इस विग्रहमें औपगवः । गार्ग्यः । नाडायणः ।

(गोत्रे स्वै०) यदि "एको गोत्रे" ऐसा सूत्र न किया होता तो गोत्रकी अपेक्षासे अपत्याधिकारमें जितने प्रत्यय हैं, उनमें एकको छोडकर जितने प्रत्ययोंकी परस्पर प्रसक्ति होती, अथवा गोत्रकी अपेक्षासे अपत्याधिकारमें जितने प्रत्यय हैं, उनमें दोको छोडकर संपूर्ण प्रत्यय होजाते, अर्थात् पिताको लेकर जितने उसके पुत्र पौत्रादिकी अपत्य संज्ञा हो, उतने ही अमरसिंहके मतमें और पिताके ऊर्ध्वतन तत्पुरुषको लेकर उनके पुत्र पौत्रादिकोंकी अपत्य संज्ञा हो, इस प्रकार अन्योंके मतमें प्रत्यय होते, ऐसे मतभेदके कारण, आदि पक्षमें प्रत्यय-समूहकी पारम्पर्यनिवृत्तिके निमित्त और द्वितीय पक्षमें गोत्रापेक्षासे दो ऊन प्रातिपदिकोंके उत्तर अनिष्ट प्रत्ययकी निवृत्तिके निमित्त "एको गोत्रे" इस प्रकार सूत्र लिखाहै । वृत्तिकार कारिकासे पूर्वोक्त अर्थ स्पष्ट करके लिखतेहैं, जैसे–जिस मतमें पिताको लेकर उसके पुत्रादिकी अपत्य संज्ञा हो, उस मतमें उपगुसे तृतीय होनेपर औपगव शब्दके उत्तर इञ् प्रत्यय होजाता, और चतुर्थ होनेपर मृतज्येष्ठविषयमें और मृतवंश्यविषयमें औपगवि शब्दके उत्तर फक् प्रत्यय होजाता; इस प्रकार फक् प्रत्यय और इञ् प्रत्ययके पारम्पर्यविषयमें मूलसे सौमें गोत्रसे एकोनशत प्रत्यय होजाते, यद्यपि जिस मुख्य मतमें पितामहको लेकर उसके पौत्रादिकी अपत्य संज्ञा होतीहै उस मतमें उपगु शब्दके उत्तर अण् प्रत्ययद्वारा इष्टसिद्धि होसकतीहै, तथापि अण् प्रत्ययान्तके उत्तर फिर इञ् प्रत्यय होजाता और चतुर्थ होनेपर फक् प्रत्यय होजाता, इस प्रकार फक् और इञ् प्रत्ययके पारम्पर्यविषयमें सौमें गोत्रमें ९८ अनिष्ट प्रत्यय होजाते, इनकी निवृत्तिके निमित्त पूर्वोक्त ("एको गोत्रे") सूत्र किया है, इस प्रकार उत्तर सूत्रका भी प्रयोजन जानना होगा ॥

१०९४ गोत्राद्यून्यस्त्रियाम् । ४ । १ । ९४ ॥

यून्यपत्ये गोत्रप्रत्ययान्तादेवापत्यप्रत्ययः स्यात् स्त्रियां तु न युवसंज्ञा । गर्गस्य युवाऽपत्यं गार्ग्यायणः । स्त्रियां गोत्रत्वादेक एव प्रत्ययः ॥

१०९४–युवापत्य अर्थमें यदि अपत्य प्रत्यय हो तो पहले गोत्ररूप सन्तान अर्थमें प्रत्यय हो, पीछे युवरूप सन्तान अर्थमें प्रत्यय हो, परन्तु स्त्रीलिङ्गमें युव संज्ञा न हो, जैसे–गर्गस्य युवा अपत्यम्, इस विग्रहमें गार्ग्यायणः (यञ्+फक्) । स्त्रीलिङ्गमें गोत्रत्वके कारण एकमात्र प्रत्यय होगा ॥

१०९५ अत इञ् । ४ । १ । ९५ ॥

अदन्तं यत्प्रातिपदिकं तत्प्रकृतिकात्षष्ठ्यन्तादिञ् स्यादपत्येऽर्थे । दाक्षिः ॥

१०९५–अकारान्त प्रातिपदिक यदि षष्ठ्यन्त हो तो उसके उत्तर अपत्य अर्थमें इञ् प्रत्यय हो, जैसे–दक्षस्यापत्यम्, इस विग्रहमें दक्ष+इञ्=दाक्षिः ॥

१०९६ बाह्वादिभ्यश्च । ४ । १ । ९६ ॥

बाहविः । औडुलोमिः । आकृतिगणोऽयम् ॥

१०९६–बाहु आदि शब्दके उत्तर अपत्यार्थमें इञ् प्रत्यय हो, जैसे–बाहोरपत्यम्, इस वाक्यमें बाहु+इञ्=बाहविः । उडुलोम्नोऽपत्यम्, इस विग्रहमें उडुलोमन्+इञ्=औडुलोमिः । यह आकृतिगण है ॥

१०९७ सुधातुरकङ् च । ४ । १ । ९७ ॥

चादिञ् । सुधातुरपत्यं सौधातकिः ॥ व्यासवरुडनिषादचण्डालबिम्बानां चेति वक्तव्यम् ॥ * ॥

१०९७–अपत्यार्थमें सुधातृ शब्दके अकङ् आदेश हो और सूत्रमें चकार होनेके कारण इञ् प्रत्यय भी हो, ङित्व होनेके कारण "ङिच्च" इससे अन्त्य (ऋ) के स्थानमें होगा, जैसे–सुधातुरपत्यम्, इस वाक्यमें सुधात्+अकङ्+इञ्=सौधातकिः ।

व्यास, वरुड, निषाद, चडाल और बिम्ब, इन संपूर्ण शब्दोंको अकङ् आदेश और इञ् प्रत्यय हो * ॥

१०९८ न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् । ७ । ३ । ३ ॥

पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः किंतु ताभ्यां पूर्वौ क्रमादैचावागमौ स्तः । वैयासकिः । वारुडकिरित्यादि ॥

१०९८–पदके अन्तस्थित यकार और वकारके परे स्वर वर्णको वृद्धि न हो, परन्तु यकार और वकारके पूर्वमें क्रमसे ऐच् (ऐ औ) का आगम हो, जैसे–व्यासस्यापत्यम्, इस विग्रहमें व्यास्+अकङ्+इञ्=वैयासकिः । वरुडस्यापत्यम्, इस विग्रहमें वरुड्+अकङ्+इञ्=वारुडकिः–इत्यादि । व्यास आदि प्रातिपदिकोंको अदन्त होनेसे इञ् तो होजाता पर अकङ् आदेश होनेके लिये १०९७ सूत्रमें वार्तिक पढाहै ॥

१०९९ गोत्रे कुञ्जादिभ्यश्च्फञ् ४।१।९८।

१०९९–गोत्र होनेपर कुञ्जादि शब्दके उत्तर अपत्य अर्थमें च्फञ् (फ) प्रत्यय हो । इञ्का अपवाद है * ॥

११०० व्रातच्फञोरस्त्रियाम् ५।३।११३॥

व्रातवाचिभ्यश्च्फञन्तेभ्यश्च स्वार्थे ञ्यः स्यान्न तु स्त्रियाम् । कौञ्जायन्यः । बहुत्वे तद्राजत्वाल्लुग्वक्ष्यते । ब्राध्नायन्यः । स्त्रियां कौञ्जायनी । गोत्रत्वेन जातित्वान्ङीष् । अनन्तरापत्ये कौञ्जिः ॥

११००–च्फञ्प्रत्ययान्त जो व्रातवाचक शब्द उसके उत्तर ञ्य(य) प्रत्यय हो, परन्तु स्त्रीलिङ्गमें नहीं हो, जैसे–कुञ्जस्य गोत्रापत्यम्, इस विग्रहमें कौञ्जायन्यः । बहुत्व विवक्षित होनेपर "तद्राजाचाणः" इस गणसूत्रसे लुक् हो, यह आगे कहेंगे । ब्रध्नस्यापत्यम्, इस विग्रहमें ब्राध्नायन्यः । स्त्रीलिङ्गमें गोत्रत्वके हेतु जातिवाचकके उत्तर ङीष् प्रत्यय होकर कौञ्जायनी । अनन्तर अपत्य होनेपर 'कौञ्जिः' ऐसा पद होगा ॥

११०१ नडादिभ्यः फक् । ४ । १ । ९९ ॥

गोत्र इत्येव । नाडायनः । चारायणः । अनन्तरो नाडिः ॥

११०१–गोत्र होनेपर षष्ठ्यन्त नडादि शब्दके उत्तर अपत्य अर्थमें फक् प्रत्यय हो, जैसे–नडस्य गोत्रापत्यम्, इस विग्रहमें नाडायनः । चरस्य गोत्रापत्यम्, इस वाक्यमें चारायणः । अनन्तरापत्य होनेपर 'नाडिः' ऐसा पद होगा ॥

११०२ हरितादिभ्योऽञः ।४।१।१००॥

एभ्योऽञन्तेभ्यो यूनि फक् । हारितायनः । इह गोत्राधिकारेपि सामर्थ्याद्यून्ययम् । न हि गोत्रादपरो गोत्रप्रत्ययः । बिदाद्यन्तर्गणो हरितादिः ॥

११०२–अञ्प्रत्ययान्त हरितादि शब्दके उत्तर युवापत्य अर्थमें फक् प्रत्यय हो, जैसे–हरितस्य युवापत्यम्, इस विग्रहमें हारितायनः । इस सूत्रमें 'गोत्रे' इसका अधिकार होनेपर भी सामर्थ्यके कारण युवापत्यार्थमें फक् प्रत्यय हुआहै, यह फक् गोत्रापत्यार्थ प्रत्यय नहीं है, क्योंकि, गोत्रापत्यप्रत्ययके उत्तर अन्य गोत्रार्थ प्रत्यय नहीं होताहै । हरितादि बिदादि गण (११०६) के अन्तर्गत है ॥

११०३ यञिञोश्च । ४ । १ । १०१ ॥

गोत्रे यौ यञिञौ तदन्तात् फक् स्यात् । अनातीत्युक्तेरापत्यस्येति यलोपो न । गार्ग्यायणः । दाक्षायणः ॥

११०३–गोत्रार्थ विषयमें जो यञ् और इञ् प्रत्यय तदन्त प्रातिपदिकके उत्तर फक् प्रत्यय हो, आकार परे रहते अपत्यार्थ प्रत्ययके यकारका लोप न हो, ऐसी उक्तिके कारण "आपत्यस्य० १०८२" इस सूत्रसे यकारका लोप न हुआ। यञन्त जैसे–गार्ग्यायणः । इञन्त जैसे–दाक्षायणः । यञन्तसे इञ्का और इञन्तसे अण्का बाध समझना चाहिये ॥

---

१ यहां च्फञ् प्रत्ययमें चकार अनुबन्ध "व्रातच्फञोः०" इस सूत्रमें संबन्ध होनेके और ञकार वृद्धिके लिये है और इन च्फञ्प्रत्ययान्त प्रातिपदिकोंसे स्वार्थमें ञ्य प्रत्यय होजाताहै, उस ञ्य प्रत्ययको तद्राज संज्ञा होनेसे बहुवचनमें लुक् होजाताहै । विकल्प, समर्थोंका, इन दोका अधिकार छः पादमें और तद्धित संज्ञाका अधिकार पंचमाध्यायपर्यंत तथा षष्ठी समर्थोंका अधिकार इसी पादमें जाताहै । इन सबका संबन्ध प्रतिसूत्रमें समझना चाहिये ॥

१ इस सूत्रमें गोत्रापत्यकी विवक्षा इस कारण नहीं है कि, हारितादिकोंसे प्रथम गोत्रापत्यमें अञ्विधान है, फिर दूसरा प्रत्यय गोत्रापत्यमें नहीं होसकता, किन्तु युवापत्यमें होगा ॥

११०४ शरद्वच्छुनकदर्भाद्भृगुवत्साग्रायणेषु । ४ । १ । १०२ ॥

गोत्रे फक् । अञिञोरपवादः । आद्यौ बिदादी । शारद्वतायनो भार्गवश्चेत् । शारद्वतोऽन्यः । शौनकायनो वात्स्यश्चेत् । शौनकोऽन्यः । दार्भायण आग्रायणश्चेत् । दार्भिरन्यः ॥

११०४-गोत्रार्थमें भार्गवार्थ होनेपर शरद्वत् शब्दके उत्तर, वात्स्य अर्थ होनेपर शुनक शब्दके उत्तर और आग्रायण अर्थ होनेपर दर्भ शब्दके उत्तर फक् प्रत्यय हो । यह फक् प्रत्यय, अञ् और इञ् प्रत्ययका अपवाद है । प्रथम दो शब्द अर्थात् शरद्वत् और शुनक शब्द बिदादि हैं, जैसे-शारद्वतायनः, अर्थात् भार्गवः । अन्य अर्थ होनेपर 'शारद्वतः' ऐसा होगा । शौनकायनः, अर्थात् वात्स्यः । अन्यार्थमें शौनकः । दार्भायणः, अर्थात् आग्रायणः । अन्यार्थमें 'दार्भिः' ऐसा होगा ।

११०५ द्रोणपर्वतजीवन्तादन्यतरस्याम् । ४ । १ । १०३ ॥

एभ्यो गोत्रे फग् वा । द्रौणायनः । द्रौणिः । पार्वतायनः । पार्वतिः । जैवन्तायनः। जैवन्तिः। अनादिरिह द्रोणः । अश्वत्थाम्न्यनन्तरे तूपचारात् ॥

११०५-गोत्रार्थमें द्रोण, पर्वत और जीवन्त शब्दके उत्तर विकल्प करके फक् प्रत्यय हो । इञ्का अपवाद है, जैसे-द्रौणायनः । विकल्पपक्षमें द्रौणिः । पार्वतायनः । पक्षमें=पार्वतिः । जैवन्तायनः । पक्षमें जैवन्तिः । इस सूत्रमें द्रोण शब्द अनादि है सादि नहीं, अर्थात् भारतमें प्रसिद्ध जो द्रोण शब्द वह सादि है, और यह अनादि है, तो अश्वत्थामारूप अनन्तर अपत्यार्थमें 'द्रोणायनः' पदकी उक्ति कैसी ? समाधान करते हैं कि, वह उपचाराधीन (लाक्षणिक पद) है ।

११०६ अनृष्यानन्तर्ये बिदादिभ्योऽञ् । ४ । १ । १०४ ॥

एभ्योऽञ् गोत्रे ये त्वत्राऽनृषयस्तेभ्य आनन्तर्ये। सूत्रे स्वार्थे ष्यञ् । बिदस्य गोत्रापत्यं बैदः। अनन्तरो बैदिः । बाह्वादेराकृतिगणत्वादिञ् । पुत्रस्यापत्यं पौत्रः । दौहित्रः ॥

११०६-ऋषिवाचक जो बिदादि शब्द उसके उत्तर गोत्रापत्य अर्थमें और ऋषिवाचकसे भिन्न जो बिदादि शब्द उसके उत्तर अनन्तरापत्य अर्थमें अञ् प्रत्यय हो । सूत्रमें 'आनन्तर्ये' इसमें स्वार्थमें ष्यञ् प्रत्यय हुआहै । जैसे-बिदस्य गोत्रापत्यम्, इस विग्रहमें 'बैदः' यह पद सिद्ध हुआ है । जिस स्थानमें अनन्तर अपत्य होगा उस स्थानमें 'बैदिः' ऐसा होगा, इस स्थानमें बाह्वादिके आकृतिगणत्वके कारण इञ् प्रत्यय हुआ । पुत्रस्यापत्यम्, इस विग्रहमें पौत्रः । दुहितुरपत्यम्, इस वाक्यमें दौहित्रः-इत्यादि * ॥

११०७ गर्गादिभ्यो यञ् । ४ । १ । १०५ ॥

गोत्र इत्येव । गार्ग्यः । वात्स्यः ॥

११०७-गोत्रापत्य अर्थमें गर्गादि शब्दके उत्तर यञ् प्रत्यय हो, जैसे-गार्ग्यः । वात्स्यः ॥

११०८ यञञोश्च । २ । ४ । ६४ ॥

गोत्रे यद्यञन्तमञन्तं च तदवयवयोरेतयोर्लुक् स्यात्तत्कृते बहुत्वे न तु स्त्रियाम् । गर्गाः । वत्साः । बिदाः । ऊर्वाः । तत्कृते इति किम् । प्रियगार्ग्याः । स्त्रियां तु गार्ग्यः स्त्रियः । गोत्रे किम् । द्वैप्याः । औत्साः । प्रवराध्यायप्रसिद्धमिह गोत्रम् । तेनेह न । पौत्राः । दौहित्राः ॥

११०८-तत्कृत बहुत्व अर्थ होनेपर, गोत्रविषयमें जो यञ्प्रत्यायान्त और अञ्प्रत्ययान्त प्रातिपदिक तदवयवीभूत उक्त प्रत्ययका अर्थात् यञ् और अञ् प्रत्ययका लुक् हो, परन्तु स्त्रीलिङ्गमें न हो, जैसे-गर्गाः । वत्साः । बिदाः । ऊर्वाः ।

जिस स्थानमें तत्कृत बहुत्व न होगा, उस स्थानमें यञ् प्रत्ययका लोप नहीं होगा, जैसे-प्रियगार्ग्याः ।

स्त्रीलिङ्गमें तो 'गार्ग्यः स्त्रियः' ऐसा पद होगा ।

गोत्रसे भिन्न अर्थमें द्वैप्याः । औत्साः ।

इस सूत्रमें प्रवराध्यायप्रसिद्ध गोत्र जानना चाहिये, इस कारण 'पौत्राः, दौहित्राः' इस स्थानमें अञ् प्रत्ययका लुक् नहीं हुआ ॥

११०९ मधुबभ्र्वोर्ब्राह्मणकौशिकयोः । ४ । १ । १०६ ॥

गोत्रे यञ् । माधव्यो ब्राह्मणः । माधवोऽन्यः। बाभ्रव्यः कौशिक ऋषिः । बाभ्रवोऽन्यः । बभ्रुशब्दस्य गर्गादिपाठात्सिद्धेपि नियमार्थमिदम् । गर्गादिपाठफलं तु लोहितादिकार्यार्थम् । बाभ्रव्यायणी ॥

११०९-ब्राह्मण और कौशिक अर्थ होनेपर क्रमसे मधु और बभ्रु शब्दके उत्तर गोत्रविषयमें यञ् प्रत्यय हो, जैसे-माधव्यो ब्राह्मणः, ब्राह्मण न होनेपर 'माधवः' ऐसा होगा । बाभ्रव्यः, अर्थात् कौशिक ऋषि । कौशिक न होनेपर 'बाभ्रवः' ऐसा होगा ।

बभ्रु शब्दका गर्गादिके मध्यमें पाठ होनेके कारण यद्यपि यञ् प्रत्यय सिद्ध ही है, तथापि यह सूत्रकरण केवल नियमार्थ है अर्थात् बभ्रु शब्दसे कौशिक अर्थ होनेपर ही यञ् प्रत्यय हो अन्यार्थमें नहीं हो, ऐसे नियमके निमित्त है, लोहितादि

---

१ इस प्रकरणमें तीन प्रकारके अपत्य जानने चाहिये-गोत्रापत्य, युवापत्य और अनन्तरापत्य,इनमें गोत्रापत्य और युवापत्यका आगे व्याख्यान कियाहै, अनन्तरापत्य पिताकी अपेक्षामें पुत्रको कहतेहैं, जिसमें कुछ अन्तर नहीं होता ॥

कार्यके निमित्त गर्गादिमें पाठकी आवश्यकता है, जैसे- ' बाभ्रव्यायणी ' यह गर्गादिमें पाठ होनेसे स्त्रीलिंङ्गमें हुआ है ॥

१११० कपिबोधादाङ्गिरसे।४।१।१०७॥

गोत्रे यञ् स्यात् । काप्यः । बौध्यः । आङ्गिरसे किम् । कापेयः । बौधिः ॥

१११०-गोत्रविषयमें आङ्गिरस अर्थ होनेपर कपि और बोध शब्दके उत्तर यञ् प्रत्यय हो, जैसे-काप्यः । बौध्यः । जिस स्थानमें आङ्गिरस अर्थ नहीं होगा, उस स्थानमें 'कापेयः, बौधः' ऐसे पद होंगे ॥

११११ वतण्डाच्च । ४ । १ । १०८ ॥

आंगिरस इत्येव । वातण्ड्यः । अनांगिरसे तु गर्गादौ शिवादौ च पाठाद्यञणौ । वातण्ड्यः । वातण्डः ॥

११११-आङ्गिरस अर्थ होने पर वतण्ड शब्दके उत्तर यञ् प्रत्यय हो, जैसे-वातण्ड्यः । जिस स्थानमें आङ्गिरस अर्थ नहीं होगा, उस स्थानमें वतण्ड शब्दसे गर्गादिके मध्यमें और शिवादिके मध्यमें पाठ होनेके कारण यञ् और अण् यह दोनों प्रत्यय होंगे, जैसे-वातण्ड्यः । वातण्डः ॥

१११२ लुक् स्त्रियाम् । ४ । १ ।१०९॥

वतण्डाच्चेति विहितस्य लुक् स्यात् स्त्रियाम् । शार्ङ्गरवादित्वात् ङीन् । वतण्डी । अनांगिरसे तु वातण्ड्यायनी । लोहितादित्वात् ष्फः । अणि तु वातण्डी। ऋषित्वाद्वक्ष्यमाणः ष्यङ् न॥

१११२-"वतण्डाच्च११११" इस सूत्रसे विहित जो स्त्रीलिङ्गमें यञ् प्रत्यय, उसका लुक् हो । शार्ङ्गरवादित्वके कारण ङीन् प्रत्यय होकर ' वतण्डी ' पद सिद्ध हुआ । आङ्गिरस न होनेपर ' वातण्ड्यायनी ' ऐसा पद होगा, इस स्थानमें लोहितादित्वके कारण ष्फ प्रत्यय हुआहै । अण् प्रत्यय करनेपर ' वातण्डी ' ऐसा पद होगा, इस स्थानमें ऋषित्वके कारण वक्ष्यमाण ष्यङ् प्रत्यय नहीं हुआ ॥

१११३ अश्वादिभ्यः फञ्।४।१।११०॥

गोत्रे । आश्वायनः ॥ पुंसि जाते ॥ * ॥ पुंसीति तु प्रकृतिविशेषणम् । जातस्य गोत्रापत्यं जातायनः । पुंसि इति किम् । जाताया अपत्यं जातेयः ॥

१११३-गोत्र होनेपर अश्वादि शब्दके उत्तर फञ् प्रत्यय हो, जैसे-आश्वायनः ।

(पुंसि जाते *) इस गणसूत्रमें 'पुंसि' यह पद प्रकृतिका विशेषण है । पुंलिङ्ग जात शब्दके उत्तर गोत्र होनेपर फञ् प्रत्यय हो, जैसे-जातस्य गोत्रापत्यम्, इस विग्रहमें जातायनः । जिस स्थानमें पुंलिङ्ग जात शब्द न होगा, उस स्थानमें जातायाः अपत्यम्, इस विग्रहमें ' जातेयः ' ऐसा पद होगा ॥

१११४ भर्गात्त्रैगर्ते । ४ । १ । १११ ॥

गोत्रे फञ् । भार्गायणस्त्रैगर्तः । भार्गिरन्यः॥

१११४-गोत्रविषयमें त्रैगर्त अर्थ होनेपर भर्ग शब्दके उत्तर फञ् प्रत्यय हो, जैसे-भार्गायणः,अर्थात् त्रैगर्त। त्रैगर्तसे भिन्न अर्थ होनेपर ' भार्गिः ' ऐसा पद होगा, इसमें इञ् प्रत्यय हुआहै ॥

१११५ शिवादिभ्योऽण् ।४।१।११२ ॥

गोत्रे इति निवृत्तम् । शिवस्यापत्यं शैवः । गांगः । पक्षे तिकादित्वात्फिञ् । गांगायनिः । शुभ्रादित्वाड्ढक् । गांगेयः ॥

१११५-इस स्थलमें गोत्र अर्थकी निवृत्ति हुई, शिवादि शब्दोंके उत्तर अण् प्रत्यय हो, जैसे-शिवस्यापत्यम्, इस विग्रहमें शिव+अण्=शैवः । गाङ्गः । पक्षमें तिकादित्वके कारण फिञ् प्रत्यय होगा, जैसे-गाङ्गायनिः । शुभ्रादि गंगाके उत्तर ढक् प्रत्यय करके 'गांगेयः' यह पद सिद्ध हुआहै ॥

१११६ अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः । ४ । १ । ११३ ॥

अवृद्धेभ्यो नदीमानुषीनामभ्योऽण् स्यात् । ढकोऽपवादः । यामुनः । नार्मदः । चिन्तिताया अपत्यं चैन्तितः । अवृद्धाभ्यः किम् । वासवदत्तेयः । नदी इत्यादि किम् । वैनतेयः । तन्नामिकाभ्यः किम् । शोभनाया अपत्यं शौभनेयः॥

१११६-वृद्धसंज्ञकसे भिन्न नदी और मानुषीनामक शब्दोंके उत्तर अण् प्रत्यय हो, यह अण् प्रत्यय ढक् प्रत्ययका अपवादक है, जैसे-यामुनः । नार्म्मदः । चिन्तितायाः अपत्यम्, इस विग्रहमें चैन्तितः ।

वृद्धसंज्ञकसे भिन्न न होनेपर अण् प्रत्यय नहीं होगा, जैसे-वासवदत्तेयः ।

नदी और मानुषी न होनेपर अण् नहीं होगा, जैसे-वैनतेयः ॥

नदी और मानुषीनामक न होनेपर भी अण् नहीं होगा, जैसे-शोभनायाः अपत्यम्, इस विग्रहमें 'शौभनेयः' यहां अण् न होनेपर ढक् हुआ ॥

१११७ ऋष्यन्धकवृष्णिकुरुभ्यश्च । ४ । १ । ११४ ॥

ऋषयो मन्त्रद्रष्टारः । वासिष्ठः । वैश्वामित्रः । अन्धकेभ्यः। श्वाफल्कः । वृष्णिभ्यः । वासुदेवः । आनिरुद्धः । शौरिः इति तु बाह्वादित्वादिञ् । कुरुभ्यः । नाकुलः । साहदेवः । इञ् एवायमपवादः, मध्येऽपवादन्यायात् । अत्रिशब्दात्तु परत्वाड्ढक् । आत्रेयः ॥

१११७-ऋषिवाचक, अन्धकवाचक, वृष्णिवाचक और कुरुवाचक शब्दोंके उत्तर अण् प्रत्यय हो, मन्त्र देखनेवालोंको ऋषि कहतेहैं, जैसे-वशिष्ठ+अण्=वाशिष्ठः । विश्वामित्र+अण्=

वैश्वामित्रः। अन्धकवाचक जैसे-श्वाफल्कः। वृष्णिवाचक जैसे-वासुदेवः। आनिरुद्धः। 'शौरिः' यह पद तो बाह्वादित्वके कारण इञ् प्रत्यय होकर सिद्ध हुआहै। कुरुवाचक जैसे-नाकुलः। साहदेवः। यह सूत्र मध्येऽपवादन्यायके कारण इञ्का ही अपवादक होताहै, इसलिये अत्रि शब्दके उत्तर परत्वके कारण ढक् प्रत्यय करके 'आत्रेयः' यह पद सिद्ध हुआहै॥

११९८ मातुरुत्संख्यासम्भद्रपूर्वायाः। ४।१।११५॥

संख्यादिपूर्वस्य मातृशब्दस्योदादेशः स्यादण् प्रत्ययश्च। द्वैमातुरः। षाण्मातुरः। साम्मातुरः। भाद्रमातुरः। आदेशार्थं वचनम्। प्रत्ययस्तूत्सर्गेण सिद्धः। स्त्रीलिंगनिर्देशोऽर्थापेक्षः। तेन धान्यमातुर्न। संख्येति किम्। सौमात्रः। शुभ्रादित्वाद्वैमात्रेयः॥

११९८-संख्यापूर्वक, सम्पूर्वक और भद्रपूर्वक जो मातृ शब्द उसको उत् आदेश हो और उससे अण् प्रत्यय भी हो, जैसे-द्वैमातुरः। षाण्मातुरः। साम्मातुरः। भाद्रमातुरः। यह सूत्र केवल उत् आदेशके निमित्त ही है, अण् प्रत्यय तो "तस्यापत्यम्" इस सूत्रसे ही सिद्ध है। इस सूत्रमें अर्थकी अपेक्षासे स्त्रीलिङ्ग निर्देश कियाहै, इससे यह फल हुआ कि, धान्यमातृ शब्दको उत् नहीं होगा। संख्या, सम्, और भद्रपूर्वक न होनेपर, जैसे-सौमात्रः। शुभ्रादित्वके कारण ढक् प्रत्यय करके 'वैमात्रेयः' ऐसा पद होगा॥

१११९ कन्यायाः कनीन च ४।१।११६॥

ढकोऽपवादोऽण्। तत्सन्नियोगेन कनीनादेशश्च। कानीनो व्यासः कर्णश्च। अनूढाया एवापत्यमित्यर्थः॥

१११९-कन्या शब्दसे ढक् प्रत्ययका अपवाद अर्थात् विशेषक अण् प्रत्यय हो और इस अण् प्रत्ययके सन्नियोगसे कन्या शब्दके स्थानमें कनीन आदेश भी हो, जैसे-कानीनो व्यासः कर्णश्च, अविवाहितावस्थामें उत्पन्न हुए पुत्रको 'कानीन' कहतेहैं॥

११२० विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु। ४।१।११७॥

अपत्येऽण्। वैकर्णो वात्स्यः। वैकर्णिरन्यः। शौङ्गो भारद्वाजः। शौङ्गिरन्यः। छागल आत्रेयः। छागलिरन्यः। केचित्तु शुंगेत्याबन्तं पठन्ति। तेषां ढक् प्रत्युदाहरणम्। शौङ्गेयः॥

११२०-विकर्ण, शुङ्ग, छगल, इन शब्दोंके उत्तर यथाक्रम वात्स्य, भारद्वाज और आत्रेय अर्थ होनेपर अपत्य अर्थमें अण् प्रत्यय हो, जैसे-वैकर्णः अर्थात् वात्स्य। अन्य अर्थमें वैकर्णिः। शौङ्गः, अर्थात् भारद्वाज। अन्य अर्थमें शौङ्गिः। छागलः, अर्थात् आत्रेय। अन्य अर्थमें छागलिः। सूत्रमें कोई २ 'शुङ्गा' ऐसा आबन्त पढतेहैं, उनके मतमें ढक् प्रत्ययान्त प्रत्युदाहरण होगा, जैसे-शौङ्गेयः॥

११२१ पीलाया वा। ४।१।११८॥

तन्नामिकाणं बाधित्वा द्व्यच इति ढकि प्राप्ते पक्षेऽण् विधीयते। पीलाया अपत्यं पैलः। पैलेयः॥

११२१-पीला शब्दके उत्तर विकल्प करके अण् प्रत्यय हो। "अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः" इस सूत्रसे जो अण् प्रत्ययकी प्राप्ति हुई थी, उसको बाध करके "द्व्यचः ११२४" इस सूत्रसे ढक् प्रत्ययकी प्राप्ति होनेपर इस सूत्रसे पक्षमें अण्का विधान करतेहैं, जैसे-पीलाया अपत्यम्, इस विग्रहमें पैलः। विकल्प पक्षमें पैलेयः॥

११२२ ढक् च मण्डूकात्। ४।१।११९॥

चादण्। पक्षे इञ्। माण्डूकेयः। माण्डूकः। माण्डूकिः॥

११२२-मण्डूक शब्दके उत्तर विकल्पकरके ढक् प्रत्यय हो और चकारनिर्देशके कारण अण् प्रत्यय हो, विकल्प पक्षमें इञ् प्रत्यय होगा, जैसे-माण्डूकेयः, माण्डूकः, माण्डूकिः॥

११२३ स्त्रीभ्यो ढक्। ४।१।१२०॥

स्त्रीप्रत्ययान्तेभ्यो ढक् स्यात्। वैनतेयः। बाह्वादित्वात्सौमित्रिः। शिवादित्वात्सापत्नः॥

११२३-स्त्रीप्रत्ययान्त शब्दके उत्तर अपत्य अर्थमें ढक् प्रत्यय हो, जैसे-विनताया अपत्यम्=वैनतेयः बाह्वादित्वके कारण इञ् प्रत्यय करके 'सौमित्रिः' ऐसा पद हुआ। शिवादित्वके कारण अण् प्रत्यय करके 'सापत्नः' यह पद सिद्ध हुआहै॥

११२४ द्व्यचः। ४।१।१२१॥

द्व्यचः स्त्रीप्रत्ययान्तादपत्ये ढक्। तन्नामिकाऽणोपवादः। दात्तेयः। पार्थ इत्यत्र तु तस्येदमित्यण्॥

११२४-दो अचोंसे युक्त जो स्त्रीप्रत्ययान्त शब्द, उसके उत्तर अपत्य अर्थमें ढक् प्रत्यय हो। यह सूत्र "अवृद्धाभ्यः०" इससे विहित अण्का विशेषक है, जैसे-दात्तेयः। 'पार्थः' इस स्थलमें तो "तस्येदम् १५००" इस सूत्रसे अण् प्रत्यय हुआहै॥

११२५ इतश्चानिञः। ४।१।१२२॥

इकारान्ताद् द्व्यचोऽपत्ये ढक् स्यात् न त्विञन्तात्। दौलेयः। नैधेयः॥

११२५-दो अचोंसे युक्त जो इकारान्त शब्द, उसके उत्तर अपत्य अर्थमें ढक् प्रत्यय हो, परन्तु इञ्प्रत्ययान्त होनेपर नहीं हो, जैसे-दोलि+ढक्=दौलेयः। नैधेयः॥

११२६ शुभ्रादिभ्यश्च। ४।१।१२३॥

ढक् स्यात्। शुभ्रस्यापत्यं शौभ्रेयः॥

११२६-अपत्य अर्थमें शुभ्रादि शब्दके उत्तर ढक् प्रत्यय हो, जैसे-शुभ्रस्यापत्यम्, इस विग्रहमें शौभ्रेयः ॥

११२७ विकर्णकुषितकात्काश्यपे । ४ । १ । १२४ ॥

अपत्ये ढक् । वैकर्णेयः। कौषीतकेयः । अन्यो वैकर्णिः । कौषीतकिः ।

११२७-काश्यप अर्थ होनेपर विकर्ण और कुषीतक शब्दके उत्तर अपत्य अर्थमें ढक् प्रत्यय हो, जैसे-वैकर्णेयः । कौषीतकेयः । अन्य अर्थ होनेपर ढक् प्रत्यय नहीं होगा, जैसे-वैकर्णिः । कौषीतकिः ॥

११२८ भ्रुवो वुक् च । ४ । १ । १२५॥

चात् ढक् । भ्रौवेयः ॥

११२८-भ्रू शब्दको वुक्का आगम और चकारसे ढक् प्रत्यय हो, जैसे-भ्रौवेयः ॥

११२९ प्रवाहणस्य ढे । ७ । ३ । १२९॥

प्रवाहणशब्दस्योत्तरपदस्याऽचामादेरचो वृद्धिः पूर्वपदस्य तु वा ढे परे । प्रवाहणस्यापत्यं प्रावाहणेयः । प्रवाहणेयः ॥

११२९-ढ प्रत्यय परे रहते प्रवाहण शब्दके उत्तरपदके आद्यच्को नित्य वृद्धि हो और पूर्वपदके आद्यच्को विकल्प करके वृद्धि हो, जैसे-प्रवाहणस्यापत्यम्, इस वाक्यमें प्रावाहणेयः, प्रवाहणेयः ॥

११३० तत्प्रत्ययस्य च । ७ । ३।२०॥

ढान्तस्य प्रवाहणस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा । प्रवाहणेयस्यापत्यं प्रावाहणेयिः । प्रवाहणेयिः । बाह्यतद्धितनिमित्ता वृद्धिर्ढाश्रयेण विकल्पेन बाधितुं न शक्यत इति सूत्रारम्भः ॥

११३०-ढप्रत्ययान्त प्रवाहण शब्दके उत्तरपदके आद्यच्को वृद्धि हो, और पूर्वपदको विकल्प करके वृद्धि हो, जैसे-प्रवाहणेयस्यापत्यम्, इस विग्रहमें प्रावाहणेयिः, प्रवाहणेयिः । बाह्यतद्धितनिमित्त जो वृद्धि उसको ढप्रत्ययाश्रित विकल्प बाधित नहीं कर सकता, इस कारण यह सूत्रारम्भ हुआ है ॥

११३१ कल्याण्यादीनामिनङ् । ४ । १ । १२६ ॥

एषामिनङादेशः स्यात् ढक् च । काल्याणिनेयः । बान्धकिनेयः ॥

११३१-कल्याणी आदि शब्दोंको इनङ् आदेश और चकारसे ढक् प्रत्यय हो, जैसे-कल्याण्+इनङ्+ढक्=काल्याणिनेयः । बान्धकिनेयः ॥

११३२ कुलटाया वा । ४ । १ । १२७॥

इनङ्मात्रं विकल्प्यते ढक् तु नित्यः पूर्वेणैव। कौलटिनेयः । कौलटेयः । सती भिक्षुकयत्र कुलटा । या तु व्यभिचारार्थं कुलान्यटति तस्याः क्षुद्राभ्यो वेति पक्षे ढ्रक् कौलटेरः ॥

११३२-कुलटा शब्दको विकल्प करके इनङ् आदेश हो, इस सूत्रसे इनङ् आदेशमात्रका विकल्पविधान करतेहैं, ढक् प्रत्यय तो पूर्व सूत्रसे ही नित्य होगा, जैसे-कुलट्+इनङ्+ढक्=कौलटिनेयः । कुलटा+ढक्=कौलटेयः । इस स्थलमें कुलटा शब्दसे सती भिक्षुकी जानना,परन्तु जो स्त्री व्यभिचारके निमित्त अपने कुलको त्याग कर गमन करे उससे अपत्यअर्थमें "क्षुद्राभ्यो वा" इस सूत्रसे ढ्रक् प्रत्यय होगा, जैसे-कौलटेरः ॥

११३३ हृद्भगसिन्ध्वन्ते पूर्वपदस्य च । ७ । ३ । १९ ॥

हृदाद्यन्ते पूर्वोत्तरपदयोरचामादेरचो वृद्धिर्ञिति णिति किति च । सुहृदोऽपत्यं सौहार्दः । सुभगाया अपत्यं सौभागिनेयः । सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवः तेषु भवः साक्तुसैन्धवः ॥

११३३-ञित्, णित् और कित् प्रत्यय परे रहते हृद्, भग और सिन्धुशब्दान्त प्रातिपदिकमें पूर्वपद और उत्तरपदके अचोंके मध्यमें आद्यच्को वृद्धि हो, जैसे-सुहृदोऽपत्यम्, इस विग्रहमें सौहार्दः । सुभगाया अपत्यम्, इस वाक्यमें सौभागिनेयः । सक्तुप्रधानाः सिन्धवः, इस विग्रहमें सक्तुसिन्धवः । सक्तसिन्धुषु भवः, इस विग्रहमें साक्तुसैन्धवः ॥

११३४ चटकाया ऐरक् ।४।१।१२८॥

चटकस्येति वाच्यम् ॥ * ॥ लिङ्गविशिष्टपरिभाषया स्त्रिया अपि । चटकस्य चटकाया वा अपत्यं चाटकैरः॥ स्त्रियामपत्ये लुग्वक्तव्यः॥*॥ तयोरेव स्त्र्यपत्यं चटका । अजादित्वाट्टाप् ॥

११३४-चटका शब्दके उत्तर ऐरक् प्रत्यय हो। वार्त्तिककार इस स्थलमें कहतेहैं कि-

(चटकस्येति वाच्यम् *) 'चटक' इस पुंलिङ्ग शब्दके उत्तर ऐरक् प्रत्यय हो ऐसा कहना चाहिये। लिङ्गविशिष्ट परिभाषासे स्त्रीलिङ्ग चटका शब्दसे भी ऐरक् प्रत्यय होगा, जैसे-चटकस्य, चटकाया वा अपत्यम्, इस विग्रहमें चाटकैरः ।

(स्त्रियामपत्ये लुग् वक्तव्यः *) स्त्री सन्तान हो तो ऐरक् प्रत्ययका लुक् हो । तयोरेव स्त्र्यपत्यम्, इस विग्रहमें 'चटका' यह पद सिद्ध हुआ, इस स्थानमें अजादित्वके कारण टाप् हुआ है ।

११३५ गोधाया ढ्रक्। ४ । १ ।१२९॥

गौधेरः । शुभ्रादित्वात्पक्षे ढक् । गौधेयः ॥

११३५-गोधा शब्दके उत्तर ढ्रक् प्रत्यय हो, जैसे-गौधेरः। पक्षमें शुभ्रादित्वके कारण ढक् प्रत्यय करके 'गौधेयः' ऐसा पद सिद्ध होगा ॥

११३६ आरगुदीचाम् ।४।१।१३०॥

गौधारः । रका सिद्धे आकारोच्चारणमन्यतो

विधानार्थम् । जडस्यापत्यं जाडारः । पण्डस्यापत्यं पाण्डारः ॥

११३६–उत्तरदेशीय पण्डितोंके मतमें गोधा शब्दके उत्तर आरक् प्रत्यय हो, जैसे–गौधारः । रक् प्रत्यय करनेसे ही यह पद सिद्ध होता तो आरक् ऐसे आकारयुक्त उच्चारणकी क्या आवश्यकता थी ? तो उसका अभिप्राय कहतेहैं कि, अन्य स्थलमें विधानके निमित्त आकारयुक्त करके कहाहै, जैसे–जडस्यापत्यम्, इस विग्रहमें जाडारः । पण्डस्यापत्यम्, इस वाक्यमें पाण्डारः ॥

११३७ क्षुद्राभ्यो वा । ४ । १ । १३१ ॥

अङ्गहीनाः शीलहीनाश्च क्षुद्रास्ताभ्यो वा ढ्रक् । पक्षे ढक् । काणेरः । काणेयः । दासेरः । दासेयः ॥

११३७–जो अङ्गहीन और शीलहीन हैं, उन स्त्रियोंको क्षुद्रा कहतेहैं, उनके उत्तर विकल्पकरके ढ्रक् प्रत्यय हो, विकल्प पक्षमें ढक् होगा, जैसे–काणेरः, काणेयः । दासेरः, दासेयः ॥

११३८ पितृष्वसुश्छण् । ४ । १ । १३२ ॥

अणोपवादः । पैतृष्वस्रीयः ॥

११३८–पितृष्वसृ शब्दके उत्तर छण् प्रत्यय हो, यह छण् प्रत्यय अण् प्रत्ययका अपवाद अर्थात् विशेषक है, जैसे–पैतृष्वस्रीयः ॥

११३९ ढकि लोपः । ४ । १ । १३३ ॥

पितृष्वसुरन्तलोपः स्याड्ढकि । अत एव ज्ञापकात् ढक् । पैतृष्वसेयः ॥

११३९–ढक् प्रत्यय परे रहते पितृष्वसृ शब्दके अन्तका लोप हो, इसी ज्ञापनके कारण ढक् प्रत्यय हुआ, जैसे–पैतृष्वसेयः[१]॥

११४० मातृष्वसुश्च । ४ । १ । १३४ ॥

पितृष्वसुर्यदुक्तं तदस्यापि स्यात् । मातृष्वस्रीयः । मातृष्वसेयः ॥

११४० पितृष्वसृ शब्दके उत्तर जो २ विधि उक्त हुईहैं, वह सब विधि मातृष्वसृ शब्दके उत्तर भी हों, जैसे–मातृष्वस्रीयः । मातृष्वसेयः ॥

११४१ चतुष्पाद्भ्यो ढञ् । ४ । १ । १३५ ॥

११४१–चतुष्पाद्जातिवाचक शब्दके उत्तर ढञ् प्रत्यय हो–॥

११४२ ढे लोपोऽकद्र्वाः । ६ । ४ । १४७ ॥

कद्रूभिन्नस्योवर्णान्तस्य भस्य लोपः स्यात् ढे परे । कामण्डलेयः । कमण्डलुशब्दश्चतुष्पाज्जातिविशेषे ॥

११४२–ढ प्रत्यय परे रहते कद्रु शब्दसे भिन्न जो उवर्णान्त भसंज्ञक शब्द उसके अन्त्य वर्णका लोप हो, जैसे–कामण्डलेयः । कमंडलु शब्दसे चतुष्पाज्जाति जानना ॥

[१] यहां " ओर्गुणः ८४१ " इस सूत्रसे ' ओः ' इस पदकी अनुवृत्ति होनेसे तथा ' भस्य ' इसके साथ विशेष्यविशेषणभावके कारण " येन विधिः० २६ " इस सूत्ररूप परिभाषासे तदन्तविधि होनेसे ' उवर्णान्त ' ऐसा अर्थ लब्ध हुआ ॥

११४३ गृष्ट्यादिभ्यश्च । ४ । १ । १३६ ॥

एभ्यो ढञ् स्यात् । अणढकोरपवादः । गार्ष्टेयः । मित्रयोरपत्यम् । ऋष्यणि प्राप्ते ढञ् ॥

११४३–गृष्ट्यादि शब्दोंके उत्तर ढञ् प्रत्यय हो, यह सूत्र अण् और ढक् प्रत्ययका विशेषक है, जैसे–गार्ष्टेयः । मित्रयोरपत्यम्, इस विग्रहमें " ऋष्यन्धक० १११७ " इस सूत्रसे अण् प्रत्ययकी प्राप्ति होनेपर, इस सूत्रसे ढञ्विधान कियाहै ॥

११४४ केकयमित्रयुप्रलयानां यादेरियः । ७ । ३ । २ ॥

एषां यकारादेरिय् आदेशः स्यात् ञिति णिति किति च तद्धिते परे । इति इयादेशे प्राप्ते ॥

११४४–ञित्, णित्, और कित् तद्धित प्रत्यय परे रहते केकय, मित्रयु और प्रलय शब्दके यकारादिको इय् आदेश हो । इस सूत्रसे इय् आदेशकी प्राप्ति होनेपर–॥

११४५ दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि । ६ । ४ । १७४ ॥

एतानि निपात्यन्ते । इति युलोपः । मैत्रेयः । मैत्रेयौ ॥

११४५–दाण्डिनायन, हास्तिनायन, आथर्वणिक, जैह्माशिनेय, वाशिनायनि, भ्रौणहत्य, धैवत्य, सारव, ऐक्ष्वाक, मैत्रेय और हिरण्मय यह सम्पूर्ण शब्द निपातनसे सिद्ध हों, इससे युलोप करके ' मैत्रेयः, मैत्रेयौ ' यह पद सिद्ध हुए हैं ॥

११४६ यस्कादिभ्यो गोत्रे । २ । ४ । ६३ ॥

एभ्योऽपत्यप्रत्ययस्य लुक् स्यात्तत्कृते बहुत्वे न तु स्त्रियाम् । मित्रयवः ॥

११४६–तत्कृत बहुत्व अर्थ गम्यमान होनेपर स्त्रीलिङ्गको छोडकर यस्कादि शब्दोंके उत्तर गोत्रप्रत्ययका लुक् हो, जैसे–मित्रयवः ॥

११४७ अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च । २ । ४ । ६५ ॥

एभ्यो गोत्रप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियाम् । अत्रयः । भृगवः । कुत्साः । वसिष्ठाः । गोतमाः । अङ्गिरसः ॥

११४७–तत्कृत बहुत्व होनेपर अत्रि, भृगु, कुत्स, वसिष्ठ, गोतम और अङ्गिरस् शब्दोंके उत्तर गोत्र प्रत्ययका लुक् हो, जैसे–अत्रयः । भृगवः । कुत्साः । वसिष्ठाः । गोतमाः । अङ्गिरसः ॥

११४८ बह्वच इञः प्राच्यभरतेषु । २ । ४ । ६६ ॥

बह्वचः परो य इञ् प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्तस्य लुक् स्यात्।पन्नागाराः।युधिष्ठिराः॥

११४८–प्राच्यगोत्र और भरतगोत्रमें वर्तमान और बहुत अचोंसे युक्त शब्दके उत्तर प्रयुज्यमान इञ् प्रत्ययका लुक् हो, जैसे–पन्नागाराः । युधिष्ठिराः ॥

११४९ न गोपवनादिभ्यः ।२।४।६७॥

एभ्यो गोत्रप्रत्ययस्य लुक् न स्यात् । बिदाद्यन्तर्गणोयम् । गौपवनाः । शैग्रवाः ॥

११४९–गोपवनादि शब्दोंके उत्तर गोत्रप्रत्ययका लुक् न हो, गोपवनादि बिदादिका अन्तर्गण है, जैसे–गौपवनाः । शैग्रवाः ॥

११५० तिककितवादिभ्यो द्वन्द्वे । २ । ४ । ६८ ॥

एभ्यो गोत्रप्रत्ययस्य बहुत्वे लुक् स्यात् द्वन्द्वे। तैकायनयश्च कैतवायनयश्च। तिकादिभ्यः फिञ् तस्य लुक् । तिककितवाः ॥

११५०–तिककितवादि शब्दोंके उत्तर द्वन्द्व समासविषयमें बहुत्व अर्थ गम्यमान होनेपर गोत्रप्रत्ययका लुक् हो । तैकायनयश्च कैतवायनयश्च–"तिकादिभ्यः फिञ्११७८"इस सूत्रसे फिञ् प्रत्यय होकर वर्त्तमान सूत्रसे उसका लुक् हुआ, जैसे–तिककितवाः ॥

११५१ उपकादिभ्योऽन्यतरस्यामद्वन्द्वे । २ । ४ । ६९ ॥

एभ्यो गोत्रप्रत्ययस्य बहुत्वे लुग्वा स्यात् द्वन्द्वे चाद्वन्द्व च।औपकायनाश्च लामकायनाश्च । नडादिभ्यः फक् । तस्य लुक् । उपकलमकाः । औपकायनलामकायनाः । भ्राष्ट्रककपिष्ठलाः । भ्राष्ट्रकिकापिष्ठलयः । लमकाः । लामकायनाः ॥

११५१–उपकादि शब्दोंके उत्तर द्वन्द्व वा अद्वन्द्व दोनोंमें बहुत्व अर्थ गम्यमान होनेपर गोत्र प्रत्ययका विकल्प करके लुक् हो,जैसे–औपकायनाश्च लामकायनाश्च–"नडादिभ्यः फक्११०१"इससे फक् प्रत्यय होकर प्रस्तुत सूत्रसे उसका लुक् करके उपकलमकाः, औपकायनलामकायनाः । भ्राष्ट्रककपिष्ठलाः, भ्राष्ट्रकिकापिष्ठलयः । उपकाः, औपकायनाः । लमकाः,लामकायनाः॥

११५२ आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्। २ । ४ । ७० ॥

एतयोरवयवस्य गोत्रप्रत्ययस्याणो यञश्च बहुषु लुक् स्यादवशिष्टस्य प्रकृतिभागस्य यथासंख्यमगस्ति कुण्डिनच् एतावादेशौ स्तः । अगस्तयः । कुण्डिनाः ॥

११५२–आगस्त्य और कौण्डिन्य इन दो शब्दोंका अवयवीभूत जो गोत्रप्रत्ययसम्बन्धी अण् और यञ् प्रत्यय उनके बहुवचनमें और अवशिष्ट भागके स्थानमें यथाक्रमसे अगस्ति और कुण्डिनच् आदेश हों,जैसे–अगस्तयः । कुण्डिनाः ॥

११५३ राजश्वशुराद्यत् ।४।१।१३७ ॥

राज्ञो जातावेवेति वाच्यम् ॥ * ॥

११५३–राजन् और श्वशुर शब्दके उत्तर यत् प्रत्यय हो । जाति अर्थ होनेपर ही राजन् शब्दके उत्तर यत् प्रत्यय हो ऐसा कहना चाहिये *॥

११५४ ये चाऽभावकर्मणोः ।६।४।१६८

यादौ तद्धिते परेऽन्प्रकृत्या स्यान्न तु भावकर्मणोः । राजन्यः । श्वशुर्यः । जातिग्रहणाच्छूद्रादावुत्पन्नो राजनः ॥

११५४–भाव तथा कर्म्म वाच्य न होनेपर यकार आदिमें है जिसके ऐसे तद्धित प्रत्यय परे रहते अन् इस अवयवको प्रकृतिभाव हो, अर्थात् टिका लोप नहीं हो, जैसे--राजन्यः । श्वशुर्यः । सूत्रमें जातिग्रहणके कारण शूद्रादिमें उत्पन्न होनेपर 'राजनः' ऐसा पद होगा । (इससे क्षत्रियजातिके राजामें ही यत् होगा) ॥

११५५ अन् । ६ । ४ । १६७ ॥

अणि अन्प्रकृत्या स्यात् । इति टिलोपो न । अभावकर्मणोः किम् । राज्ञः कर्म भावो वा राज्यम् ॥

११५५–अण् प्रत्यय परे रहते अन्को प्रकृतिभाव हो, और भाव तथा कर्म वाच्यमें विहित तद्धित प्रत्यय परे रहते नहीं हो, इस कारण टिका लोप नहीं हुआ, जैसे–राजनः। जिस स्थानमें भाव और कर्मवाचक तद्धित होगा उस स्थानमें राज्ञो भावः कर्म वा, इस विग्रहमें 'राज्यम्' ऐसा होगा ॥

११५६ संयोगादिश्च ।६।४।१६६ ॥

इन्प्रकृत्या स्यादणि परे । चक्रिणोपत्यं चाक्रिणः ॥

११५६–अण् प्रत्यय परे रहते आदिमें संयोग स्थित रहते इन्को प्रकृतिभाव हो, जैसे–चक्रिणोऽपत्यम्, इस वाक्यमें चाक्रिणः ॥

११५७ न मपूर्वोऽपत्येऽवर्मणः । ६ । ४ । १७० ॥

मपूर्वोऽन्प्रकृत्या न स्यादपत्येऽणि । भाद्रसामः । मपूर्वः किम् । सौत्वनः । अपत्ये किम् । चर्मणा परिवृतश्चार्मणो रथः । अवर्मणः किम् । चक्रवर्मणोऽपत्यं चाक्रवर्मणः ॥ वा हितनाम्न इति वाच्यम् ॥ * ॥ हितनाम्नोपत्यं हैतनामः। हैतनामनः ॥

११५७-अपत्य अर्थमें विहित अण् प्रत्यय परे रहते वर्मन् शब्दसे भिन्न जिसके पूर्वमें मकार है ऐसे अन्को प्रकृतिभाव न हो, जैसे-भाद्रसामः ।

मकारपूर्वक न होनेपर प्रकृतिभाव होगा, जैसे-सौत्वनः ।

अपत्यार्थक अण् प्रत्यय न होनेपर प्रकृतिभाव होगा, जैसे-चर्मणा परिवृतः चार्मणो रथः ।

'अवर्मणः' क्यों कहा ? तो वर्मन् शब्दसे अपत्यार्थक अण् प्रत्यय परे रहते प्रकृतिभावका निषेध न हो, जैसे-चक्रवर्मणोऽपत्यम्, इस विग्रहमें चाक्रवर्मणः ।

हितनामन् शब्दके अन्को विकल्प करके प्रकृतिभाव हो* जैसे-हितनाम्नोऽपत्यम्, इस वाक्यमें हैतनामः । विकल्प पक्षमें हैतनामनः ॥

११५८ ब्राह्मो जातौ । ६।४।१७१॥

योगविभागोत्र कर्तव्यः। ब्राह्म इति निपात्यतेऽनपत्येऽणि । ब्राह्मं हविः । ततो जातौ । अपत्ये जातावणि ब्रह्मणष्टिलोपो न स्यात् । ब्रह्मणोपत्यं ब्राह्मणः । अपत्ये किम् । ब्राह्मी औषधिः ॥

११५८-इस स्थलमें योगविभाग अर्थात् भिन्न सूत्र करना उचित है, अनपत्यार्थक अण् प्रत्यय परे रहते 'ब्राह्मः' यह पद निपातनसे सिद्ध हो, जैसे-ब्राह्मं हविः । अब 'जातौ' इसका अर्थ कहतेहैं, अपत्यार्थक अण् प्रत्यय परे रहते और जाति होनेपर ब्रह्मन् शब्दकी टिका लोप न हो, जैसे-ब्रह्मणोऽपत्यम्, इस विग्रहमें ब्राह्मणः । जिस स्थानमें अपत्यार्थक प्रत्यय नहीं होगा, उस स्थानमें 'ब्राह्मी' ऐसा होगा । ब्राह्मी शब्दसे औषधि जानना ॥

११५९ औक्षमनपत्ये ।६ । ४ ।१७३ ॥

अणि टिलोपो निपात्यते । औक्षं पदम् । अनपत्ये किम् । उक्ष्णोपत्यम्-॥

११५९-अनपत्यार्थक अण् प्रत्यय परे रहते औक्षन् शब्दमें निपातनसे टिका लोप हो, जैसे-उक्ष्ण इदम् औक्षं पदम् । अपत्यार्थक प्रत्यय होनेपर उक्ष्णोऽपत्यम्, इस विग्रहमें 'औक्षणः' इस पदमें टिका लोप नहीं हुआ ॥

११६० षपूर्वहन्धृतराज्ञामणि । ६ । ४ । १३५ ॥

षपूर्वो योऽन् तस्य हनादेश्च भस्यातो लोपोऽणि। औक्ष्णः।ताक्ष्णः।भ्रौणघ्नः। धृतराज्ञोपत्यं धार्तराज्ञः षपूर्वेति किम् । साम्नोऽयं सामनः । अणि किम् । ताक्षण्यः ॥

११६०-अण् प्रत्यय परे रहते भसंज्ञक जो षकारपूर्वक अन् और हन् आदि शब्द, उनके अकारका लोप हो, जैसे-औक्ष्णः । ताक्ष्णः । भ्रौणघ्नः । 'धृतराज्ञोऽपत्यम्' इस विग्रहमें धार्तराज्ञः ।

षकारपूर्वक न होनेपर अकारका लोप न हो । साम्नोऽयम्, इस वाक्यमें सामनः । अण् प्रत्यय परे न रहते अकारका लोप न हो, जैसे-ताक्षण्यः ॥

११६१ क्षत्राद् घः । ४।१।१३८ ॥

क्षत्रियः । जातावित्येव । क्षात्रिरन्यः ॥

११६१-जाति होनेपर क्षत्त्र शब्दके उत्तर घ प्रत्यय हो, इञ्का अपवाद है, जैसे-क्षत्त्रियः । अन्यार्थमें क्षात्त्रिः ॥

११६२ कुलात्खः । ४ ।१। १३९ ॥

कुलीनः । तदन्तादपि । उत्तरसूत्रेऽपूर्वपदादिति लिङ्गात् । आढ्यकुलीनः ॥

११६२-कुल शब्दके उत्तर ख प्रत्यय हो, जैसे-कुलीनः। उत्तर सूत्रमें अपूर्वपद अर्थात् जिसके पूर्वमें कोई पद न हो ऐसे कुल शब्दके उत्तर ख प्रत्ययके निर्देशके कारण कुलशब्दान्त जो प्रातिपदिक उसके उत्तर भी ख प्रत्यय होगा, जैसे-आढ्यकुलीनः ॥

११६३ अपूर्वपदादन्यतरस्यां यड्ढकञौ । ४ । १ । १४० ॥

कुलादित्येव । पक्षे खः । कुल्यः । कौलेयकः । कुलीनः । पदग्रहणं किम् । बहुकुल्यः । बाहुकुलेयकः । बहुकुलीनः ॥

११६३-यदि कुल शब्दके पूर्वमें अन्य कोई पद न हो तो उसके उत्तर विकल्प करके यत् और ढकञ् प्रत्यय हो, विकल्प पक्षमें ख प्रत्यय हो,जैसे-कुल्यः। कौलेयकः। कुलीनः। अपूर्वपदग्रहण करनेसे बहुकुल्यः[1] । बाहुकुलेयकः । बहुकुलीनः इत्यादि पद सिद्ध हुए हैं । (यह अप्राप्तविभाषा है) ॥

११६४ महाकुलादञ्खञौ।४।१।१४१॥

अन्यतरस्यामित्यनुवर्तते । पक्षे खः । माहाकुलः । माहाकुलीनः । महाकुलीनः ॥

११६४-महाकुल शब्दके उत्तर अन् और खञ् प्रत्यय हो,विकल्पपक्षमें ख प्रत्यय हो,जैसे-महाकुलः । माहाकुलीनः । महाकुलीनः ॥

११६५ दुष्कुलाड्ढक ।४।१।१४२॥

पूर्ववत्पक्षे खः । दौष्कुलेयः । दुष्कुलीनः ॥

११६५-दुष्कुल शब्दके उत्तर ढक् प्रत्यय हो, विकल्प पक्षमें ख प्रत्यय हो, जैसे-दौष्कुलेयः । पक्षमें दुष्कुलीनः ॥

११६६ स्वसुश्छः । ४ । १।१४३ ॥

स्वस्रीयः ॥

११६६-स्वसृ शब्दके उत्तर छ प्रत्यय हो, जैसे-स्वस्रीयः ॥

११६७ भ्रातुर्व्यच्च । ४ । १ । १४४ ॥

चाच्छः । अणोपवादः । भ्रातृव्यः।भ्रात्रीयः॥

[1] आशय यह है कि, सुबन्त कुल शब्दसे " विभाषा सुपः० २०२३ " से प्रकृतिसे पूर्व बहुच् (बहु) प्रत्यय होकर बहुकुल शब्दसे उक्त प्रत्यय हुए हैं, इसलिये बहुके पूर्वपद न होनेसे ' अपूर्वपदात् ' यह निषेध न लगा, यदि पदग्रहण न करते, तो यहां भी सपूर्वक होनेसे 'अपूर्वात्' यह निषेध लग जाता ॥

११६७-अपत्यार्थमें भ्रातृ शब्दके उत्तर व्यत् प्रत्यय हो और चकारनिर्देशके कारण छ प्रत्यय भी हो, यह सूत्र अण् प्रत्ययका विशेषक है, जैसे-भ्रातृव्यः । भ्रात्रीयः ॥

११६८ व्यन्सपत्ने । ४ । १ । १४५ ॥

भ्रातुर्व्यन् स्यादपत्ये प्रकृतिप्रत्ययसमुदायेन शत्रौ वाच्ये । भ्रातृव्यः शत्रुः पाप्मना भ्रातृव्ये-णेति तूपचारात् ॥

११६८-यदि प्रकृति और प्रत्यय मिलित होकर शत्रुवाचक हों तो अपत्यार्थमें भ्रातृ शब्दके उत्तर व्यन् प्रत्यय हो, जैसे-भ्रातृव्यः-शत्रुः । 'पाप्मना भ्रातृव्येण' इस स्थलमें "अस्त्री पङ्कं पुमान् पाप्मा पापं किल्बिषकल्मषम्" इस अमरकोषके अनुसार पाप्मन् शब्द पाप अर्थका बोधक है, इस लिये 'भ्रातृव्यः'में व्यन् प्रत्यय नहीं होना चाहिये कारण कि, भ्राताका अपत्य पाप नहीं होसकता ? इस शंकाको मनमें रखके समाधान देतेहैं कि, 'इति तूपचारात् इति' अर्थात् पाप्मन् शब्द उपचार (लक्षणा) से पापी पुरुषका बोधक है, तब कोई बाध नहीं है ॥

११६९ रेवत्यादिभ्यष्ठक् ।४।१ ।१४६॥

११६९—रेवत्यादि शब्दोंके उत्तर ठक् प्रत्यय हो ॥

११७० ठस्येकः । ७ । ३ । ५० ॥

अंगात्परस्य ठस्येकादेशः स्यात् । रैवतिकः॥

११७०-अङ्गके परे ठ प्रत्ययके स्थानमें इक आदेश हो, जैसे-रैवतिकः ॥

११७१ गोत्रस्त्रियाः कुत्सने ण च४। १ । १४७ ॥

गोत्रं या स्त्री तद्वाचकाच्छब्दात् णठकौ स्तः कुत्सायाम् । सामर्थ्याद्यूनि । गार्ग्या अपत्यं गार्गो गार्गिको वा जाल्मः ॥ भस्याढे तद्धिते इति पुंवद्भावाद्गार्ग्यशब्दाण्णठकौ । यस्येति लोपः । आपत्यस्येति यलोपः ॥

११७१-कुत्सा अर्थ होनेपर गोत्रवाचक स्त्रीलिङ्ग शब्दके उत्तर ण और ठक् प्रत्यय हो । ढक्का अपवाद है । गार्ग्या अपत्यम्, इस वाक्यमें गार्गो गार्गिको वा जाल्मः । "भस्याढे तद्धिते *" इससे पुंवद्भाव प्राप्त होनेपर गार्ग्य शब्दके उत्तर ण और ठक् प्रत्यय हुआ । "यस्येति च-३११" इस सूत्रसे अकारका लोप होकर और "आपत्यस्य० १०८२" इस सूत्रसे यकारका लोप हुआहै ॥

११७२ वृद्धाट्ठक् सौवीरेषु बहुलम् । ४ । १ । १४८ ॥

सुवीरदेशोद्भवाः सौवीराः । वृद्धात्सौवीर-गोत्राद्यूनि बहुलं ठक् स्यात् कुत्सायाम् । भाग-वित्तेर्भागवित्तिकः । पक्षे फक् । भागवित्तायनः॥

११७२-सुवीरदेशोद्भव मनुष्यको सौवीर कहतेहैं, कुत्सार्थ गम्यमान होनेपर युवापत्य अर्थमें सौवीरगोत्रवाचक जो वृद्ध (वृद्धसंज्ञक) शब्द उसके उत्तर बहुल (विकल्प) करके ठक् प्रत्यय हो, जैसे-भागवित्तेः-भागवित्तिकः । पक्षमें फक् प्रत्यय होगा, जैसे-भागवित्तायनः ॥

११७३ फेश्छ च । ४ । १ । १४९ ॥

फिञन्तात्सौवीरगोत्रादपत्ये छः ठक् च कुत्सने गम्ये । यमुन्दस्यापत्यं यामुन्दायनिः । तिकादित्वात् फिञ् । तस्यापत्यं यामुन्दायनीयः। यामुन्दायनिकः। कुत्सने किम् । यामुन्दायनिः। औत्सर्गिकस्याणो ण्यक्षत्रियेति लुक् । सौवीरेति किम् । तैकायनिः ॥

११७३-कुत्सा अर्थ गम्यमान होनेपर अपत्य अर्थमें सौवीर-गोत्रवाचक फिञ्प्रत्ययान्त शब्दके उत्तर छ और ठक् प्रत्यय हो, जैसे-यमुन्दस्यापत्यम्=यामुन्दायनिः । तिकादित्वके कारण फिञ् प्रत्यय करके तदन्तको तस्यापत्यम्, इस विग्रहमें यामुन्दायनीयः, यामुन्दायनिकः ।

कुत्सार्थ न होनेपर 'यामुन्दायनिः' ऐसा होगा । 'औत्सर्गिकस्याणो ण्यक्षत्रियेति' अर्थात् "ण्यक्षत्रिय० १२७६" इस सूत्रसे अण् प्रत्ययका लुक् होताहै ।

सौवीरसे भिन्नस्थलमें छ और ठक् प्रत्यय नहीं होगा, जैसे-तैकायनिः ॥

११७४ फाण्टाहृतिमिमताभ्यां णफिञौ । ४ । १ । १५० ॥

सौवीरेषु । नेह यथासंख्यमल्पाच्तरस्य पर-निपातालिङ्गादिति वृत्तिकारः । भाष्ये तु यथा-संख्यमेवेति स्थितम् । फाण्टाहृतः । फाण्टा-हृतायनिः । मैमतः । मैमतायनिः ॥

११७४-सौवीरार्थ होनेपर फाण्टाहृति और मिमत शब्दके उत्तर ण और फिञ् प्रत्यय हो । फक्का अपवाद है ।

वृत्तिकार कहतेहैं कि, इस(११७४) सूत्रसे ण और फिञ् प्रत्ययका यथासंख्यसे विधान नहीं होगा । कारण कि, सूत्रमें अल्पाच्विशिष्टका पूर्व निर्देश है । भाष्यमें तो यथासंख्यसे ही विधान है । वृत्तिकारके मतसे उदाहरण देतेहैं, फाण्टाहृतः, फाण्टाहृतायनिः । मैमतः, मैमतायनिः ॥

११७५ कुर्वादिभ्यो ण्यः ।४।१।१५१॥

अपत्ये । कौरव्या ब्राह्मणाः । वावदूक्याः ॥ सम्राजः क्षत्रिये ॥ * ॥ साम्राज्यः । साम्रा-जोन्यः ॥

११७५-अपत्यार्थमें कुरु आदि शब्दोंके उत्तर ण्य प्रत्यय हो, इञ्का अपवाद है, जैसे-कौरव्याः ब्राह्मणाः । वावदूक्याः ॥

क्षत्त्रिय होनेपर सम्राज् शब्दके उत्तर ण्य प्रत्यय हो * जैसे-साम्राज्यः । अन्य अर्थमें साम्राजः, ऐसा पद होगा ॥

११७६ सेनान्तलक्षणकारिभ्यश्च । ४ । १ । १५२ ॥

एभ्यो ण्यः । एति संज्ञायामिति सस्य षः । हारिषेण्यः । लाक्षण्यः । कारिः शिल्पी तस्मात् । तान्तुवाय्यः । कौंभकार्यः । नापित्यः ॥

११७६–सेनान्त शब्द, लक्षण शब्द और कारि अर्थात् शिल्पिवाचक शब्द, इनके उत्तर ण्य प्रत्यय हो, "एति संज्ञायाम्० १०२३" इस सूत्रसे सकारके स्थानमें षकार होताहै, जैसे–हारिषेण्यः । लाक्षण्यः । कारि (शिल्पी) वाचकके उत्तर ण्य प्रत्यय होकर जैसे–तांतुवाय्यः । कौंभकार्यः । नापित्यः ॥

११७७ उदीचामिञ् । ४ । १ । १५३॥

हारिषेणिः । लाक्षणिः । तान्तुवायिः । कौम्भकारिः । नापितात्तु परत्वात् फिञेव । नापितायनिः ॥ तक्ष्णोऽण उपसंख्यानम् ॥ * ॥ ताक्ष्णः । पक्षे ताक्षण्यः ॥

११७७–सेनान्त, लक्षण और कारि (शिल्पी) वाचक शब्दके उत्तर, उत्तरदेशीय आचार्योंके मतमें इञ् प्रत्यय हो, जैसे–हारिषेणिः । लाक्षणिः । तान्तुवायिः । कौंभकारिः । नापित शब्दके उत्तर तो परत्वके कारण फिञ् प्रत्यय ही होगा, जैसे–नापितायनिः ॥

तक्षन् शब्दके उत्तर अण् प्रत्ययका उपसंख्यान हो * "बपूर्व० ११६०"इस सूत्रसे अन्के अकारका लोप होताहै, जैसे–ताक्ष्णः । विकल्प पक्षमें ताक्षण्यः ॥

११७८ तिकादिभ्यः फिञ् ।४।१।१५४॥

तैकायनिः ॥

११७८–तिकादि शब्दोंके उत्तर फिञ् प्रत्यय हो, तैकायनिः ॥

११७९ कौसल्यकार्मार्याभ्यां च । ४ । १ । १५५ ॥

अपत्ये फिञ् । इञोपवादः ॥ परमप्रकृतेरेवायमिष्यते ॥ * ॥ प्रत्ययसंनियोगेन प्रकृतिरूपं निपात्यते। कोसलस्याऽपत्यं कौसल्यायनिः। कर्मारस्यापत्यं कार्मार्यायणिः ॥ छागवृषयोरपि ॥ * ॥ छाग्यायनिः । वार्ष्यायणिः ॥

११७९–कौसल्य और कार्मार्य शब्दके उत्तर अपत्यार्थमें फिञ् प्रत्यय हो, यह फिञ् प्रत्यय इञ् प्रत्ययका अपवाद अर्थात् विशेषक है ॥

यह फिञ् प्रत्यय कोसल और कर्मार इस प्रकृतिके उत्तर ही हो (एतदर्थ अन्य शब्दके उत्तर न हो)। फिञ् प्रत्ययके सन्नियोगसे कौसल्य और कार्मार्य इन प्रकृतिरूपोंका निपातन होताहै, जैसे–कोसलस्यापत्यम् , इस विग्रहमें कौसल्यायनिः । कर्मारस्यापत्यम्, इस विग्रहमें कार्मार्यायणिः ॥

छाग और वृष शब्दके उत्तर फिञ् प्रत्यय हो * जैसे–छाग्यायनिः । वार्ष्यायणिः ॥

११८० अणो द्व्यचः । ४ । १।१५६॥

अपत्ये फिञ् । इञोऽपवादः । कार्त्रायणिः । अण इति किम् । दाक्षायणः । द्व्यचः किम् । औपगविः ॥ त्यदादीनां फिञ् वा वाच्यः ॥ * ॥ त्यादायनिः । त्यादः ॥

११८०–दोस्वरयुक्त अण्प्रत्ययान्त शब्दके उत्तर अपत्यार्थमें फिञ् प्रत्यय हो । यह फिञ् इञ् प्रत्ययका अपवादक है, जैसे–कार्त्रायणिः । जिस स्थानमें अण् प्रत्यय नहीं होगा उस स्थानमें इञ् नहीं होगा, जैसे–दाक्षायणः । जिस स्थानमें दो अच् नहीं होंगे, उस स्थानमें 'औपगविः' ऐसा होगा ।

त्यदादिके उत्तर विकल्प करके फिञ् प्रत्यय हो * जैसे–त्यदायनिः, त्यादः ॥

११८१ उदीचां वृद्धादगोत्रात्४।१।१५७॥

आम्रगुप्तायनिः । प्राचां तु । आम्रगुप्तिः । वृद्धात्किम् दाक्षिः । अगोत्रात्किम् । औपगविः॥

११८१–उत्तरदेशीय आचार्योंके मतमें गोत्रप्रत्ययान्तसे भिन्न जो वृद्धसंज्ञक शब्द, उसके उत्तर फिञ् प्रत्यय हो । यह फिञ इञ्का बाधक है, जैसे–आम्रगुप्तस्यापत्यम्=आम्रगुप्तायनिः । प्राचीनोंके मतमें तो 'आम्रगुप्तिः' ऐसा पद होगा । वृद्धसंज्ञक शब्दके उत्तर न होनेपर 'दाक्षिः' ऐसा पद होगा । जिस स्थानमें गोत्रप्रत्ययान्तसे भिन्न नहीं होगा, उस स्थानमें औपगविः, ऐसा होगा ॥

११८२ वाकिनादीनां कुक् च । ४ । १ । १५८ ॥

अपत्ये फिञ् वा । वाकिनस्यापत्यं वाकिनकायनिः । वाकिनिः ॥

११८२–वाकिनादि शब्दोंको अपत्यार्थमें कुक्का आगम हो और चकारसे विकल्प करके फिञ् प्रत्यय भी हो, जैसे–वाकिनस्यापत्यम्, इस विग्रहमें वाकिनकायनिः, वाकिनिः ॥

११८३ पुत्रान्तादन्यतरस्याम् । ४ । १ । १५९ ॥

अस्माद्धि फिञ् सिद्धस्तस्मिन्परे पुत्रान्तस्य वा कुक् विधीयते । गार्गीपुत्रकायणिः । गार्गीपुत्रायणिः । गार्गीपुत्रिः ॥

११८३–पुत्रान्त शब्दके उत्तर विकल्पकरके फिञ् प्रत्यय हो और विकल्प करके कुक्का आगम हो । इञ्का अपवाद है । "उदीचाम्० ११८१" इस सूत्रसे विकल्प करके फिञ् प्रत्यय सिद्ध रहते फिञ् प्रत्यय परे रहते पुत्रान्त शब्दको इस सूत्रसे विकल्प करके कुक्के आगममात्रका विधान है, जैसे–गार्गीपुत्रस्यापत्यम्=गार्गीपुत्रकायणिः । गार्गीपुत्रायणिः । गार्गीपुत्रिः ॥

११८४ प्राचामवृद्धात्फिन्बहुलम् । ४ । १ । १६० ॥

ग्लुचुकायनिः ॥

११८४–प्राचीन पंडितोंके मतमें वृद्धसंज्ञक शब्दसे भिन्न शब्दके उत्तर बहुल करके फिन् प्रत्यय हो, जैसे–ग्लुचुकायनिः ॥

११८५ मनोर्जातावञ्यतौ षुक् च । ४ । १ । १६१ ॥

समुदायार्थो जातिः । मानुषः । मनुष्यः ॥

११८५–प्रकृति और प्रत्यय मिलकर यदि जातिवाचक हों, तो मनु शब्दके उत्तर अञ् और यत् प्रत्यय हों, और षुक्का आगम हो, जैसे–मानुषः । मनुष्यः * ॥

११८६ जनपदशब्दात्क्षत्रियादञ् । ४ । १ । १६८ ॥

जनपदक्षत्रिययोर्वाचकादञ् स्यादपत्ये । दाण्डिनायनेतिसूत्रे निपातनाट्टिलोपः। ऐक्ष्वाकः। ऐक्ष्वाकौ ॥ क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत् ॥ * ॥ तद्राजमाचक्षाणस्तद्राज इत्यन्वर्थसंज्ञासामर्थ्यात् । पञ्चालानां राजा पाञ्चालः ॥ पूरोरण् वक्तव्यः ॥ * ॥ पौरवः ॥ पाण्डोर्ड्यण् ॥ * ॥ पाण्ड्यः ॥

११८६–जनपद और क्षत्रियवाचक शब्दके उत्तर अपत्यार्थमें अञ् प्रत्यय हो । "दांडिनायन० ११४५" इस सूत्रमें निपातनसे टिका लोप होकर–ऐक्ष्वाकः, ऐक्ष्वाकौ, यह दो पद सिद्ध हुए हैं ।

क्षत्रियतुल्य जनपदवाचक शब्दक उत्तर, 'उसका राजा' इस अर्थमें अपत्यकी समान प्रत्यय हो * तद्राजमाचक्षणः, इस विग्रहमें तद्राजः, इस अर्थानुगतसंज्ञाके बलसे पञ्चालानां राजा, इस वाक्यमें पाञ्चालः ।

पूरु शब्दके उत्तर अण् प्रत्यय हो * जसे–पौरवः ।

पांडु शब्दके उत्तर ड्यण् प्रत्यय हो * जैसे–पांड्यः ॥

११८७ साल्वेयगान्धारिभ्यां च । ४ । १ । १६९ ॥

आभ्यामपत्येऽञ् वृद्धेदिति ञ्यङोऽपवादः । साल्वेयः । गान्धारः । तस्य राजन्यप्येवम् ॥

११८७–साल्वेय और गांधारि शब्दोंके उत्तर अपत्यार्थमें अञ् प्रत्यय हो । यह "वृद्धेत्० ११८९" इससे विधीयमान ञ्यङ् प्रत्ययका अपवाद है, जैसे–साल्वेयानामपत्यम्=साल्वेयः । गांधारः । तस्य राजा, ऐसे अर्थमें भी ऐसे (अपत्यवत्) ही प्रत्यय होंगे ॥

* अपत्यमें अण् होगा, यथा–मानवी प्रजा ॥

११८८ द्व्यञ्मगधकलिङ्गसूरमसादण् । ४ । १ । १७० ॥

अञोपवादः । द्व्यच् । आङ्गः । वाङ्गः । सौह्मः । मागधः । कालिङ्गः । सौरमसः । तस्य राजन्यप्येवम् ॥

११८८–दोस्वरयुक्त, मगध, कलिङ्ग और सूरमस शब्दके उत्तर अण् प्रत्यय हो । यह अञ् प्रत्ययका अपवाद है । द्वयच् जैसे–अङ्गानामपत्यम्, तेषां राजा वा=आङ्गः । वाङ्गः । सौह्मः । मागधः । कालिङ्गः । सौरमसः । तस्य राजा, इस अर्थमें भी पूर्ववत् (अपत्यवत्) कार्य होगा ॥

११८९ वृद्धेत्कोसलाजादाञ् ञ्यङ् । ४ । १ । १७१ ॥

वृद्धात् । आम्बष्ठ्यः । सौवीर्यः । इत् । आवन्त्यः । कौसल्यः। अजादस्यापत्यम् आजाद्यः॥

११८९–वृद्धसंज्ञक शब्द, इकारान्त शब्द, कोसल शब्द और अजाद शब्दके उत्तर ञ्यङ् प्रत्यय हो । वृद्धसंज्ञक जैसे–आम्बष्ठानामपत्यम्, तेषां राजा वा=आम्बष्ठ्यः । सौवीर्यः । इकारान्त, जैसे–आवन्त्यः । कौसल्यः । अजादस्यापत्यम्, इस विग्रहमें आजाद्यः ॥

११९० कुरुनादिभ्यो ण्यः ।४।१।१७२॥

कौरव्यः । नैषध्यः । सनैषधस्यार्थपतेरित्यादौ तु शैषिकोऽण् ॥

११९०–कुरु और नकारादि शब्दोंके उत्तर ण्य प्रत्यय हो, जैसे–कुरूणामपत्यं तेषां राजा वा=कौरव्यः । नैषध्यः । 'स नैषधस्यार्थपतेः' इत्यादि प्रयोगमें तो शेषाधिकारका अण् प्रत्यय जानना ॥

११९१ साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् । ४ । १ । १७३ ॥

साल्वो जनपदस्तदवयवा उदुम्बरादयस्तेभ्यः प्रत्यग्रथादिभ्यस्त्रिभ्यश्च इञ् । अञोपवादः। औदुम्बरिः । प्रात्यग्रथिः । कालकूटिः । आश्मकिः । राजन्यप्येवम् ॥

११९१–साल्व पदसे तदाख्य जनपदविशेष जानना, उसके अवयव जो उदुम्बरादि शब्द, तिनके उत्तर और प्रत्यग्रथ, कलकूट और अश्मक शब्दके उत्तर इञ् प्रत्यय हो। यह इञ् प्रत्यय अञ् प्रत्ययका अपवाद है, जैसे–औदुम्बरिः। प्रात्यग्रथिः । कालकूटिः । आश्मकिः । तद्राजार्थमें भी अपत्यवत् कार्य होगा ॥

११९२ ते तद्राजाः । ४ । १ । १७४ ॥

अञादय एतत्संज्ञाः स्युः ॥

११९२–"जनपद० ४ । १।१६८" से लेकर यहांतक विहित अञ् आदि प्रत्ययोंकी तद्राज संज्ञा हो ॥

११९३ तद्राजस्य बहुषु तेनैवाऽस्त्रियाम् । २ । ४ । ६२ ॥

बहुष्वर्थेषु तद्राजस्य लुक् स्यात्तदर्थकृते बहुत्वे न तु स्त्रियाम् । इक्ष्वाकवः । पञ्चाला इत्यादि । कथं तर्हि कौरव्याः पशवः, तस्यामेव रघोः पाण्ड्या इति च । कौरव्ये पाण्ड्ये च साधव इति समाधेयम् । रघूणामन्वयं वक्ष्ये, निरुध्यमाना यदुभिः कथंचिदिति तु रघुयदुशब्दयोस्तदपत्ये लक्षणया ॥

११९३–तदर्थ (तद्राजसंज्ञकप्रत्ययार्थ) कृत बहुत्व होने-
पर तद्राजार्थक प्रत्ययोंका लुक् हो, स्त्रीलिङ्गमें लुक् न हो,
जैसे–इक्ष्वाकवः । पञ्चालाः–इत्यादि । इस सूत्रके रहते
'कौरव्याः पशवः' और 'तस्यामेव रघोः पांड्याः' इत्यादि
स्थलोंमें 'कौरव्याः' और 'पांड्याः' किस प्रकार सिद्ध हुए ?
इस शंकापर कहतेहैं कि, इस स्थलमें "तत्र साधुः" इस
सूत्रसे 'कौरव्ये पाण्ड्ये च साधवः' इस विग्रहमें यत् प्रत्यय
करके उक्त दोनों पद सिद्ध हुए हैं । 'रघूणामन्वयं वक्ष्ये'
इत्यादि स्थलोंमें और 'निरुध्यमाना यदुभिः कथञ्चित्'
इत्यादि स्थलोंमें लक्षणाद्वारा रघु और यदु शब्दसे तदपत्य
कहाहै, (नहीं तो तद्राजसंज्ञक प्रत्यय न होनेके कारण लुक्
न होकर 'राघवाणाम्, यादवानाम्' ऐसे होजाते) ॥

११९४ कम्बोजाल्लुक् । ४ । १ । १७५ ॥

अस्मात्तद्राजस्य लुक् । कम्बोजः । कम्बोजौ ॥ कम्बोजादिभ्य इति वक्तव्यम् ॥ * ॥ चोलः । शकः । द्व्यज्लक्षणस्याणो लुक् । केरलः । यवनः । अञो लुक् । कम्बोजाः समरे इति पाठः सुगमः । दीर्घपाठे तु कम्बोजोऽभिजनो येषामित्यर्थः । सिन्धुतक्षशिलादिभ्योऽणञावित्यण् ॥

११९४–कम्बोज शब्दके उत्तर तद्राजसंज्ञक प्रत्ययका
लुक् हो, जैसे–कम्बोजस्यापत्यम्, तेषां राजा वा=कम्बोजः ।
कम्बोजौ ।

कम्बोजादि शब्दोंके उत्तर तद्राजसंज्ञक प्रत्ययोंका लुक् हो
ऐसा कहना चाहिये * जैसे–चोलः । शकः । यहां दोअच्-
निमित्तक जो अण् उसका लुक् हुआहै । केरलः । यवनः ।
इनमें अञ् प्रत्ययका लुक् हुआहै । 'कम्बोजाः समरे' यह
पाठ सुगम है । जिस स्थानमें दीर्घ पाठ है वहां 'कम्बोजो-
ऽभिजनो येषाम्' ऐसा अर्थ जानना । " सिंधुतक्षशिलादि-
भ्योऽणञौ १४७२ " इस सूत्रसे इस स्थानमें अण् प्रत्यय
हुआ है ॥

११९५ स्त्रियामवन्तिकुन्तिकुरुभ्यश्च । ४ । १ । १७६ ॥

तद्राजस्य लुक् स्यात् । अवन्ती । कुन्ती । कुरूः ॥

११९५–स्त्रीलिङ्गमें अवन्ति, कुन्ति और कुरु शब्दके
उत्तर तद्राजसंज्ञक प्रत्ययोंका लुक् हो, जैसे–अवन्तीनामपत्यम्,
तेषां राज्ञी वा=अवन्ती । कुन्ती । कुरूः ॥

११९६ अतश्च । ४ । १ । १७७ ॥

तद्राजस्याकारस्य स्त्रियां लुक् स्यात् । शूरसेनी । मद्री । कथं माद्रीसुताविति । ह्रस्व एव पाठ इति हरदत्तः । भर्गादित्वं वा कल्प्यम् ॥

११९६–स्त्रीलिङ्गमें तद्राजसंज्ञक प्रत्ययोंके अकारका
लुक् हो, जैसे–शूरसेनी । मद्री (ङीष्), तो 'माद्रीसुतौ'
इस स्थलमें किस प्रकार माद्री हुआ ? इसपर हरदत्त कहतेहैं
कि, इस स्थलमें ह्रस्व पाठ ही श्रेष्ठ है, अथवा भर्गादि
(११९७) गणमें इसकी कल्पना करनी चाहिये ॥

११९७ न प्राच्यभर्गादियौधेयादिभ्यः । ४ । १ । १७८ ॥

एभ्यस्तद्राजस्य न लुक् । पाञ्चाली । वैदर्भी । आङ्गी । वाङ्गी । मागधी । एते प्राच्याः । भार्गी । कारूशी । कैकयी । केकयीत्यत्र तु जन्यजनकभावलक्षणे पुंयोगे ङीष् । युधा, शुक्रा, आभ्यां द्व्यच इति ढक् । ततः स्वार्थे पर्श्वादियौधेयादिभ्योऽणञावित्यञ् । शार्ङ्गरवाद्यञ इति ङीन् । अतश्चेति लुकि तु ढगन्तत्वात् ङीप्युदात्तनिवृत्तिस्वरः स्यात् । यौधेयी । शौक्रेयी ॥

११९७–प्राच्यसंज्ञक, भर्गादि और यौधेयादि शब्दोंके
उत्तर तद्राजसंज्ञक प्रत्ययका लुक् न हो, जैसे–पाञ्चाली ।
वैदर्भी । अङ्गानामपत्यम्, तद्राज्ञी वा=आङ्गी ।
वाङ्गी । मागधी । यह प्राच्यसंज्ञक हैं । भार्गी ।
कारूशी । कैकेयी । केकयी, इस स्थानमें जन्यजनक-
भावलक्षण पुंयोगमें ङीष् प्रत्यय हुआहै । यौधेयी और शौ-
क्रेयी इन दो स्थलोंमें युध और शुक्रासे "द्व्यचः ११२४"
इस सूत्रसे ढक् प्रत्यय हुआहै, पश्चात् स्वार्थमें "पर्श्वादियौ-
धेयादिभ्योऽणञौ २०७०" इस सूत्रसे अञ् प्रत्यय, पश्चात्
शार्ङ्गरवादित्वके कारण अञन्तसे ङीन् प्रत्यय हुआ (५२७)।
"अतश्च ११९६" इस सूत्रसे प्रत्ययका लुक् होनेपर तो
ढगन्तत्वके कारण ङीप् प्रत्यय होकर उदात्तनिवृत्ति स्वर होजाता,
इस प्रकार ये दोनों पद सिद्ध हुएहैं ॥

११९८ अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे । ४ । १ । ७८ ॥

ऽयादीनामन्त्यमुत्तमं तस्य समीपमुपोत्तमम् । गोत्रे याविणिञौ विहितावनार्षौ तदन्तयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियां ष्यङादेशः स्यात् । निर्दिश्यमानस्यादेशा भवन्तीत्यणिञोरेव । षङावितौ । यङश्चाप् । कुमुदगन्धेरपत्यं स्त्री कौमुदगन्ध्या । वाराह्या । अनार्षयोः किम् । वासिष्ठी । वैश्वामित्री । गुरूपोत्तमयोः किम् ।

औपगवी । जातिलक्षणो ङीष् । गोत्रे किम् । अहिच्छत्रे जाता आहिच्छत्री ॥

११९८–ञ्यादिका जो अन्त्य भाग, उसको उत्तम कहतेहैं, और उसके समीपवर्त्तीको उपोत्तम कहतेहैं। गोत्रमें विहित जो अनार्ष (ऋषिवाचक शब्दसे विहित न हो ऐसा) अण् प्रत्यय और इञ् प्रत्यय, तदन्त जो गुरूपोत्तम प्रातिपदिक, उनके उत्तर स्त्रीलिङ्गमें ष्यङ् आदेश हो । "निर्दिश्यमानस्यादेशा भवन्ति" इस परिभाषासे अण् और इञ् प्रत्ययको ही ष्यङ् होगा । ष्यङ् प्रत्ययके षकार और ङकारकी इत्संज्ञा हुई । "यङश्चाप् ५२८" इस सूत्रसे चाप(आप्) करके 'कुमुदगन्धेरपत्यम् स्त्री, कौमुदगन्ध्या' यह पद सिद्ध हुआहै। वाराह्या। ऋषिभिन्नसे विहित न होनेपर ष्यङ् न होगा, जैसे–वाशिष्ठी । वैश्वामित्री । गुरूपोत्तम न होनेपर ष्यङ् न होगा, जैसे–औपगवी, इस स्थानमें जातिलक्षणसे ङीष् प्रत्यय हुआहै। गोत्रवाचक न होनेपर ष्यङ् आदेश नहीं होगा, जैसे–अहिच्छत्रे जाता, इस विग्रहमें आहिच्छत्री ॥

११९९ गोत्रावयवात् । ४ । १ । ७९ ॥

गोत्रावयवा गोत्राभिमताः कुलाख्यास्ततो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशः स्यात् । अगुरूपोत्तमार्थमारम्भः। पौणिक्या। भौणिक्या॥

११९९–गोत्रावयव (कुलनाम) वाचक शब्दके परे गोत्रार्थमें विहित जो अण् और इञ् प्रत्यय, उनको स्त्रीलिङ्गमें ष्यङ् आदेश हो । अगुरूपोत्तमार्थ यह सूत्रारंभ हुआहै, जैसे–पौणिक्या । भौणिक्या ॥

१२०० क्रौड्यादिभ्यश्च । ४ । १ ।८० ॥

स्त्रियां ष्यङ् प्रत्ययः स्यात् । अगुरूपोत्तमार्थोऽनणिञर्थश्चारम्भः । क्रौड्या । व्याड्या ॥ सूत युवत्याम् ॥ * ॥ सूत्या ॥ भोज क्षत्रिये ॥ * ॥ भोज्या ॥

१२००–क्रौड्यादि शब्दोंके उत्तर स्त्रीलिङ्गमें ष्यङ् प्रत्यय हो । अगुरूपोत्तमार्थ और अनणिञर्थ यह सूत्रारंभ है, जैसे–क्रौड्या । व्याड्या ॥

(सूत युवत्याम् *) युवती अर्थमें सूत शब्द ष्यङ्को लाभ करे सूत्या ।

(भोज क्षत्रिये *) क्षत्रिय वाच्य रहते भोजशब्दसे ष्यङ् हो भोज्या ॥

१२०१ दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम्।४।१।८१॥

एभ्यश्चतुर्भ्यः ष्यङ् । अगोत्रार्थमिदं गोत्रेपि परत्वात्प्रवर्तते । पक्षे इतो मनुष्येति ङीष् । दैवयज्ञ्या । दैवयज्ञी ॥

॥ इत्यपत्याधिकारः ॥

१२०१–दैवयज्ञि, शौचिवृक्षि, सात्यमुग्रि और काण्ठेविद्धि इन चार शब्दोंके उत्तर विकल्प करके ष्यङ् प्रत्यय हो । यह सूत्रारंभ अगोत्रार्थ है, अर्थात् जिस स्थानमें गोत्र नहीं है उस स्थानमें होनेके निमित्त है, परन्तु गोत्रविषयमें भी परत्वके कारण यह प्रवृत्त होताहै, विकल्प पक्षमें "इतो मनुष्य० ५२०" इस सूत्रसे ङीष् प्रत्यय होगा, जैसे–दैवयज्ञ्या । दैवयज्ञी । इत्यादि ॥

॥ इत्यपत्याधिकारप्रकरणम् ॥

अथ रक्ताद्यर्थकाः ।

१२०२ तेन रक्तं रागात् । ४ । २ । १ ॥

रज्यतेऽनेनेति रागः । कषायेण रक्तं वस्त्रं काषायम् । माञ्जिष्ठम् । रागात्किम् । देवदत्तेन रक्तं वस्त्रम् ॥

१२०२–जिससे कोई वस्तु रंगी जाय, उसको 'राग' कहतेहैं, तृतीयान्त रागवाचक शब्दके उत्तर 'रक्तम्' (रंगा-हुआ)' इस अर्थमें अणादि प्रत्यय हों, जैसे–कषायेण रक्तं वस्त्रम्, इस विग्रहमें काषायम् । माञ्जिष्ठम् । रागवाचक न होनेपर प्रत्यय नहीं होगा, जैसे–देवदत्तेन रक्तं वस्त्रम् ॥

१२०३ लाक्षारोचनाट्ठक् । ४ । २ । २॥

लाक्षिकः । रौचनिकः ॥ शकलकर्दमाभ्यामुपसंख्यानम् ॥ * ॥ शाकलिकः । कार्दमिकः । आभ्यामणपीति वृत्तिकारः । शाकलः। कार्दमः॥ नील्या अन् ॥ * ॥ नील्या रक्तं नीलम् ॥ पीतात्कन् ॥ * ॥ पीतकम् ॥ हरिद्रामहारजनाभ्यामञ् ॥ * ॥ हारिद्रम् । माहारजनम्॥

१२०३–तृतीयान्त रागवाचक लाक्षा और रोचना शब्दके उत्तर 'रक्तम्' इस अर्थमें ठक् प्रत्यय हो, अण्का अपवाद है, जैसे–लाक्षया रक्तं वस्त्रम्=लाक्षिकः । रौचनिकः ।

शकल और कर्दम शब्दके उत्तर ठक् प्रत्यय हो * जैसे–शकलेन रक्तः=शाकलिकः । कार्दमिकः । वृत्तिकार कहतेहैं कि, इन दोनोंसे अण् भी हो, यथा–शाकलः । कार्दमः ॥

तृतीयान्त रागवाचक नीली शब्दके उत्तर रक्त इस अर्थमें अन् प्रत्यय हो* जैसे–नील्या रक्तम्=नीलम् ।

पीत प्रातिपदिकसे कन् प्रत्यय हो* जैसे–पीतेन रक्तम्=पीतकम् ।

हरिद्रा और महारजना शब्दके उत्तर 'रक्त' इस अर्थमें अञ् प्रत्यय हो * जैसे–हरिद्रया रक्तम्=हारिद्रम्। माहारजनम्॥

१२०४ नक्षत्रेण युक्तः कालः ।४।२।३॥

पुष्येण युक्तं पौषमहः । पौषी रात्रिः ॥

१२०४–तृतीयान्त नक्षत्रवाचक शब्दके उत्तर 'युक्त' इस अर्थमें अण् प्रत्यय हो और जो युक्त हो वह यदि कालवाचक हो तो, जैसे–पुष्येण युक्तम्=पौषम् अहः । पौषी रात्रिः ॥

१२०५ लुबविशेषे । ४ । २ । ४ ॥

पूर्वेण विहितस्य लुप्स्यात् षष्टिदण्डात्मकस्य कालस्यावान्तरविशेषश्चेन्न गम्यते । अद्य पुष्यः। कथं तर्हि पुष्ययुक्ता पौर्णमासी पौषीति । विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्य इति

निर्देशेन पौर्णमास्यामयं लुब् नेति ज्ञापितत्वात्। श्रवणशब्दात्तु अत एव लुप् युक्तवद्भावाभावश्च। अबाधकान्यपि निपातनानि। श्रावणी॥

१२०५-यदि षष्टिदंडात्मक कालके अवान्तर (मध्य)में कालविशेषकी प्रतीति नहीं हो तो पूर्वसूत्रसे विहित जो प्रत्यय उसका लोप हो, जैसे-पुष्येण युक्तः कालः अद्य=पुष्यः। इस सूत्रको रहते 'पुष्ययुक्ता पौर्णमासी पौषी' इस स्थलमें प्रत्ययका लोप क्यों नहीं हुआ ? इसपर कहतेहैं कि, "विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः १२३५" इस सूत्रनिर्देशके कारण 'पौर्णमासी' अर्थमें यह लुप् न हो ऐसा ज्ञापन होनेसे यहां लुप् नहीं हुआ। इसी सूत्रनिर्देशके कारण श्रवण शब्दके उत्तर तो प्रत्ययका लुप् और प्रकृतिवत् लिङ्ग तथा वचनका अभाव होताहै। निपातन बाधक नहीं भी होतेहैं इस परिभाषासे 'श्रावणी' इस स्थानमें प्रत्ययका लुप् नहीं हुआ यह जानना चाहिये॥

१२०६ संज्ञायां श्रवणाश्वत्थाभ्याम्। ४।२।५॥

विशेषार्थोयमारम्भः। श्रवणा रात्रिः। अश्वत्थो मुहूर्तः। संज्ञायां किम्। श्रावणी। आश्वत्थी॥

१२०६-संज्ञा होनेपर श्रवण और अश्वत्थ शब्दके उत्तर प्रत्ययका लुप् हो। विशेषके निमित्त यह सूत्रारंभ हुआहै अर्थात् षष्टिदण्डात्मक कालके मध्यमें जहां कालविशेषकी प्रतीति हो वहांके निमित्त है, जैसे-श्रवणा रात्रिः। अश्वत्थो मुहूर्तः। संज्ञा न होनेपर प्रत्ययका लुप् नहीं होगा, जैसे-श्रावणी। आश्वत्थी॥

१२०७ द्वन्द्वाच्छः। ४।२।६॥

नक्षत्रद्वन्द्वाद्युक्ते काले छः स्यात् विशेषे सत्यसति च। तिष्यपुनर्वसवीयमहः। राधानुराधीया रात्रिः॥

१२०७-नक्षत्रवाचक शब्दका द्वन्द्व समास होनेपर 'तद्युक्त काल' इस अर्थमें विशेष रहते अथवा न रहते उसके उत्तर छ प्रत्यय हो, जैसे-तिष्यपुनर्वसवीयमहः। राधानुराधीया रात्रिः॥

१२०८ दृष्टं साम। ४।२।७॥

तेनेत्येव। वशिष्ठेन दृष्टं वाशिष्ठं साम॥ अस्मिन्नर्थेऽण् डिद्वा वक्तव्यः॥ *॥ उशनसा दृष्टमौशनम्। औशनसम्॥

१२०८-दृष्ट अर्थमें तृतीयान्त समर्थसे अण् आदि प्रत्यय हों, यदि वह दृष्ट वस्तु साम अर्थात् सामवेद हो तो, जैसे-वशिष्ठेन दृष्टम्=वाशिष्ठं साम।

दृष्ट अर्थमें अण् प्रत्यय विकल्प करके डित् हो * जैसे-उशनसा दृष्टम्, इस विग्रहमें औशनम्, औशनसम्॥

१२०९ कलेर्ढक्। ४।२।८॥

कलिना दृष्टं कालेयं साम॥

१२०९-दृष्ट अर्थमें और वह दृष्ट वस्तु यदि साम वेद हो तो कलि शब्दके उत्तर ढक् प्रत्यय हो, जैसे-कलिना दृष्टं साम, इस वाक्यमें कालेयं साम। (यह वार्त्तिक मानागयाहै)॥

१२१० वामदेवाड्ड्यड्ड्यौ। ४।२।९॥

वामदेवेन दृष्टं साम वामदेव्यम्॥ सिद्धे यस्येति लोपेन किमर्थं ययतौ डितौ। ग्रहणं मातदर्थंमूद्वामदेव्यस्य नञ्स्वरे॥ *॥

१२१०-दृष्टार्थमें दृष्ट वस्तुके सामवेद होनेपर वामदेव शब्दके उत्तर ड्यत् और ड्य प्रत्यय हों, जैसे-वामदेवेन दृष्टं साम, इस विग्रहमें वामदेव्यम्। "यस्येति च ३११" इस सूत्रसे ही लोपकी सिद्धि होती थी, तब किस कारण य और यत् प्रत्ययको डित् किया ? इस विषयमें कहतेहैं कि, वामदेव्य शब्दका "ययतोश्चातदर्थे ३८९०" इस सूत्रसे अतदर्थमें विहित जो नञ्स्वर उसमें ग्रहण न हो अर्थात् 'अवामदेव्यम्' यहां नञ्स्वर न हो॥

१२११ परिवृतो रथः। ४।२।१०॥

वस्त्रैः परिवृतो वास्त्रो रथः। रथः किम्। वस्त्रेण परिवृतः कायः। समन्ताद्वेष्टितः परिवृत उच्यते। तेनेह न। छात्रैः परिवृतो रथः॥

१२११-तृतीयान्त समर्थसे परिवृत (मढा हुआ) अर्थमें अण् आदि प्रत्यय हों, जैसे-परिवृत वस्तु यदि रथ हो तो अण् आदि प्रत्यय हों, जैसे-वस्त्रैः परिवृतः=वास्त्रो रथः। जिस स्थानमें रथ परिवृत नहीं होगा,उस स्थानमें अणादि नहीं होंगे, जैसे-वस्त्रेण परिवृतः कायः अर्थात् वस्त्रसे चारों तरफसे घिरा हुआ शरीर। चारों तरफसे वेष्टितको परिवृत कहतेहैं, इस कारण, छात्रैः परिवृतः रथः, इस स्थलमें अण् प्रत्यय नहीं हुआ॥

१२१२ पाण्डुकम्बलादिनिः।४।२।११॥

पाण्डुकम्बलेन परिवृतः पाण्डुकम्बली। पाण्डुकम्बलशब्दो राजास्तरणवर्णकम्बलस्य वाचकः। मत्वर्थीयेनैव सिद्धे वचनमणो निवृत्त्यर्थम्॥

१२१२-परिवृत अर्थमें पांडुकंबल शब्दके उत्तर इनि प्रत्यय हो, जैसे-पांडुकम्बलेन परिवृतः, इस विग्रहमें पांडुकम्बली। पांडुकम्बल शब्दसे राजाका आस्तरण कम्बल जानना। मत्वर्थीय इन् प्रत्ययसे ही उक्त प्रयोगकी सिद्धि थी फिर यह सूत्र केवल अण् प्रत्ययकी निवृत्तिके निमित्त किया है॥

१२१३ द्वैपवैयाघ्रादञ्। ४।२।१२॥

द्वीपिनो विकारो द्वैपम्। तेन परिवृतो द्वैपो रथः। एवं वैयाघ्रः॥

१२१३-परिवृत अर्थमें परिवृत वस्तु रथ हो तो द्वैप और वैयाघ्र शब्दके उत्तर अञ् प्रत्यय हो, जैसे-द्वीपिनो विकारः; इस विग्रहमें द्वैपम्,तेन परिवृतः=द्वैपः अर्थात् रथः। इसी प्रकार वैयाघ्रः॥

१२१४ कौमारापूर्ववचने। ४।२।१३॥

कौमारित्यविभक्तिको निर्देशः। अपूर्वत्वे निपातनमिदम्। अपूर्वपतिं कुमारीं पतिरुपपन्नः कौमारः पतिः। यद्वा। अपूर्वपतिः कुमारी पतिमुपपन्ना कौमारी भार्या॥

१२१४–अपूर्व होनेपर अर्थात् जिसका किसीके साथ विवाह पहले न हुआ हो ऐसे कुमार शब्दके उत्तर निपातनसे अण् प्रत्यय हो। सूत्रमें कौमार यह अविभक्तिक निर्देश है। यह अपूर्वत्वमें निपातनसे सिद्ध हुआ है, जैसे–अपूर्वपतिं कुमारीं पतिरुपपन्नः=कौमारः पतिः। अथवा अपूर्वपतिः कुमारी पतिमुपपन्ना=कौमारी भार्या॥

१२१५ तत्रोद्धृतममत्रेभ्यः। ४।२।१४॥

शराव उद्धृतः शाराव ओदनः। उद्धरतिरिहोद्धरणपूर्वके निधाने वर्तते। तेन सप्तमी। उद्धृत्य निहित इत्यर्थः॥

१२१५–सप्तम्यन्त पात्रवाचक शब्दसे उद्धृत अर्थमें अण् आदि प्रत्यय हों जैसे–शरावे उद्धृतः, इस विग्रहमें शारावः ओदनः। इस सूत्रमें उद्धरति, अर्थात् उत्पूर्वक धृ धातुका उद्धरणपूर्वक स्थापन अर्थ है, इस कारण सप्तमी विभक्ति विहित हुई है। उद्धृतः इसका अर्थ उठाकर रक्खा हुआ, ऐसा जानना॥

१२१६ स्थण्डिलाच्छयितरि व्रते। ४।२।१५॥

तत्रेत्येव। समुदायेन चेद्व्रतं गम्यते। स्थण्डिले शेते स्थाण्डिलो भिक्षुः॥

१२१६–शयनकर्त्ता अर्थ होनेपर सप्तम्यन्त स्थण्डिल शब्दके उत्तर अण् आदि प्रत्यय हों, समुदायसे यदि व्रत गम्यमान हो तो, जैसे–स्थण्डिले शेते स्थाण्डिलः, अर्थात् भिक्षुक॥

१२१७ संस्कृतं भक्षाः। ४।२।१६॥

सप्तम्यन्तादण् स्यात्संस्कृतेऽर्थे यत्संस्कृतं भक्षाश्चेत्ते स्युः। भ्राष्ट्रे संस्कृता भ्राष्ट्रा यवाः। अष्टसु कपालेषु संस्कृतोऽष्टाकपालः पुरोडाशः॥

१२१७–संस्कृत अर्थ होनेपर संस्कृत द्रव्य भक्ष्य वस्तु हो तो सप्तम्यन्त प्रातिपदिकके उत्तर अण् प्रत्यय हो, जैसे–भ्राष्ट्रे संस्कृताः, इस विग्रहमें भ्राष्ट्राः यवाः। अष्टसु कपालेषु संस्कृतः=अष्टाकपालः, अर्थात् पुरोडाशः॥

१२१८ शूलोखाद्यत्। ४।२।१७॥

अणोपवादः। शूले संस्कृतं शूल्यं मांसम्। उखा पात्रविशेषः। तस्यां संस्कृतमुख्यम्॥

१२१८–संस्कृत अर्थ होनेपर संस्कृत वस्तु भक्ष्य द्रव्य हो तो सप्तम्यन्त शूल और उखा शब्दके उत्तर यत् प्रत्यय हो, यह सूत्र अण् प्रत्ययका अपवादक है, जैसे–शूले संस्कृतम्=शूल्यं मांसम्। उखा शब्दसे पात्रविशेष जानना, उसमें संस्कृत, इस अर्थमें उख्यम्॥

१२१९ दध्नष्ठक्। ४।२।१८॥

दध्नि संस्कृतं दाधिकम्॥

१२१९–संस्कृत अर्थ होनेपर सप्तम्यन्त दधि शब्दके उत्तर ठक् प्रत्यय हो, जैसे–दध्नि संस्कृतम्, इस विग्रहमें दाधिकम्॥

१२२० उदश्वितोऽन्यतरस्याम्। ४।२।१९॥

ठक् स्यात्पक्षेऽण्॥

१२२०–संस्कृत अर्थमें उदश्वित् शब्दके उत्तर विकल्प करके ठक् प्रत्यय हो, विकल्प पक्षमें अण् प्रत्यय होगा॥

१२२१ इसुसुक्तान्तात्कः। ७।३।५१॥

इस् उस् उक् त एतदन्तात्परस्य ठस्य कः स्यात्। उदकेन श्वयति वर्धते इत्युदश्वित्। तत्र संस्कृत औदश्वित्कः औदश्वितः। इसुसोः प्रतिपदोक्तयोर्ग्रहणान्नेह। आशिषा चरति आशिषिकः। उषा चरति औषिकः॥ दोष उपसंख्यानम्॥*॥ दोर्भ्यां चरति दौष्कः॥

१२२१–इस् उस् उक् और त् यह अन्तमें हैं जिनके ऐसे प्रातिपदिकके परे स्थित ठके स्थानमें क हो, जैसे–उदकेन श्वयति वर्द्धते, ऐसे विग्रहमें 'उदश्वित्' यह पद सिद्ध हुआ, उसमें संस्कृत, इस अर्थमें औदश्वित्कः, औदश्वितः।

प्रतिपदोक्त इस् और उस्के ग्रहणके कारण इस स्थानमें क आदेश नहीं हुआ, जैसे–आशिषा चरति, इस वाक्यमें आशिषिकः। उषा चरति, इस वाक्यमें औषिकः।

दोष् शब्दके परे स्थित ठके स्थानमें ककारका उपसंख्यान करना चाहिये * जैसे–दोर्भ्यां चरति, इस वाक्यमें दौष्कः॥

१२२२ क्षीराड्ढञ्। ४।२।२०॥

अत्र संस्कृतमित्येव संबध्यते न तु भक्षा इति। तेन यवाग्वामपि भवति। क्षैरेयी॥

१२२२–संस्कृत अर्थ होनेपर क्षीर शब्दके उत्तर ढञ् प्रत्यय हो, इस सूत्रमें 'संस्कृत' यही अर्थ सम्बद्ध होताहै भक्ष अर्थ नहीं, इस कारण यवागू अर्थ होनेपर भी क्षीर शब्दके उत्तर ढञ् प्रत्यय होताहै, जैसे–क्षैरेयी॥

१२२३ सास्मिन्पौर्णमासीति। ४।२।२१॥

इतिशब्दात्संज्ञायामिति लभ्यते। पौषी पौर्णमासी अस्मिन् पौषो मासः॥

१२२३–संज्ञा होनेपर 'अस्मिन्' इस सप्तम्यन्तार्थमें प्रथमान्त पौर्णमासीवाचक शब्दके उत्तर अण् आदि प्रत्यय हों, इति शब्दसे 'संज्ञायाम्' इसका लाभ होताहै। पौषी पौर्णमासी अस्मिन्, इस विग्रहमें पौषो मासः॥

१२२४ आग्रहायण्यश्वत्थाट्ठक्। ४।२।२२॥

अग्रे हायनमस्या इति आग्रहायणी। प्रज्ञादेराकृतिगणत्वादण्। पूर्वपदात्संज्ञायामिति णत्वम्।

आग्रहायणी पौर्णमासी अस्मिन् आग्रहायणिको मासः । अश्वत्थेन युक्ता पौर्णमासी अश्वत्थः । निपातनात्पौर्णमास्यामपि लुप् । आश्वत्थिकः ॥

१२२४-'अस्मिन्' इस सप्तम्यन्तार्थमें आग्रहायणी और अश्वत्थ शब्दके उत्तर ठक् प्रत्यय हो, जैसे-अग्रे हायनम् अस्याः, इस वाक्यमें 'आग्रहायणी' इस स्थलमें प्रज्ञादिके आकृतिगणत्वके कारण अण् प्रत्यय हुआ है और "पूर्वपदात्संज्ञायाम्० ८५७" इस सूत्रसे णत्व हुआ है, आग्रहायणी पौर्णमासी अस्मिन्, इस वाक्यमें आग्रहायणिको मासः । अश्वत्थेन युक्ता पौर्णमासी=अश्वत्थः। सूत्रमें अश्वत्थ ऐसे निपातनके कारण पौर्णमासी होनेपर भी प्रत्ययका लुक् हुआ । अश्वत्थः पौर्णमासी अस्मिन्मासि, इस विग्रहमें आश्वत्थिकः ॥

१२२५ विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः । ४ । २ । २३ ॥

एभ्यष्ठग्वा पक्षेऽण् । फाल्गुनिकः फाल्गुनो मासः । श्रावणिकः । श्रावणः । कार्तिकिकः । कार्तिकः । चैत्रिकः । चैत्रः ॥

१२२५-'अस्मिन्' इस सप्तम्यन्तार्थमें फाल्गुनी, श्रवणा, कार्त्तिकी और चैत्री शब्दके उत्तर विकल्प करके ठक् प्रत्यय हो, विकल्प पक्षमें अण् प्रत्यय होगा, जैसे-फाल्गुनिकः, फाल्गुनो मासः । श्रावणिकः,श्रावणः । कार्त्तिकिकः,कार्त्तिकः । चैत्रिकः, चैत्रः ॥

१२२६ सास्य देवता । ४ । २ । २४ ॥

इन्द्रो देवताऽस्येति ऐन्द्रं हविः । पाशुपतम् । बार्हस्पतम् । त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता मन्त्रस्तुत्या च । ऐन्द्रो मन्त्रः । आग्नेयो वै ब्राह्मणो देवतयेति तु शैषिकेऽर्थे सर्वत्राग्नीति ठक्॥

१२२६-'अस्य' इस षष्ठ्यन्तार्थमें प्रथमान्त देवतावाचक शब्दके उत्तर अण् आदि प्रत्यय हों, जैसे-इन्द्रो देवता अस्य, इस वाक्यमें ऐन्द्रं हविः । पाशुपतम् । बार्हस्पतम् । त्यज्यमान द्रव्यमें उद्देश्यविशेष जो हो, उसका नाम देवता है और मन्त्रसे जिसकी स्तुति की जाय उसको भी देवता कहतेहैं ॥ 'ऐन्द्रो मन्त्रः आग्नेयो वै ब्राह्मणो देवतया' इस स्थलमें तो शैषिकार्थमें "अग्निकलिभ्याम्०" इस वार्त्तिकसे ठक् प्रत्यय हुआ ॥

१२२७ कस्येत् । ४ । २ । २५ ॥

कशब्दस्य इदादेशः स्यात्प्रत्ययसन्नियोगेन । यस्येति लोपात्परत्वादादिवृद्धिः । को ब्रह्मा देवताऽस्य कायं हविः । श्रीर्देवताऽस्य श्रायम् ॥

१२२७-प्रत्ययके सन्नियोगसे क शब्दको इत् आदेश हो । "यस्येति च ३११" इस सूत्रसे विहित लोपसे पर होनेके कारण आदि स्वरको वृद्धि हुई, जैसे-को ब्रह्मा देवता अस्य, इस विग्रहमें कायम्, अर्थात् हविष । श्रीर्देवतास्य, इस विग्रहमें श्रायम् ॥

१२२८ शुक्राद्धन् । ४ । २ । २६ ॥

शुक्रियम् ॥

१२२८-अस्य इस षष्ठ्यन्तार्थमें शुक्र शब्दके उत्तर घन् प्रत्यय हो, जैसे-शुक्रियम् (घको इय्) ॥

१२२९ अपोनप्त्रपान्नप्तृभ्यां घः ।४।२।२७।

अपोनप्त्रियम् । अपान्नप्त्रियम् । अपोनपात् अपान्नपाच्च देवता । प्रत्ययसन्नियोगेन तूक्तं रूपं निपात्यते । अत एवापोनपाते अपान्नपातेऽनुब्रूहीति प्रैषः ॥

१२२९-अपोनपात् और अपान्नपात् शब्दके उत्तर घ प्रत्यय हो, इस घ प्रत्ययके सन्नियोगसे अपोनपात् शब्दके स्थानमें अपोनप्तृ और अपान्नपात् शब्दके स्थानमें अपान्नप्तृ आदेश निपातनसे हुए हैं, जैसे अपोनपात् देवता अस्य, इस विग्रहमें अपोनप्त्रियम् । अपान्नपात् देवतास्य, इस विग्रहमें अपान्नप्त्रियम् । यहां अपोनपात् और अपान्नपात्से विहित प्रत्ययके साथ उक्त रूप निपातनसे सिद्ध हुए हैं, इस कारण 'अपोनपाते, अपान्नपातेऽनुब्रूहि' ऐसा प्रैष है ॥

१२३० छ च । ४ । २ । २८ ॥

योगविभागो यथासंख्यनिवृत्त्यर्थः । अपोनप्त्रीयम् । अपांनप्त्रीयम् ॥ शतरुद्राद्घश्च ॥*॥ चाच्छः । शतं रुद्रा देवता अस्य शतरुद्रियम् । शतरुद्रीयम् । घच्छयोर्विधानसामर्थ्याद्द्विगोर्लुगनपत्ये इति न लुक् ॥

१२३०-अपोनपात् और अपान्नपात् शब्दके उत्तर छ प्रत्यय हो, इस छ प्रत्ययके संनियोगसे अपोनपात् शब्दके स्थानमें अपोनप्तृ और अपान्नपात् शब्दके स्थानमें अपान्नप्तृ आदेश हुआहै । यहां यथासंख्यकी निवृत्तिके निमित्त योगविभाग कियाहै अर्थात् भिन्न सूत्र न करके यदि "अपोनप्त्रपान्नप्तृभ्यां घश्छ च" ऐसा एक सूत्र करते तो यथाक्रम अपोनपात् शब्दके उत्तर घ प्रत्यय और अपान्नपात् शब्दके उत्तर छ प्रत्यय होजाता, उसकी निवृत्तिके निमित्त भिन्न सूत्र किया है । अपोनप्त्रीयम् । अपान्नप्त्रीयम् ।

शतरुद्र शब्दके उत्तर घ प्रत्यय और चकारसे छ प्रत्यय भी हो * जैसे-शतं रुद्रा देवता अस्य, इस विग्रहमें शतरुद्रियम्, शतरुद्रीयम् । घ और छ प्रत्ययके विधानके सामर्थ्यसे "द्विगोर्लुगनपत्ये १०८०" इस सूत्रसे लुक् नहीं हुआ ॥

१२३१ महेन्द्राद् घाणौ च । ४।२।२९॥

चाच्छः । महेन्द्रियं हविः । माहेन्द्रम् । महेन्द्रीयम् ॥

१२३१-महेन्द्र शब्दके उत्तर घ और अण् प्रत्यय हो और चकारसे छ प्रत्यय भी हो, जैसे-महेन्द्रियम् हविः, माहेन्द्रम्, महेन्द्रीयम् ॥

१२३२ सोमाट्ट्यण्। ४। २। ३०॥

सौम्यम्। टित्वान् ङीप्। सौमी ऋक्॥

१२३२–सोम शब्दके उत्तर ट्यण् प्रत्यय हो, जैसे–सौम्यम्। टित्वके कारण ङीप् प्रत्यय होकर 'सौमी' पद सिद्ध होगा, इसका अर्थ ऋक् है॥

१२३३ वाय्वृतुपित्रुषसो यत्।४।२।३१॥

वायव्यम्। ऋतव्यम्॥

१२३३–वायु, ऋतु, पितृ और उषस् शब्दके उत्तर यत् प्रत्यय हो, जैसे–वायव्यम्। ऋतव्यम्॥

१२३४ रीङृतः। ७। ४। २७॥

अकृद्यकारेऽसार्वधातुके यकारे च्वौ च परे ऋदन्तांगस्य रीङादेशः स्यात्। यस्येति च। पित्र्यम्। उषस्यम्॥

१२३४–कृत्से भिन्न और सार्वधातुकसे भिन्न यकार और च्वि प्रत्यय परे रहते ऋकारान्त जो अङ्ग उसको रीङ् आदेश हो, "यस्येति० ३११" इस सूत्रसे ईकारका लोप होकर–पित्र्यम्। उषस्यम्॥

१२३५ द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च। ४। २। ३२॥

चाद्यत्। द्यावापृथिवीयम्। द्यावापृथिव्यम्। शुनासीरीयम्। शुनासीर्यम्॥

१२३५–द्यावापृथिवी, शुनासीर, मरुत्वत्, अग्नीषोम, वास्तोष्पति और गृहमेध शब्दके उत्तर छ प्रत्यय हो और चकारसे यत् प्रत्यय भी हो, जैसे–द्यावापृथिव्यौ देवते अस्य=द्यावापृथिवीयम्, द्यावापृथिव्यम्। शुनासीरीयम्, शुनासर्यिम्॥

१२३६ अग्नेर्ढक्। ४। २। ३३॥

आग्नेयम्॥

१२३६–अग्नि शब्दके उत्तर ढक् प्रत्यय हो, जैसे–आग्नेयम्॥

१२३७ कालेभ्यो भववत्। ४।२।३४॥

मासिकम्। प्रावृषेण्यम्॥

१२३७–कालवाचक शब्दके उत्तर भव अर्थमें कहे हुए प्रत्ययोंके समान 'सास्य देवता' ऐसे अर्थमें प्रत्यय हों,–जैसे–मासिकम्। प्रावृषेण्यम्॥

१२३८ महाराजप्रोष्ठपदाट्ठञ्। ४।२।३५॥

माहाराजिकम्। प्रौष्ठपदिकम्॥

१२३८–महाराज और प्रोष्ठपद शब्दके उत्तर ठञ् प्रत्यय हो, जैसे–महाराजो देवता अस्य=माहाराजिकम्। प्रौष्ठपदिकम्॥

१२३९ देवताद्वन्द्वे च। ७। ३। २१॥

अत्र पूर्वोत्तरपदयोराद्यचो वृद्धिः स्यात् ञिति णिति किति च परे। आग्निमारुतम्॥

१२३९–ञित्, णित् और कित् प्रत्यय परे रहते देवतावाचक शब्दके द्वन्द्व समासमें पूर्वपद और उत्तर पदका जो आद्यच् उसको वृद्धि हो, जैसे–आग्निमारुतम्॥

१२४० नेन्द्रस्य परस्य। ७। ३।२२॥

परस्येन्द्रस्य वृद्धिर्न स्यात्। सौमेन्द्रः। परस्य किम्। ऐन्द्राग्नः॥

१२४०–इन्द्र शब्द परे रहते उसके इकारको वृद्धि नहीं हो, जैसे–सौमेन्द्रः। इन्द्र शब्द परे न रहते अर्थात् पूर्वमें रहते वृद्धि होगी, जैसे–ऐन्द्राग्नः॥

१२४१ दीर्घाच्च वरुणस्य। ७।३।२३॥

दीर्घात्परस्य वरुणस्य न वृद्धिः। ऐन्द्रावरुणम्। दीर्घात्किम्। आग्निवारुणीमनड्वाहीमालभेत॥ तदस्मिन्वर्तत इति नवयज्ञादिभ्य उपसंख्यानम्॥ *॥ नावयज्ञिकः कालः। पाकयज्ञिकः॥ पूर्णमासादण् वक्तव्यः॥ *॥ पूर्णो मासोऽस्यां वर्तते इति पौर्णमासी तिथिः॥

१२४१–दीर्घके परे स्थित वरुण शब्दके आद्यच्को वृद्धि न हो, जैसे–ऐन्द्रावरुणम्। जिस स्थानमें दीर्घसे परे स्थित वरुण शब्द नहीं होगा, उस स्थानमें वृद्धि होगी, जैसे–आग्निवारुणीमनड्वाहीमालभेत।

वह इसमें वर्तताहै, इस अर्थमें नवयज्ञादि शब्दोंके उत्तर ठञ्का उपसंख्यान करना चाहिये* जैसे–नावयज्ञिकः कालः। पाकयज्ञिकः। वह इसमें वर्तताहै, इस अर्थमें पूर्णमास शब्दके उत्तर अण् प्रत्यय हो * जैसे–पूर्णः मासोऽस्यां वर्तते इस विग्रहमें पौर्णमासी तिथिः॥

१२४२ पितृव्यमातुलमातामहपितामहाः। ४। २। ३६॥

एते निपात्यन्ते॥ पितुर्भ्रातरि व्यत्॥ *॥ पितुर्भ्राता पितृव्यः॥ मातुर्डुलच्॥ *॥ मातुर्भ्राता मातुलः॥ मातृपितृभ्यां पितरि डामहच्॥ *॥ मातुः पिता मातामहः। पितुः पिता पितामहः॥ मातरि षिच्च॥ *॥ मातामही। पितामही॥ अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः॥ *॥ सकारपाठसामर्थ्यान्न षः। अविसोढम्। अविदूसम्। अविमरीसम्॥ तिलान्निष्फलात्पिञ्जपेजौ॥ *॥ तिलपिञ्जः। तिलपेजः। वन्ध्यस्तिल इत्यर्थः॥ पिञ्जश्छन्दसि डिच्च॥ *॥ तिल्पिञ्जः॥

१२४२–पितृव्य, मातुल, मातामह, पितामह, इतने पद निपातनसे सिद्ध हों।

पिताका भ्राता होनेपर पितृ शब्दके उत्तर व्यत् प्रत्यय हो * जैसे-पितुर्भ्राता=पितृव्यः ।

माताका भ्राता होनेपर मातृ शब्दके उत्तर डुलच् प्रत्यय हो * जैसे-मातुर्भ्राता=मातुलः ।

मातृ और पितृ शब्दके उत्तर उसका पिता वाच्य होनेपर डामहच् प्रत्यय हो * जैसे-मातुःपिता=मातामहः । पितुः पिता=पितामहः ।

माता और पिताकी माता वाच्य होनेपर मातृ शब्दके उत्तर डामहच् प्रत्यय हो और प्रत्यय पित् हो * जैसे-मातामही । पितामही ।

दुग्ध अर्थमें अवि शब्दके उत्तर सोढ, दूस और मरीसच् प्रत्यय हों * सकारपाठसामर्थ्यके कारण प्रत्ययावयव सकारको षत्व नहीं हुआ, जैसे-अवेर्दुग्धम्=अविसोढम्, अविदूसम्, अविमरीसम् ।

निष्फलार्थक तिल शब्दके उत्तर पिञ्ज और पेज प्रत्यय हो* जैसे-तिलपिञ्जः । तिलपेजः, अर्थात् वन्ध्य तिल ।

वेदमें तिल शब्दके उत्तर पिञ्ज प्रत्यय हो और वह डित् भी हो * जैसे=तिल्पिञ्जः ॥

१२४३ तस्य समूहः । ४ । २ । ३७ ॥

काकानां समूहः काकम् । बाकम् ॥

१२४३-समूह अर्थमें षष्ठ्यन्त प्रातिपदिकके उत्तर अण् आदि प्रत्यय हों, जैसे=काकानां समूहः, इस विग्रहमें-काकम् । बाकम् ॥

१२४४ भिक्षादिभ्योऽण् ।४।२ । ३८ ॥

भिक्षाणां समूहो भैक्षम् । गर्भिणीनां समूहो गार्भिणम् । इह भस्याढ इति पुंवद्भावे कृते ॥

१२४४-समूह अर्थमें भिक्षादि शब्दके उत्तर अण् प्रत्यय हो, जैसे-भिक्षाणां समूहः=भैक्षम् । गर्भिणीनां समूहः=गार्भिणम्, इस स्थलमें "भस्याढे०" इससे पुंवद्भाव होनेपर-॥

१२४५ इनण्यनपत्ये । ६ । ४ ।१६४॥

अनपत्यार्थेणि परे इन् प्रकृत्या स्यात् । तेन नस्तद्धित इति टिलोपो न । युवतीनां समूहो यौवनम् । शत्रन्तादनुदात्तादेरञि यौवतम् ॥

१२४५-अनपत्यार्थमें विहित अण् प्रत्यय परे रहते इन्को प्रकृतिभाव हो, अर्थात् इन् विकृत न हो, इससे "नस्तद्धिते ६७९" इस सूत्रसे टिका लोप नहीं हुआ, युवतीनाम् समूहः, इस विग्रहमें यौवनम् । शतृप्रत्ययान्त अनुदात्तादि युवत् शब्दके उत्तर अञ् प्रत्यय होकर-यौवतम् ॥

१२४६ गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् । ४।२।३९ ॥

एभ्यः समूहे वुञ् स्यात् । लौकिकमिह गोत्रं तच्चापत्यमात्रम् ॥

१२४६-गोत्रप्रत्ययान्त, उक्ष, उष्ट्र, उरभ्र, राजन्, राजन्य, राजपुत्र, वत्स, मनुष्य और अज शब्दके उत्तर समूह अर्थमें वुञ् प्रत्यय हो । इस स्थलमें गोत्र शब्दसे लौकिक गोत्र जानना, वह अपत्यमात्र है ॥

१२४७ युवोरनाकौ । ७ । १ । १ ॥

यु वु एतयोरनुनासिकयोः क्रमादन अक एतावादेशौ स्तः । ग्लुचुकायनीनां समूहो ग्लौचुकायनकम् । औक्षकमित्यादि । आपत्यस्य चेति यलोपे प्राप्ते ॥ प्रकृत्या अके राजन्यमनुष्ययुवानः ॥ * ॥ राजन्यकम् । मानुष्यकम् ॥ वृद्धाच्चेति वक्तव्यम् ॥ * ॥ वार्द्धकम् ॥

१२४७-यु वु इन दो अनुनासिक वर्णोंके स्थानमें यथाक्रम अन और अक आदेश हों, जैसे-ग्लुचुकायनीनां समूहः, इस विग्रहमें ग्लौचुकायनकम् । औक्षकम् । "आपत्यस्य च० १०८२" इस सूत्रसे यकारका लोप प्राप्त होनेपर-

अक प्रत्यय परे रहते राजन्य, मनुष्य और युवन् शब्दको प्रकृतिभाव हो * जैसे-राजन्यकम् । मानुष्यकम् ।

वृद्ध शब्दके उत्तर वुञ् प्रत्यय हो * जैसे-वार्द्धकम् ॥

१२४८ केदाराद्यञ्च । ४ । २ । ४० ॥

चाद्वुञ् । कैदार्यम् । कैदारकम् । गणिकाया यञिति वक्तव्यम् ॥ * ॥ गाणिक्यम् ॥

१२४८-समूह अर्थमें केदार शब्दके उत्तर यञ् प्रत्यय हो और चकारसे वुञ् प्रत्यय भी हो,जैसे-कैदार्य्यम्,कैदारकम्।

गणिका शब्दके उत्तर यञ् प्रत्यय हो* जैसे-गाणिक्यम् ॥

१२४९ ठञ्कवचिनश्च । ४ । २ । ४१॥

चात्केदारादपि । कवचिनां समूहः कावचिकम् । कैदारिकम् ॥

१२४९-समूह अर्थमें कवचिन् शब्दके उत्तर ठञ् प्रत्यय हो, चकारसे केदार शब्दके उत्तर भी ठञ् प्रत्यय हो, जैसे-कवचिनां समूहः, इस विग्रहमें कावचिकम् । कैदारिकम् ॥

१२५० ब्राह्मणमाणववाडवाद्यत् । ४ । २ । ४२ ॥

ब्राह्मण्यम् । माणव्यम् । वाडव्यम् । पृष्ठादुपसंख्यानम् ॥ * ॥ पृष्ठ्यम् ॥

१२५०-ब्राह्मण, माणव और वाडव शब्दके उत्तर समूहार्थमें यत् प्रत्यय हो, जैसे-ब्राह्मणानां समूहः=ब्राह्मण्यम् । माणव्यम् । वाडव्यम् ।

पृष्ठ शब्दके उत्तर यत् प्रत्यय हो * जैसे-पृष्ठ्यम् ॥

१२५१ ग्रामजनबन्धुभ्यस्तल् ।४।२।४३॥

ग्रामता । जनता । बन्धुता ॥ गजसहायाभ्यां चेति वक्तव्यम् ॥ * ॥ गजता । सहायता ॥ अह्नः खः क्रतौ ॥ * ॥ अहीनः । अहर्गणसाध्यसुत्याकः क्रतुरित्यर्थः । क्रतौ किम् । आह्नः । इह खण्डिकादित्वादञ् । अह्न-

ष्टखोरेवेति नियमाट्टिलोपो न ॥ पर्श्वा णस् वक्तव्यः ॥ * ॥

१२५१–ग्राम, जन, और बन्धु शब्दके उत्तर समूह अर्थमें तल् प्रत्यय हो, जैसे–ग्रामाणां समूहः ग्रामता। जनता। बन्धुता। गज और सहाय शब्दके उत्तर समूहार्थमें तल् प्रत्यय हो* जैसे–गजानां समूहः=गजता । सहायता ।

क्रतु, अर्थात् यज्ञ वाच्य होनेपर अहन् शब्दके उत्तर ख प्रत्यय हो *जैसे–अह्नां समूहः=अहीनः, अर्थात् अहर्गणसाध्य सुत्याक नामका क्रतु । क्रतु अर्थ न होनेपर ख प्रत्यय न होकर खण्डिकादित्वके कारण अञ् प्रत्यय होगा, जैसे–आह्नः, यहां " अहष्टखोरेव ७८९"इस नियमसे टिका लोप नहीं हुआ ।

पर्शु शब्दके उत्तर णस् प्रत्यय हो * ।

१२५२ सिति च । १ । ४ । १६ ॥

सिति परे पूर्वं पदसंज्ञं स्यात् । अभत्वादोर्गुणो न । पर्शूनां समूहः पार्श्वम् ॥

१२५२–सित् प्रत्यय परे रहते पूर्वको पद संज्ञा हो, इससे भ संज्ञाके अभावके कारण "ओर्गुणः ६।४।१४६" इससे गुण नहीं होगा, जैसे–पर्शूनां समूहः, इस विग्रहमें पार्श्वम् ॥

१२५३ अनुदात्तादेरञ् । ४ । २ । ४४॥

कापोतम् । मायूरम् ॥

१२५३–अनुदात्तादि शब्दोंके उत्तर समूह अर्थमें अञ् प्रत्यय हो, जैसे–कापोतम् । मायूरम् ॥

१२५४ खण्डिकादिभ्यश्च ।४।२। ४५ ॥

अञ् स्यात् । खण्डिकानां समूहः खाण्डिकम् ॥

१२५४–खण्डिकादि शब्दोंके उत्तर समूह अर्थमें अञ् प्रत्यय हो, जैसे–खण्डिकानां समूहः, इस विग्रहमें खाण्डिकम् ॥

१२५५ चरणेभ्यो धर्मवत् ।४।२।४६ ॥

काठकम् । छान्दोग्यम् ॥

१२५५–चरणवाचक शब्दोंमेंसे जिस प्रकृतिके उत्तर जो प्रत्यय धर्म अर्थमें विधान करेंगे, वह प्रत्यय उस प्रकृतिके उत्तर समूह अर्थमें भी हो, जैसे–काठकम् । छान्दोग्यम् । यहां क्रमसे"गोत्रचरणाद्वुञ् ४।३।१२६" "छन्दोगौ० ४।३।१२९" इनसे वुञ् और ञ्य प्रत्यय हुए हैं ॥

१२५६अचित्तहस्तिधेनोष्ठक्।४।२।४७॥

साक्तुकम् । हास्तिकम् । धैनुकम् ॥

१२५६–समूह अर्थमें चित्तभिन्न, अर्थात् अचेतनवाचक शब्द, हस्ति शब्द और धेनु शब्दके उत्तर ठक् प्रत्यय हो, जैसे–सक्तूनां समूहः=साक्तुकम् । हास्तिकम् । धैनुकम् ॥

१२५७ केशाश्वाभ्यां यञ्छावन्यतरस्याम् । ४ । २ । ४८ ॥

पक्षे ठगणौ । कैश्यम् । कैशिकम् । अश्वीयम्। आश्वम् ॥

१२५७–समूह अर्थमें केश शब्दके उत्तर विकल्प करके यञ् प्रत्यय और अश्व शब्दके उत्तर विकल्प करके छ प्रत्यय हो, विकल्प पक्षमें अचित्तवाचक शब्दसे ठक् और अश्व शब्दसे अण् प्रत्यय होगा, जैसे–केशानां समूहः=कैश्यम्, कैशिकम् । अश्वीयम्, आश्वम् ॥

१२५८ पाशादिभ्यो यः । ४ ।२ ।४९ ॥

पाश्या । तृण्या । धूम्या । वन्या । वात्या ॥

१२५८–समूह अर्थमें पाशादि शब्दोंके उत्तर य प्रत्यय हो, जैसे–पाश्या । तृण्या । धूम्या । वन्या । वात्या ॥

१२५९ खलगोरथात् । ४ । २ । ५०॥

खल्या । गव्या । रथ्या ॥

१२५९–समूह अर्थमें खल, गो और रथ, शब्दके उत्तर य प्रत्यय हो, जैसे–खल्या । गव्या । रथ्या ॥

१२६० इनित्रकट्यचश्च ।४।२। ५१ ॥

खलादिभ्यः क्रमात्स्युः । खलिनी । गोत्रा । रथकट्या । खलादिभ्य इनिर्वक्तव्यः ॥ * ॥ डाकिनी । कुटुम्बिनी । आकृतिगणोयम् ॥

१२६०–खल, गो और रथ शब्दके उत्तर यथाक्रम इनि, त्र और कट्यच् प्रत्यय हो, अर्थात् खल शब्दके उत्तर इनि, गो शब्दके उत्तर त्र और रथ शब्दके उत्तर कट्यच् प्रत्यय हो, जैसे–खलिनी । गोत्रा । रथकट्या ।

खलादि शब्दोंके उत्तर इनि प्रत्यय हो * जैसे–डाकिनी । कुटुम्बिनी । खलादि आकृतिगण है ॥

१२६१ विषयो देशे । ४ । २ । ५२ ॥

षष्ठयन्तादणादयः स्युरत्यन्तपरिशीलितेऽर्थे स चेद्देशः । शिबीनां विषयो देशः शैबः । देशे किम् । देवदत्तस्य विषयोऽनुवाकः ॥

१२६१–षष्ठीविभक्त्यन्त प्रातिपदिकके उत्तर अत्यन्त परिशीलित अर्थमें अण् आदि प्रत्यय हों, जो परिशीलित हो वह यदि देश हो तो, जैसे–शिबीनां विषयो देशः, इस विग्रहमें शैबः । देश न होनेपर अण् आदि प्रत्यय नहीं होंगे, जैसे–देवदत्तस्य विषयोऽनुवाकः ॥

१२६२ राजन्यादिभ्यो वुञ्।४।२।५३॥

राजन्यकः ॥

१२६२–अत्यन्त परिशीलित अर्थमें जो परिशीलित हो वह यदि देश हो तो राजन्यादि शब्दोंके उत्तर वुञ् प्रत्यय हो, जैसे–राजन्यकः ॥

१२६३ भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ । ४ । २ । ५४ ॥

भौरिकीणां विषयो देशः । भौरिकिविधम् । भौलिकिविधम् । ऐषुकारिभक्तम् । सारसायनभक्तम् ॥

१२६३–पूर्वोक्त अर्थमें भौरिकिआदि शब्द और ऐषुकारि आदि शब्दोंके उत्तर यथाक्रम विधल् और भक्तल्

प्रत्यय हों, जैसे-मौरिकीणाम् विषयो देशः, इस विग्रहमें मौरिकिविधम् । मौलिकिविधम् । ऐषुकारिभक्तम् । सारसायनभक्तम् ॥

१२६४ सोऽस्यादिरितिच्छन्दसः प्रगाथेषु । ४ । २ । ५५ ॥

अण् । पंक्तिरादिरस्येति पाङ्क्तः प्रगाथः ॥ स्वार्थ उपसंख्यानम् ॥ * ॥ त्रिष्टुबेव त्रैष्टुभम्॥

१२६४-प्रगाथ अर्थ होनेपर षष्ठ्यन्तार्थमें आदिभूत प्रथमान्त जो छन्दोवाचक शब्द उसके उत्तर अण् प्रत्यय हो, जैसे-पंक्तिः आदिरस्य, इस विग्रहमें-पाङ्क्तः प्रगाथः ॥

स्वार्थमें भी अण् प्रत्ययका उपसंख्यान करना चाहिये* जैसे-त्रिष्टुप् एव, इस विग्रहमें-त्रैष्टुभम् ॥

१२६५ संग्रामे प्रयोजनयोद्धृभ्यः । ४ । २ । ५६ ॥

सोऽस्येत्यनुवर्तते । सुभद्रा प्रयोजनमस्य संग्रामस्येति सौभद्रः।भरता योद्धारोऽस्य संग्रामस्य भारतः ॥

१२६५-षष्ठ्यन्तार्थमें प्रथमान्त प्रयोजन और योद्धृवाचक शब्दके उत्तर अण् प्रत्यय हो, जैसे-सुभद्रा प्रयोजनमस्य संग्रामस्य, इस विग्रहमें सौभद्रः । भरता योद्धारः अस्य संग्रामस्य, इस विग्रहमें भारतः ॥

१२६६ तदस्यां प्रहरणमिति क्रीडायां णः । ४ । २ । ५७ ॥

दण्डः प्रहरणमस्यां क्रीडायां दाण्डा।मौष्टा॥

१२६६-सप्तम्यन्तार्थमें प्रथमान्त प्रहरणवाचक शब्दके उत्तर ण प्रत्यय हो। यदि सप्तम्यन्तार्थ क्रीडा हो तो,जैसे-दण्डः प्रहरणम् अस्यां क्रीडायाम्, इस विग्रहमें दाण्डा । मौष्टा ॥

१२६७ घञः सास्यां क्रियेति ञः । ४ । २ । ५८ ॥

घञन्तात्क्रियावाचिनः प्रथमान्तादस्यामिति सप्तम्यर्थे स्त्रीलिङ्गे ञप्रत्ययः स्यात् । घञ इति कृद्ग्रहणाद्गतिकारकपूर्वस्यापि ग्रहणम् ॥

१२६७-सप्तम्यन्तार्थमें प्रथमान्त घञन्त क्रियावाचक प्रातिपदिकके उत्तर स्त्रीलिङ्गमें ञ प्रत्यय हो । 'घञः' इस कृत् प्रत्ययके ग्रहणके कारण गति और कारकपूर्वक शब्दका भी ग्रहण होताहै ॥

१२६८ श्येनतिलस्य पाते ञे।६।३।७१॥

श्येन, तिल, एतयोर्मुमागमः स्यात् ञप्रत्यये परे पातशब्दे उत्तरपदे । श्येनपातोऽस्यां वर्तते श्यैनम्पाता मृगया । तिलपातोऽस्यां वर्तते तैलम्पाता स्वधा । श्येनतिलस्य किम् । दण्डपातोऽस्यां तिथौ वर्तते दाण्डपाता तिथिः ॥

१२६८-ञ प्रत्यय परे रहते और पात शब्द उत्तरपद होनेपर श्येन और तिल शब्दको मुम्का आगम हो, जैसे-श्येनपातोऽस्यां वर्त्तते, इस विग्रहमें श्यैनम्पाता मृगया । तिलपातोऽस्यां वर्तते, इस विग्रहमें तैलम्पाता स्वधा ।

श्येन और तिल शब्द न होनेके कारण मुमागम नहीं होगा, जैसे-दण्डपातोऽस्यां तिथौ वर्तते, इस विग्रहमें दाण्डपाता तिथिः ॥

१२६९ तदधीते तद्वेद । ४ । २ । ५९ ॥

व्याकरणमधीते वेद वा वैयाकरणः ॥

१२६९-तदधीते, अर्थात् उसे अध्ययन करताहै और तद्वेद, अर्थात् उसे जानताहै, ऐसा अर्थ होनेपर द्वितीयान्त प्रातिपदिकके उत्तर अण्आदि प्रत्यय हों, जैसे-व्याकरणम् अधीते वेद वा, इस विग्रहमें-वैयाकरणः ॥

१२७० क्रतूक्थादिसूत्रान्ताट्ठक् । ४ । २ । ६० ॥

क्रतुविशेषवाचिनामेवेह ग्रहणम् । तेभ्यो मुख्यार्थेभ्यो वेदितरि तत्प्रतिपादकग्रन्थपरेभ्यस्त्वध्येतरि । आग्निष्टोमिकः । वाजपेयिकः । उक्थं सामविशेषस्तल्लक्षणपरो ग्रन्थविशेषो लक्षणयोक्थम् । तदधीते वेद वा औक्थिकः ॥ मुख्यार्थात्तूक्थशब्दाट्ठगणौ नेष्येते ॥ * ॥ न्यायम् नैयायिकः । वृत्तिम् वार्त्तिकः । लौकायतम् लौकायतिक इत्यादि॥सूत्रान्तात्त्वकल्पादेरेवेष्यते ॥*॥ साङ्ग्रहसूत्रिकः । अकल्पादेः किम् । काल्पसूत्रः ॥ विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम् ॥ * ॥ वायसविद्यिकः । गौलक्षणिकः । आश्वलक्षणिकः । पाराशरकल्पिकः ॥ अङ्गक्षत्रधर्मत्रिपूर्वाद्विद्यान्तान्नेति वक्तव्यम् ॥ * ॥ आङ्गविद्यः । क्षात्रविद्यः । धार्मविद्यः । त्रिविधा विद्या त्रिविद्या तामधीते वेद वा त्रैविद्यः ॥ आख्यानाख्यायिकेतिहासपुराणेभ्यश्च ॥ * ॥ यवक्रीतमधिकृत्य कृतमाख्यानमुपचाराद् यवक्रीतं तदधीते वेत्ति वा यावक्रीतिकः । वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता । अधिकृत्य कृते ग्रन्थे इत्यर्थे वृद्धाच्छः । तस्य लुबाख्यायिकाभ्यो बहुलमिति लुप् । ततोऽनेन ठक् । वासवदत्तिकः । ऐतिहासिकः । पौराणिकः ॥ सर्वादेः सादेश्च लुग्वक्तव्यः ॥ * ॥ सर्ववेदानधीते सर्ववेदः । सर्वतन्त्रः ।सवार्त्तिकः। द्विगोर्लुगिति लुक् । द्वितन्त्रः ॥ इकन्पदोत्तरपदात् ॥ * ॥ शतषष्टेः षिकन्पथः ॥ * ॥ पूर्वपदिकः । उत्तरपदिकः । शतपथिकः । शतपथिकी । षष्टिपथिकः । षष्टिपथिकी ॥

१२७०—क्रतुवाचक उक्थादि और सूत्रान्त प्रातिपदि-
कोंके उत्तर ठक् प्रत्यय हो, इस स्थलमें क्रतु शब्दसे क्रतुवि-
शेषवाचकोंका ही ग्रहण है, सामान्यक्रतुवाचक शब्दका ग्रहण
नहीं है, मुख्यार्थयुक्त क्रतुवाची शब्दोंके उत्तर 'वेत्ता' अर्थमें
और तत्प्रतिपादक ग्रन्थपरक क्रतुवाचक शब्दके उत्तर 'अ·
ध्येता' अर्थमें ठक् प्रत्यय हो, जैसे—अग्निष्टोममधीते वेद वा=
आग्निष्टोमिकः। वाजपेयिकः। उक्थ शब्दसे सामविशेष जानना।
लक्षणाद्वारा तल्लक्षणपरक ग्रन्थविशेष भी उक्थ कहाताहै,
जैसे—उक्थमधीते वेद वा, इस विग्रहमें औक्थिकः।

मुख्यार्थविशिष्ट उक्थशब्दके उत्तर ठक् और अण् प्रत्यय
वैयाकरणोंको अभिमत नहीं है *।

न्यायम् अधीते वेद वा, इस विग्रहमें नैयायिकः। वृत्तिम्
अधीते वेद वा=वार्तिकः। लोकायतम् अधीते वेद वा=लौ-
कायतिकः—इत्यादि।

कल्प शब्द आदिमें न हो ऐसे सूत्रान्त प्रातिपदिकोंके
उत्तर ठक् प्रत्यय हो * जैसे—सांग्रहसूत्रिकः। अकल्पादि कह-
नेका भाव यह है कि, कल्प शब्द आदिमें होनेपर काल्पसूत्रः,
यहां ठक् न हो।

विद्या, लक्षण, कल्प इन शब्दोंमेंसे कोई एक शब्द
जिसके अन्तमें है, ऐसे प्रातिपदिकके उत्तर ठक् प्रत्यय हो *
जैसे—वायसविद्यिकः। गौलक्षणिकः। आश्वलक्षणिकः।
पाराशरकल्पिकः।

अङ्ग, क्षत्र, धर्म, त्रि, इन शब्दोंमेंसे कोई एक शब्द
पूर्वमें हो, और विद्या शब्द अन्तमें हो तो ऐसे प्रातिपदिकके
उत्तर ठक् प्रत्यय न हो * जैसे—आंगविद्यः। क्षात्त्र-
विद्यः। धार्मविद्यः। त्रिविधा विद्या=त्रिविद्या, तामधीते वेद
वा=त्रैविद्यः।

आख्यान, आख्यायिका, इतिहास और पुराण शब्दके
उत्तर ठक् प्रत्यय हो * जैसे—यवक्रीतका अधिकार करके
कृत जो आख्यान सो उपचारके कारण यवक्रीत कहाताहै,
उससे यवक्रीतम् अधीते वेद वा, इस विग्रहमें—यावक्रीतिकः।
वासवदत्ताका अधिकार करके की हुई आख्यायिकाका वास-
वदत्ता कहतेहैं, "अधिकृत्य कृते ग्रन्थे १४६७" इस अर्थमें
"वृद्धाच्छः १३३७" इस सूत्रसे छ प्रत्यय हुआ और "लुबा-
ख्यायिकाभ्यो बहुलम्" इस सूत्रसे उसका लुप् हुआ, पश्चात्
इससे ठक् प्रत्यय होकर—वासवदत्तिकः। ऐतिहासिकः।
पौराणिकः।

सर्व शब्द आदिमें है जिसके ऐसे प्रातिपदिक और स
शब्द आदिमें है जिसके ऐसे प्रातिपदिकके उत्तर अण् प्रत्य-
यका लुक् हो * जैसे—सर्ववेदान् अधीते=सर्ववेदः। सर्वतन्त्रः।
सवार्तिकः। "द्विगोर्लुक्—१०८०" इस सूत्रसे अण् प्रत्ययका
लुक् होकर द्वितंत्रः।

पद शब्द उत्तर पद हो जिसके ऐसे प्रातिपदिकके उत्तर
ष्कन् प्रत्यय हो, शत शब्द और षष्टि शब्दके परे स्थित
पथिन् शब्दके उत्तर षिकन् प्रत्यय हो * जैसे—पूर्वपदिकः। उत्तर-
पदिकः। शतपथिकः। शतपथिकी। षष्टिपथिकः। षष्टिपथिकी॥

१२७१ क्रमादिभ्यो वुन्। ४। २। ६१॥

क्रमकः। क्रम, पद, शिक्षा, मीमांसा. क्रमादिः॥

१२७१—'अधीते' और 'वेद' इस अर्थमें क्रमादि
शब्दोंके उत्तर वुन् प्रत्यय हो, जैसे—क्रमकः। क्रमादि जैसे—
क्रम, पद, शिक्षा, मीमांसा॥

१२७२ अनुब्राह्मणादिनिः। ४।२।६२॥

तदधीते तद्वेदेत्यर्थे। ब्राह्मणसदृशो ग्रन्थोऽनुब्राह्मणं तदधीते अनुब्राह्मणी। मत्वर्थीयेनैव सिद्धे अण्बाधनार्थमिदम्॥

१२७२—'अधीते' और 'वेद' इस अर्थमें अनुब्रा-
ह्मण शब्दके उत्तर इनि प्रत्यय हो, जैसे—ब्राह्मणसदृशो ग्रन्थो
अनुब्राह्मणम्, तदधीते तद्वेद वा=अनुब्राह्मणी। मत्वर्थीय प्रत्य-
यसे ही उक्त पद सिद्ध होता, फिर यह सूत्र केवल अण्
प्रत्ययके बाधके निमित्त है॥

१२७३ वसन्तादिभ्यष्ठक्। ४। २। ६३॥

वासन्तिकः। अथर्वाणमधीते आथर्वणिकः। दाण्डिनायनेति सूत्रे निपातनाट्टिलोपो न॥

१२७३—उक्त अर्थमें वसन्तादि शब्दोंके उत्तर ठक्
प्रत्यय हो, जैसे—वासन्तिकः। अथर्वाणमधीते=आथर्वणिकः,
यहां "दाण्डिनायन० ११४५" इस सूत्रमें निपातनके कारण
टिका लोप नहीं हुआ॥

१२७४ प्रोक्ताल्लुक्। ४। २। ६४॥

प्रोक्तार्थप्रत्ययात्परस्याध्येतृवेदितृप्रत्ययस्य लुक् स्यात्। पणनं पणः। घञर्थे कविधानमिति कः। सोऽस्यास्तीति पणी। तस्य गोत्रापत्यं पाणिनः॥

१२७४—प्रोक्तार्थक प्रत्ययके परे स्थित अध्येतृ और वेदितृ-
वाचक प्रत्ययका लुक् हो, जैसे—पणनं पणः "घञर्थे कवि-
धानम्" इससे क प्रत्यय हुआ, पणोऽस्यास्तीति=पणी तस्य
गोत्रापत्यम्=पाणिनः॥

१२७५ गाथिविदथिकेशिगणिपणिनश्च। ६। ४। १६५॥

एतेऽणि प्रकृत्या स्युः। इति टिलोपो न। ततो यूनि इञ्। पाणिनिः॥

१२७५—अण् प्रत्यय परे रहते गाथिन्, विदथिन्, केशिन्,
गणिन् और पणिन् शब्दको प्रकृतिभाव हो, इस कारण टिका
लोप नहीं हुआ, जैसे—पाणिनः। पश्चात् युवापत्य अर्थमें इञ्
प्रत्यय होकर पाणिनिः॥

१२७६ ण्यक्षत्रियार्षञितो यूनि लुगणिञोः। २। ४। ५८॥

ण्यप्रत्ययान्तात्क्षत्रियगोत्रप्रत्ययान्तादृष्य-

भिधायिनो गोत्रप्रत्ययान्ताद ञितश्च परयो-र्युवाभिधायिनोरणिञोर्लुक् स्यात् । कौरव्यः पिता, कौरव्यः पुत्रः । श्वाफल्कः पिता, श्वाफल्कः पुत्रः । वाशिष्ठः पिता, वाशिष्ठः पुत्रः । तैकायनिः पिता, तैकायनिः पुत्रः । एभ्यः किम् । शिवाद्यण् । कौहडः पिता तत इञ् । कौहडिः पुत्रः । यूनि किम् । वामरथ्य-स्य च्छात्राः वामरथाः । इति अणो लुक् तु न भवति । आर्षग्रहणेन प्रतिपदोक्तस्य ऋष्यण एव ग्रहणात् । पाणिनिना प्रोक्तं पाणिनीयम् । वृद्धाच्छः । इञश्चेत्यण् तु न । गोत्रे य इञ् तदन्तादिति वक्ष्यमाणत्वात् । ततोऽध्येतृवेदि-त्रणो लुक् । स्वरे स्त्रियां च विशेषः । पाणि-नीयः । पाणिनीया ॥

१२७६–ण्यप्रत्ययान्त और क्षत्रियवाची गोत्रप्रत्ययान्त और ऋषिवाचक गोत्रप्रत्ययान्त प्रातिपदिकके परे और ञित् प्रत्ययके परे युवापत्यार्थमें विहित अण् और इञ् प्रत्ययका लुक् हो, जैसे–कौरव्यः पिता । कौरव्यः पुत्रः । श्वाफल्कः पिता । श्वाफल्कः पुत्रः । वाशिष्ठः पिता । वाशिष्ठः पुत्रः । तैकायनिः पिता । तैकायनिः पुत्रः ।

इनसे भिन्न शब्दके उत्तर उक्त प्रत्ययका लुक् नहीं होताहै, इसलिये शिवादित्वके कारण अण् प्रत्यय करके कौहडः पिता, पश्चात् युवापत्यार्थमें इञ् प्रत्यय करके कौहडिः पुत्रः ।

युवापत्यार्थसे दूसरे अर्थमें विहित जो अण् और इञ् प्रत्यय, उनका लुक् न होगा, जैसे–वामरथ्यस्य छात्राः= वामरथाः ॥

आर्षग्रहणसे इस स्थलमें प्रतिपदोक्त ऋषिवाचक शब्दसे विहित जो अण् अर्थात् अण्से परे स्थित इञ्, उसका ही ग्रहण है, इस कारण अण् (अण्से परे स्थित इञ्) का लुक् नहीं होगा, जैसे–'पाणिनिना प्रोक्तम्=पाणिनीयम्' यहां "वृद्धाच्छः १३३७" इस सूत्रसे छ प्रत्यय हुआ, इस स्था-नमें "इञश्च १३३३" इस सूत्रसे अण् प्रत्यय तो नहीं होताहै, कारण कि, गोत्रार्थमें विहित जो इञ् प्रत्यय तदन्त प्रातिपदिकके उत्तर अण् प्रत्यय हो यह वक्ष्यमाण है (कहेंगे) पश्चात् अध्येतृ, वेदितृ अर्थमें विहित प्रत्ययका लुक् हुआ, लुगन्तके स्वर और स्त्रीलिङ्गमें विशेष होगा, जैसे–पाणिनीयः । पाणिनीया ॥

१२७७ सूत्राच्च कोपधात् । ४ । २ । ६५ ॥

सूत्रवाचिनः ककारोपधादध्येतृवेदितृप्रत्यय-स्य लुक् स्यात् । अप्रोक्तार्थ आरम्भः । अष्टा-वध्यायाः परिमाणमस्य अष्टकं पाणिनेः सूत्रम् । तदधीयते विदन्ति वा अष्टकाः ॥

१२७७–ककारोपध सूत्रवाचक शब्दके उत्तर अध्येतृ, वेदितृ प्रत्ययका लुक् हो, अप्रोक्तार्थ यह सूत्रारम्भ है, जैसे-अष्टावध्यायाः परिमाणमस्य=अष्टकं पाणिनेः सूत्रम्, तदधी-यते विदन्ति वा, इस विग्रहमें अष्टकाः ॥

१२७८ छन्दोब्राह्मणानि च तद्विष-याणि । ४ । २ । ६६ ॥

छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि तद्विषयाणि स्युः । अध्येतृवेदितृप्रत्ययं विना न प्रयोज्यानीत्यर्थः । कठेन प्रोक्तमधीयते कठाः । वैशम्पायनान्तेवासित्वाण्णिनिः । तस्य कठचरकादिति लुक्, ततोऽण्, तस्य प्रोक्ताल्लुक् ॥

(इति रक्ताद्यर्थकाः) ।

१२७८–प्रोक्तप्रत्ययान्त छन्दोवाचक और ब्राह्मणवाचक शब्द अध्येतृ और वेदितृविषयक हों अर्थात् अध्येतृ और वेदितृ प्रत्ययके विना प्रयुक्त न हों, जैसे–कठेन प्रोक्तम् अधीयते=कठाः । "कलापिवैशम्पायनान्तेवासिभ्यः ४ । ३ १०४" इस सूत्रसे वैशम्पायनान्तेवासित्वके कारण णिनि प्रत्यय हुआ, उसका "कठचरकात्० १४८७" इस सूत्रसे लुक् हुआ, पश्चात् अण् प्रत्यय होकर उसका "प्रोक्ताल्लुक् १२७४" इस सूत्रसे लुक् हुआ ॥

(इति रक्ताद्यर्थकाः) ।

अथ चातुरर्थिकप्रकरणम् ।

१२७९ तदस्मिन्नस्तीति देशे तन्नाम्नि । ४ । २ । ६७ ॥

उदुम्बराः सन्त्यस्मिन् देशे, औदुम्बरः ॥

१२७९–तदस्मिन् अस्ति, अर्थात् वह इसमें है, इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर प्रत्ययान्तसे देशनाम गम्यमान होनेपर यथाविहित प्रत्यय हों, जैसे–उदुम्बराः सन्ति अस्मिन् देशे, इस विग्रहमें–औदुम्बरः ॥

१२८० तेन निर्वृत्तम् । ४ । २ । ६८ ॥

कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी ॥

१२८०–तेन निर्वृत्तम्, अर्थात् उससे यह निष्पादित हुआहै, इस अर्थमें तृतीयान्त प्रातिपदिकके उत्तर यथा-विहित प्रत्यय हों, जैसे–कुशाम्बेन निर्वृत्ता=कौशाम्बी नगरी ॥

१२८१ तस्य निवासः । ४ । २ । ६९ ॥

शिबीनां निवासो देशः शैवः ॥

१२८१–षष्ठ्यन्त प्रातिपदिकके उत्तर निवास अर्थमें यथा-विहित प्रत्यय हों, जैसे–शिबीनां निवासो देशः=शैवः ॥

१२८२ अदूरभवश्च । ४ । २ । ७० ॥

विदिशाया अदूरभवं नगरं वैदिशम् । च-कारेण प्रागुक्तास्त्रयोऽर्थाः संनिधाप्यन्ते तेन व-क्ष्यमाणप्रत्ययानां चातुरर्थिकत्वं सिध्यति ॥

१२८२–अदूरभव अर्थमें षष्ठ्यन्त प्रातिपदिकके उत्तर यथाविहित प्रत्यय हों, जैसे–विदिशाया अदूरभवं नगरम्=

वैदिशम्, यहां अण् प्रत्यय हुआहै । चकारसे प्रागुक्त तीनों अर्थोंमें भी वक्ष्यमाण प्रत्यय होंगे, इसलिये वक्ष्यमाण प्रत्ययोंको चातुरर्थिकत्व सिद्ध होताहै ॥

१२८३ ओरञ् । ४ । २ । ७१ ॥

अणोऽपवादः । कक्षतु, काक्षतवम् । नद्यां तु परत्वान्मतुप् । इक्षुमती ॥

१२८३–उकारान्त प्रातिपदिकके उत्तर अञ् प्रत्यय हो, यह अञ् प्रत्यय अण् प्रत्ययका अपवाद (विशेषक) है, जैसे–कक्षतुरस्मिन्नस्ति=काक्षतवम् । नदी वाच्य रहते तो "नद्यां मतुप् १३०४" इस सूत्रसे परत्वके कारण मतुप् प्रत्यय होगा, जैसे–इक्षुमती ॥

१२८४ मतोश्च बह्वजङ्गात् ।४।२।७२॥

बह्वच् अङ्गं यस्य मतुपस्तदन्तादञ् नाऽण् । सैध्रकावतम् । बह्वजिति किम् । आहिमतम् । अङ्गग्रहणं बह्वजिति तद्विशेषणं यथा स्यान्मत्वन्तविशेषणं मा भूत् ॥

१२८४–जिसका अङ्ग बहुत अचोंसे युक्त हो ऐसा जो मतुप्, प्रातिपदिकके उत्तर अञ् प्रत्यय हो, अण् प्रत्यय न हो, जै कावतम् ।

बहुत अचोंसे युक्त अङ्ग न होनेपर अञ् त्यय नहीं होगा, जैसे–आहिमतम् । सूत्रमें बह्वच् यह अङ्गका विशेषण हो,मत्वन्तका विशेषण न हो, इसलिये अङ्गग्रहण कियाहै, नहीं तो 'आहिमतम्' यहां अञ् प्रत्यय होजाता ॥

१२८५ बह्वचः कूपेषु । ४ । २ । ७३ ॥

अणोऽपवादः।दीर्घवरत्रेण निर्वृत्तो दैर्घवरत्रःकूपः॥

१२८५–बहुत अचोंसे युक्त जो प्रातिपदिक, उसके उ र कूप वाच्य होनेपर अञ् प्रत्यय हो । यह अञ्, अण् प्रत्ययका विशेषक है,जैसे–दीर्घवरत्रेण निर्वृत्तः=दैर्घवरत्रः,अर्थात् कूप ॥

१२८६ उदक् च विपाशः । ४।२।७४॥

विपाश उत्तरे कूले ये कूपास्तेष्वञ् । अबह्वजर्थ आरम्भः । दत्तेन निवृत्तो दात्तः कूपः । उदक् किम् । दक्षिणतः कूपेष्वणेव ॥

१२८६–विपाशाके उत्तर कूलमें स्थित जो कूप, सो वाच्य होनेपर तृतीयान्त प्रातिपदिकसे अञ् प्रत्यय हो । बह्वच् प्रातिपदिकसे भिन्न स्थलमें अञ् प्रत्ययके निमित्त यह सूत्रारंभ कियाहै, जैसे–दत्तेन निर्वृत्तः, इस विग्रहमें दात्तः कूपः । विपाशाके उत्तर कूलमें स्थित न होनेपर अर्थात् दक्षिण कूलमें स्थित होनेपर अण् प्रत्यय ही होगा, अञ् नहीं होगा ॥

१२८७ संकलादिभ्यश्च । ४ । २ ।७५॥

कूपेष्विति निवृत्तम् । संकलेन निर्वृत्तं सांकलम् । पौष्कलम् ॥

१२८७–संकलादि शब्दोंके उत्तर अञ् प्रत्यय हो । यहां 'कूपेषु' यह निवृत्त हुआ । संकलेन निर्वृत्तम्=सांकलम् । पौष्कलम् ॥

१२८८ स्त्रीषु सौवीरसाल्वप्राक्षु । ४ । २ । ७६ ॥

स्त्रीलिङ्गेषु एषु देशेषु वाच्येष्वञ् । सौवीरे, दत्तामित्रेण निर्वृत्ता दात्तामित्री नगरी । साल्वे, वैधूमाग्नी । प्राचि माकन्दी ॥

१२८८–स्त्रीलिङ्गमें सौवीर, साल्व और प्राच्य देश वाच्य होनेपर अञ् प्रत्यय हो । सौवीरमें जैसे–दत्तामित्रेण निर्वृत्ता=दात्तामित्री नगरी । साल्वमें–वैधूमाग्नी । प्राच्यमें माकन्दी ॥

१२८९ सुवास्त्वादिभ्योऽण् ।४।२।७७॥

अञोऽपवादः । सुवास्तोरदूरभवं सौवास्तवम् । वर्णु, वार्णवम् । अण्ग्रहणं नद्यां मतुपो बाधनार्थम् । सौवास्तवी ॥

१२८९–सुवास्त्वादि शब्दोंके उत्तर अण् प्रत्यय हो,यह अण् अञ् प्रत्ययका अपवाद है । सुवास्तोरदूरभवम्, इस विग्रहमें सौवास्तवम् । वर्णोरदूरभवम्=वार्णवम् । इस सूत्रमें अण् ग्रहण "नद्यां मतुप् १३०४" इस सूत्रसे विहित मतुप् प्रत्ययके बाधके निमित्त है, जैसे–सौवास्तवी ॥

१२९० रोणी । ४ । २ । ७८ ॥

रोणीशब्दात्तदन्ताच्च अण् । कूपाञोऽपवादः। रौणः । आजकरोणः ॥

१२९०–रोणी और रोणीशब्दान्त प्रातिपदिकके उत्तर अण् प्रत्यय हो, यह अण् कूपार्थक अञ् प्रत्ययका अपवाद है। रौणः । आजकरोणः ॥

१२९१ कोपधाच्च । ४ । २ । ७९ ॥

अण् । अञोऽपवादः कार्णच्छिद्रकः कूपः । कार्कवाकवम् । त्रैशंकवम् ॥

१२९१–ककारोपध प्रातिपदिकके उत्तर अण् प्रत्यय हो, यह अण् प्रत्यय अञ् प्रत्ययका अपवाद है, जैसे–कार्णच्छिद्रकः अर्थात् कूप । कार्कवाकवम् । त्रैशंकवम् ॥

१२९२ वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः । ४ । २ । ८० ॥

सप्तदशभ्यः सप्तदश क्रमात्स्युश्चतुरर्थ्याम् । अरीहणेन निर्वृत्तमारीहणकम् । कृशाश्वादिभ्यश्छण् । कार्शाश्वीयम् । ऋश्यादिभ्यः कः। ऋश्यकम् । कुमुदादिभ्यष्ठच्। कुमुदिकम् । काशादिभ्य इलः । काशिलः । तृणादिभ्यः सः । तृणसम् । प्रेक्षादिभ्य इनिः ।

प्रेक्षी । अश्मादिभ्यो रः । अश्मरः । सख्यादिभ्यो ढञ् । साखेयम् । संकाशादिभ्यो ण्यः । सांकाश्यम् । बलादिभ्यो यः । बल्यम् । पक्षादिभ्यः फक् । पाक्षायणः । पथः पन्थ च । पान्थायनः । कर्णादिभ्यः फिञ् । कार्णायनिः । सुतङ्गमादिभ्य इञ् । सौतङ्गमिः । प्रगद्यादिभ्यो ञ्यः । प्रागद्यः । वराहादिभ्यः कक् । वाराहकः । कुमुदादिभ्यष्ठक् । कौमुदिकः ॥

१२९२–चारों (तदस्मिन्नस्तीति देश तन्नाम्नि १, तेन निर्वृत्तम् २, तस्य निवासः ३, अदूरभवश्च ४) अर्थोंमें अरीहणादि सप्तदश शब्दोंके उत्तर क्रमसे वुञ् आदि सप्तदश प्रत्यय हों, अर्थात् अरीहणादि शब्दोंके उत्तर वुञ् प्रत्यय हो, जैसे–अरीहणेन निर्वृत्तम्–आरीहणकम् । कृशाश्वादि शब्दोंके उत्तर छण् प्रत्यय हो,–जैसे–कार्शाश्वीयम् । ऋश्यादि शब्दोंके उत्तर क प्रत्यय हो, जैसे–ऋश्यकम् । कुमुदादि शब्दोंके उत्तर ठच् प्रत्यय हो, जैसे–कुमुदिकम् । काशादि शब्दोंके उत्तर इल प्रत्यय हो, जैसे–काशिलः । तृणादि शब्दोंके उत्तर स प्रत्यय हो, जैसे–तृणसम् । प्रेक्षादि शब्दोंके उत्तर इनि प्रत्यय हो, जैसे–प्रेक्षी । अश्मादि शब्दोंके उत्तर र प्रत्यय हो, जैसे–अश्मरः । सख्यादि शब्दोंके उत्तर ढञ् प्रत्यय हो, जैसे–साखेयम् । सङ्काशादि शब्दोंके उत्तर ण्य प्रत्यय हो, जैसे–साङ्काश्यम् । बलादि शब्दोंके उत्तर य प्रत्यय हो, जैसे–बल्यम् । पक्षादि शब्दोंके उत्तर फक् प्रत्यय हो, जैसे–पाक्षायणः । पथिन् शब्दके स्थानमें पंथ आदेश और फक् प्रत्यय हो, जैसे-पांथायनः । कर्णादि शब्दोंके उत्तर फिञ् प्रत्यय हो, जैसे-कर्णायनिः । सुतंगमादि शब्दोंके उत्तर इञ् प्रत्यय हो, जैसे–सौतङ्गमिः । प्रगद्यादि शब्दोंके उत्तर ञ्य प्रत्यय हो, जैसे–प्रागद्यः । वराहादि शब्दोंके उत्तर कक् प्रत्यय हो, जैसे–वाराहकः । कुमुदादि शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे–कौमुदिकः ॥

१२९३ जनपदे लुप् । ४ । २ । ८१ ॥

जनपदे वाच्ये चातुरर्थिकस्य लुप्स्यात् ॥

१२९३–जनपद अर्थ वाच्य होनेपर चातुरर्थिक प्रत्ययका लुप् हो–॥

१२९४ लुपि युक्तवद्व्यक्तिवचने १।२।५१॥

लुपि सति प्रकृतिवल्लिङ्गवचने स्तः । पञ्चालानां निवासो जनपदः पञ्चालाः । कुरवः । अङ्गाः । वङ्गाः । कलिङ्गाः ॥

१२९४–(साधारणतः विशेषणके, विशेष्यके लिङ्ग और वचनके समान लिङ्ग और वचन होतेहैं, परन्तु इस स्थानमें उस नियमका परिहार करतेहैं–) प्रत्ययका लुप् होनेपर प्रकृतिके समान लिङ्ग और वचन हों, अर्थात् विशेष्यानुरोधसे विशेषण अपने लिंग और वचनका परित्याग न करे, जैसे–पाञ्चालानां निवासो जनपदः=पञ्चालाः । कुरवः । अङ्गाः । वङ्गाः । कलिङ्गाः ॥

१२९५ तदशिष्यं संज्ञाप्रमाणत्वात् । १ । २ । ५३ ॥

युक्तवद्वचनं न कर्तव्यं संज्ञानां प्रमाणत्वात् ॥

१२९५–पूर्व आचार्योंके अनुरोधसे "लुपि युक्तवद्व्यक्तिवचने" इस प्रकार सूत्र कियाहै, परन्तु सम्प्रति इस सूत्रका प्रत्याख्यान करतेहैं, कारण कि, लोकमें व्यवहृत संज्ञाको प्रामाण्य होनेसे जैसी संज्ञा लोकमें व्यवहृत होगी वैसी ही साधु होगी अङ्गाः, वङ्गाः, कलिङ्गाः–इत्यादि बहुवचनान्त ही जनपदकी संज्ञा हैं, इसके लिये प्रकृतिवत् लिङ्गवचनविधान करना उचित नहीं है, इसलिये 'आपो दाराः' इत्यादि स्थलमें शास्त्रसे लिङ्ग, संख्याके विधान नहीं किये जातेहैं ॥

१२९६ लुब्योगाऽप्रख्यानात् ।१।२।५४॥

लुबपि न कर्तव्योऽवयवार्थस्येहाप्रतीतेः ॥

१२९६–उपजीवक युक्तवद्वचनका प्रत्याख्यान करके अब उपजीव्य लुब्विधानका प्रत्याख्यान करतेहैं कि, चातुरर्थिक प्रत्ययके लुप्का विधान नहीं करना चाहिये, कारण कि, इस स्थानमें अवयवार्थ, अर्थात् यौगिक अर्थकी प्रतीति नहीं होतीहै । आशय यह है कि, पाञ्चालादि शब्द जैसे क्षत्रियमें रूढ हैं, वैसे जनपदमें भी रूढ हैं, इसलिये "तस्य निवासः" "अदूरभवश्च" इनसे तद्धितोत्पत्ति हो ही नहीं सकती है, फिर उसका लुप्विधान करना व्यर्थ है ॥

१२९७ योगप्रमाणे च तदभावेऽदर्शनं स्यात् । १ । २ । ५५ ॥

यदि हि योगस्यावयवार्थस्येदं बोधकं स्यात्तदा तदभावे न दृश्येत ॥

१२९७–प्रत्ययके स्वीकार होनेपर उसके विषयमें भी कहतेहैं कि, यदि कहो कि, इस स्थानमें योगार्थका बोध होताहै अर्थात् पञ्चाल शब्दसे क्षत्रियका निवास जिस स्थानमें हो, उसको 'पञ्चालाः' कहतेहैं, ऐसे यौगिकार्थका बोध होताहै तो, जिस स्थानमें प्रत्ययका लुप् होगा, उस स्थानमें यौगिकार्थका बोध नहीं होगा अर्थात् पञ्चाल शब्दसे क्षत्रियका निवासस्थान इस अर्थका बोध नहीं होगा ॥

१२९८ प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् । १ । २ । ५६ ॥

प्रत्ययार्थः प्रधानमित्येवंरूपं वचनमप्यशिष्यम् । कुतः । अर्थस्य लोकत एव सिद्धेः ॥

१२९८–प्रकृत्यर्थ और प्रत्ययार्थके मध्यमें प्रत्ययार्थको प्राधान्य है, ऐसा वचन भी नहीं करना चाहिये, कारण कि, प्रत्ययार्थप्रधानविषयक बोधकी लोकहीसे सिद्धि है ॥

१२९९ कालोपसर्जने च तुल्यम् । १ । २ । ५७ ॥

अतीताया रात्रेः पश्चार्द्धेनागामिन्याः पूर्वार्द्धेन च सहितो दिवसोऽद्यतनः । विशेषणमुपस-

र्जनमित्यादि पूर्वाचार्यैः परिभाषितं तत्राप्यशिष्यत्वं समानं लोकप्रसिद्धेः ॥

१२९९–'बीती हुई रात्रिके शेषार्द्धसे और आगामिनी रात्रिके प्रथमार्द्धसे युक्त जो दिन, उसको अद्यतन कहतेहैं' 'विशेषण अप्रधान होताहै' इत्यादि पूर्वाचार्य्योंके कहे हुए वचन भी नहीं करने चाहियें, कारण कि, वह सब लोकमें प्रसिद्ध हैं ॥

१३०० विशेषणानां चाऽजातेः १।२।५२॥

लुबर्थस्य विशेषणानामपि तद्वल्लिङ्गवचने स्तो जातिं वर्जयित्वा । पञ्चाला रमणीयाः । गोदौ रमणीयौ । अजातेः किम् । पञ्चाला जनपदः । गोदौ ग्रामः ॥ हरीतक्यादिषु व्यक्तिः ॥ * ॥ हरीतक्याः फलानि हरीतक्यः ॥ खलतिकादिषु वचनम् ॥ * ॥ खलतिकस्य पर्वतस्यादूरभवानि खलतिकं वनानि ॥ मनुष्यलुपि प्रतिषेधः ॥ * ॥ मनुष्यलक्षणे लुबर्थे विशेषणानां न । लुबन्तस्य तु भवतीत्यर्थः । चञ्चा अभिरूपः ॥

१३००–जिस प्रत्ययका लुप् हुआ है, तदर्थभूत जो विशेष्य पद, उसके जो विशेषण, उनके भी विशेष्यके समान ही लिङ्ग और वचन हों, अर्थात् विशेष्यके जैसे लिङ्गादि हों विशेषणके भी वैसे ही लिङ्गादि हों, परन्तु जातिवाचक शब्दके नहीं हों, जैसे पञ्चालाः रमणीयाः । गोदौ रमणीयौ । जातिवाचक होनेपर विशेषण, विशेष्यके लिङ्ग वचनके भागी नहीं होंगे, जैसे–पञ्चाला जनपदः । गोदौ ग्रामः ।

हरीतकी आदि शब्दोंमें प्रकृतिवत् लिङ्ग हो अर्थात् विशेषण, विशेष्यलिङ्गका भागी न हो * जैसे– हरीतक्याः फलानि=हरीतक्यः ।

खलतिकादि शब्दोंमें प्रकृतिवत् वचन हो, अर्थात् विशेष्यानुरूप वचन न हो * जैसे–खलतिकस्य पर्वतस्य अदूरभवानि=खलतिकं वनानि ।

लुबर्थ मनुष्य होनेपर विशेष्यके समान विशेषणका लिङ्ग और वचन न हो, परन्तु लुबन्तके प्रकृतिवत् लिङ्ग, वचन हों* जैसे–चञ्चा अभिरूपः ॥

१३०१ वरणादिभ्यश्च । ४ । २ । ८२ ॥

अजनपदार्थ आरम्भः । वरणानामदूरभवं नगरं वरणा ॥

१३०१–वरणादि शब्दोंके उत्तर चातुरर्थिक प्रत्ययका लुप् हो, अजनपदार्थ इस सूत्रका आरंभ है, अर्थात् जनपदवाचक शब्दके अतिरिक्त शब्दसे चातुरर्थिक प्रत्ययका लुप् हो इस लिये यह सूत्र है, जैसे–वरणानामदूरभवं नगरम्=वरणाः ॥

१३०२ शर्कराया वा । ४ । २ । ८३ ॥

अस्माच्चातुरर्थिकस्य वा लुप्स्यात् ॥

१३०२–शर्करा शब्दके उत्तर चातुरर्थिक प्रत्ययका विकल्प करके लुप् हो ॥

१३०३ ठक्छौ च । ४ । २ । ८४ ॥

शर्कराया एतौ स्तः । कुमुदादौ वराहादौ च पाठसामर्थ्यात्पक्षे ठच्ककौ । वाग्रहणसामर्थ्यात्पक्षे औत्सर्गिकोऽण्, तस्य लुब्विकल्पः । षड् रूपाणि । शर्करा । शार्करम् । शार्करिकम् । शर्करीयम् । शर्करिकम् । शार्करकम् ॥

१३०३–शर्करा शब्दके उत्तर ठक् और छ प्रत्यय हों । कुमुदादि गण (१२९२) और वराहादि (१२९२) गणमें शर्करा शब्दके पाठके सामर्थ्यसे ठच् और कक् प्रत्यय होंगे, पूर्व सूत्रसे विकल्पसे लुप्के विधानके कारण पक्षमें औत्सर्गिक अण् प्रत्यय होगा, उस अण् प्रत्ययका विकल्प करके लुप् होगा, इस प्रकार शर्करा शब्दके छः रूप होंगे, जैसे–शर्करा, शार्करम्, शार्करिकम्, शर्करीयम्, शर्करिकम्, शार्करकम् ॥

१३०४ नद्यां मतुप् । ४ । २ । ८५ ॥

चातुरर्थिकः । इक्षुमती ॥

१३०४–नदी वाच्य होनेपर चातुरर्थिक मतुप् प्रत्यय हो, जैसे–इक्षुमती ॥

१३०५ मध्वादिभ्यश्च । ४ । २ । ८६ ॥

मतुप् स्याच्चातुरर्थिकः । अनद्यर्थ आरम्भः । मधुमान् ॥

१३०५–मधु आदि शब्दोंके उत्तर चातुरर्थिक मतुप् प्रत्यय हो, नदीवाचकसे भिन्न स्थलमें भी मतुप् प्रत्यय होनेके लिये यह सूत्रारम्भ हुआ है, जैसे–मधुमान् ॥

१३०६ कुमुदनडवेतसेभ्यो ड्मतुप् । ४ । २ । ८७ ॥

कुमुद्वान् । नड्वान् । वेतस्वान् । आद्ययोर्झय इति अन्त्ये मादुपधाया इति वक्ष्यमाणेन वः ॥ महिषाच्चेति वक्तव्यम् ॥ * ॥ महिष्मान्नाम देशः ॥

१३०६–कुमुद, नड और वेतस् शब्दके उत्तर ड्मतुप् प्रत्यय हो, जैसे–कुमुद्वान् । नड्वान् । वेतस्वान् । आद्य दोनों अर्थात् कुमुद और नड शब्दके उत्तर जो मतुप् प्रत्ययका मकार उसके स्थानमें "झयः १८९८"–इस वक्ष्यमाण सूत्रसे व आदेश और अन्त्यस्थित जो वेतस् शब्द उसके उत्तर मतुप्के मकारको "मादुपधायाः १८१७" इस वक्ष्यमाण सूत्रसे व हुआ ।

महिष शब्दसे भी ड्मतुप् हो* जैसे–महिष्मान् नाम देशः ॥

१३०७ नडशादाड्ड्वलच् । ४ । २ । ८८ ॥

नड्वलः । शादो जम्बालघासयोः । शाद्वलः ॥

१३०७–नड और शाद शब्दके उत्तर ड्वलच् प्रत्यय हो, जैसे–नड्वलः । शाद शब्दसे जम्बाल और घास जानना । शाद्वलः ॥

१३०८ शिखाया वलच् । ४ । २ । ८९ ॥

शिखावलम् ॥

१३०८-शिखा शब्दसे वलच् प्रत्यय हो, जैसे-शिखावलम् ॥

१३०९ उत्करादिभ्यश्छः । ४।२।९०॥

उत्करीयः ॥

१३०९-उत्करादि शब्दोंके उत्तर छ प्रत्यय हो, जैसे-उत्करीयः ॥

१३१० नडादीनां कुक् च ।४।२।९१॥

नडकीयम् ॥ कुञ्चाह्रस्वत्वं च ॥ * ॥ कुञ्चकीयः ॥ तक्षन्नलोपश्च ॥ तक्षकीयः ॥

१३१०-नडादि शब्दोंको कुक्का आगम और छ प्रत्यय हो, जैसे-नडकीयम् ।

कुञ्चा शब्दको कुक्का आगम और छ प्रत्यय और कुञ्चाको ह्रस्वत्व हो* जैसे-कुञ्चकीयः ।

तक्षन् शब्दको कुक्का आगम और छ प्रत्यय और नकारका लोप हो* जैसे-तक्षकीयः ॥

१३११ बिल्वकादिभ्यश्छस्य लुक् । ६ । ४ । १५३ ॥

नडाद्यन्तर्गता बिल्वकादयस्तेभ्यश्छस्य लुक् तद्धिते परे । बिल्वा यस्यां सन्ति सा बिल्वकीया तस्यां भवा बैल्वकाः । वेत्रकीयाः । वैत्रकाः । छस्य किम् । छमात्रस्य लुग्यथा स्यात्कुको निवृत्तिर्मा भूत् । अन्यथा सन्नियोगशिष्टानामिति कुगपि निवर्तेत । लुग्ग्रहणं सर्वलोपार्थं लोपोऽपि यमात्रस्य स्यात् ॥

॥ इति चातुरर्थिकाः ॥

१३११-नडादिके अन्तर्गत जो बिल्वकादि शब्द, उनके उत्तर तद्धित प्रत्यय परे रहते छ प्रत्ययका लुक् हो, जैसे-बिल्वा यस्यां सन्ति सा=बिल्वकीया, तस्यां भवाः=बैल्वकाः । इसी प्रकार-वेत्रकीयाः । वैत्रकाः ।

इस सूत्रमें छ प्रत्ययका ग्रहण क्यों किया ? तो बिल्वकादि शब्दोंके उत्तर जो प्रत्यय, केवल उसका ही लुक् हो और कुक्की निवृत्ति नहीं हो । यदि छ प्रत्ययका लुक् हो, ऐसा न कहकर प्रत्ययमात्रका लुक् कहते तो "सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः" इस न्यायसे प्रत्ययकी निवृत्ति होनेसे सन्नियोगशिष्ट कुक् भी निवृत्त हो जाता । लोपकी अनुवृत्ति न करके इस सूत्रमें लुक्का ग्रहण सर्वलोपके निमित्त है, नहीं तो लोपकी अनुवृत्ति करनेसे केवल यकारहीका लोप होता ॥

॥ इति चातुरर्थिकप्रकरणम् ॥

अथ शैषिकप्रकरणम् ।

१३१२ शेषे । ४ । २ । ९२ ॥

अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषस्तत्राऽणादयः स्युः । चक्षुषा गृह्यते चाक्षुषं रूपम् । श्रावणः शब्दः । औपनिषदः पुरुषः । दृषदि पिष्टा दार्षदाः सक्तवः । उलूखले क्षुण्णः औलूखलो यावकः । अश्वैरुह्यते आश्वो रथः । चतुर्भिरुह्यते चातुरं शकटम् । चतुर्दश्यां दृश्यते चातुर्दशं रक्षः । शेष इति लक्षणं चाधिकारश्च । तस्य विकार इत्यतः प्राक् शेषाधिकारः ॥

१३१२-तद्धितमें अपत्य आदि चतुरर्थ्यन्त जो २ अर्थ हैं उनसे जो अन्य (अर्थात् विशेष रूपसे भासमान) अर्थ उनका नाम शेष है, उस शेष अर्थमें अणादि प्रत्यय हों, यथा-चक्षुषा गृह्यते=चाक्षुषं रूपम् । श्रावणः शब्दः । औपनिषदः पुरुषः । दृषदि पिष्टाः=दार्षदाः सक्तवः । उलूखले क्षुण्णः-औलूखलः यावकः । अश्वैरुह्यते=आश्वो रथः । चतुर्भिरुह्यते=चातुरं शकटम् । चतुर्दश्यां दृश्यते=चातुर्दशं रक्षः । "शेषे" यह लक्षण और अधिकार भी है । "तस्य विकारः" इस सूत्रके पूर्वपर्यन्त इस सूत्रका अधिकार अर्थात् शेषाधिकार चलेगा ॥

१३१३ राष्ट्रावारपाराद्धखौ ।४।२।९३॥

आभ्यां क्रमाद्धखौ स्तः शेषे । राष्ट्रियः । अवारपारीणः ॥ अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम् ॥ * ॥ अवारीणः । पारीणः । पारावारीणः । इह प्रकृतिविशेषाद्घादयष्ट्युट्युलन्ताः प्रत्यया उच्यन्ते तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते ॥

१३१३-शेषार्थमें राष्ट्र और अवारपार शब्दके उत्तर यथाक्रम घ और ख प्रत्यय हो, जैसे-राष्ट्रियः । अवारपारीणः ।

विगृहीत अवारपार शब्द अर्थात् अवार और पार शब्दसे और विपरीत अवारपार शब्द अर्थात् पारावार शब्दसे भी ख प्रत्यय हो* जैसे-अवारीणः । पारीणः।पारावारीणः । इस गणमें प्रकृतिविशेषसे घआदि टयुटयुलन्त प्रत्यय उक्त होतेहैं, उन प्रत्ययोंका जात आदि अर्थविशेष और समर्थ विभक्ति कही जायँगी ॥

१३१४ ग्रामाद्यखञौ । ४ । २।९४॥

ग्राम्यः । ग्रामीणः ॥

१३१४-शेषार्थमें ग्राम शब्दके उत्तर य और खञ् प्रत्यय हो, जैसे-ग्रामे जातो भवो वा=ग्राम्यः । ग्रामीणः ॥

१३१५ कत्र्यादिभ्यो ढकञ् ।४।२।९५॥

कुत्सितास्त्रयः कत्रयः तत्र जातादिः कात्रेयकः । नागरेयकः । ग्रामादित्यनुवृत्तेः-ग्रामेयकः॥

१३१५–कत्र्यादि शब्दोंके उत्तर ढकञ् प्रत्यय हो, जैसे–कुत्सितास्त्रयः=कत्रयः,तत्र जातादिः=कात्रेयकः । नागरेयकः। इस सूत्रमें ग्राम शब्दकी अनुवृत्तिके कारण'ग्रामेयकः' ऐसा पद सिद्ध हुआ ॥

१३१६ कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु । ४ । २ । ९६ ॥

कौलेयकः श्वा । कौलोऽन्यः । कौक्षेयकोऽसिः । कौक्षोऽन्यः । ग्रैवेयकोऽलंकारः । ग्रैवोऽन्यः ॥

१३१६–कुल, कुक्षि और ग्रीवा शब्दके उत्तर क्रमसे श्वा, असि और अलंकार अर्थ होनेपर ढकञ् प्रत्यय हो, जैसे–कौलेयकः श्वा । अन्यार्थमें कौलः। कौक्षेयकः असिः ।अन्यार्थमें कौक्षः । ग्रैवेयकः अलंकारः । अन्यार्थमें ग्रैवः ॥

१३१७ नद्यादिभ्यो ढक्।४।२।९७॥

नादेयम् । माहेयम् । वाराणसेयम् ॥

१३१७–जातादि अर्थमें नदी आदि शब्दोंके उत्तर ढक् प्रत्यय हो, जैसे–नादेयम् । माहेयम् । वाराणसेयम् ॥

१३१८ दक्षिणापश्चात्पुरसस्त्यक् । ४ । २ । ९८ ॥

दक्षिणेत्याजन्तमव्ययम । दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः ॥

१३१८–दक्षिणा, पश्चात् और पुरस् शब्दके उत्तर त्यक् प्रत्यय हो, 'दक्षिणा' यह पद अच्प्रत्ययान्त अव्यय है, जैसे–दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः ॥

१३१९ कापिश्याः ष्फक् । ४ ।२।९९ ॥

कापिश्यां जातादि कापिशायनं मधु । कापिशायनी द्राक्षा ॥

१३१९–जातादि अर्थमें कापिशी शब्दके उत्तर ष्फक् प्रत्यय हो, जैसे–कापिश्यां जातादि=कापिशायनं मधु । कापिशायनी द्राक्षा ॥

१३२० रंकोरमनुष्येऽण् च।४।२।१००॥

चात् ष्फक् । रांकवो गौः । रांकवायणः । अमनुष्ये इति किम् । रांकवको मनुष्यः ॥

१३२०–मनुष्यसे भिन्न अर्थ होनेपर रंकु शब्दके उत्तर अण् प्रत्यय और चकारसे ष्फक् प्रत्यय हो, जैसे–राङ्कवो गौः। राङ्कवायणः । मनुष्यार्थ होनेपर रांकवको मनुष्यः ॥

१३२१ द्युप्रागपागुदक्प्रतीचो यत् । ४ । २ । १०१ ॥

दिव्यम् । प्राच्यम् । अपाच्यम् । उदीच्यम् । प्रतीच्यम् ॥

१३२१–जातादि अर्थमें दिव्, प्राच्, अपाच्, उदच् और प्रतीच् शब्दके उत्तर यत् प्रत्यय हो,जैसे–दिवि भवम्=दिव्यम्। प्राचि भवम्=प्राच्यम् । अपाच्यम् । उदीच्यम् । प्रतीच्यम् ॥

१३२२ कन्थायाष्ठक् ।४।२।१०२॥

कान्थिकः ॥

१३२२–जातादि अर्थमें कन्था शब्दके उत्तर ठक् प्रत्यय हो, जैसे–कान्थिकः ॥

१३२३ वर्णौ वुक् । ४ । २ । १०३ ॥

वर्णुर्नदस्तस्य समीपदेशो वर्णुः, तद्विषयार्थवाचिकन्थाशब्दाद्वुक् स्यात् । यथा हि जातं हिमवत्सु कान्थकम् ॥

१३२३–वर्णुनामक नद है,उसके समीपका देश भी वर्णु कहाताहै, तद्विषयार्थवाची कन्था शब्दसे वुक् प्रत्यय हो, यथा–"यथा हि जातं हिमवत्सु कान्थकम् " ॥

१३२४ अव्ययात्त्यप् । ४ । २।१०४॥

अमेहक्वतसित्रेभ्य एव ॥ * ॥ अमान्तिकसहार्थयोः । अमात्यः । इहत्यः । क्वत्यः । ततस्त्यः । तत्रत्यः । परिगणनं किम् । उपरिष्टाद्भव औपरिष्टः ॥ अव्ययानां भमात्रे टिलोपः ॥ * ॥ अनित्योऽयं बहिषष्टिलोपविधानात् । तेनेह न । आरातीयः ॥ त्यब्नेर्ध्रुव इति वक्तव्यम् ॥ * ॥ नित्यः ॥निसो गते॥*॥

१३२४–अव्ययसंज्ञक शब्दके उत्तर त्यप् प्रत्यय हो ।

अमा, इह, क्व, तस् और त्रल्प्रत्ययान्त अव्यय शब्दोंके उत्तर ही त्यप् प्रत्यय हो * ।

' अमा ' यह अव्यय शब्द अन्तिकार्थक और सहार्थक है, जैसे–अमात्यः । इहत्यः । क्वत्यः । ततस्त्यः । तत्रत्यः ।

परिगणन क्यों किया ? तो उपरिष्टाद्भवः, इस विग्रहमें 'औपरिष्टः' यहां त्यप् न हो ।

अव्ययकी भ–संज्ञामात्रमें टिका लोप हो * बहिष् शब्दके टिलोपविधानके कारण यह टिलोपविधि अनित्य है, इस कारण इस स्थानमें टिलोप नहीं हुआ, जैसे–आरातीयः ।

निश्चयार्थमें नि उपसर्गके उत्तर त्यप् प्रत्यय हो*जैसे–नित्यः।

निस् उपसर्गके परे गत अर्थमें त्यप् प्रत्यय हो–* ।

१३२५ ह्रस्वात्तादौ तद्धिते।८।३।१०१ ॥

ह्रस्वादिणः परस्य सस्य षः स्यात्तादौ तद्धिते । निर्गतो वर्णाश्रमेभ्यो निष्ट्यश्चाण्डालादिः ॥ अरण्याण्णः ॥ * ॥ आरण्याः सुमनसः ॥ दूरादेत्यः ॥ * ॥ दूरेत्यः ॥ उत्तरादाहञ् ॥ * ॥ औत्तराहः ॥

१३२५–तकारादि तद्धित प्रत्यय परे रहते ह्रस्व इण्के परे स्थित सकारको षत्व हो, जैसे–निर्गतो वर्णाश्रमेभ्यः, इस विग्रहमें निष्ट्यः–चाण्डालादिः ।

अरण्य शब्दके उत्तर ण प्रत्यय हो * जैसे आरण्याः सुमनसः ।

दूर शब्दके उत्तर एत्य प्रत्यय हो * जैसे–दूरेत्यः ।

उत्तर शब्दके उत्तर आहञ् प्रत्यय हो * जैसे–औत्तराहः॥

१३२६ ऐषमोह्यःश्वसोऽन्यतरस्याम् । ४ । २ । १०५ ॥

एभ्यस्त्यब्वा । पक्षे वक्ष्यमाणौ ट्यु ऐषमस्त्यम् । ऐषमस्तनम् । ह्यस्त्यम् । ह्यस्तनम् । श्वस्त्यम् । श्वस्तनम् । पक्षे । शौवस्तिकं वक्ष्यते ॥

१३२६-ऐषमस्, ह्यस् और श्वस् शब्दके उत्तर विकल्प करके त्यप् प्रत्यय हो, पक्षमें वक्ष्यमाण ट्यु और ट्युल् प्रत्यय होगा, जैसे-ऐषमस्त्यम्, ऐषमस्तनम् । ह्यस्तम् । ह्यस्त्यनम् । श्वस्त्यम् । श्वस्तनम् । पक्षमें 'शौवस्तिकम्' ऐसा रूप कहेंगे ॥

१३२७ तीररूप्योत्तरपदादञ्ञौ । ४ । २ । १०६ ॥

यथासंख्येन । काकतीरम् । पाल्वलतीरम् । शैवरूप्यम् । तीररूप्यान्तादिति नोक्तम् । बहुच्पूर्वान्मा भूत् । बाहुरूप्यम् ॥

१३२७-तीर शब्द और रूप्य शब्द उत्तर पद हैं जिनके ऐसे शब्दोंके उत्तर यथाक्रम अञ् और ञ प्रत्यय हो, जैसे-काकतीरम् । पाल्वलतीरम् । शैवरूप्यम् ।

तीरशब्दान्त और रूप्यशब्दान्त प्रातिपदिकोंके उत्तर उक्त प्रत्यय हों, ऐसे न कहकर तीर शब्द और रूप्य शब्द उत्तरपद हैं जिनके ऐसे शब्दोंके उत्तर उक्त प्रत्यय हों, ऐसा क्यों कहा? तो जिस स्थानमें बहुच् प्रत्यय होगा उस स्थानमें तीर शब्द अथवा रूप्य शब्द अन्तस्थित होगा, क्योंकि, बहुच् प्रत्यय प्रकृतिके पूर्वमें ही होताहै, उस स्थानमें अञ् अथवा ञ प्रत्यय नहीं हो, जैसे-'बाहुरूप्यम्' इस स्थानमें ञ प्रत्यय नहीं हुआ ॥

१३२८ दिक्पूर्वपदादसंज्ञायां ञः । ४ । २ । १०७ ॥

अणोपवादः । पौर्वशालः । असंज्ञायां किम् । संज्ञाभूतायाः प्रकृतेर्मा भूत् । पूर्वेषुकामशम्यां भवः पूर्वेषुकामशमः । प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिः ॥

१३२८-दिग्वाचक शब्द जिसका पूर्वपद है, ऐसे प्रातिपदिकके उत्तर संज्ञा न होनेपर ञ प्रत्यय हो, यह ञ प्रत्यय अण् प्रत्ययका विशेषक है, जैसे-पौर्वशालः ।

संज्ञा न होनेपर ऐसा क्यों कहा ? तो संज्ञाभूत प्रातिपदिक॰ के उत्तर ञ प्रत्यय नहीं हो, जैसे-पूर्वेषुकामशम्यास्भवः= पूर्वेषुकामशमः वहां "प्राचां ग्रामनगराणाम् १४४०" इस सूत्रसे उत्तरपदकी वृद्धि हुई है ॥

१३२९ मद्रेभ्योऽञ् । ४ । २ । १०८ ॥

दिक्पूर्वपदादित्येव । दिशोऽमद्राणामिति मद्रपर्युदासादादिवृद्धिः । पौर्वमद्रः । आपरमद्रः ।

१३२९-जिसके पूर्वमें दिग्वाचक शब्द है, ऐसे मद्र शब्द-के उत्तर अञ् प्रत्यय हो, "दिशोऽमद्राणाम् १३९९" इस सूत्रमें मद्र शब्दके पर्युदासके कारण आदि अच्की वृद्धि हुई, जैसे-पौर्वमद्रः । आपरमद्रः ॥

१३३० उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् । ४ । २ । १०९ ॥

अञ् स्यात् । शैवपुरम् ॥

१३३०-इस सूत्रमें 'दिक्पूर्वपदात्' यह निवृत्त हुआ । बहुत स्वरसे युक्त अन्तोदात्त उदीच्यग्रामवाचक शब्दके उत्तर अञ् प्रत्यय हो, जैसे-शैवपुरम् ॥

१३३१ प्रस्थोत्तरपदपलद्यादिकोपधादण् । ४ । २ । ११० ॥

माहिकिप्रस्थः । पालदः । नैलीनकः ॥

१३३१-प्रस्थ शब्द उत्तर पद है जिसके ऐसे प्रातिपदिक, पलदी आदि शब्द और ककारोपध प्रातिपदिकके उत्तर अण् प्रत्यय हो, जैसे-माहिकिप्रस्थः । पालदः । नैलीनकः ॥

१३३२ कण्वादिभ्यो गोत्रे । ४ । २ । १११ ॥

एभ्यो गोत्रप्रत्ययान्तेभ्योऽण् स्यात् । कण्वो गर्गादिः । काण्व्यस्य छात्राः काण्वाः ॥

१३३२-गोत्रप्रत्ययान्त कण्वादि शब्दोंके उत्तर अण् प्रत्यय हो, कण्व शब्द गर्गादि गणमें पठित है, जैसे-काण्व्यस्य छात्राः, इस विग्रहमें-काण्वाः ॥

१३३३ इञश्च । ४ । २ । ११२ ॥

गोत्रे य इञ् तदन्तादण् स्यात् । दाक्षाः । गोत्रे किम् । सौतङ्गमेरिदं सौतङ्गमीयम् । गोत्रमिह शास्त्रीयं न तु लौकिकम् । तेनेह न । पाणिनीयम् ॥

१३३३-गोत्रार्थमें जो इञ् प्रत्यय, तदन्त प्रातिपदिकके उत्तर अण् प्रत्यय हो, जैसे-दाक्षाः ।

गोत्रार्थ न होनेपर इञ् नहीं होगा । जैसे-सौतङ्गमेरिदम्= सौतङ्गमीयम् ।

इस स्थलमें गोत्र शास्त्रीय है, लौकिक नहीं है अर्थात् शास्त्रमें पौत्रादि अपत्यको गोत्र कहतेहैं वही इस सूत्रमें गोत्र जानना, किन्तु लौकिक गोत्र नहीं, इसलिये यहां नहीं हुआ, जैसे-पाणिनीयम् ।

१३३४ न द्व्यचः प्राच्यभरतेषु । ४ । २ । ११३ ॥

इञश्चेत्यणोऽपवादः । प्राष्ठीयाः । काशीयाः । भरतानां प्राच्यत्वेऽपि पृथगुपादानमन्यत्र प्राच्यग्रहणे भरतानामग्रहणस्य लिंगम् ॥

१३३४-दो स्वरोंसे युक्त शब्दके उत्तर प्राच्य और भरत प्राच्य रहते गोत्रार्थमें जो इञ् प्रत्यय, तदन्तके उत्तर अण् प्रत्यय न हो, यह सूत्र "इञश्च १३३३" इस सूत्रसे विहित अण् प्रत्ययका निषेधक है, जैसे-प्राष्ठीयाः । काशीयाः ।

भरतोंके प्राच्यत्व होनेपर भी इस स्थानमें पृथक् ग्रहणके कारण अन्य किसी स्थलमें प्राच्य शब्दका ग्रहण करनेपर भरतोंका ग्रहण नहीं होगा ॥

१३३५ वृद्धिर्यस्याचामादिस्तद्वृद्धम् । १।१।७३॥

यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात् ॥

१३३५—जिस समुदायके अचोंके मध्यमें आद्यच् वृद्धि हो वह वृद्धसंज्ञक हो ॥

१३३६ त्यदादीनि च । १ । १ ।७४ ॥

वृद्धसंज्ञानि स्युः ॥

१३३६—त्यदादि भी वृद्धसंज्ञक हों ॥

१३३७ वृद्धाच्छः । ४ । २ । ११४ ॥

शालीयः । मालीयः । तदीयः ॥

१३३७—वृद्धसंज्ञक शब्दके उत्तर छ प्रत्यय हो, जैसे—शालीयः । मालीयः । तदीयः ॥

१३३८ एङ् प्राचां देशे । १।१।७५॥

एङ् यस्याचामादिस्तद्वृद्धसंज्ञं वा स्याद्देशाभिधाने । एणीपचनीयः । गोनर्दीयः । भोजकटीयः । पक्षे अणि । ऐणीपचनः । गौनर्दः । भौजकटः । एङ् किम् । आहिच्छत्रः । कान्यकुब्जः ॥ वा नामधेयस्य वृद्धसंज्ञा वक्तव्या॥*॥ देवदत्तीयः । दैवदत्तः ॥

१३३८—देश अर्थमें अचोंके मध्यमें एङ् (ए ओ) जिसके आदिमें है, उसकी विकल्प करके वृद्धसंज्ञा हो, जैसे—एणीपचनीयः । गोनर्दीयः । भोजकटीयः । विकल्प पक्षमें अण् प्रत्यय होगा, जैसे—ऐणीपचनः । गौनर्दः । भौजकटः ।

एङ् आदिमें न होनेपर वृद्ध संज्ञा नहीं होगी, जैसे—आहिच्छत्रः । कान्यकुब्जः ।

नामधेयवाचक शब्दकी विकल्प करके वृद्ध संज्ञा हो * जैसे—देवदत्तीयः, दैवदत्तः ॥

१३३९ भवतष्ठक्छसौ ।४।२।११५॥

वृद्धाद्भवत एतौ स्तः । भावत्कः । जश्त्वम् । भवदीयः । वृद्धादित्यनुवृत्तेः शत्रन्तादणेव । भावतः ॥

१३३९—वृद्धसंज्ञक भवत् शब्दके उत्तर ठक् और छस् प्रत्यय हो, जैसे—भावत्कः । स् प्रत्ययमें सकारकी इत् संज्ञा होनेके कारण पूर्वपदकी "सिति च १ । ४ । १६ " इससे पदसंज्ञा होनेपर जश्त्व हुआ, जैसे—भवदीयः 'वृद्धात्' इस पदकी अनुवृत्ति होनेसे शतृप्रत्ययान्तके उत्तर अण् प्रत्यय ही होगा, जैसे—भावतः ॥

१३४० काश्यादिभ्यष्ठञ्ञिठौ । ४ । २ । ११६ ॥

इकार उच्चारणार्थः । काशिकी । काशिका । वैदिकी । वैदिका ॥ आपदादिपूर्वपदात्कालान्तात् ॥ * ॥ आपदादिराकृतिगणः । आपत्कालिकी । आपत्कालिका ॥

१३४०—काश्यादि शब्दके उत्तर ठञ् और ञिठ् प्रत्यय हो, ञिठ् प्रत्ययका इकार उच्चारणार्थ है, जैसे—काशिकी, काशिका । वैदिकी, वैदिका ।

आपदादि शब्द पूर्वमें है और काल शब्द अन्तमें है जिसके ऐसे प्रातिपदिकके उत्तर ठञ् और ञिठ् प्रत्यय हो * आपदादि आकृतिगण है । जैसे—आपत्कालिकी, आपत्कालिका ॥

१३४१ वाहीकग्रामेभ्यश्च ।४।२।११७॥

वाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः । छस्यापवादः । कास्तीरं नाम वाहीकग्रामः । कास्तीरिकी । कास्तीरिका ॥

१३४१—वाहीकग्रामवाचक वृद्धसंज्ञक शब्दके उत्तर ठञ् और ञिठ् प्रत्यय हो । यह सूत्र छ प्रत्ययका अपवादक है । कास्तीरं नाम वाहीकग्रामः । कास्तीरिकी, कास्तीरिका ॥

११४२ विभाषोशीनरेषु ।४।२।११८ ॥

एषु ये ग्रामास्तद्वाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ वा स्तः । सौदर्शनिकी । सौदर्शनिका । सौदर्शनीया ॥

१३४२—उशीनर देशमें जो ग्राम हैं, तद्वाचक वृद्धसंज्ञक शब्दके उत्तर विकल्प करके ठञ् और ञिठ् प्रत्यय हो, जैसे—सौदर्शनिकी, सौदर्शनिका, सौदर्शनीया ॥

१३४३ ओर्देशे ठञ् ।४।२।११९ ॥

उवर्णान्ताद्देशवाचिनष्ठञ् । निषादकर्षूः । नैषादकर्षुकः । केऽण इति ह्रस्वः । देशे किम् । पटोश्छात्राः पाटवाः । ञिठं व्यावर्तयितुं ठञ्ग्रहणम् । वृद्धाच्छं परत्वादयं बाधते । दाक्षिकर्षुकः ॥

१३४३—उवर्णान्त देशवाचक शब्दके उत्तर ठञ् प्रत्यय हो, जैसे—निषादकर्षू 'नैषादकर्षुकः' यहां "केऽणः ८३४" इस सूत्रसे ह्रस्व हुआहै । देशार्थ न होनेपर—पटोश्छात्राः=पाटवाः ऐसा पद होगा । ञिठ् प्रत्ययकी व्यावृत्तिके निमित्त सूत्रमें ठञ् प्रत्ययका ग्रहण कियाहै । यह सूत्र परत्वके कारण "वृद्धाच्छः" इस पूर्वोक्त सूत्रको बाधताहै, जैसे—दाक्षिकर्षुकः ॥

१३४४ वृद्धात्प्राचाम् ।४।२।१२० ॥

प्राग्देशवाचिनो वृद्धादेवेति नियमार्थं सूत्रम् । आढकजम्बुकः । शाकजम्बुकः । नेह । मल्लवास्तु- माल्लवास्तवः ॥

१३४४—वृद्धसंज्ञक ही पूर्वदेशवाचक शब्दके उत्तर ठञ् प्रत्यय हो, ऐसे नियमके निमित्त यह सूत्र है, इससे पूर्वदेशवाचक वृद्धसंज्ञक ही शब्दके उत्तर ठञ् प्रत्यय होगा

अन्यत्र नहीं होगा, जैसे–आढकजम्बुकः । शाकजम्बुकः । मल्लवास्तुसे–माल्लवास्तवः इस स्थलमें नहीं हुआ ॥

१३४५ धन्वयोपधाद्वुञ् ।४।२।१२१॥

धन्वविशेषवाचिनो यकारोपधाच्च देशवाचिना वृद्धाद्वुञ् स्यात् । ऐरावतं धन्व ऐरावतकः । सांकाश्यकाम्पिल्यशब्दौ वुञ्छणादिसूत्रेण ण्यान्तौ । सांकाश्यकः । काम्पिल्यकः ।

१३४५–धन्वविशेषवाचक शब्द और यकारोपध देशवाचक वृद्धसंज्ञक शब्दके उत्तर वुञ् प्रत्यय हों, जैसे–ऐरावतं धन्व=ऐरावतकम्।सांकाश्य और काम्पिल्य शब्द"वुञ्छण० १२९२" इस सूत्रसे ण्यप्रत्ययान्त है, जैसे–सांकाश्यकः । काम्पिल्यकः ॥

१३४६ प्रस्थपुरवहान्ताच्च ।४।२।१२२॥

एतदन्ताद्वृद्धाद्देशवाचिनो वुञ् स्यात् । छस्यापवादः । मालाप्रस्थकः । नान्दीपुरकः । पैलुवहकः । पुरान्तग्रहणमप्रागर्थम् । प्राग्देशे तूत्तरेण सिद्धम् ॥

१३४६–प्रस्थ,पुर और वह अन्तमें है जिनके ऐसे देशवाचक वृद्धसंज्ञक शब्दोंके उत्तर वुञ् प्रत्यय हो, यह वुञ् प्रत्यय छ प्रत्ययका विशेषक है, जैसे–मालाप्रस्थकः । नान्दीपुरकः । पैलुवहकः । पुरशब्दान्तका ग्रहण अप्रागर्थ अर्थात् पूर्वदेशवाचकसे भिन्नके अर्थ है, पूर्वदेशवाचक होनेपर तो वक्ष्यमाण "रोपधेतोः० १३४७" इस परवर्ती सूत्रसे वुञ् प्रत्यय सिद्ध है ॥

१३४७ रोपधेतोः प्राचाम् ।४।२।१२३॥

रोपधादीकारान्ताच्च प्राग्देशवाचिनश्च वृद्धाद्वुञ् स्यात् । पाटलिपुत्रकः । ईतः । कान्दकः ॥

१३४७–रकारोपध और ईकारान्त पूर्वदेशवाचक वृद्धसंज्ञक शब्दके उत्तर वुञ् प्रत्यय हो, जैसे–पाटलिपुत्रकः । ईतः–कान्दकः ॥

१३४८ जनपदतदवध्योश्च ।४।२।१२४॥

जनपदवाचिनस्तदवधिवाचिनश्च वृद्धाद्वुञ् स्यात् । आदर्शकः । त्रैगर्तकः ॥

१३४८–जनपदवाचक और उसकी अवधि अर्थात् 'सीमा' वाचक वृद्धसंज्ञक शब्दके उत्तर वुञ् प्रत्यय हो, जैसे–आदर्शकः । त्रैगर्त्तकः ॥

१३४९ अवृद्धादपि बहुवचनविषयात् । ४ । २ । १२५ ॥

अवृद्धाद्वृद्धाच्च जनपदतदवधिवाचिनो बहुवचनविषयात्प्रातिपदिकाद्वुञ् स्यादवृद्धादणो वृद्धाच्छस्यापवादः। अवृद्धाज्जनपदात्–आंगकः। अवृद्धाज्जनपदावधेः–आजमीढकः । वृद्धाज्जनपदात्–दार्वकः । वृद्धाज्जनपदावधेः–कालञ्जरकः । विषयग्रहणं किम् । एकशेषेण बहुत्वे मा भूत् । वर्तनी च वर्तनी च वर्तनी च वर्तन्यः, तासु भवो वार्तनः ॥

१३४९–अवृद्ध अथवा वृद्धसंज्ञक जनपदवाचक और उसकी अवधिवाचक बहुवचनविषयीभूत अर्थात् बहुवचनान्त प्रातिपदिकके उत्तर वुञ् प्रत्यय हो, अवृद्धसंज्ञकके उत्तर अण् प्रत्ययका और वृद्धसंज्ञकके उत्तर छ प्रत्ययका विशेषक यह सूत्र है ।

अवृद्धजनपदके उत्तर, जैसे–आङ्गकः । अवृद्धजनपदावधिके उत्तर, जैसे–आजमीढकः ।

वृद्धसंज्ञक जनपदवाचकके उत्तर, जैसे–दार्वकः । वृद्धसंज्ञक जनपदावधिकके उत्तर, जैसे–कालञ्जरकः ।

विषयग्रहण कहनेसे जिस स्थानमें एकशेषसे बहुत्व होगा उस स्थानमें नहीं होगा, जैसे–वर्तनी च वर्तनी च वर्तनी च वर्त्तन्यः, तासु भवः=वार्तनः ॥

१३५० कच्छाग्निवक्रवर्तोत्तरपदात् । ४ । २ । १२६ ॥

देशवाचिनो वृद्धादवृद्धाच्च वुञ् स्यात् । दारुकच्छकः । काण्डाग्नकः । सैन्धुवक्त्रकः । बाहुवर्तकः ॥

१३५०–कच्छ, अग्नि, वक्र और वर्त शब्द उत्तरपद हैं जिसके ऐसे देशवाचक वृद्धसंज्ञक वा अवृद्ध शब्दके उत्तर वुञ् प्रत्यय हो, जैसे–दारुकच्छकः । काण्डाग्नकः । सैन्धुवक्त्रकः । बाहुवर्तकः ॥

१३५१ धूमादिभ्यश्च । ४ । २ । १२७॥

देशवाचिभ्यो वुञ् । धौमकः । तैर्थकः ॥

१३५१–देशवाचक धूमादि शब्दोंके उत्तर वुञ् प्रत्यय हो, जैसे–धौमकः । तैर्थकः ॥

१३५२ नगरात्कुत्सनप्रावीण्ययोः । ४ । २ । १२८ ॥

नगरशब्दाद्वुञ् स्यात्कुत्सने प्रावीण्ये च गम्ये। नागरकश्चौरः शिल्पी वा । कुत्सनेति किम् । नागरा ब्राह्मणाः ॥

१३५२–कुत्सन और प्रावीण्य अर्थ गम्यमान होनेपर नगर शब्दके उत्तर वुञ् प्रत्यय हो, जैसे–नागरकः चौरः शिल्पी वा । कुत्सन अर्थ न होनेपर वुञ् प्रत्यय नहीं होगा, जैसे–नागरा ब्राह्मणाः ॥

१३५३ अरण्यान्मनुष्ये ।४।२।१२९॥

वुञ् । अरण्याण्ण इत्यस्यापवादः ॥ पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यम् ॥ ॥ * ॥ आरण्यकः पन्थाः अध्यायो न्यायो विहारो मनुष्यो हस्ती वा ॥ वा गोमयेषु ॥ * ॥ आरण्यकाः आरण्या वा गोमयाः ॥

१३५३-मनुष्यार्थ गम्यमान होनेपर अरण्य के उत्तर वुञ् प्रत्यय हो। यह सूत्र "अरण्याण:" इस वार्त्तिकका अपवाद है।

मार्ग, अध्याय, न्याय, विहार, मनुष्य और हस्ती इन अर्थोंमें अरण्य शब्दके उत्तर वुञ् प्रत्यय हो, ऐसा कहना चाहिये * जैसे-आरण्यक:,-पन्था: अध्याय: न्याय: विहार: मनुष्य: हस्ती वा।

गोमय अर्थ होनेपर अरण्य शब्दके उत्तर विकल्प करके वुञ् प्रत्यय हो * जैसे-आरण्यका:, आरण्या वा गोमया:॥

१३५४ विभाषा कुरुयुगन्धराभ्याम्। ४। २। १३०॥

वुञ्। कौरवक:। कौरव:। यौगन्धरक:। यौगन्धर:॥

१३५४-कुरु और युगन्धर शब्दके उत्तर विकल्प करके वुञ् प्रत्यय हो, जैसे-कौरवक:, कौरव:। यौगन्धरक:, यौगन्धर:॥

१३५५ मद्रवृज्योः कन्। ४। २।१३१॥

जनपदवुञोऽपवाद:। मद्रेषु जातो मद्रक:। वृजिक:॥

१३५५-मद्र और वृजि शब्दके उत्तर कन् प्रत्यय हो, यह कन् प्रत्यय जनपदवाचकसे विहित वुञ् प्रत्ययका विशेषक है, जैसे-मद्रेषु जात:मद्रक:। वृजिक:॥

१३५६ कोपधादण्। ४। २। १३२॥

माहिषिक:॥

१३५६-ककारोपध शब्दके उत्तर अण् प्रत्यय हो, जैसे-माहिषिक:॥

१३५७ कच्छादिभ्यश्च। ४। २। १३३॥

देशवाचिभ्योऽण्। वुञादेरपवाद:। काच्छ:। सैन्धव:॥

१३५७-देशवाचक कच्छादि शब्दोंके उत्तर अण् प्रत्यय हो। यह सूत्र देशवाचक शब्दके उत्तर विहित वुञ् आदि प्रत्ययका अपवाद है, जैसे-काच्छ:। सैन्धव:॥

१३५८ मनुष्यतत्स्थयोर्वुञ्।४।२।१३४॥

कच्छाद्यणोऽपवाद:। कच्छे जातादि: काच्छको मनुष्य:। काच्छकं हसितम्। मनुष्येति किम्। काच्छो गौ:॥

१३५८-मनुष्य और मनुष्यस्थित पदार्थ वाच्य रहते कच्छादि शब्दोंके उत्तर वुञ् प्रत्यय हो, यह सूत्र कच्छादि शब्दोंके उत्तर विहित अण् प्रत्ययका विशेषक है, जैसे-कच्छे जातादि:=काच्छक: अर्थात् मनुष्य:। काच्छकं हसितम्।

मनुष्य अथवा उसमें रहनेवाले पदार्थ वाच्य न होनेपर वुञ् प्रत्यय नहीं होगा, जैसे-काच्छो गौ:॥

१३५९ अपदातौ साल्वात्।४।२।१३५॥

साल्वशब्दस्य कच्छादित्वाद्वुञि सिद्धे नियमार्थमिदम्। अपदातावेवेति। साल्वको ब्राह्मण:। अपदातौ किम्। साल्व: पदातिर्व्रजति॥

१३५९-पदातिभिन्न अर्थ होनेपर साल्व शब्दके उत्तर वुञ् प्रत्यय हो। साल्व शब्दके उत्तर-कच्छादित्वके कारण वुञ् प्रत्यय सिद्ध ही है फिर यह सूत्र अपदातावेव, अर्थात् अपदाति अर्थ होनेपर ही साल्व शब्दसे वुञ् प्रत्यय हो अन्यार्थमें न हो, इस नियमके निमित्त है, जैसे-साल्वको ब्राह्मण:, इस स्थानमें पदाति अर्थ नहीं है, पदाति अर्थ होनेपर वुञ् प्रत्यय नहीं होगा, जैसे-साल्व: पदातिर्व्रजति॥

१३६० गोयवाग्वोश्च। ४। २। १३६॥

साल्वाद्वुञ्। कच्छाद्यणोऽपवाद:। साल्वको गौ:। साल्विका यवागू:। साल्वमन्यत्॥

१३६०-गो और यवागू अर्थ होनेपर साल्व शब्दके उत्तर वुञ् प्रत्यय हो, यह सूत्र कच्छादिके उत्तर विहित अण् प्रत्ययका अपवाद है, जैसे-साल्वको गौ:। साल्विका यवागू:। साल्वमन्यत्॥

१३६१ गर्तोत्तरपदाच्छ: ।४।२।१३७॥

देशे। अणोऽपवाद:। वृकगर्तीयम्। उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थम्॥

१३६१-गर्त शब्द जिसके परे है, ऐसे शब्दके उत्तर देश अर्थ होनेपर छ प्रत्यय हो, यह सूत्र अण् प्रत्ययका अपवाद है, जैसे-वृकगर्तीयम्, इस स्थानमें केवल बहुच्पूर्वके निषेधार्थ उत्तर पदका ग्रहण कियाहै॥

१३६२ गहादिभ्यश्च। ४। २। १३८॥

छ: स्यात्। गहीय:॥ मुखपार्श्वतसोर्लोपश्च॥ ॥मुखतीयम्। पार्श्वतीयम्। अव्ययानां भमात्रे टिलोपस्यानित्यतां ज्ञापयितुमिदम्। कुग् जनस्य परस्य च॥ ॥जनकीयम्। परकीयम्॥ देवस्य च॥ देवकीयम्॥ स्वस्य च॥ स्वकीयम्। वेणुकादिभ्यश्छण्वाच्य:॥ *॥ वैणुकीयम्। वैत्रकीयम्। औत्तरपदकीयम्॥

१३६२-गहादि शब्दोंके उत्तर छ प्रत्यय हो, जैसे-गहीय:।

मुख और पार्श्व शब्दके उत्तर तस् प्रत्ययके अन्तका लोप हो और छ प्रत्यय हो, जैसे-मुखतीयम्। पार्श्वतीयम्। अव्ययोंकी भसंज्ञामात्रमें टिके लोपकी अनित्यता ज्ञापन करनेके निमित्त यह गणसूत्र है।

जन और पर शब्दको कुक्का आगम और छ प्रत्यय हो, जैसे-जनकीयम्। परकीयम्।

देव शब्दको कुक्का आगम और छ प्रत्यय हो, जैसे-देवकीयम् ।

स्व शब्दको कुक्का आगम और छ प्रत्यय हो, जैसे-स्वकीयम् ।

वेणुकादि शब्दोंके उत्तर छण् प्रत्यय हो* जैसे-वैणुकीयम् । वैत्रकीयम् । औत्तरपदकीयम् ॥

१३६३ प्राचां कटादेः । ४ । २ । १३९ ॥

प्राग्देशवाचिनः कटादेश्छः स्यात् । अणोऽपवादः । कटनगरीयम् । कटघोषीयम् । कटपल्वलीयम् ॥

१३६३-पूर्वदेशवाचक कटादि शब्दोंके उत्तर छ प्रत्यय हो, यह छ प्रत्यय अण् प्रत्ययका विशेषक है, जैसे-कटनगरीयम् । कटघोषीयम् । कटपल्वलीयम् ॥

१३६४ राज्ञः क च । ४ । २ । १४० ॥

वृद्धत्वाच्छे सिद्धे तत्सन्नियोगेन कादेशमात्रं विधीयते । राजकीयम् ॥

१३६४-राजन् शब्दको क आदेश और छ प्रत्यय हो, इस स्थलमें वृद्धत्वके कारण छ प्रत्यय सिद्ध होनेपर प्रत्ययसन्नियोगसे ककार आदेशमात्र विधान करतेहैं, जैसे-राजकीयम् ॥

१३६५ वृद्धादकेकान्तखोपधात् । ४ । २ । १४१ ॥

अक इक एतदन्तात् खोपधाच्च वृद्धादेशवाचिनश्छः स्यात् । ब्राह्मणको नाम जनपदो यत्र ब्राह्मणा आयुधजीविनस्तत्र जातो ब्राह्मणकीयः । शाल्मलिकीयः । अयोमुखीयः ॥

१३६५-अक, इक, यह अन्तमें हैं जिसके ऐसे और खकारोपध देशवाचक वृद्धसंज्ञक शब्दोंके उत्तर छ प्रत्यय हो, जैसे-ब्राह्मणको नाम जनपदः यत्र ब्राह्मणाः आयुधजीविनस्तत्र जातः=ब्राह्मणकीयः । शाल्मलिकीयः । अयोमुखीयः ॥

१३६६ कन्थापलदनगरग्रामह्रदोत्तरपदात् । ४ । २ । १४२ ॥

कन्थादिपञ्चकोत्तरपदाद्देशवाचिनो वृद्धाच्छः स्यात् । ठञ्ञिठादेरपवादः । दाक्षिकन्थीयम् । दाक्षिपलदीयम् । दाक्षिनगरीयम् । दाक्षिग्रामीयम् । दाक्षिह्रदीयम् ॥

१३६६-कन्था, पलद, नगर, ग्राम और ह्रद, यह पांच शब्द उत्तरपद हैं जिसके ऐसे देशवाचक वृद्धसंज्ञक शब्दके उत्तर छ प्रत्यय हो, यह छ प्रत्यय ठञ् और ञिठ् आदि प्रत्ययोंका विशेषक है, जैसे-दाक्षिकन्थीयम् । दाक्षिपलदीयम् । दाक्षिनगरीयम् । दाक्षिग्रामीयम् । दाक्षिह्रदीयम् ॥

१३६७ पर्वताच्च । ४ । २ । १४३ ॥

पर्वतीयः ॥

१३६७-पर्वत शब्दके उत्तर छ प्रत्यय हो, जैसे-पर्वतीयः ॥

१३६८ विभाषाऽमनुष्ये । ४ । २ । १४४ ॥

मनुष्यभिन्नेऽर्थे पर्वताच्छो वा स्यात्पक्षेऽण् । पर्वतीयानि पार्वतानि वा फलानि । अमनुष्ये किम् । पर्वतीयो मनुष्यः ॥

१३६८-मनुष्यभिन्न अर्थ होनेपर पर्वत शब्दके उत्तर विकल्प करके छ प्रत्यय हो, विकल्प पक्षमें अण् प्रत्यय होगा, जैसे-पर्वतीयानि पार्वतानि वा फलानि । मनुष्य अर्थ होनेपर 'पर्वतीयः' अर्थात् मनुष्य, ऐसा होगा ॥

१३६९ कृकणपर्णाद्भारद्वाजे । ४ । २ । १४५ ॥

भारद्वाजदेशवाचिभ्यामाभ्यां छः । कृकणीयम् । पर्णीयम् । भारद्वाजे किम् । कार्कणम् । पार्णम् ॥

१३६९-भारद्वाजदेशवाचक जो कृकण और पर्ण शब्द उनके उत्तर छ प्रत्यय हो, जैसे-कृकणीयम् । पर्णीयम् । भरद्वाजदेशवाचक न होनेपर 'कार्कणम्' और 'पार्णम्' ऐसा होगा ॥

१३७० युष्मदस्मदोरन्यतरस्यां खञ्च । ४ । ३ । १ ॥

चाच्छः । पक्षेऽण् । युवयोर्युष्माकं वा अयं युष्मदीयः । अस्मदीयः ॥

१३७०-युष्मद् और अस्मद् शब्दके उत्तर विकल्प करके खञ् प्रत्यय हो, चकारनिर्देशके कारण छ प्रत्यय भी हो, विकल्प पक्षमें अण् प्रत्यय होगा, जैसे-युवयोर्युष्माकं वा अयम्=युष्मदीयः । अस्मदीयः ॥

१३७१ तस्मिन्नणि च युष्माकास्माकौ । ४ । ३ । २ ॥

युष्मदस्मदोरेतावादेशौ स्तः खञि अणि च । यौष्माकीणः । आस्माकीनः । यौष्माकः । आस्माकः ॥

१३७१-खञ् और अण् प्रत्यय परे रहते युष्मद् और अस्मद् शब्दके स्थानमें यथाक्रम युष्माक और अस्माक आदेश हों, जैसे-यौष्माकीणः । यौष्माकः । आस्माकीनः । आस्माकः ॥

१३७२ तवकममकावेकवचने । ४ । ३ । ३ ॥

एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञ्यणि च । तावकीनः । तावकः । मामकीनः । मामकः । छे तु ॥

१३७२-खञ् और अण् प्रत्यय परे रहते एकार्थवाचक युष्मद् और अस्मद् शब्दके स्थानमें यथाक्रम तवक और ममक आदेश हों, जैसे-तावकीनः । तावकः । मामकीनः । मामकः । छ प्रत्यय परे रहते कैसा होगा ? सो कहतेहैं-॥

१३७३ प्रत्ययोत्तरपदयोश्च ।७।२।९८॥

मपर्यन्तयोरेकार्थयोस्त्वमौ स्तः प्रत्यये उत्तरपदे च । त्वदीयः । मदीयः ॥

१३७३-प्रत्यय परे रहते और उत्तरपद परे रहते एकार्थवाचक युष्मद् और अस्मद् शब्दके मकारपर्यन्तको त्व और म आदेश हों, जैसे-त्वदीयः । मदीयः । उत्तरपद परे होनेपर, जैसे-त्वत्पुत्रः । मत्पुत्रः ॥

१३७४ अर्द्धाद्यत् । ४ । ३ । ४ ॥

अर्द्धयः ॥

१३७४-अर्द्ध शब्दके उत्तर यत् प्रत्यय हो, जैसे-अर्द्धयः ॥

१३७५ परावराधमोत्तमपूर्वाच्च।४।३।५॥

परार्द्धयम् । अवरार्द्धयम् । अधमार्द्धयम् । उत्तमार्द्धयम् ॥

१३७५-पर, अवर, अधम और उत्तम, यह शब्द पूर्वमें रहते अर्द्ध शब्दके उत्तर यत् प्रत्यय हो, जैसे-परार्द्धयम् । अवरार्द्धयम् । अधमार्द्धयम् । उत्तमार्द्धयम् ॥

१३७६ दिक्पूर्वपदाट्ठञ्च । ४ । ३ । ६ ॥

चाद्यत् । पौर्वार्द्धिकम् । पूर्वार्द्धयम् ॥

१३७६-दिग्वाचक शब्द पूर्वमें रहते अर्द्ध शब्दके उत्तर ठञ् प्रत्यय हो, चकारनिर्देशके कारण यत् प्रत्यय भी हो,जैसे-पौर्वार्द्धिकम् । पूर्वार्द्धयम् ॥

१३७७ ग्रामजनपदैकदेशादञ्ठञौ । ४ । ३ । ७ ॥

ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च दिक्पूर्वपदादर्द्धान्तादञ्ठञौ स्तः । इमेऽस्माकं ग्रामस्य जनपदस्य वा पौर्वार्द्धाः । पौर्वार्द्धिकाः। ग्रामस्य पूर्वस्मिन्नर्द्धे भवा इति तद्धितार्थे समासः । ठञ्ग्रहणं स्पष्टार्थम् । अञ् चेत्युक्तेऽयतोऽप्यनुकर्षः सम्भाव्येत ॥

१३७७-ग्रामैकदेश (ग्रामका एक अंश) वाचक और जनपदैक देश (देशका एक अंश) वाचक जो दिग्वाचकशब्दपूर्वक अर्द्धशब्दान्त प्रातिपदिक उसके उत्तर अञ् और ठञ् प्रत्यय हो, जैसे-इमेऽस्माकं ग्रामस्य जनपदस्य वा= पौर्वार्द्धाः, पौर्वार्द्धिकाः । ग्रामस्य पूर्वस्मिन्नर्द्धे भवाः, इस विग्रहमें तद्धितार्थमें समास हुआ है । ठञ् ग्रहण स्पष्टीकरणके निमित्त है । इस सूत्रमें 'अञ् च' ऐसा कहनेसे यत् प्रत्ययका भी अनुकर्ष सम्भावित होता, उसकी निवृत्तिके निमित्त दोनोंका उल्लेख किया, यह जानना चाहिये ॥

१३७८ मध्यान्मः । ४ । ३ । ८ ॥

मध्यमः ॥

१३७८-मध्य शब्दके उत्तर म प्रत्यय हो, जैसे-मध्यमः ॥

१३७९अ साम्प्रतिके । ४ । ३ । ९ ॥

मध्यशब्दादकारप्रत्ययः स्यात्साम्प्रतिकेऽर्थे । उत्कर्षापकर्षहीनो मध्यो वैयाकरणः । मध्यं दारु। नातिह्रस्वं नातिदीर्घमित्यर्थः ॥

१३७९-साम्प्रातिक अर्थात् न्याय्य अर्थ होनेपर मध्य शब्दके उत्तर अ प्रत्यय हो । उत्कर्ष और अपकर्षसे हीन व्यक्ति और वस्तुको मध्य कहतेहैं, जैसे-मध्यो वैयाकरणः । मध्यं दारु अर्थात् न बहुत छोटा और न तो बहुत बडा दारु ॥

१३८० द्वीपादनुसमुद्रं यञ्। ४ । ३।१०॥

समुद्रस्य समीपे यो द्वीपस्तद्विषयाद्द्वीपशब्दाद्यञ् स्यात् । द्वैप्यम् । द्वैप्या ॥

१३८०-समुद्रके समीपमें जो द्वीप, तद्विषयीभूत द्वीप शब्दके उत्तर यञ् प्रत्यय हो, जैसे-द्वैप्यम् । द्वैप्या ॥

१३८१ कालाट्ठञ् । ४ । ३ । ११ ॥

कालवाचिभ्यष्ठञ् स्यात् । मासिकम् । सांवत्सरिकम् । सायम्प्रातिकः । पौनःपुनिकः । कथं तर्हि शार्वरस्य तमसो निषिद्धये इति कालिदासः, अनुदितौषसरागेति भारविः, समानकालीनं प्राक्कालीनमित्यादि च । अपभ्रंशा एवैत इति प्रामाणिकाः । तत्र जात इति यावत्कालाधिकारः ।

१३८१-कालवाचक शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-मासिकम् । सांवत्सरिकम् । सायम्प्रातिकः । पौनःपुनिकः ।

इस सूत्रके रहते कालिदासने "शार्वरस्य तमसो निषिद्धये" ऐसे स्थलमें किस प्रकार 'शार्वरस्य'पदका प्रयोग किया ? और भारविने "अनुदितौषसरागः" ऐसा प्रयोग कैसे किया ? और 'समानकालीनम्, प्राक्कालीनम्' इत्यादि पद कैसे सिद्ध हुए हैं ? इस विषयमें प्रामाणिक कहतेहैं कि, यह सब पद अपभ्रंश हैं ।

"तत्र जातः १३९३" इस सूत्रतक कालाधिकार है॥

१३८२ श्राद्धे शरदः । ४ । ३ । १२ ॥

ठञ् स्यात्।ऋत्वणोऽपवादः।शारदिकं श्राद्धम्॥

१३८२-श्राद्ध अर्थमें शरद् शब्दके उत्तर ठञ् प्रत्यय हो, यह सूत्र ऋतुवाचक शब्दके उत्तर अण् प्रत्यय (१३८७) का विशेषक है, जैसे-शारदि भवम्=शारदिकं श्राद्धम् ॥

१३८३ विभाषा रोगातपयोः।४।३।१३॥

शारदिकः शारदो वा रोग आतपो वा । एतयोः किम् । शारदं दधि ॥

१३८३-रोग और आतप अर्थमें शरद् शब्दके उत्तर विकल्प करके ठञ् प्रत्यय हो, जैसे-शारदिकः शारदो वा रोग आतपो वा । रोग और आतप अर्थ न होनेपर ठञ् प्रत्यय नहीं होगा, जैसे-शारदं दधि ॥

१३८४ निशाप्रदोषाभ्यां च ।४।३।१४॥

वा ठञ् स्यात् । नैशिकम् । नैशम् । प्रादोषिकम् । प्रादोषम् ॥

१३८४-निशा और प्रदोष शब्दके उत्तर विकल्प करके ठञ् प्रत्यय हो, जैसे-नैशिकम्, नैशम्। प्रादोषिकम्,प्रादोषम्। (प्रदोषमें होनेवाला) ॥

१३८५ श्वसस्तुट् च । ४ । ३ । १५ ॥

श्वस्शब्दाट्ठञ् वा स्यात्तस्य तुडागमश्च ॥

१३८५-श्वस् शब्दके उत्तर विकल्प करके ठञ् प्रत्यय हो और उसको तुट्का आगम हो ॥

१३८६ द्वारादीनां च । ७ । ३ । ४ ॥

द्वार, स्वर, व्यल्कश, स्वस्ति, स्वर, स्फ्यकृत, स्वादु, मृदु, श्वस्, श्वन्, स्व, एषां न वृद्धिरैजागमश्च । शौवस्तिकम् ॥

१३८६-द्वार, स्वर, स्वाध्याय, व्यल्कस, स्वस्ति, स्वर, स्फ्यकृत, स्वादु, मृदु, श्वस्, श्वन् और स्व शब्दके पूर्व स्वरको वृद्धि न हो और ऐच्का आगम हो,जैसे-शौवस्तिकम्।

१३८७ सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् । ४ । ३ । १६ ॥

सन्धिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽण् स्यात् । सन्धिवेलायां भवं सान्धिवेलम् । ग्रैष्मम् । तैषम् ॥ सन्धिवेला, संध्या, अमावास्या, त्रयोदशी, चतुर्दशी, पौर्णमासी, प्रतिपत ॥ संवत्सरात् फलपर्वणोः ॥ * ॥ सांवत्सरं फलं पर्व वा । सांवत्सरिकमन्यत् ॥

१३८७-कालवृत्ति जो संधिवेलादि शब्द, ऋतुवाचक शब्द और नक्षत्रवाचक शब्द, उनके उत्तर अण् प्रत्यय हो, जैसे-'संधिवेलायां भवम्' इस वाक्यमें-सांधिवेलम् । ग्रैष्मम् । तैषम् । संधिवेलादि जैसे-संधिवेला,संध्या,अमावास्या,त्रयोदशी, चतुर्दशी, पौर्णमासी, प्रतिपत् ।

फल और पर्व वाच्य होनेपर संवत्सर शब्दके उत्तर अण् प्रत्यय हो, जैसे-सांवत्सरं फलं पर्व वा । अन्य अर्थमें-सांवत्सरिकम् (संवत्सरमें होनेवाला) ॥

१३८८ प्रावृष एण्यः । ४ । ३ । १७ ॥

प्रावृषेण्यः ॥

१३८८-प्रावृष् शब्दके उत्तर एण्य प्रत्यय हो, जैसे-प्रावृषेण्यः (वर्षाऋतुमें होनेवाला) ॥

१३८९ वर्षाभ्यष्ठक् । ४ । ३ । १८ ॥

वर्षासु साधु वार्षिकं वासः । कालात्साधुपुष्प्यत्पच्यमानेष्विति साध्वर्थे ॥

१३८९-वर्षा शब्दके उत्तर साधु अर्थमें ठक् प्रत्यय हो, जैसे-वर्षासु साधु, इस वाक्यमें-वार्षिकम् वासः, यहां "कालात्साधुपुष्प्यत्पच्यमानेषु १४१८" इस सूत्रसे साधु अर्थमें ही ठक् होगा ॥

१३९० सर्वत्राण् च तलोपश्च।४।३।२२॥

हेमन्तादण् स्यात्तलोपश्च वेदलोकयोः । चकारात्पक्षे ऋत्वण् । हैमनम् । हैमन्तम् ॥

१३९०-वेद और लोकमें हेमन्त शब्दके उत्तर अण् प्रत्यय हो और हेमन्त शब्दके तकारका लोप हो । चकारसे पक्षमें ऋतुवाचक शब्दके उत्तर अण् (१३८७)प्रत्यय होगा, जैसे-हैमनम् । हैमन्तम् ॥

१३९१ सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च । ४ । ३ । २३ ॥

सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यष्ट्युट्युलौ स्तस्तयोस्तुट् च । तुटः प्रागनादेशः । अनद्यतन इत्यादि निर्देशात् । सायन्तनम् । चिरन्तनम् । प्राह्णप्रगयोरेदन्तत्वं निपात्यते । प्राह्णेतनम् । प्रगेतनम् । दोषातनम् । दिवातनम् ॥ चिरपरुत्परारिभ्यस्त्नो वक्तव्यः॥*॥ चिरत्नम् । परुत्नम् । परारित्नम् ॥ अग्रादिपश्चाड्डिमच् ॥ * ॥ अग्रिमम् । आदिमम् । पश्चिमम् ॥ अन्ताच्च ॥ * ॥ अन्तिमम् ॥

१३९१-सायम्, चिरम्, प्राह्णे और प्रगे यह चार अव्यय और अन्य कालवाचक अव्यय शब्दोंके उत्तर ट्यु, ट्युल् प्रत्यय हों और इन दोनों प्रत्ययोंको तुट्का आगम भी हो, "अनद्यतने० २१८५" ऐसे सूत्रके निर्देशके कारण तुट्से पहले अनादेश होगा, जैसे-सायं भवम्=सायन्तनम् । चिरन्तनम् । प्राह्णे और प्रगे शब्दका एकारान्तत्व निपातनसे सिद्ध है, जैसे-प्राह्णेतनम् । प्रगेतनम् । दोषातनम् । दिवातनम् ॥

चिर, परुत् और परारि शब्दके उत्तर त्न प्रत्यय हो * जैसे-चिरत्नम् । परुत्नम् । परारित्नम् ॥

अग्र, आदि और पश्चात् शब्दके उत्तर डिमच् प्रत्यय हो * जैसे-अग्रिमम् । आदिमम् । पश्चिमम् ।

अन्त शब्दके उत्तर भी डिमच् प्रत्यय हो* जैसे-अन्ते भवम्=अन्तिमम् ॥

१३९२ विभाषा पूर्वाह्णापराह्णाभ्याम् । ४ । ३ । २४ ॥

आभ्यां ट्युट्युलौ वा स्तस्तयोस्तुट् च । पक्षे ठञ् । पूर्वाह्णेतनम् । अपराह्णेतनम् । घकालतनेष्विति अलुक् । पूर्वाह्णः सोढोऽस्येति विग्रहे तु पूर्वाह्णतनम् । अपराह्णतनम् । पौर्वाह्णिकम् । आपराह्णिकम् ॥

१३९२-पूर्वाह्ण और अपराह्ण शब्दके उत्तर विकल्प करके ट्यु और ट्युल् प्रत्यय हो और इन ट्यु, ट्युल् प्रत्ययोंको तुट्का आगम हो, पक्षमें ठञ् प्रत्यय होगा, जैसे-पूर्वाह्णेत-

नम् । अपराह्णेतनम् । इस स्थानमें "घकालतनेषु० ९७५" इस सूत्रसे सप्तमीका अलुक् हुआ । पूर्वाह्णः सोढोऽस्य, इस विग्रहमें तो पूर्वाह्णतनम् । अपराह्णतनम् । पौर्वाह्णिकम् । आपराह्णिकम् ॥

१३९३ तत्र जातः । ४ । ३ । २५ ॥

सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः । स्रुघ्ने जातः स्रौघ्नः । औत्सः । राष्ट्रियः । अवारपारीण इत्यादि ॥

१३९३–तत्र जातः, अर्थात् सप्तमीविभक्त्यन्त प्रातिपदिकके उत्तर जात अर्थ होनेपर अण् आदि और घ आदि प्रत्यय हों, जैसे–स्रुघ्ने जातः, इस वाक्यमें–स्रौघ्नः । औत्सः । राष्ट्रियः । अवारपारीणः–इत्यादि ॥

१३९४ प्रावृषष्ठप् । ४ । ३ । २६ ॥

एण्यस्यापवादः । प्रावृषि जातः प्रावृषिकः ॥

१३९४–जात अर्थमें प्रावृष् शब्दके उत्तर ठप् प्रत्यय हो, जैसे–प्रावृषि जातः, इस विग्रहमें प्रावृषिकः । यह ठप् प्रत्यय एण्य प्रत्ययका अपवाद है ॥

१३९५ संज्ञायां शरदो वुञ् ।४।३।२७॥

ऋत्वणोऽपवादः । शारदका दर्भविशेषा मुद्गविशेषाश्च ॥

१३९५–संज्ञा अर्थ होनेपर शरद् शब्दके उत्तर वुञ् प्रत्यय हो, यह वुञ् प्रत्यय ऋतुवाचक शब्दके उत्तर विहित अण् प्रत्ययका अपवादक है, जैसे–शारदकाः, अर्थात् दर्भविशेष और मुद्गविशेष ॥

१३९६ उत्तरपदस्य । ७ । ३ । १० ॥

अधिकारोऽयम् । हनस्त इत्यस्मात्प्राक् ॥

१३९६–" उत्तरपदस्य" यह अधिकार सूत्र है, "हनस्तः०"इस वक्ष्यमाण सूत्रके पूर्वपर्यन्त इस सूत्रका अधिकार चलैगा ॥

१३९७ अवयवादृतोः । ७ । ३ । ११ ॥

अवयववाचिनः पूर्वपदादृतुवाचिनोऽचामादेरचो वृद्धिः स्यात् ञिति णिति किति च तद्धिते परे । पूर्ववार्षिकः । अपरहैमनः । अवयवात्किम् । पूर्वासु वर्षासु भवः पौर्ववर्षिकः । ऋतोर्वृद्धिमद्विधाववयवानामिति तदन्तविधिः पूर्वत्र, इह तु नावयवत्वाभावात् ॥

१३९७–ञित्, णित्, कित् तद्धित प्रत्यय परे रहते अवयववाचक जो पूर्वपद उसके उत्तर ऋतुवाचक शब्दके अचोंके मध्यमें आद्यच्को वृद्धि हो, जैसे–पूर्ववार्षिकः । अपरहैमनः ।

अवयववाचक न होनेपर वृद्धि नहीं होगी, जैसे–पूर्वासु वर्षासु भवः=पौर्ववर्षिकः ।

"ऋतोर्वृद्धिमद्विधाववयवानाम्" (ऋतुवाचक शब्दके उत्तर वृद्धिनिमित्तक प्रत्ययविधिमें तदन्तविधि हो, यह ऋतुवाचक शब्द यदि अवयववाचकसे परे रहे तो) इस वार्तिकसे 'पूर्ववार्षिकः, अपरहैमनः' इत्यादिकी सिद्धिके लिये "१३८९–१३९०" इन सूत्रोंमें तदन्तविधि होतीहै और 'पौर्ववर्षिकः' यहां अवयववाचक पूर्वपद न होनेके कारण "१३८९" इस सूत्रमें तदन्तविधि न होनेसे ठञ् प्रत्यय नहीं हुआ, किन्तु औत्सर्गिक "कालाट्ठञ् ३।३।११" इससे ठञ् प्रत्यय हुआ और " अवयवादृतोः " इससे उत्तरपदकी वृद्धि नहीं हुई ॥

१३९८ सुसर्वार्द्धाज्जनपदस्य ।७।३।१२॥

उत्तरपदस्य वृद्धिः । सुपाञ्चालकः । सर्वपाञ्चालकः । अर्द्धपाञ्चालकः । जनपदतदवध्योरिति वुञ् ॥ सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्येति तदन्तविधिः ॥

१३९८–सुसर्व और अर्द्ध शब्दके उत्तर जनपदवाचक उत्तर पदके अचोंके मध्यमें आद्यच्को वृद्धि हो, जैसे–सुपाञ्चालकः।सर्वपाञ्चालकः। अर्द्धपाञ्चालकः"जनपदतदवध्योः० १३४८ " इस सूत्रमें "सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्य" इस वार्तिकसे तदन्तविधि होतीहै, इसलिये पूर्वोक्त प्रयोगमें वुञ् प्रत्यय हुआ ॥

१३९९ दिशोऽमद्राणाम् । ७ । ३।१३॥

दिग्वाचकाज्जनपदवाचिनो वृद्धिः । पूर्वपाञ्चालकः । दिशः किम् । पूर्वपञ्चालानामयं पौर्वपञ्चालः । अमद्राणां किम् । पौर्वमद्रः । योगविभाग उत्तरार्थः ॥

१३९९–दिग्वाचक शब्दके उत्तर मद्रभिन्न जनपदवाचक शब्दके आद्यच्को वृद्धि हो, जैसे–पूर्वपाञ्चालकः ।

दिग्वाचक शब्द पूर्वमें न होनेपर–पूर्वपञ्चालानामयम्=पौर्वपञ्चालः ।

मद्र शब्द होनेपर पौर्वमद्रः, ऐसा होगा ।

उत्तर सूत्रमें दिग्वाचक शब्दकी अनुवृत्तिके निमित्त भिन्न सूत्र कियाहै ॥

१४००प्राचां ग्रामनगराणाम्।७।३।१४॥

दिशः परेषां ग्रामवाचिनां नगरवाचिनां चांगानामवयवस्य च वृद्धिः । पूर्वेषुकामशम्यां भवः पूर्वैषुकामशमः । नगरे, पूर्वपाटलिपुत्रकः ॥

१४००–दिग्वाचक शब्दके परे स्थित पश्चिमदेशस्थ ग्रामवाचक और नगरवाचक शब्दोंके अवयवको वृद्धि हो, जैसे–पूर्वेषुकामशम्यां भवः=पूर्वैषुकामशमः । नगरे–पूर्वपाटलिपुत्रकः ॥

१४०१ पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन् । ४ । ३ । २८ ॥

पूर्वाह्णकः । अपराह्णकः । आर्द्रकः । मूलकः । प्रदोषकः । अवस्करकः ॥

१४०१–पूर्वाह्ण, अपराह्ण, आर्द्रा, मूल, प्रदोष और अवस्कर शब्दके उत्तर वुन् प्रत्यय हो, जैसे–पूर्वा-

ह्नकः । अपराह्णकः । आर्द्रकः । मूलकः । प्रदोषकः । अवस्करकः ॥

१४०२ पथः पन्थ च । ४ । ३ । २९ ॥

पथि जातः पन्थकः ॥

१४०२–पथिन् शब्दके स्थानमें पन्थ आदेश हो और वुन् प्रत्यय हो, जैसे–पथि जातः=पन्थकः ॥

१४०३ अमावास्याया वा ।४।३।३० ॥

अमावास्यकः । आमावास्यः ॥

१४०३–अमावास्या शब्दके उत्तर विकल्प करके वुन् प्रत्यय हो, जैसे–अमावास्यकः । आमावास्यः ॥

१४०४ अ च । ४ । ३ । ३१ ॥

अमावास्यः ॥

१४०४–अमावास्या शब्दके उत्तर अ प्रत्यय भी हो,जैसे-अमावास्यः ॥

१४०५ सिन्ध्वपकराभ्यां कन्।४।३।३२॥

सिन्धुकः । कच्छाद्यणि मनुष्यवुञि च प्राप्ते । अपकरकः । औत्सर्गिकेऽणि प्राप्ते ॥

१४०५–सिन्धु और अपकर शब्दके उत्तर कन् प्रत्यय हो, जैसे–'सिन्धुकः' यहां कच्छादित्वके कारण अण् प्रत्यय और ''मनुष्यतत्स्थयोर्वुञ्'' इस सूत्रसे मनुष्यार्थक वुञ् प्रत्यय प्राप्त होनेपर ''सिन्ध्वपकराभ्यां कन्'' इस सूत्रसे कन् प्रत्यय होताहै । 'अपकरकः' इस स्थलमें औत्सर्गिक अण् प्रत्ययकी प्राप्ति होनेपर कन् प्रत्यय होताहै ॥

१४०६ अणञौ च । ४ । ३ । ३३ ॥

क्रमात् स्तः । सैन्धवः । आपकरः ॥

१४०६–सिन्धु और अपकर शब्दके उत्तर यथाक्रम अण् और अञ् प्रत्यय हो, जैसे–सैन्धवः । आपकरः ॥

१४०७ श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् । ४ । ३ । ३४ ॥

एभ्यो नक्षत्रवाचिभ्यः परस्य जातार्थप्रत्ययस्य लुक् स्यात् ॥

१४०७–श्रविष्ठा, फल्गुनी, अनुराधा, स्वाति, तिष्य, पुनर्वसु, हस्त, विशाखा, आषाढा, बहुला, इन नक्षत्रवाचक शब्दोंके परे जातार्थक प्रत्ययका लुक् हो ॥

१४०८ लुक् तद्धितलुकि ।१।२।४९॥

तद्धितलुकि सत्युपसर्जनस्त्रीप्रत्ययस्य लुक् स्यात् । श्रविष्ठासु जातः श्रविष्ठः । फल्गुनः इत्यादि ॥ चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम् ॥ * ॥ चित्रायां जाता चित्रा । रेवती रोहिणी आभ्यां लुक् तद्धितलुकीति लुकि कृते पिप्पल्यादेराकृतिगणत्वात्पुनर्ङीप् ॥ फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ ॥ * ॥ स्त्रियामित्येव । फल्गुनी । अषाढा ॥ श्रविष्ठाषाढाभ्यां छण्वक्तव्यः ॥ * ॥ अस्त्रियामपि । श्राविष्ठीयः । आषाढीयः ॥

१४०८–तद्धित प्रत्ययका लुक् होनेपर उपसर्जनीभूत स्त्रीप्रत्ययका लुक् हो, जैसे–श्रविष्ठासु जातः=श्रविष्ठः । फल्गुनः इत्यादि ।

चित्रा, रेवती और रोहिणी शब्दके उत्तर स्त्रीलिङ्गमें विहित नानार्थक प्रत्ययका लुक् हो, जैसे–चित्रायां जाता=चित्रा । रेवती और रोहिणी शब्दके उत्तर ''लुक् तद्धितलुकि'' इससे उपसर्जन स्त्रीप्रत्ययका लुक् करनेपर पिप्पल्यादिके आकृतिगणत्वके कारण पुनर्वार ङीप् प्रत्यय हुआ ।

स्त्रीलिङ्गमें फल्गुनी और अषाढा शब्दके उत्तर ट और अन् प्रत्यय हो * जैसे–फल्गुनी । अषाढा[1] ।

श्रविष्ठा और अषाढा शब्दके उत्तर छण् प्रत्यय हो * यह छण् प्रत्यय स्त्रीलिंगभिन्न स्थलमें भी होगा, जैसे–श्राविष्ठीयः । आषाढीयः ।

१४०९ जे प्रोष्ठपदानाम्। ७ । ३ । १८॥

प्रोष्ठपदानामुत्तरपदस्याचामादेरचो वृद्धिः स्याज्जातार्थे ञिति णिति किति च । प्रोष्ठपदासु जातः प्रोष्ठपादो माणवकः । जे इति किम् । प्रोष्ठपदासु भवः प्रौष्ठपदः । बहुवचननिर्देशात्पर्यायोऽपि गृह्यते । भद्रपादः ॥

१४०९–जातार्थमें विहित ञित्, णित् और कित् तद्धित प्रत्यय परे रहते प्रोष्ठपद शब्दके परवर्ती पदके आद्यच्को वृद्धि हो, जैसे–प्रोष्ठपदासु जातः=प्रोष्ठपादो माणवकः । जातार्थ न होनेपर पूर्वपदस्थ आद्यच्को वृद्धि होगी,जैसे–प्रोष्ठपदासु भवः=प्रौष्ठपदः । बहुवचननिर्देशके कारण पर्यायका भी ग्रहण होगा, जैसे–भद्रपादः ॥

१४१० स्थानान्तगोशालखरशालाच्च । ४ । ३ । ३५ ॥

एभ्यो जातार्थप्रत्ययस्य लुक् स्यात् । गोस्थानः । गोशालः । खरशालः । विभाषा सेनेति नपुंसकत्वे ह्रस्वत्वम् ॥

१४१०–स्थानान्त शब्द, गोशाल शब्द और खरशाल शब्दके उत्तर जातार्थमें विहित प्रत्ययका लुक् हो, जैसे–गोस्थाने जातः, इस विग्रहमें–गोस्थानः । गोशालः । खरशालः । सूत्रस्थ गोशाल और खरशाल शब्दोंको '' विभाषा सेना० ८२८ '' इस सूत्रसे नपुंसकत्व होनेपर ह्रस्व हुआहै ॥

१४११ वत्सशालाभिजिदश्वयुक्छतभिषजो वा । ४ । ३ । ३६ ॥

एभ्यो जातार्थस्य लुग्वा स्यात् । वत्सशाले जातो वत्सशालः । वात्सशालः इत्यादि ॥

[1] फल्गुनीमें ङीप् और अषाढामें टाप् प्रत्यय हुआहै ॥

जातार्थे प्रतिप्रसूतोऽण्वा डिद्वक्तव्यः ॥*॥ शातभिषः। शातभिषजः। शतभिषक् ॥

१४११–वत्सशाल, अभिजित्, अश्वयुक् और शतभिषज् शब्दके उत्तर जातार्थमें विहित प्रत्ययका विकल्प करके लुक् हो, जैसे–वत्सशाले जातः=वत्सशालः, वात्सशालः–इत्यादि।

जातार्थमें प्रतिप्रसूत अण् प्रत्यय विकल्प करके डित् हो * जैसे–शातभिषः, शातभिषजः, शतभिषक् ॥

१४१२ नक्षत्रेभ्यो बहुलम् ।४।३।३७॥

जातार्थप्रत्ययस्य बहुलं लुक् स्यात्। रोहिणः। रौहिणः ॥

१४१२–नक्षत्रवाचक शब्दके उत्तर जातार्थक प्रत्ययका विकल्प करके लुक् हो, जैसे–रोहिणः, रौहिणः ॥

१४१३ कृतलब्धक्रीतकुशलाः।४।३।३८।

तत्रेत्येव। स्रुघ्ने कृतो लब्धः क्रीतः कुशलो वा स्रौघ्नः ॥

१४१३–सप्तम्यन्त प्रातिपदिकके उत्तर कृत, लब्ध, क्रीत और कुशल अर्थमें अण् आदि और घ आदि प्रत्यय हों।

कृतार्थको जातार्थका व्याप्य और क्रीतार्थको लब्धार्थका व्याप्य होनेपर दो पदोंके पृथक् ग्रहणका फल क्या है? इसपर कहतेहैं कि, कृतत्व और क्रीतत्वप्रकारक बोधमें भी प्रत्ययविधानके निमित्त उसका ग्रहण है, इसी कारण जातार्थमें प्रत्ययका लुक् होनेपर भी कृतार्थमें लुक् नहीं होताहै, जैसे–स्रुघ्ने कृतो लब्धः क्रीतः कुशलो वा=स्रौघ्नः ॥

१४१४ प्रायभवः। ४ । ३ । ३९ ॥

तत्रेत्येव।स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः॥

१४१४–सप्तम्यन्त प्रातिपदिकके उत्तर 'प्रायेण भवति' ऐसे अर्थमें अण्आदि और घ आदि प्रत्यय हों,जैसे–स्रुघ्ने प्रायेण (बाहुल्येन) भवति=स्रौघ्नः ॥

१४१५ उपजानूपकर्णोपनीवेष्ठक्। ४। ३। ४० ॥

औपजानुकः।औपकर्णिकः। औपनीविकः ॥

१४१५–उपजानु, उपकर्ण और उपनीवि शब्दके उत्तर ठक् प्रत्यय हो, जैसे–औपजानुकः। औपकर्णिकः। औपनीविकः ॥

१४१६ संभूते। ४। ३। ४१ ॥

स्रुघ्ने संभवति स्रौघ्नः ॥

१४१६–सम्भवार्थमें सप्तम्यन्त प्रातिपदिकके उत्तर अण् आदि और घ आदि प्रत्यय हों, जैसे–स्रुघ्ने संभवति, इस विग्रहमें–स्रौघ्नः ॥

१४१७ कोशाड्ढञ्। ४। ३। ४२ ॥

कौशेयं वस्त्रम् ॥

१४१७–कोश शब्दके उत्तर ढञ् प्रत्यय हो, जैसे–कौशेयं वस्त्रम् ॥

१४१८ कालात्साधुपुष्प्यत्पच्यमानेषु। ४। ३। ४३ ॥

हेमन्ते साधुर्हैमन्तः प्राकारः। वसन्ते पुष्प्यन्ति वासन्त्यः कुन्दलताः। शरदि पच्यन्ते शारदाः शालयः ॥

१४१८–कालवाचक शब्दके उत्तर साधु, पुष्प्यत् (प्रस्फुटन) और पच्यमान अर्थमें अण् आदि और घ आदि प्रत्यय हों, जैसे–हेमन्ते साधुः=हैमन्तः प्राकारः। वसन्ते पुष्प्यन्ति=वासन्त्यः कुन्दलताः। शरदि पच्यन्ते=शारदाः शालयः ॥

१४१९ उप्ते च। ४। ३। ४४ ॥

हेमन्ते उप्यन्ते हैमन्ता यवाः ॥

१४१९–कालवाचक शब्दके उत्तर उप्त अर्थात् वपन अर्थमें अण् आदि और घ आदि प्रत्यय हों, जैसे–हेमन्ते उप्यन्ते=हैमन्ता यवाः ॥

१४२० आश्वयुज्या वुञ् ।४।३।४५॥

ठञोपवादः। आश्वयुज्यामुप्ता आश्वयुजका माषाः ॥

१४२०–आश्वयुजी शब्दके उत्तर वुञ् प्रत्यय हो, यह सूत्र ठञ् प्रत्ययका विशेषक है, जैसे–आश्वयुज्यामुप्ताः=आश्वयुजका माषाः ॥

१४२१ ग्रीष्मवसन्तादन्यतरस्याम्। ४। ३। ४६ ॥

पक्षे ऋत्वण्। ग्रैष्मकम्। ग्रैष्मम्। वासन्तकम्। वासन्तम् ॥

१४२१–ग्रीष्म और वसन्त शब्दके उत्तर विकल्प करके वुञ् प्रत्यय हो, पक्षमें ऋतुवाचक शब्दके उत्तर अण् (१३८७) प्रत्यय होगा, जैसे–ग्रैष्मकम्, ग्रैष्मम्। वासन्तकम्, वासन्तम् ॥

१४२२ देयमृणे। ४। ३। ४७ ॥

कालादित्येव। मासे देयमृणं मासिकम् ॥

१४२२–देय ऋण अर्थमें कालवाचक शब्दके उत्तर वुञ् प्रत्यय हो, जैसे–मासे देयमृणम्, इस विग्रहमें–मासिकम् ॥

१४२३ कलाप्यश्वत्थयवबुसाद्वुन्। ४। ३। ४८ ॥

यस्मिन् काले मयूराः कलापिनो भवन्ति स उपचारात्कलापी तत्र देयमृणं कालापकम्। अश्वत्थस्य फलमश्वत्थस्तद्युक्तः कालोऽप्यश्वत्थः। यस्मिन् कालेऽश्वत्थाः फलन्ति तत्र देयमश्वत्थकम्। यस्मिन् यवबुसमुत्पद्यते तत्र देयं यवबुसकम् ॥

१४२३-कलापिन्, अश्वत्थ, और यवबुस, इन कालवाचक शब्दोंके उत्तर देय ऋण अर्थमें वुन् प्रत्यय हो। जिस समयमें मोर कलापयुक्त हों वह समय उपचारके कारण कलापी कहकर प्रसिद्ध होताहै उस समयमें 'देय ऋण' अर्थमें-कालापकम्। अश्वत्थके फल अश्वत्थ, तद्युक्त काल भी अश्वत्थ, जिस समयमें सम्पूर्ण अश्वत्थ फलित हो उस समयमें 'देय ऋण' इस अर्थमें-आश्वत्थकम्। जिस समयमें यवका भूसा उत्पन्न हो उस समयमें 'देय ऋण' इस अर्थमें-यवबुसकम् ॥

१४२४ ग्रीष्मावरसमाद्वुञ् ।४।३। ४९॥

ग्रीष्मे देयमृणं ग्रैष्मकम् । आवरसमकम् ॥

१४२४-ग्रीष्म और अवरसम शब्दके उत्तर वुञ् प्रत्यय हो, जैसे-ग्रीष्मे देयमृणम्=ग्रैष्मकम्। आवरसमकम्॥

१४२५ संवत्सराग्रहायणीभ्यां ठञ्च । ४ । ३ । ५० ॥

चाद्वुञ् । सांवत्सरिकम् । सांवत्सरकम् । आग्रहायणिकम् ।आग्रहायणकम् ॥

१४२५-संवत्सर और आग्रहायणी शब्दके उत्तर ठञ् और वुञ् प्रत्यय हों, जैसे-सांवत्सरिकम्,सांवत्सरकम्। आग्रहायणिकम्, आग्रहायणकम् ॥

१४२६ व्याहरति मृगः । ४ । ३ ।५१॥

कालवाचिनः सप्तम्यन्ताच्छब्दायत इत्यर्थे अणादयः स्युः यो व्याहरति स मृगश्चेत् । निशायां व्याहरति नैशो मृगः । नैशिकः ॥

१४२६-जो शब्द करै वह मृग हो तो कालवाचक सप्तम्यन्त प्रातिपदिकके उत्तर 'शब्दायते' इस अर्थमें अण् आदि प्रत्यय हों, जैसे-निशायां व्याहरति=नैशः मृगः। नैशिकः ॥

१४२७ तदस्य सोढम् । ४ ।३।५२ ॥

कालादित्येव । निशासहचरितमध्ययनं निशा तत्सोढमस्य नैशः । नैशिकः ॥

१४२७-प्रथमान्त शब्दके उत्तर 'तदस्य सोढम्' इस अर्थमें अण् आदि प्रत्यय हों,इस सूत्रसे भी कालवाचक शब्दके उत्तर ही प्रत्यय होगा, निशासहचरितमध्ययनं निशा, तत्सोढमस्य=नैशः। नैशिकः ॥

१४२८ तत्र भवः । ४ । ३ ।५३॥

स्रुघ्ने भवः स्रौघ्नः । राष्ट्रियः ॥

१४२८-'भवः' इस अर्थमें सप्तम्यन्त प्रातिपदिकके उत्तर अण् आदि प्रत्यय हों, जैसे-स्रुघ्ने भवः=स्रौघ्नः। राष्ट्रियः ॥

१४२९ दिगादिभ्यो यत् । ४।३।५४ ॥

दिश्यम् । वर्ग्यम् ॥

१४२९-दिक् आदि शब्दोंके उत्तर भवार्थमें यत् प्रत्यय हो, जैसे-दिशि भवम्=दिश्यम्। वर्ग्यम् ॥

१४३० शरीरावयवाच्च ।४। ३ । ५५ ॥

दन्त्यम् । कर्ण्यम् ॥

१४३०-शरीरावयववाचक शब्दोंके उत्तर यत् प्रत्यय हो, जैसे-दन्ते भवम्=दन्त्यम्। कर्ण्यम् ॥

१४३१ प्राचां नगरान्ते। ७ । ३ ।२४॥

प्राचां देशे नगरान्तेऽङ्गे पूर्वपदस्योत्तरपदस्य चाऽचामादेरचो वृद्धिर्ञिति णिति किति च । सुह्मनगरे भवः सौह्मनागरः । पौर्वनागरः । प्राचां किम्।मद्रनगरमुदक्षु तत्र भवो माद्रनगरः॥

१४३१-ञित्, णित् और कित् तद्धित प्रत्यय परे रहते प्राचीनदेशीय नगरान्त अंगमें पूर्व और उत्तरपदके अचोंके मध्यमें आद्यच्को वृद्धि, हो जैसे-सुह्मनगरे भवः=सौह्मनागरः। पौर्वनागरः।

प्राचीनदेशीय नगरान्त अंग न होनेपर, जैसे-मद्रनगरमुदक्षु तत्र भवः=माद्रनगरः ॥

१४३२ जंगलधेनुवलजान्तस्य विभाषितमुत्तरम् । ७ । ३ । २५ ॥

जंगलाद्यन्तस्यांगस्य पूर्वपदस्याचामादेरचो वृद्धिरुत्तरपदस्य वा ञिति णिति किति च । कुरुजंगले भवं कौरुजांगलम् । कौरुजंगलम् ॥ वैश्वधैनवम् । वैश्वधेनवम् । सौवर्णवालजम् । सौवर्णवलजम् ॥

१४३२-ञित्,णित् और कित् तद्धित प्रत्यय परे रहते जंगलाद्यन्त अंगके पूर्व पदके आद्यच्को नित्य और उत्तर पदके आद्यच्को विकल्प करके वृद्धि हो, जैसे-कुरुजंगले भवम्=कौरुजांगलम्,कौरुजंगलम्। वैश्वधैनवम्, वैश्वधेनवम्। सौवर्णवालजम्, सौवर्णवलजम् ॥

१४३३ दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् । ४ । ३ । ५६ ॥

दार्तेयम् । कौक्षेयम् । कलशिर्घटः तत्र भवं कालशेयम् ॥

१४३३-दृति, कुक्षि, कलशि, वस्ति, अस्ति और अहि शब्दके उत्तर ढञ् प्रत्यय हो, जैसे-दार्तेयम्। कौक्षेयम्। कलशिः, अर्थात् घट, उसमें उत्पन्न-कालशेयम् ॥

१४३४ ग्रीवाभ्योऽण् च । ४ । ३।५७॥

चात् ढञ् । ग्रैवम् । ग्रैवेयम् ॥

१४३४-ग्रीवादि शब्दोंके उत्तर अण् और ढञ् प्रत्यय हो, जैसे-ग्रैवम्, ग्रैवेयम् ॥

१४३५ गम्भीराञ्ञ्यः । ४ । ३।५८॥

गम्भीरे भवं गाम्भीर्यम् ॥

१४३५-गंभीर शब्दके उत्तर ञ्य प्रत्यय हो, जैसे-गंभीरे भवम्=गाम्भीर्यम् ।

(पञ्चजन शब्दके उत्तर ञ्य प्रत्यय हो * जैसे-पाञ्चजन्यः) ॥

१४३६ अव्ययीभावाच्च । ४ । ३।५९॥

परिमुखं भवं पारिमुख्यम् । परिमुखादिभ्य एवेष्यते ॥ * ॥ नेह । औपकूलः ॥

१४३६-अव्ययीभावसंज्ञक पदके उत्तर ञ्य प्रत्यय हो, जैसे-परिमुखं भवम्=पारिमुख्यम् ।

परिमुखादि ही शब्दोंके उत्तर ञ्य प्रत्यय हो * इस कारण 'औपकूलः' इस स्थलमें ञ्य प्रत्यय नहीं हुआ ॥

१४३७ अन्तःपूर्वपदाट्ठञ् । ४ ।३।६०॥

अव्ययीभावादित्येव । वेश्मनि इति अन्तर्वेश्मम् । तत्र भवमान्तर्वेश्मिकम् । आन्तर्गणिकम् ॥ अध्यात्मादेष्ठञिष्यते ॥ * ॥ अध्यात्मं भवमाध्यात्मिकम् ॥

१४३७-अन्तर् शब्द पूर्वमें है जिसके, ऐसे अव्ययीभावसंज्ञक शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-वेश्मनि इस विग्रहमें अन्तर्वेश्मम्=तत्र भवम्=आन्तर्वेश्मिकम् । आन्तर्गणिकम् ।

आध्यात्मादि शब्दोंके उत्तर ठञ् प्रत्यय हो * जैसे-अध्यात्मं भवम्=आध्यात्मिकम् ॥

१४३८ अनुशतिकादीनां च।७।३।२०॥

एषामुभयपदवृद्धिः स्यात् ञिति णिति किति च । आधिदैविकम् । आधिभौतिकम् । ऐहलौकिकम्।पारलौकिकम्। अध्यात्मादिराकृतिगणः॥

१४३८-ञित्, णित् और कित् तद्धित प्रत्यय परे रहते अनुशतिकादि शब्दोंके दोनों पदोंके आद्यच्को वृद्धि हो, जैसे-आधिदैविकम् । आधिभौतिकम् । ऐहलौकिकम् । पारलौकिकम् । अध्यात्मादि आकृतिगण है ॥

१४३९ देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् । ७ । ३ । १ ॥

एषां पञ्चानां वृद्धिप्राप्तावादेरच आत् ञिति णिति किति च । दाविकम् । देविकाकूले भवा दाविकाकूलाः शालयः । शिंशपाया विकारः शांशपश्चमसः । पलाशादिभ्यो वेत्यञ् । दित्यौह इदं दात्यौहम् । दीर्घसत्रे भवं दार्घसत्रम् । श्रेयसि भवं श्रायसम ॥

१४३९-ञित्, णित्, और कित् तद्धित प्रत्यय परे रहते देविका, शिंशपा, दित्यवाट्, दीर्घसत्र और श्रेयस्, इन पांच शब्दोंके वृद्धिकी प्राप्ति होनेपर आद्यच्के स्थानमें आत् आदेश हो, जैसे-दाविकम् । देविकाकूले भवाः=दाविकाकूलाः शालयः । शिंशपाया विकारः=शांशपश्चमसः, यहां "पलाशादिभ्यो वा ४ । ३ । १४१" इससे अञ् प्रत्यय होताहै । दित्यौह इदम्, इस विग्रहमें-दात्यौहम् । दीर्घसत्रे भवम्=दार्घसत्रम् । श्रेयसि भवम्=श्रायसम् ॥

१४४० ग्रामात्पर्यनुपूर्वात् ।४।३।६१॥

ठञ् स्यात् । अव्ययीभावादित्येव । पारिग्रामिकः । आनुग्रामिकः ॥

१४४०-परि और अनुपूर्वक ग्राम शब्दके उत्तर ठञ् प्रत्यय हो, यह विधि अव्ययीभावसंज्ञक शब्दके उत्तर ही होगी, जैसे-पारिग्रामिकः । आनुग्रामिकः ॥

१४४१ जिह्वामूलाऽङ्गुलेश्छः।४।३।६२॥

जिह्वामूलीयम् । अंगुलीयम् ॥

१४४१-जिह्वामूल और अङ्गुलि शब्दके उत्तर छ प्रत्यय हो, जैसे-जिह्वामूले भवम्-जिह्वामूलीयम् । अङ्गुलीयम् । यह सूत्र "शरीरावयवाच १४३०" इसका बाधक है ।

१४४२ वर्गान्ताच्च ।४। ३ । ६३ ॥

कवर्गीयम् ॥

१४४२-वर्गान्त शब्दके उत्तर छ प्रत्यय हो, जैसे-कवर्गे भवम्=कवर्गीयम् ॥

१४४३अशब्दे यत्खावन्यतरस्याम्। ४ । ३ । ६४ ॥

पक्षे पूर्वेण छः । मद्वर्ग्यः । मद्वर्गीणः । मद्वर्गीयः । अशब्दे किम् । कवर्गीयो वर्णः ॥

१४४३-अशब्द अर्थ होनेपर वर्गान्त शब्दके उत्तर विकल्प करके यत् और ख प्रत्यय हो, विकल्प पक्षमें पूर्व सूत्रसे छ प्रत्यय होगा, जैसे-मद्वर्ग्यः, मद्वर्गीणः, मद्वर्गीयः ।

शब्द अर्थ होनेपर अर्थात् वर्णमात्र होनेपर केवल छ प्रत्यय ही होगा, जैसे-कवर्गीयो वर्णः ॥

१४४४ कर्णललाटात्कनलंकारे । ४ । ३ । ६५ ॥

कर्णिका । ललाटिका ॥

१४४४-कर्ण और ललाट शब्दके उत्तर अलङ्कारार्थमें कन् प्रत्यय हो, जैसे-कर्णिका । ललाटिका ॥

१४४५ तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः । ४। ३ । ६६ ॥

सुपां व्याख्यानः सौपो ग्रन्थः । तैङः । कार्तः । सुप्सु भवं सौपम ॥

१४४५-व्याख्यातव्य ग्रन्थके प्रतिपादक षष्ठ्यन्त पदके उत्तर व्याख्यान अर्थमें और तादृश सप्तम्यन्त पदके उत्तर भवार्थमें अण् आदि प्रत्यय हों, जैसे-सुपां व्याख्यानः=सौपो ग्रन्थः । तिङां व्याख्यानो ग्रंथः=तैङः । कार्तः । सुप्सु भवम्=सौपम् ॥

१४४६ बह्वचोऽन्तोदात्ताट्ठञ्।४।३।६७॥

षत्वणत्वयोर्विधायकं शास्त्रं षत्वणत्वम् । तस्य व्याख्यानस्तत्र भवो वा षात्वणत्विकः ॥

१४४६-पूर्वोक्त अर्थमें बहुत अचोंसे युक्त अन्तोदात्त शब्दके उत्तर ठञ् प्रत्यय हो । षत्व और णत्वविधायक जो शास्त्र है उसको 'षत्वणत्वम्' कहतेहैं, तस्य व्याख्यानः, तत्र भवो वा, इस विग्रहमें-षात्वणत्विकः ॥

१४४७ क्रतुयज्ञेभ्यश्च । ४ । ३ । ६८ ॥

सोमसाध्येषु यागेष्वेतौ प्रसिद्धौ, तत्रान्यतरोपादानेन सिद्धे उभयोरुपादानसामर्थ्यादसोमका अपीह गृह्यन्ते । अग्निष्टोमस्य व्याख्यानस्तत्र भवो वा आग्निष्टोमिकः । वाजपेयिकः । पाकयज्ञिकः । नावयज्ञिकः । बहुवचनं स्वरूपविधिनिरासार्थम् । अनन्तोदात्तार्थ आरम्भः ॥

१४४७-पूर्वोक्त अर्थमें क्रतु और यज्ञवाचक शब्दके उत्तर ठञ् प्रत्यय हो, सोमसाध्य यागमें यह दोनों प्रसिद्ध हैं, उसमें अन्यतरके उपादानसे सिद्ध होनेपर दोनोंके उपादानके सामर्थ्यसे इस स्थानमें असोमकका भी ग्रहण है, जैसे-अग्निष्टोमस्य व्याख्यानः, तत्र भवो वा, इस विग्रहमें-आग्निष्टोमिकः । वाजपेयिकः । पाकयज्ञिकः । नावयज्ञिकः । स्वरूपविधिके निरासके निमित्त बहुवचनान्त प्रयोग है । अनन्तोदात्तार्थ इस सूत्रका आरंभ है ॥

१४४८ अध्यायेष्वेवर्षेः । ४ । ३ । ६९ ॥

ऋषिशब्देभ्यो लक्षणया व्याख्येयग्रन्थवृत्तिभ्यो भवे व्याख्याने चाध्याये ठञ् स्यात् । वशिष्ठेन दृष्टो मन्त्रो वशिष्ठस्तस्य व्याख्यानस्तत्र भवो वा वाशिष्ठिकोऽध्यायः । अध्यायेषु किम् । वाशिष्ठी ऋक् ॥

१४४८-लक्षणाद्वारा व्याख्येयग्रंथवृत्ति ऋषिवाचक शब्दके उत्तर भवार्थमें और व्याख्यानार्थमें अध्यायवाच्य रहते ठञ् प्रत्यय हो, जैसे-वशिष्ठेन दृष्टो मंत्रो वाशिष्ठस्तस्य व्याख्यानस्तत्र भवो वा, इस विग्रहमें वाशिष्ठिकः अध्यायः ।

अध्यायार्थ न होनेपर 'वाशिष्ठी ऋक्' ऐसा होगा ॥

१४४९ पौरोडाशपुरोडाशात्ष्ठन् । ४ । ३ । ७० ॥

पुरोडाशसहचरितो मन्त्रः पुरोडाशः स एव पौरोडाशः ततः ष्ठन् पौरोडाशिकः । पुरोडाशिकः ॥

१४४९-पुरोडाशसहचरित मंत्रविशेषको पुरोडाश कहतेहैं, उसका ही नाम पौरोडाश है, उस पौरोडाश शब्दके उत्तर ष्ठन् प्रत्यय हो, जैसे-पौरोडाशिकः । पुरोडाशिकः ॥

१४५० छन्दसो यदणौ । ४ । ३ । ७१ ॥

छन्दस्यः । छान्दसः ॥

१४५०-छन्दस् शब्दके उत्तर यत् और अण् प्रत्यय हो, जैसे-छन्दस्यः । छान्दसः ॥

१४५१ द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक् । ४ । ३ । ७२ ॥

द्व्यचः । ऐष्टिकः । पाशुकः । ऋत् । चातुर्होतृकः । ब्राह्मणिकः । आर्चिकः । इत्यादि ॥

१४५१-दो अचोंसे युक्त शब्द, ऋकारान्त शब्द और ब्राह्मण, ऋच्, प्रथम, अध्वर, पुरश्चरण, नामन्, आख्यात, इन शब्दोंके उत्तर ठक् प्रत्यय हो । दोअच् जैसे-ऐष्टिकः । पाशुकः । ऋकारान्त जैसे-चातुर्होतृकः । ब्राह्मणिकः । आर्चिकः-इत्यादि ॥

१४५२ अणृगयनादिभ्यः । ४ । ३ । ७३ ॥

ठञादेरपवादः । आर्गयनः । औपनिषदः । वैयाकरणः ॥

१४५२-ऋगयनआदि शब्दोंके उत्तर अण् प्रत्यय हो, यह अण् प्रत्यय ठञादि प्रत्ययोंका विशेषक है, जैसे-आर्गयनः । औपनिषदः । वैयाकरणः-इत्यादि ॥

१४५३ तत आगतः । ४ । ३ । ७४ ॥

स्रुघ्नादागतः स्रौघ्नः ॥

१४५३-तत आगतः, अर्थात् उससे आया, इस अर्थमें अणादि प्रत्यय हो, जैसे-स्रुघ्नादागतः=स्रौघ्नः ॥

१४५४ ठगायस्थानेभ्यः । ४ । ३ । ७५ ॥

शुल्कशालाया आगतः । शौल्कशालिकः ॥

१४५४-आयस्थानवाचक शब्दसे आगत अर्थमें ठक् प्रत्यय हो, जैसे-शुल्कशालाया आगतः, इस वाक्यमें-शौल्कशालिकः ॥

१४५५ शुण्डिकादिभ्योऽण् । ४ । ३ । ७६ ॥

आयस्थानठक्छादीनां चापवादः । शुण्डिकादागतः शौण्डिकः । कार्कणः । तैर्थः ॥

१४५५-शुण्डिकादि शब्दोंके उत्तर अण् प्रत्यय हो, यह अण् प्रत्यय आयस्थानवाचकसे विहित ठक् और छआदि प्रत्ययोंका विशेषक है, जैसे शुण्डिकादागतः=शौण्डिकः । कार्कणः । तैर्थः ॥

१४५६ विद्यायोनिसम्बन्धेभ्यो वुञ् । ४ । ३ । ७७ ॥

औपाध्यायकः । पैतामहकः ॥

१४५६-विद्या और योनिसंबन्धवाचक शब्दके उत्तर वुञ् प्रत्यय हो, जैसे-उपाध्यायादागतः=औपाध्यायकः । पैतामहकः । (१२४७) ॥

१४५७ ऋतष्ठञ् । ४ । ३ । ७८ ॥

वुञोऽपवादः । हौतृकम् । भ्रातृकम् ॥

१४५७-ऋकारान्त शब्दोंके उत्तर ठञ् प्रत्यय हो, यह ठञ् प्रत्यय वुञ् प्रत्ययका विशेषक है, जैसे-होतुरागतम्=हौतृकम् । भ्रातृकम् ॥

१४५८ पितुर्यच्च । ४ । ३ । ७९ ॥

चाट्ठञ् । रीङ् ऋतः । यस्येति लोपः । पित्र्यम् । पैतृकम् ॥

१४५८-पितृ शब्दके उत्तर यत् प्रत्यय हो, चकारसे ठञ् प्रत्यय हो, "रीङ् ऋतः १२३४", "यस्येति० ३११" इन दो सूत्रोंमें एकसे रीङ् आदेश होगा, दूसरेसे ईकारका लोप होगा, जैसे-पितुरागतम्=पित्र्यम्, पैतृकम् ॥

१४५९ गोत्रादङ्कवत् । ४ । ३ । ८० ॥

बिदेभ्यः आगतं बैदम् । गार्गम् । दाक्षम् । औपगवकम् ॥

१४५९-आगत अर्थमें गोत्रप्रत्ययान्त शब्दोंके उत्तर अंकवत् प्रत्यय हो, अर्थात् अंक अर्थमें जो प्रत्यय गोत्रप्रत्ययान्तसे होताहै वह हो, जैसे-बिदेभ्य आगतम्=बैदम्। गार्गम्। दाक्षम् । औपगवकम् ॥

१४६० नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् । ७ । ३ । ३० ॥

नञः परेषां शुच्यादिपञ्चानामादेरचो वृद्धिः पूर्वपदस्य तु वा ञिदादौ परे । आशौचम् । अशौचम् । आनैश्वर्यम् । अनैश्वर्यम् । आक्षेत्रज्ञम् । अक्षेत्रज्ञम् । आकौशलम् । अकौशलम् । आनैपुणम् । अनैपुणम् ॥

१४६०-ञित्आदि प्रत्यय परे रहते नञ्के परे स्थित शुचि, ईश्वर, क्षेत्रज्ञ, कुशल और निपुण शब्दके आद्यच्को नित्य और पूर्वपदके आद्यच्को विकल्प करके वृद्धि हो, जैसे-आशौचम्, अशौचम् । आनैश्वर्यम्, अनैश्वर्यम् । आक्षेत्रज्ञम्, अक्षेत्रज्ञम् । आकौशलम्, अकौशलम् । आनैपुणम्, अनैपुणम् ॥

१४६१ हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः । ४ । ३ । ८१ ॥

समादागतं समरूप्यम् । विषमरूप्यम् । पक्षे गहादित्वाच्छः । समीयम् । विषमीयम् । देवदत्तरूप्यम् । दैवदत्तम् ॥

१४६१-हेतु और मनुष्यवाचक शब्दसे आगत अर्थमें बिकल्प करके रूप्य प्रत्यय हो, जैसे-समादागतम्=समरूप्यम् । विषमरूप्यम् । पक्षमें गहादिगणके मध्यमें पठित होनेके कारण छ प्रत्यय होगा, जैसे-समीयम् । विषमीयम् । देवदत्तरूप्यम् । दैवदत्तम् ॥

१४६२ मयट् च । ४ । ३ । ८२ ॥

सममयम् । विषममयम् । देवदत्तमयम् ॥

१४६२-उक्त अर्थमें हेतु और मनुष्यावाचक शब्दसे मयट् प्रत्यय हो, जैसे-सममयम् । विषममयम् । देवदत्तमयम् ॥

१४६३ प्रभवति । ४ । ३ । ८३ ॥

तत इत्येव। हिमवतः प्रभवति हैमवती गंगा ॥

१४६३-उससे उत्पन्न होताहै, इस अर्थमें ठञ् प्रत्यय हो, जैसे-हिमवतः प्रभवति=हैमवती गङ्गा ॥

१४६४ विदूराञ्ञ्यः । ४ । ३ । ८४ ॥

विदूरात्प्रभवति वैदूर्यो मणिः ॥

१४६४-'प्रभवति' इस अर्थमें पञ्चम्यन्त विदूर शब्दसे ञ्य प्रत्यय हो, जैसे-विदूरात्प्रभवति=वैदूर्यो मणिः ॥

१४६५ तद्गच्छति पथिदूतयोः ४ । ३ । ८५ ॥

स्रुघ्नं गच्छति स्रौघ्नः पन्था दूतो वा ॥

१४६५-'गच्छति' इस अर्थमें द्वितीयान्त समर्थ प्रातिपदिकोंसे मार्ग और दूत वाच्य रहते अण्आदि प्रत्यय हों, जैसे-स्रुघ्नं गच्छति, इस विग्रहमें स्रौघ्नः, अर्थात् पन्था (मार्ग) अथवा दूत ॥

१४६६ अभिनिष्क्रामति द्वारम् । ४ । ३ । ८६ ॥

तदित्येव । स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारम् ॥

१४६६-'अभिनिष्क्रामति' इस अर्थमें द्वितीयान्त प्रातिपदिकके उत्तर अण्आदि प्रत्यय हों, अभिनिष्क्रमणकर्त्ता द्वार हो तो, जैसे-स्रुघ्नम् अभिनिष्क्रामति, इस विग्रहमें-स्रौघ्नम् कान्यकुब्जद्वारम् ॥

१४६७ अधिकृत्य कृते ग्रन्थे । ४ । ३ । ८७ ॥

तदित्येव । शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः । शारीरकं भाष्यमिति त्वभेदोपचारात् ॥

१४६७-तदधिकृत्य कृते ग्रन्थे, अर्थात् उसका अधिकार करके कृत ग्रन्थ, ऐसा अर्थ होनेपर द्वितीयान्त प्रातिपदिकके उत्तर अणादि प्रत्यय हों, जैसे-शारीरकमधिकृत्य कृतो ग्रन्थः, इस विग्रहमें शारीरकीयः । 'शारीरकं भाष्यम्' यह प्रयोग तो अभेदोपचारके वशसे होताहै ॥

१४६८ शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः । ४ । ३ । ८८ ॥

शिशूनां क्रन्दनं शिशुक्रन्दः तमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः । यमस्य सभा यमसभम्। क्लीबत्वं निपातनात् । यमसभीयः । किरातार्जुनीयम् । इन्द्रजननादिराकृतिगणः । इन्द्रजननीयम् । विरुद्धभोजनीयम् ॥

१४६८-शिशुक्रन्द, यमसभ, द्वन्द्वसमासनिष्पन्न शब्द और इन्द्रजननादि शब्दोंके उत्तर 'उसका अधिकार करके कृत ग्रन्थ' इस अर्थमें छ प्रत्यय हो, जैसे-शिशूनां क्रन्दनम्=शिशुक्रन्दः=तमधिकृत्य कृतो ग्रन्थः=शिशुक्रन्दीयः । यमस्य सभा=यमसभम्, इस स्थलमें क्लीबलिङ्गत्व निपातनसिद्ध है, यमसभीयः। किरातार्जुनीयम्। इन्द्रजननादि आकृतिगण है । इन्द्रजननीयम्। विरुद्धभोजनीयम् ॥

१४६९ सोऽस्य निवासः । ४ । ३ । ८९ ॥

स्रुघ्नो निवासोऽस्य स्रौघ्नः ॥

१४६९-सोऽस्य निवासः, अर्थात् वह इसका निवास है, इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर अणादि प्रत्यय हों, जैसे-स्रुघ्नो निवासोऽस्य=स्रौघ्नः ॥

१४७० अभिजनश्च । ४ । ३ । ९० ॥

स्रुघ्नोऽभिजनोस्य स्रौघ्नः । यत्र स्वयं वसति स निवासः। यत्र पूर्वैरुषितं सोऽभिजन इति विवेकः ॥

१४७०-सोऽस्याभिजनः, अर्थात् वह इसका अभिजन है, इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर अणादि प्रत्यय हों, जैसे-स्रुघ्नोऽभिजनोस्य, इस विग्रहमें स्रौघ्नः । जिस स्थलमें स्वयं वास करताहै, उसका नाम निवास और जिस स्थलमें पूर्व पुरुषोंने वास कियाहै, उस स्थलको अभिजन कहतेहैं, यह पार्थक्य है ॥

१४७१ आयुधजीविभ्यश्छः पर्वते । ४ । ३ । ९१ ॥

पर्वतवाचिनः प्रथमान्तादभिजनशब्दादस्येत्यर्थे छः स्यात् । हृद्गोलः पर्वतोऽभिजनो येषामायुधजीविनां ते हृद्गोलीयाः । आयुधेति किम् । ऋक्षोदः पर्वतोऽभिजनो येषां ते आर्क्षोदा द्विजाः॥

१४७१-पर्वतवाचक प्रथमान्त अभिजन शब्दके उत्तर अस्य, अर्थात् इसका, इस अर्थमें छ प्रत्यय हो, जैसे-हृद्गोलः पर्वतोऽभिजनो येषामायुधजीविनान्ते=हृद्गोलीयाः ।

आयुधजीवी क्यों कहा ? तो आयुधजीवीसे भिन्नार्थमें छ प्रत्यय नहीं हो, जैसे-ऋक्षोदः पर्वतोऽभिजनो येषां ते= आर्क्षोदाः द्विजाः ॥

१४७२शण्डिकादिभ्यो ञ्यः।४।३।९२॥

शण्डिकोऽभिजनोस्य शाण्डिक्यः ॥

१४७२-'सोऽस्याभिजनः' इस अर्थमें शण्डिकादि शब्दोंके उत्तर ञ्य प्रत्यय हो, जैसे-शण्डिकोऽभिजनोऽस्य, इस विग्रहमें शाण्डिक्यः ॥

१४७३ सिन्धुतक्षशिलादिभ्योऽणञौ । ४ । ३ । ९३ ॥

सिन्ध्वादिभ्योऽण् तक्षशिलादिभ्योऽञ् स्यादुक्तेर्थे । सैन्धवः । तक्षशिला नगरी अभिजनोऽस्य ताक्षशिलः ॥

१४७३-प्रागुक्त अर्थमें सिन्धु आदि शब्दोंके उत्तर अण् प्रत्यय और तक्षशिलादि शब्दोंके उत्तर अञ् प्रत्यय हो, जैसे-सैन्धवः । तक्षशिला नगरी अभिजनोऽस्य=ताक्षशिलः ॥

१४७४ तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः । ४ । ३ । ९४ ॥

तूदी अभिजनोऽस्य तौदेयः । शालातुरीयः । वार्मतेयः । कौचवार्यः ॥

१४७४-तूदी, शलातुर, वर्मती और कूचवार शब्दोंके उत्तर यथाक्रम ढक्, छण्, ढञ् और यक् प्रत्यय हों, जैसे-तूदी अभिजनोऽस्य=तौदेयः । शालातुरीयः । वार्मतेयः । कौचवार्यः ॥

१४७५ भक्तिः । ४ । ३ । ९५ ॥

सोऽस्येत्यनुवर्तते। भज्यते सेव्यते इति भक्तिः। स्रुघ्नो भक्तिरस्य स्रौघ्नः ॥

१४७५-'भक्तिः अस्य' अर्थात् इसकी भक्ति, इस अर्थमें प्रथमान्त समर्थ प्रातिपदिकसे अणादि प्रत्यय हों, जैसे-भज्यते सेव्यते इति भक्तिः,-स्रुघ्नो भक्तिरस्य=स्रौघ्नः ॥

१४७६ अचित्ताददेशकालाट्ठक् । ४ । ३ । ९६ ॥

अपूपा भक्तिरस्य आपूपिकः । पायसिकः । अचित्तात्किम् । दैवदत्तः । अदेशात्किम् । स्रौघ्नः। अकालात्किम् । ग्रैष्मः ॥

१४७६- चेतन न हो और देश कालवाचक न हो, ऐसा जो शब्द उसके उत्तर ठक् प्रत्यय हो, जैसे-अपूपा भक्तिरस्य आपूपिकः । पायसिकः ।

चेतन होनेपर ठक् प्रत्यय न होगा,जैसे-दैवदत्तः ।

देश होनेपर जैसे-स्रौघ्नः ।

होनेपर जैसे-ग्रैष्मः ॥

१४७७ महाराजाट्ठञ् । ४ । ३ । ९७ ॥

माहाराजिकः ॥

१४७७-महाराज शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-माहाराजिकः ॥

१४७८वासुदेवार्जुनाभ्यां वुन्।४।३।९८॥

वासुदेवकः । अर्जुनकः ॥

१४७८-वासुदेव और अर्जुन शब्दके उत्तर वुन् प्रत्यय हो, यह छ अणका अपवाद है, जैसे-वासुदेवकः । अर्जुनकः

१४७९ गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् । ४ । ३ । ९९ ॥

अणोपवादः । परत्वाद्वृद्धाच्छं बाधते । ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः । नाकुलकः। बहुलग्रहणान्नेह । पाणिनो भक्तिरस्य पाणिनीयः॥

१४७९-गोत्रप्रत्ययान्त और क्षत्रियवाचक शब्दोंके उत्तर बहुल करके वुञ् प्रत्यय हो, यह वुञ् प्रत्यय अण् प्रत्ययका अपवादक है, परत्वके कारण "वृद्धाच्छः" इस सूत्रसे विहित छ प्रत्ययको भी बाधताहै, जैसे-ग्लुचुकायनिर्भक्तिरस्य= ग्लौचुकायनकः । नाकुलकः ।

बहुल शब्दका ग्रहण करनेसे सर्वत्र वुञ् प्रत्यय नहीं होगा, अत एव पाणिनो भक्तिरस्य=पाणिनीयः, इस स्थलमें वुञ् प्रत्यय नहीं हुआ ॥

१४८० जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने।४।३।१००।

जनपदस्वामिवाचिनां बहुवचने जनपदवाचिनां समानश्रुतीनां जनपदवत्सर्वं स्यात्प्रत्ययः प्रकृतिश्च। जनपदतदवध्योश्चेति प्रकरणे ये प्रत्यया उक्तास्तेऽत्रातिदिश्यन्ते। अङ्गा जनपदो भक्तिरस्याङ्गकः। अङ्गाः क्षत्रिया भक्तिरस्याङ्गकः। जनपदिनां किम्। पञ्चाला ब्राह्मणा भक्तिरस्य पाञ्चालाः। जनपदेनेति किम्। पौरवो राजा भक्तिरस्य पौरवीयः॥

१४८०–बहुवचनमें जनपदवाचक शब्दके समान जो जनपदस्वामिवाचक शब्द उसको जनपदवाचक शब्दके समान प्रकृति और प्रत्यय हो। "जनपदतदवध्योश्च१३४८" इस सूत्रप्रकरणमें जो जो प्रत्यय उक्त हुए हैं, उन सबका इस स्थलमें अतिदेश होताहै, अर्थात् जनपद स्वामिवाचक बहुवचनान्त अङ्ग शब्दके उत्तर इस सूत्रसे अण् प्रत्ययकी प्राप्तिमें वुञ् प्रत्ययका अतिदेश होताहै, जैसे–अङ्गा जनपदो भक्तिरस्य=आङ्गकः। अङ्गाः क्षत्रिया भक्तिरस्य=आङ्गकः।

जनपदस्वामी न होनेपर, जैसे–पञ्चाला ब्राह्मणा भक्तिरस्य=पाञ्चालः। जनपदके समान शब्द न होनेपर, जैसे–पौरवो राजा भक्तिरस्य=पौरवीयः॥

१४८१ तेन प्रोक्तम्।४।३।१०१॥

पाणिनिना प्रोक्तं पाणिनीयम्॥

१४८१–'प्रोक्तम्' इस अर्थमें तृतीयान्त प्रातिपदिकके उत्तर अणादि प्रत्यय हों, जैसे–पाणिनिना प्रोक्तम्=पाणिनीयम्॥

१४८२ तित्तिरिवरतन्तुखण्डिकोखाच्छण्।४।३।१०२॥

छन्दोब्राह्मणानीति तद्विषयता। तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः॥

१४८२–"छन्दोब्राह्मणानि १३७८" इस सूत्रसे प्रोक्तप्रत्ययान्त छन्दोवाचक, ब्राह्मणवाचक शब्दको अध्येतृ, वेदितृ प्रत्ययविषयत्व है, तित्तिरि, वरतन्तु, खण्डिक और उख शब्दके उत्तर प्रोक्तार्थमें छण् प्रत्यय हो, जैसे–तित्तिरिणा प्रोक्तमधीयते, इस विग्रहमें–तैत्तिरीयाः॥

१४८३ काश्यपकौशिकाभ्यामृषिभ्यां णिनिः।४।३।१०३॥

काश्यपेन प्रोक्तमधीयते काश्यपिनः॥

१४८३–काश्यप, कौशिक इन दो ऋषिवाचक शब्दोंके उत्तर प्रोक्त अर्थमें णिनि प्रत्यय हो, जैसे–काश्यपेन प्रोक्तमधीयते=काश्यपिनः॥

१४८४ कलापिवैशम्पायनान्तेवासिभ्यश्च।४।३।१०४॥

कलाप्यन्तेवासिभ्यः–हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः। वैशम्पायनान्तेवासिभ्यः–आलम्बिनः॥

१४८४–कलापी और वैशम्पायन ऋषिके अन्तेवासी, अर्थात् छात्रवाचक शब्दके उत्तर प्रोक्त अर्थमें णिनि प्रत्यय हो, कलाप्यन्तेवासीके उत्तर, जैसे=हरिद्रुणा प्रोक्तमधीयते=हारिद्रविणः। वैशम्पायनान्तेवासीके उत्तर, जैसे–आलम्बेन प्रोक्तमधीयते=आलम्बिनः॥

१४८५ पुराणप्रोक्तेषु ब्राह्मणकल्पेषु।४।३।१०५॥

तृतीयान्तात्प्रोक्तार्थे णिनिः स्यात्। यत्प्रोक्तं पुराणप्रोक्ताश्चेद्ब्राह्मणकल्पास्ते भवन्ति। पुराणेन चिरन्तनेन मुनिना प्रोक्ताः। भल्लु, भाल्लविनः। शाट्यायन, शाट्यायनिनः। कल्पे–पिंगेन प्रोक्तः पैंगी कल्पः। पुराणेति किम्। याज्ञवल्कानि ब्राह्मणानि। आश्मरथः कल्पः। अणि आपत्यस्येति यलोपः॥

१४८५–जो प्रोक्त हो वह यदि पुराणप्रोक्त ब्राह्मण और कल्प हो, तो तृतीयान्त पदके उत्तर प्रोक्तार्थमें णिनि प्रत्यय हो, ब्राह्मणमें यथा–पुराणेन चिरन्तनेन मुनिना प्रोक्ताः, भल्लु–भाल्लविनः। शाट्यायन–शाट्यायनिनः। कल्पमें–पिङ्गेन प्रोक्तः=पैङ्गी कल्पः।

पुराण क्यों कहा? तो याज्ञवल्कानि ब्राह्मणानि। आश्मरथः कल्पः, यहां नहीं हो, यहां अण् प्रत्यय परे रहते "आपत्यस्य० १०८२" इस सूत्रसे यकारका लोप हुआहै॥

१४८६ शौनकादिभ्यश्छन्दसि।४।३।१०६॥

छन्दस्यभिधेये एभ्यो णिनिः। शौनकेन प्रोक्तमधीयते शौनकिनः॥

१४८६–वेद अभिधेय (वाच्य) होनेपर शौनकादि शब्दोंके उत्तर प्रोक्त अर्थमें णिनि प्रत्यय हो, जैसे–शौनकेन प्रोक्तमधीयते, इस विग्रहमें–शौनकिनः॥

१४८७ कठचरकाल्लुक्।४।३।१०७॥

आभ्यां प्रोक्तप्रत्ययस्य लुक् स्यात्। कठेन प्रोक्तमधीयते कठाः। चरकाः॥

१४८७–कठ और चरक शब्दके उत्तर प्रोक्त अर्थमें विहित प्रत्ययका लुक् हो, जैसे–कठेन प्रोक्तमधीयते, इस विग्रहमें–कठाः। चरकाः॥

१४८८ कलापिनोऽण्।४।३।१०८॥

कलापिना प्रोक्तमधीयते कालापाः॥ नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापि-

कौथुमितैतिलिजाजलिलांगलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानाट्टिलोपः ॥

१४८८-' प्रोक्तमधीयते ' इस अर्थमें तृतीयान्त कलापिन् शब्दके उत्तर अण् प्रत्यय हो, जैसे-कलापिना प्रोक्तमधीयते, इस विग्रहमें-कालापाः ।

नकारान्त शब्दकी टिके लोपके विषयमें सब्रह्मचारिन्,पीठसर्पिन्, कलापिन्, कौथुमिन्, तैतिलिन्, जाजलिन्, लाङ्गलिन्, शिलालिन्, शिखंडिन्, सूकरसद्मन्, सुपर्वन्, इन शब्दोंके उपसंख्यानके कारण यहां अण् प्रत्यय परे रहते टिका लोप हुआ ॥

१४८९ छगलिनो ढिनुक् ।४।३।१०९॥

छगलिना प्रोक्तमधीयते छागलेयिनः ॥

१४८९-तृतीयान्त छगलिन् शब्दके उत्तर 'प्रोक्तमधीयते' इस अर्थमें ढिनुक् प्रत्यय हो, जैसे-छगलिना प्रोक्तमधीयते= छागलेयिनः ॥

१४९० पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः । ४ । ३ । ११० ॥

पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणो भिक्षवः । शैलालिनो नटाः ॥

१४९०-पूर्वोक्त अर्थमें भिक्षु वाच्य होनेपर पराशर्य शब्दके उत्तर और नटसूत्र अर्थमें शिलालिन् शब्दके उत्तर णिनि प्रत्यय हो, जैसे-पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते=पाराशरिणो भिक्षवः । शैललिना प्रोक्तं नटसूत्रमधीयते=शैलालिनो नटाः ॥

१४९१ कर्मन्दकृशाश्वादिनिः । ४ । ३ । १११ ॥

भिक्षुनटसूत्रयोरित्येव । कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः । कृशाश्विनो नटाः ॥

१४९१-भिक्षु अर्थमें तृतीयान्त कर्मन्द शब्दके उत्तर और नटसूत्र अर्थमें तृतीयान्त कृशाश्व शब्दके उत्तर 'प्रोक्तमधीयते' इस अर्थमें इनि प्रत्यय हो,जैसे-कर्मन्देन प्रोक्तं भिक्षुसूत्रमधीयते= कर्मन्दिनो भिक्षवः । कृशाश्वेन प्रोक्तं नटसूत्रमधीयते=कृशाश्विनो नटाः ॥

१४९२ तेनैकदिक् । ४ । ३ । ११२ ॥

सुदाम्ना अद्रिणा एकदिक् सौदामनी ॥

१४९२-एकदिक् अर्थात् तुल्यदिक् अर्थमें तृतीयान्त समर्थ प्रातिपदिकके उत्तर अणादि प्रत्यय हों, जैसे-सुदाम्ना अद्रिणा एकदिक्=सौदामनी ॥

१४९३ तसिश्च । ४ । ३ । ११३ ॥

स्वरादिपाठादव्ययत्वम् । पीलुमूलेन एकदिक् पीलुमूलतः ॥

१४९३-एकदिक् अर्थमें तृतीयान्त पदके उत्तर तसि प्रत्यय भी हो । स्वरादिगण (४४७) में तसि प्रत्ययका पाठ है, इससे तसि प्रत्ययान्त शब्दको अव्ययत्व होताहै, यथा- पीलुमूलेन एकदिक्=पीलुमूलतः ॥

१४९४ उरसो यच्च । ४ । ३ । ११४ ॥

चात्तसिः । अणोऽपवादः । उरसा एकदिक् उरस्यः । उरस्तः ॥

१४९४-तृतीयान्त उरस् शब्दके उत्तर एकदिक् अर्थमें यत् प्रत्यय और चकारसे तसि प्रत्यय हो, यह प्रत्यय अण् प्रत्ययके अपवाद हैं । यथा-उरसा एकदिक्=उरस्यः, उरस्तः ॥

१४९५ उपज्ञाते । ४ । ३ । ११५ ॥

तेनेत्येव । पाणिनिना उपज्ञातं पाणिनीयम् ॥

१४९५-उपज्ञात अर्थमें तृतीयान्त समर्थ प्रातिपदिकके उत्तर यत् प्रत्यय हो, यथा-पाणिनिना उपज्ञातम्= पाणिनीयम् ॥

१४९६ कृते ग्रन्थे । ४ । ३ । ११६ ॥

वररुचिना कृतो वाररुचो ग्रन्थः ॥

१४९६-कृत (कियागया) अर्थमें परन्तु जो कियाजाय सो ग्रन्थ हो तो तृतीयान्त समर्थ प्रातिपदिकके उत्तर अण् प्रत्यय हो, यथा-वररुचिना कृतः=वाररुचः ग्रन्थः ॥

१४९७ संज्ञायाम् । ४ । ३ । ११७ ॥

तेनेत्येव । अग्रन्थार्थमिदम् । मक्षिकाभिः कृतं माक्षिकं मधु ॥

१४९७-कृत अर्थमें संज्ञा होनेपर तृतीयान्त प्रातिपदिकके उत्तर अण् प्रत्यय हो, यह सूत्र ग्रन्थभिन्नार्थ है, अर्थात् संज्ञामें ग्रन्थ अर्थ होनेपर अण् प्रत्यय न हो,किन्तु तद्भिन्न अर्थमें अण् प्रत्यय हो, यथा-मक्षिकाभिः कृतम्=माक्षिकम्, अर्थात् मधु ॥

१४९८ कुलालादिभ्यो वुञ् ।४।३।११८॥

तेन कृते संज्ञायाम् । कुलालेन कृतं कौलालकम् । वारुडकम् ॥

१४९८-कृत अर्थ होनेपर संज्ञामें तृतीयान्त कुलालादिशब्दोंके उत्तर वुञ् प्रत्यय हो, यथा-कुलालेन कृतम्=कौलालकम् । वारुडकम् ।

१४९९ क्षुद्राभ्रमरवटरपादपादञ् । ४ । ३ । ११९ ॥

तेन कृते संज्ञायाम् । क्षुद्राभिः कृतं क्षौद्रम् । भ्रामरम् । वाटरम् । पादपम् ॥

१४९९-कृत अर्थमें संज्ञा होनेपर तृतीयान्त क्षुद्रा, भ्रमर, वटर और पादप शब्दके उत्तर अञ् प्रत्यय हो, यथा-क्षुद्राभिः कृतम्=क्षौद्रम् । भ्रमरेण कृतम्=भ्रामरम् । वटरेण (कुक्कुटेन) कृतम्=वाटरम् । पादपैः कृतम्=पादपम्॥

१५०० तस्येदम् । ४ । ३ । १२० ॥

उपगोरिदमौपगवम् ॥ वहेस्तुरणिट् च ॥*॥ संवोढुः स्वं सांवहित्रम् ॥ अग्नीधः शरणे रण्

भं च ॥ * ॥ अग्निमिन्धे अग्नीत्, तस्य स्थानमाग्नीध्रम्, तात्स्थ्यात्सोप्याग्नीध्रः ॥ समिधामाधाने षेण्यण् ॥ * ॥ सामिधेन्यो मन्त्रः । सामिधेनी । ऋक् ॥

१५००–उसका यह है, इस अर्थमें षष्ठ्यन्त समर्थ प्रातिपदिकोंसे शैषिक प्रकरणमें कहे हुए प्रत्यय हों, यथा–उपगोरिदम्=औपगवम् ।

तृन्, तृच्–प्रत्ययान्त वह धातुके उत्तर अण् प्रत्यय और वह धातुको इट्का आगम हो * यथा–संवोढुः स्वम्=सांवहित्रम् ।

अग्नीध् शब्दके उत्तर शरण (घर) अर्थमें रण् प्रत्यय हो और अग्नीध् शब्दको भसंज्ञा हो * यथा–अग्निमिन्धे–अग्नीत्, तस्य स्थानम्=आग्नीध्रम् । तात्स्थ्यहेतु (उस स्थानमें रहनेके हेतु) से वह (अग्निको दीप्त करनेवाला) भी आग्नीध्र कहाजाताहै ।

आधान अर्थमें समिध् शब्दके उत्तर षेण्यण् प्रत्यय हो * यथा–सामिधेन्यः मन्त्रः । सामिधेनी ऋक् ॥

१५०१ रथाद्यत् । ४ । ३ । १२१ ॥

रथ्यं चक्रम् ॥

१५०१–रथ शब्दके उत्तर यत् प्रत्यय हो, यथा–रथ्यं चक्रम् ॥

१५०२ पत्रपूर्वादञ् । ४ । ३ । १२२ ॥

पत्रं वाहनम् । अश्वरथस्येदमाश्वरथम् ॥

१५०२–पत्र, अर्थात् वाहनवाचकशब्दपूर्वक रथ शब्दके उत्तर अञ् प्रत्यय हो, यथा–अश्वरथस्य इदम्=आश्वरथम् ॥

१५०३ पत्राध्वर्युपरिषदश्च।४।३।१२३॥

अञ् ॥ पत्राद्वाह्ये ॥ * ॥ अश्वस्येदं वहनीयमाश्वम् । आध्वर्यवम् । पारिषदम् ॥

१५०३–पत्रवाचक, अध्वर्यु और परिषद् शब्दके उत्तर अञ् प्रत्यय हो ।

पत्रवाचकसे वाह्य अर्थमें हो * यथा–अश्वस्येदं वहनीयम्=आश्वम् । आध्वर्यवम् । पारिषदम् ॥

१५०४ हलसीराट्ठक् । ४ । ३ । १२४॥

हालिकम् । सैरिकम् ॥

१५०४–हल और सीर शब्दके उत्तर ठक् प्रत्यय हो, यथा–हालिकम् । सैरिकम् ॥

१५०५ द्वन्द्वाद्वुन्वैरमैथुनिकयोः । ४ । ३ । १२५ ॥

काकोलूकिका । कुत्सकुशिकिका ॥ वैरे देवासुरादिभ्यः प्रतिषेधः ॥ * ॥ दैवासुरम् ॥

१५०५–वैर और मैथुनिका (स्त्रीपुरुषका कर्म) अर्थमें द्वन्द्वसमासनिष्पन्न शब्दके उत्तर वुन् प्रत्यय हो, यथा–काकोलूकिका । कुत्सकुशिकिका ।

वैर अर्थमें द्वन्द्वसमासनिष्पन्न देवासुर शब्दके उत्तर वुन् प्रत्यय न हो * यथा–दैवासुरम् ॥

१५०६ गोत्रचरणाद्वुञ् । ४ । ३।१२६॥

औपगवकम् ॥ चरणाद्धर्माम्नाययोरिति वक्तव्यम् ॥ * ॥ काठकम् ॥

१५०६–गोत्रप्रत्ययान्त और चरणवाचक शब्दके उत्तर वुञ् प्रत्यय हो, यथा–औपगवकम् ।

चरणवाचक शब्दके उत्तर धर्म, और आम्नाय अर्थात् वेद अर्थमें उक्त प्रत्यय हो * यथा–काठकम् ॥

१५०७ सङ्घाङ्कलक्षणेष्वञ्यञिञामण् । ४ । ३ । १२७ ॥

घोषग्रहणमपि कर्तव्यम् ॥ * ॥ अञ्, बैदः सङ्घोऽङ्को घोषो वा।बैदं लक्षणम् । यञ्, गार्गः । गार्गम्। इञ्, दाक्षः। दाक्षम्। परम्परासम्बन्धोऽङ्कः। साक्षात्तु लक्षणम् ॥

१५०७ संघ, अंक और लक्षण अर्थमें अञ्, यञ् और इञ्प्रत्ययान्त षष्ठ्यन्त समर्थ शब्दोंके उत्तर अण् प्रत्यय हो ।

इस सूत्रमें घोष शब्दका भी ग्रहण करना चाहिये*अञ् जैसे–बैदः संघोंको घोषो वा । बैदं लक्षणम् । यञ् यथा–गार्गः । गार्गम्। इञ् जैसे–दाक्षः । दाक्षम् । परम्परासम्बन्धको 'अंक' कहतेहैं और साक्षात् सम्बन्धको ' लक्षण ' कहतेहैं ॥

१५०८ शाकलाद्वा । ४ । ३ । १२८ ॥

अण् वोक्तेर्थे । पक्षे चरणत्वाद्वुञ् । शाकलेन प्रोक्तमधीयते शाकलास्तेषां सङ्घोऽङ्को घोषो वा शाकलः । शाकलकः । लक्षणे क्लीबता ॥

१५०८–पूर्वोक्त अर्थमें शाकल शब्दके उत्तर विकल्पसे अण् प्रत्यय हो, पक्षमें चरणवाचक शब्दके उत्तर वुञ् प्रत्यय होगा, यथा–शाकलेन प्रोक्तमधीयते शाकलाः, तेषां संघोंको घोषो वा, इस विग्रहमें-शाकलः । पक्षमें शाकलकः । लक्षण अर्थमें नपुंसकलिङ्ग होताहै ॥

१५०९ छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः । ४ । ३ । १२९ ॥

छन्दोगानां धर्म आम्नायो वा छान्दोग्यम् । औक्थिक्यम् । याज्ञिक्यम् । बाह्वृच्यम्।नाट्यम्॥ चरणाद्धर्माम्नाययोरित्युक्तं तत्साहचर्यान्नटशब्दादपि तयोरेव ॥

१५०९–छन्दोग, औक्थिक, याज्ञिक, बह्वृच और नट शब्दके उत्तर ञ्य प्रत्यय हो, यथा–छन्दोगानां धर्म आम्नायो वा=छान्दोग्यम् । औक्थिक्यम् । याज्ञिक्यम् । बाह्वृच्यम् । नाट्यम् ।

चरणवाचक शब्दके उत्तर धर्म और आम्नाय अर्थमें ञ्य प्रत्यय हो, यह पहले कह आये हैं, उसके साहचर्यसे नट शब्दके उत्तर भी धर्म और आम्नाय अर्थमें ही ञ्य प्रत्यय होताहै ॥

१५१० न दण्डमाणवान्तेवासिषु । ४ । ३ । १३० ॥

दण्डप्रधाना माणवा दण्डमाणवास्तेषु शिष्येषु च वुञ् न स्यात्। दाक्षा दण्डमाणवाः शिष्या वा॥

१५१०--दण्डप्रधान जो माणव उसको दंडमाणव कहतेहैं, दंडमाणव और शिष्य अर्थमें वुञ् प्रत्यय न हो, यथा--दाक्षा दण्डमाणवाः शिष्या वा ॥

१५११ रैवतिकादिभ्यश्छः ।४।३।१३१।

तस्येदमित्यर्थे । वुञोपवादः । रैवतिकीयः । बैजवापीयः ॥

१५११--'यह उसका है' इस अर्थमें रैवतिकादि शब्दोंके उत्तर छ प्रत्यय हो, यह छ प्रत्यय वुञ्का अपवाद है, यथा--रैवतिकीयः । बैजवापीयः ॥

१५१२ कौपिञ्जलहास्तिपदादण् । ४ । ३ । १३२ ॥ (वा १९१८) ॥

कुपिञ्जलस्यापत्यम् । इहैव, निपातनादण् तदन्तात्पुनरण् । कौपिञ्जलः । गोत्रवुञोऽपवादः । हस्तिपादस्यापत्यं हास्तिपदस्तस्यायं हास्तिपदः।

१५१२--कौपिञ्जल और हास्तिपद शब्दके उत्तर अण् प्रत्यय हो । कुपिञ्जलस्यापत्यम्, इस विग्रहमें इसी सूत्रमें निपातनसे अण् प्रत्यय होकर तदन्तके उत्तर फिर अण् प्रत्यय हुआ, यथा--कौपिञ्जलः । यह अण् प्रत्यय, गोत्रवाचक शब्दके उत्तर वुञ् प्रत्ययका अपवाद है । हस्तिपादस्यापत्यम्--हास्तिपदः, तस्यायम्=हास्तिपदः । (यह प्रक्षिप्त सूत्र है, ऐसा कैयटका मत है) ॥

१५१३ आथर्वणिकस्येकलोपश्च । ४ । ३ । १३३ ॥

चादण् । आथर्वणिकस्यायमाथर्वणो धर्म आम्नायो वा । चरणाद्वुञोपवादः ॥

॥ समाप्ताः शैषिकाः ॥

१५१३--आथर्वणिक शब्दके उत्तर अण् प्रत्यय हो और इकका लोप हो । यह सूत्र चरणवाचक शब्दके उत्तर विहित वुञ् प्रत्ययका अपवाद है, यथा--आथर्वणिकस्यायम्=आथर्वणो धर्म आम्नायो वा ॥

॥ इति शैषिकप्रकरणम् ॥

अथ प्राग्दीव्यतीयप्रकरणम् ।

१५१४ तस्य विकारः । ४ ।३।१३४॥

अश्मनो विकारे टिलोपो वक्तव्यः ॥ * ॥ अश्मनो विकार आश्मः । भास्मनः । मार्तिकः ॥

१५१४--षष्ठ्यन्त प्रातिपदिकके उत्तर विकार अर्थमें अण् आदि प्रत्यय हों । विकारार्थक प्रत्यय परे रहते अश्मन् शब्दकी टिका लोप हो* (जहांतक विशेष कथन न हो वहांतक विकार अर्थ जानना) अश्मनो विकारः=आश्मः । भास्मनः । मार्तिकः ॥

१५१५ अवयवे च प्राण्योषधिवृक्षेभ्यः । ४ । ३ । १३५ ॥

चाद्विकारे । मयूरस्यावयवो विकारो वा मायूरः । मौर्वं काण्डं भस्म वा । पैप्पलम् ॥

१५१५--प्राणी, ओषधि और वृक्षवाचक शब्दके उत्तर अवयव अर्थमें और विकार अर्थमें अण् आदि प्रत्यय हों, जैसे--मयूरस्यावयवो विकारो वा, इस विग्रहमें--मायूरः । मौर्वं कांडं भस्म वा । पैप्पलम् ॥

१५१६ बिल्वादिभ्योऽण् ।४।३।१३६॥

बैल्वम् ॥

१५१६--बिल्वादि शब्दोंके उत्तर अण् प्रत्यय हो, जैसे--बैल्वम्, अर्थात् बिल्वका विकार वा अवयव ॥

१५१७ कोपधाच्च । ४ । ३ । १३७ ॥

अण् । अञोपवादः । तर्कु, तार्कवम् । तैत्तिडीकम् ॥

१५१७--ककारोपध शब्दके उत्तर अण् प्रत्यय हो, यह अण् प्रत्यय अञ् प्रत्ययका अपवाद है, जैसे-- --तार्कवम् । तैत्तिडीकम् ॥

१५१८ त्रपुजतुनोः षुक् । ४।३।१३८॥

आभ्यामण् स्याद्विकारे एतयोः षुगागमश्च । त्रापुषम् । जातुषम् ॥

१५१८--त्रपु और जतु शब्दके उत्तर विकार अर्थमें अण् प्रत्यय हो और षुक्का आगम हो, जैसे--त्रापुषम् । जातुषम् ॥

१५१९ ओरञ् । ४ । ३ । १३९ ॥

दैवदारवम् । भाद्रदारवम् ॥

१५१९--उकारान्त प्रातिपदिकके उत्तर विकार अर्थमें अञ् प्रत्यय हो, जैसे--दैवदारवम् । भाद्रदारवम् ।

१५२० अनुदात्तादेश्च । ४। ३ । १४०॥

दाधित्थम् । कापित्थम् ॥

१५२०--अनुदात्तादि प्रातिपदिकके उत्तर भी अञ् प्रत्यय हो, जैसे--दाधित्थम् । कापित्थम् ॥

१५२१ पलाशादिभ्यो वा ।४।३।१४१॥

पालाशम् । कारीरम् ॥

१५२१--अवयव और विकार अर्थमें पलाशादि शब्दोंके उत्तर अञ् प्रत्यय हो, जैसे--पालाशम् । खादिरम् । कारीरम् ॥

१५२२ शम्याः ट्लञ् । ४ । ३ । १४२॥

शामीलं भस्म । षित्वान्ङीष् । शामीली स्रुक् ॥

१५२२–शमी शब्दके उत्तर ष्लञ् प्रत्यय हो, जैसे–शामीलं भस्म, षित्वके कारण स्त्रीलिङ्गमें ङीष् प्रत्यय होगा, जैसे–शामीली स्रुक् ॥

१५२३ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः । ४ । ३ । १४३ ॥

प्रकृतिमात्रान्मयड्वा स्याद्विकारावयवयोः । अश्ममयम् । आश्मनम् । अभक्ष्येत्यादि किम् । मौद्गः सूपः । कार्पासमाच्छादनम् ॥

१५२३–भाषा (लोक) में विकार और अवयव अर्थ होनेपर प्रकृतिमात्रके उत्तर विकल्प करके मयट् प्रत्यय हो, भक्ष्य और आच्छादन अर्थ छोडकर, जैसे–अश्मनो विकारः अवयवो वा=अश्ममयम्।आश्मनम्।भक्ष्य और आच्छादन अर्थ होनेपर, जैसे–मौद्गः सूपः । कार्पासम् आच्छादनम् ॥

१५२४ नित्यं वृद्धशरादिभ्यः । ४ । ३ । १४४ ॥

आम्रमयम् । शरमयम् ॥ एकाचो नित्यम्॥*॥ त्वङ्मयम् । वाङ्मयम् । कथं तर्हि आप्यमम्मयमिति । तस्येदमित्यण्णन्तात्स्वार्थे ष्यञ् ॥

१५२४–वृद्धसंज्ञक और शरादि शब्दोंके उत्तर नित्य मयट् प्रत्यय हो, जैसे–आम्रस्य विकारोऽवयवो =आम्रमयम् । शरमयम् ।

एक अच्से युक्त शब्दके उत्तर नित्य मयट् हो * जैसे–त्वङ्मयम् । वाङ्मयम् । शरमयम् । इस सूत्रके रहते'आप्यम्, अम्मयम्' ऐसे पद किस प्रकार हुए ? इसपर कहतेहैं कि, इस स्थानमें "तस्येदम् १५००" इस सूत्रसे विहित अण्प्रत्ययान्तके उत्तर स्वार्थमें ष्यञ् प्रत्यय हुआहै ॥

१५२५ गोश्च पुरीषे । ४ । ३ । १४५ ॥

गोः पुरीषं गोमयम् ॥

१५२५–पुरीष (विष्ठा) अर्थमें गो शब्दके उत्तर मयट् प्रत्यय हो, जैसे–गोः पुरीषम्=गोमयम् ॥

१५२६ पिष्टाच्च । ४ । ३ । १४६ ॥

मयट् स्याद्विकारे । पिष्टमयं भस्म । कथं पैष्टी सुरेति । सामान्यविवक्षायां तस्येदमित्यण्॥

१५२६–विकार अर्थमें पिष्ट शब्दके उत्तर मयट् प्रत्यय हो, जैसे–पिष्टमयं भस्म, तो फिर 'पैष्टी सुरा' यहां पैष्टी पद किस प्रकारसे सिद्ध हुआहै ? इसपर कहतेहैं कि, इस स्थलमें सामान्यविवक्षामें "तस्येदम् १५००" इस सूत्रसे अण् प्रत्यय हुआहै ॥

१५२७ संज्ञायां कन् । ४ । ३ । १४७॥

पिष्टादित्येव । पिष्टस्य विकारविशेषः पिष्टकः । पूपोऽपूपः पिष्टकः स्यात् ॥

१५२७–संज्ञामें पिष्ट शब्दके उत्तर कन् प्रत्यय हो, जैसे–पिष्टस्य विकारविशेषः=पिष्टकः। 'पूपोऽपूपः पिष्टकः स्यात्' इत्यमरः ॥

१५२८ व्रीहेः पुरोडाशे । ४ । ३ । १४८ ॥

मयट् स्यात् । बिल्वाद्यणोपवादः । व्रीहिमयः पुरोडाशः । व्रैहमन्यत् ॥

१५२८–पुरोडाश अर्थमें व्रीहि शब्दके उत्तर मयट् प्रत्यय हो, यह बिल्वादि (१५१६) शब्दके उत्तर विहित अण्का अपवाद है, जैसे—व्रीहिमयः पुरोडाशः, अन्य अर्थमें व्रैहम् ॥

१५२९ असंज्ञायां तिलयवाभ्याम् । ४ । ३ । १४९ ॥

तिलमयम् । यवमयम् । संज्ञायां तु तैलम् । यावकः ॥

१५२९–असंज्ञामें तिल और यव शब्दके उत्तर मयट् प्रत्यय हो, जैसे–तिलमयम् । यवमयम् । संज्ञा होनेपर नहीं होगा, जैसे–तैलम् । यावकः ॥

१५३० तालादिभ्योण् । ४ । ३ । १५२ ॥

अञ्मयटोरपवादः ॥ तालाद्धनुषि ॥*॥ तालं धनुः । अन्यत्तालमयम् । ऐन्द्रायुधम् ॥

१५३०–तालादि शब्दके उत्तर अण् प्रत्यय हो । यह अञ् और मयट् प्रत्ययका अपवाद है ।

ताल शब्दके उत्तर धनुष् अर्थमें मयट् प्रत्यय हो * जैसे–तालं धनुः । अन्य अर्थमें–तालमयम् । ऐन्द्रायुधम् ॥

१५३१ जातरूपेभ्यः परिमाणे । ४ । ३ । १५३ ॥

अण् । बहुवचनात्पर्यायग्रहणम् । हाटकः । तापनीयः । सौवर्णो वा निष्कः । परिमाणे किम् । हाटकमयी यष्टिः ॥

१५३१–परिमाण अर्थमें जातरूप (सुवर्ण) वाचक शब्दके उत्तर अण् प्रत्यय हो । इस स्थलमें बहुवचनसे जातरूपके पर्यायका ग्रहण होताहै, जैसे–हाटकः, तापनीयः, सौवर्णो वा निष्कः । परिमाण अर्थ न होनेपर 'हाटकमयी यष्टिः' ऐसा रूप होगा ॥

१५३२ प्राणिरजतादिभ्योऽञ् । ४ । ३ । १५४ ॥

शौकम् । बाकम् । राजतम् ॥

१५३२–प्राणिन् और रजतादि शब्दोंके उत्तर विकार अर्थ और अवयव अर्थमें अञ् प्रत्यय हो, जैसे–शौकम् । बाकम् । राजतम् ।

१५३३ ञितश्च तत्प्रत्ययात् । ४ । ३ । १५५ ।

ञितो विकारावयवप्रत्ययस्तदन्तादञ् स्यात्तयोरेवार्थयोः । मयटोपवादः । शामीलस्य शामीलम् । दाधित्थस्य दाधित्थम् । कापित्थम् । ञितः किम् । बैल्वमयम् ॥

१५३३-विकार और अवयव अर्थमें ञित् जो विकारावयवार्थ प्रत्यय,तदन्तके उत्तर अञ् प्रत्यय हो । यह अञ् प्रत्यय मयट् प्रत्ययका अपवाद है, जैसे-शामीलस्य-शामीलम् । दाधित्थस्य-दाधित्थम् । कापित्थम् । ञित् न होनेपर अञ् न होकर मयट् प्रत्यय ही होगा, जैसे-बैल्वमयम् ॥

१५३४ क्रीतवत्परिमाणात् । ४ । ३ । १५६ ॥

प्राग्वहतेष्ठगित्यारभ्य क्रीतार्थे ये प्रत्यया येनोपाधिना परिमाणाद्विहितास्ते तथैव विकारेऽतिदिश्यन्ते । अणादीनामपवादः । निष्केण क्रीतं नैष्किकम्, एवं निष्कस्य विकारोपि नैष्किकः । शतस्य विकारः शत्यः । शतिकः ॥

१५३४-"प्राग्वहतेष्ठक् १५४८" इस सूत्रसे आरंभ करके क्रीतार्थमें जो २ प्रत्यय जिस उपाधिसे परिमाणवाचकसे कहे गये हैं वह सब प्रत्यय परिमाणवाचकसे विकार अर्थमें हों । यह सूत्र अणादि प्रत्ययका विशेषक है, जैसे-निष्केण क्रीतम्=नैष्किकम् । इसी प्रकार निष्कस्य विकारः=नैष्किकः । शतस्य विकारः=शत्यः । शतिकः ॥

१५३५ उष्ट्राद्वुञ् । ४ । ३ । १५७ ॥

प्राण्यञोऽपवादः । औष्ट्रकः ॥

१५३५-उष्ट्र शब्दके उत्तर वुञ् प्रत्यय हो । यह वुञ् प्रत्यय प्राणिवाचकके उत्तर विहित अण् प्रत्ययका अपवाद है, जैसे-औष्ट्रकः ॥

१५३६ उमोर्णयोर्वा । ४ । ३ । १५८ ॥

औमम् । औमकम् । और्णम् । और्णकम् । वुञभावे यथाक्रममणञौ ॥

१५३६-उमा और ऊर्णा शब्दके उत्तर विकल्प करके वुञ् प्रत्यय हो, जैसे-औमकम्, औमम् । और्णकम्, और्णम् । वुञ्के अभावपक्षमें क्रमसे अर्थात् उमा शब्दके उत्तर अण् और ऊर्णा शब्दके उत्तर अञ् प्रत्यय होताहै ॥

१५३७ एण्या ढञ् । ४ । ३ । १५९ ॥

ऐणेयम् । एणस्य तु ऐणम् ॥

१५३७-एणी शब्दके उत्तर ढञ् प्रत्यय हो, जैसे-ऐणेयम् । एण शब्दका तो 'ऐणम्' ऐसा रूप होगा ॥

१५३८ गोपयसोर्यत् । ४ । ३ । १६० ॥

गव्यम् । पयस्यम् ॥

१५३८-गो और पयस् शब्दके उत्तर यत् प्रत्यय हो, जैसे-गव्यम् । पयस्यम् ॥

१५३९ द्रोश्च । ४ । ३ । १६१ ॥

द्रुर्वृक्षस्तस्य विकारोऽवयवो वा द्रव्यम् ॥

१५३९-द्रु शब्दके उत्तर यत् प्रत्यय हो, द्रु शब्दसे वृक्ष जानना, उसका विकार वा अवयव होनेपर 'द्रव्यम्' इस प्रकार रूप होगा ॥

१५४० माने वयः । ४ । ३ । १६२ ॥

द्रोरित्येव । द्रुवयम् । यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् ॥

१५४०-मान अर्थमें द्रु शब्दके उत्तर वय प्रत्यय हो, जैसे-द्रुवयम् । "यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम्" अर्थात् यह तीन पद परिमाणवाचक हैं ॥

१५४१ फले लुक् । ४ । ३ । १६३ ॥

विकारावयवप्रत्ययस्य लुक् स्यात् फले । आमलक्याः फलमामलकम् ॥

१५४१-फल वाच्य होनेपर विकार और अवयव अर्थमें विहित प्रत्ययका लुक् हो, जैसे-आमलक्याः फलम्, इस वाक्यमें आमलकम् ॥

१५४२ प्लक्षादिभ्योऽण् । ४ । ३ । १६४ ॥

विधानसामर्थ्यान्न लुक् । प्लाक्षम् ॥

१५४२-प्लक्षादि शब्दोंके उत्तर अण् प्रत्यय हो । इस स्थानमें फलवाचक होनेपर भी विधानसामर्थ्यके कारण प्लक्ष आदि शब्दोंके उत्तर प्रत्ययका लुक् नहीं हुआ, जैसे-प्लाक्षम् ॥

१५४३ न्यग्रोधस्य च केवलस्य । ७ । ३ । ५ ॥

अस्य न वृद्धिरैजागमश्च । नैयग्रोधम् ॥

१५४३-अण् प्रत्यय परे रहते केवल न्यग्रोध शब्दके पूर्व स्वरकी वृद्धि न हो, परन्तु ऐच्का आगम हो, जैसे-नैयग्रोधम् ॥

१५४४ जम्ब्वा वा । ४ । ३ । १६५ ॥

जम्बूशब्दात् फलेऽण् वा स्यात् । जाम्बवम् । पक्षे ओरञ्, तस्य लुक्, जम्बु ॥

१५४४-फल वाच्य होनेपर जम्बू शब्दके उत्तर विकल्प करके अण् प्रत्यय हो, जैसे-जाम्बवम् । विकल्प पक्षमें "ओरञ्" इस सूत्रसे उकारान्त शब्दके उत्तर अञ् प्रत्यय होकर उसके लुक् होनेपर 'जम्बु' ऐसा पद होगा ॥

१५४५ लुप् च । ४ । ३ । १६६ ॥

जम्ब्वाः फलप्रत्ययस्य लुप् वा स्यात् । फललुपि युक्तवत् । जम्ब्वाः फलं जम्बूः ॥ फल- ॥ * ॥ व्रीहयः । पाकशुषामुपसंख्यानम् ॥ * ॥ मल्लिमुद्गाः ॥ पुष्पमूलेषु बहुलम् ॥ * ॥ मल्लिकायाः पुष्पं मल्लिका । जात्याः पुष्पं जाती । विदार्या मूलं विदारी । बहुलग्रहणान्नेह । पाटलानि पुष्पाणि । साल्वानि मूलानि । बाहुलकात् क्वचिल्लुक् । अशोकम् । करवीरम् ॥

१५४५-जम्बू शब्दके उत्तर फल अर्थमें विहित प्रत्ययका विकल्प करके लुप् हो । लुप् होनेपर प्रकृतिकी समान लिङ्ग और वचन होगा (१२९४) जैसे-जम्ब्वाः फलम्-जम्बूः । फल परिपक्व होनेपर जो सूखजायँ, तद्वाचक शब्दोंके उत्तर

फल अर्थमें विहित प्रत्ययका लुप् हो * जैसे-व्रीहीणां फलानि=व्रीहयः। मुद्गाः।

पुष्प और मूल वाच्य रहते बहुल करके विकारावयव-प्रत्ययका लुप् हो* जैसे-मल्लिकायाः पुष्पम्=मल्लिका। जात्याः पुष्पम्=जाती। विदार्याः मूलम्-विदारी । बहुलग्रहणके कारण 'पाटलानि पुष्पाणि' और 'साल्वानि मूलानि' इन दो स्थलोंमें प्रत्ययका लुप् न हुआ। बहुलग्रहणके कारण किसी किसी स्थलमें लुक् होगा, जैसे-अशोकम्। करवीरम्।

१५४६ हरीतक्यादिभ्यश्च।४।३।१६७॥

एभ्यः फलप्रत्ययस्य लुप्स्यात्। हरीतक्यादीनां लिङ्गमेव प्रकृतिवत्। हरीतक्याः फलानि हरीतक्यः॥

१५४६-हरीतकी आदि शब्दोंके उत्तर फलार्थक प्रत्ययका लुक् हो, हरीतक्यादि शब्दोंका लिङ्ग ही प्रकृतिकी समान होगा वचन तो, विशेष्यानुरोधसे ही होगा, जैसे-हरीतक्याः फलानि, इस विग्रहमें हरीतक्यः॥

१५४७ कंसीयपरशव्ययोर्यञञौ लुक् च।४।३।१६८॥

कंसीयपरशव्यशब्दाभ्यां यञञौ स्तश्छयतोश्च लुक्। कंसाय हितं कंसीयम् । तस्य विकारः कांस्यम् । परशवे हितं परशव्यम्, तस्य विकारः पारशवः॥

॥ इति प्राग्दीव्यतीयाः॥

१५४७-कंसीय और परशव्य शब्दके उत्तर यञ् और अञ् प्रत्यय हों और प्रकृतिके अवयव जो छ और यत् प्रत्यय उनका लुक् हो, जैसे-कंसाय हितम्-कंसीयम्, तस्य विकारः=कांस्यम्। परशवे हितम्-परशव्यम्, तस्य विकारः= पारशवः॥

॥ इति प्राग्दीव्यतीयप्रकरणं समाप्तम्॥

अथ ठगधिकारप्रकरणम्।

१५४८ प्राग्वहतेष्ठक्।४।४।१॥

तद्वहतीत्यतः प्राक् ठगधिक्रियते ॥ तदाहेति माशब्दादिभ्य उपसंख्यानम् ॥ * ॥ मा शब्दः कारि इति य आह स माशब्दिकः॥

१५४८-"तद्वहति० १६२७" इस सूत्रके पूर्वतक ठक्का अधिकार है।

'तदाह' वह कहताहै, इस अर्थमें मा शब्द (स्वागत) आदि शब्दोंके उत्तर ठक् प्रत्यय हो* जैसे-मा शब्दः कारि इति य आह सः=माशब्दिकः॥

१५४९ स्वागतादीनां च।७।३।७॥

ऐच् न स्यात्। स्वागतमित्याह स्वागतिकः। स्वाध्वरिकः। स्वङ्गस्यापत्यं स्वाङ्गिः। व्यङ्गस्यापत्यं व्याङ्गिः। व्यडस्यापत्यं व्याडिः। व्यवहारेण चरति व्यावहारिकः। स्वपतौ साधु स्वापतेयम्॥ * ॥ आहौ प्रभूतादिभ्यः । प्रभूतमाह प्राभूतिकः। पार्याप्तिकः॥ पृच्छतौ सुस्नातादिभ्यः॥ * ॥ सुस्नातं पृच्छति सौस्नातिकः। सौखशायनिकः। अनुशातिकादिः ॥ गच्छतौ परदारादिभ्यः॥ * ॥ पारदारिकः । गौरुतल्पिकः॥

१५४९-स्वागतादि शब्दोंको ऐच्का आगम न हो, जैसे-स्वागतमित्याह=स्वागतिकः। स्वाध्वरिकः। स्वङ्गस्यापत्यम्= स्वांगिः। व्यंगस्यापत्यम्=व्यांगिः। व्यडस्यापत्यम्=व्याडिः। व्यवहारेण चरति=व्यावहारिकः। स्वपतौ साधु=स्वापतेयम्।

'आह' इस अर्थमें प्रभूतादि शब्दोंके उत्तर ठक् प्रत्यय हो * जैसे-प्रभूतमाह=प्राभूतिकः। पार्याप्तिकः।

'पृच्छति' इस अर्थमें सुस्नातादि शब्दोंके उत्तर ठक् प्रत्यय हो * जैसे-सुस्नातं पृच्छति=सौस्नातिकः । सौखशायनिकः, यह अनुशातिकादि १४३८ है।

'गच्छति' इस अर्थमें परदारादि शब्दोंके उत्तर ठक् प्रत्यय हो* जैसे-पारदारिकः। गौरुतल्पिकः॥

१५५० तेन दीव्यति खनति जयति जितम्।४।४।२॥

अक्षैर्दीव्यति आक्षिकः। अभ्र्या खनति आभ्रिकः। अक्षैर्जयति आक्षिकः। अक्षैर्जितमाक्षिकम्॥

१५५०-दीव्यति, खनति, जयति, जितम्, अर्थात् क्रीडा करताहै, खनन करताहै, जय करताहै और जीतागया है, इन अर्थोंमें तृतीयान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-अक्षैर्दीव्यति=आक्षिकः । अभ्र्या खनति आभ्रिकः। अक्षैर्जयति=आक्षिकः। अक्षैर्जितम्=आक्षिकम्॥

१५५१ संस्कृतम्।४।४।३॥

दध्ना संस्कृतं दाधिकम्। मारिचिकम्॥

१५५१-संस्कृत अर्थमें तृतीयान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-दध्ना संस्कृतम्, इस विग्रहमें दाधिकम्। मारिचिकम्॥

१५५२ कुलत्थकोपधादण्।४।४।४॥

ठकोपवादः। कुलत्थैः संस्कृतं कौलत्थम्। तैत्तिडीकम्॥

१५५२-तृतीयान्त कुलत्थ और ककारोपध शब्दके उत्तर संस्कृत अर्थमें अण् प्रत्यय हो, यह अण् प्रत्यय ठक् प्रत्ययका विशेषक है, जैसे-कुलत्थैः संस्कृतम्, इस विग्रहमें कौलत्थम्। तैत्तिडीकम्॥

१५५३ तरति।४।४।५॥

उडुपेन तरति औडुपिकः॥

१५५३-'तरति' अर्थात् तरताहै, ऐसे अर्थमें तृतीयान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-उडुपेन तरति, इस वाक्यमें औडुपिकः॥

१५५४ गोपुच्छाट्ठञ् । ४ । ४ । ६ ॥

गौपुच्छिकः ॥

१५५४-उक्त अर्थमें तृतीयान्त गोपुच्छ शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-गौपुच्छिकः ॥

१५५५ नौद्व्यचष्ठन् । ४ । ४ । ७ ॥

नाविकः । घटिकः । बाहुभ्यां तरति बाहुका स्त्री ॥

१५५५-उक्त अर्थमें नौ शब्द और द्विस्वरयुक्त शब्दके उत्तर ठन् प्रत्यय हो, जैसे-नाविकः । घटिकः । बाहुभ्यां तरति (दोनों भुजाओंसे तरतीहै) इस वाक्यमें बाहुका स्त्री ॥

१५५६ चरति । ४ । ४ । ८ ॥

तृतीयान्ताद्गच्छति भक्षयतीत्यर्थयोष्ठक् स्यात् । हस्तिना चरति हास्तिकः । शाकटिकः । दध्ना भक्षयति दाधिकः ॥

१५५६-तृतीयान्त प्रातिपदिकके उत्तर 'चरति' अर्थात् 'गच्छति' और 'भक्षयति' इन दो अर्थोंमें ठक् प्रत्यय हो, जैसे-हस्तिना चरति=हास्तिकः । शकटेन चरति=शाकटिकः । दध्ना भक्षयति=दाधिकः ॥

१५५७ आकर्षात् ष्ठल् । ४ । ४ । ९ ॥

आकर्षो निकषोपलः । आकषादिति पाठान्तरम् । तेन चरति आकर्षिकः । षित्त्वान्ङीष् । आकर्षिकी ॥

१५५७-आकर्ष शब्दसे निकष पत्थर जानना, तृतीयान्त आकर्ष शब्दके उत्तर 'चरति' (चलता है) इस अर्थमें ष्ठल् प्रत्यय हो, यहां'आकषात्' ऐसा पाठान्तर भी है। आकर्षेण चरति=आकर्षिकः । षित् प्रत्यय होनेके कारण उसके उत्तर स्त्रीलिङ्गमें ङीष् प्रत्यय होगा, जैसे-आकर्षिकी ॥

१५५८ पर्पादिभ्यः ष्ठन् । ४ । ४ । १० ॥

पर्पेण चरति पर्पिकः । पर्पिकी । येन पीठेन पङ्गवश्चरन्ति स पर्पः । अश्विकः । रथिकः ॥

१५५८-'चरति' इस अर्थमें तृतीयान्त पर्पादि शब्दोंके उत्तर ष्ठन् प्रत्यय हो, जैसे-पर्पेण चरति=पर्पिकः । स्त्रीलिङ्गमें पर्पिकी । जिस पीठ (वा यान) से लँगडे चलें उसको 'पर्प' कहतेहैं । अश्विकः। रथिकः ॥

१५५९ श्वगणाट्ठञ्च । ४ । ४ । ११ ॥

चात् ष्ठन् ॥

१५५९-उक्त अर्थमें तृतीयान्त श्वगण शब्दके उत्तर ठञ् और चकारसे ष्ठन् प्रत्यय हो ॥

१५६० श्वादेरिञि । ७ । ३ । ८ ॥

ऐच् न । श्वभस्त्रस्यापत्यं श्वाभस्त्रिः । श्वादंष्ट्रिः । तदादिविधौ चेदमेव ज्ञापकम् ॥ इकारादाविति वाच्यम् ॥ * ॥ श्वगणेन चरति श्वागणिकः । श्वागणिकी । श्वगणिकः । श्वगणिकी ॥

१५६०-श्वादि (श्वन्शब्दपूर्वक) शब्दके इञ् प्रत्यय परे रहते ऐच् न हो, जैसे--श्वभस्त्रस्यापत्यम्=श्वाभस्त्रिः । श्वादंष्ट्रिः ।

तदादिविधिविषयमें यही ज्ञापन है, आशय यह है कि, द्वारादि गणमें श्वन् शब्द पठित है, श्वभस्त्रादि शब्द पठित नहीं हैं, इससे उनको "द्वारादीनाञ्च ७।३।४ " इस सूत्रसे ऐजागमकी प्राप्ति ही नहीं थी फिर यह निषेधसूत्र करनेका क्या प्रयोजन ? इसपर कहतेहैं कि, यही निषेधक सूत्र व्यर्थ होकर ज्ञापन करताहै कि, द्वारादिमें तदादिविधि है, इस ज्ञापनसे द्वारादिशब्दपूर्वक शब्दमें भी ऐजागमकी प्राप्ति होनेपर यह निषेधक सूत्र चारितार्थ हुआ ।

इकारादि तद्धित प्रत्यय परे रहते ऐच् न हो, ऐसा कहना चाहिये * जैसे--श्वगणेन चरति, इस विग्रहमें श्वागणिकः । श्वागणिकी । श्वगणिकः । श्वगणिकी ॥

१५६१ पदान्तस्याऽन्यतरस्याम् । ७ । ३ । ९ ॥

श्वादेरङ्गस्य पदशब्दान्तस्यैज्वा । श्वापदस्येदं शौवापदम् । श्वापदम् ॥

१५६१--पद शब्द अन्तमें है जिसके ऐसे श्वन्शब्दपूर्वक अंगको विकल्प करके ऐच्का आगम हो, जैसे--श्वापदस्येदम्=शौवापदम् । श्वापदम् ॥

१५६२ वेतनादिभ्यो जीवति।४।४।१२॥

वेतनेन जीवति वैतनिकः । धानुष्कः ॥

१५६२--जीवति (जीवनको धारण करताहै) इस अर्थमें तृतीयान्त वेतनादि शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे--वेतनेन जीवति, इस विग्रहमें वैतनिकः । धनुषा जीवति=धानुष्कः ॥

१५६३ वस्नक्रयविक्रयाट्ठन्।४।४।१३॥

वस्नेन मूल्येन जीवति वस्निकः । क्रयविक्रयग्रहणं संघातविगृहीतार्थम् । क्रयविक्रयिकः । क्रयिकः । विक्रयिकः ॥

१५६३-'जीवति' इस अर्थमें तृतीयान्त वस्न और क्रय विक्रय शब्दके उत्तर ठन् प्रत्यय हो, वस्न शब्दसे मूल्य जानना, जैसे-वस्नेन जीवति=वस्निकः । संघात और विगृहीत निमित्त क्रय विक्रय शब्दका ग्रहण सूत्रमें किया है, जैसे- क्रयविक्रयिकः । क्रयिकः । विक्रयिकः ॥

१५६४ आयुधाच्छ च ।४।४।१४ ॥

चाट्ठन्।आयुधेन जीवति आयुधीयः।आयुधिकः ॥

१५६४--तृतीयान्त आयुध शब्दके उत्तर'जीवति'इस अर्थमें छ और चकारसे ठन् प्रत्यय हो, जैसे--आयुधेन जीवति=आयुधीयः, आयुधिकः ॥

१५६५ हरत्युत्सङ्गादिभ्यः ।४।४।१५॥

उत्सङ्गेन हरत्यौत्सङ्गिकः ॥

१५६५--'हरति' इस अर्थमें तृतीयान्त उत्सङ्गादि शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे--उत्सङ्गेन हरति=औत्संगिकः ॥

१५६६ भस्त्रादिभ्यः ष्ठन् ।४।४।१६॥

भस्त्रया हरति भस्त्रिकः। षित्त्वान्ङीष् भस्त्रिकी ॥

१५६६--'हरति' इस अर्थमें तृतीयान्त भस्त्रादि शब्दोंके उत्तर ष्ठन् प्रत्यय हो,जैसे--भस्त्रया हरति=भस्त्रिकः षकार इत् होनेके कारण स्त्रीलिंगमें ङीष् होगा, जैसे--भस्त्रिकी ॥

१५६७ विभाषा विवधात् ।४।४।१७॥

विवधेन हरति विवधिकः। पक्षे ठक्। वैवधिकः। एकदेशविकृतस्याऽनन्यत्वाद्वीवधादपि ष्ठन्। वीवधिकः। वीवधिकी। विवधवीवधशब्दौ उभयतोबद्धशिक्ये स्कन्धवाह्ये काष्ठे वर्तेते॥

१५६७--'हरति' इस अर्थमें तृतीयान्त विवध शब्दके उत्तर विकल्प करके ष्ठन् प्रत्यय हो, विकल्प पक्षमें ठक् प्रत्यय होगा, जैसे--विवधेन हरति--विवधिकः। वैवधिकः।

"एकदेशविकृतमनन्यवत्" (एक देशके विकारसे वह दूसरा नहीं होताहै) इस न्यायसे वीवध शब्दका विवध शब्दसे अन्य रूप नहीं हुआ,इस कारण वीवध शब्दके उत्तर भी ष्ठन् प्रत्यय होगा, जैसे–वीवधिकः। वीवधिकी। विवध और वीवध दोनों शब्दोंसे दोनों पार्श्वोंमें बद्धशिक्य स्कंधवाह्य काष्ठ (बाँक) जानना ॥

१५६८ अण् कुटिलिकायाः ।४।४।१८॥

कुटिलिका व्याधानां गतिविशेषः कर्मारोपकरणभूतं लोहं च। कुटिलिकया हरति मृगानङ्गारान्वा कौटिलिको व्याधः कर्मारश्च ॥

१५६८—'हरति' इस अर्थमें तृतीयान्त कुटिलिका शब्दके उत्तर अण् प्रत्यय हो, व्याधोंके गतिविशेष और कर्मारके उपकरणभूत लौहको कुटिलिका कहतेहैं, जैसे–कुटिलकया हरति मृगान् अङ्गारान् वा, इस विग्रहमें कौटिलिकः, अर्थात् व्याध और कर्मार। (कर्मार शब्दसे कर्मकार जानना) ॥

१५६९ निर्वृत्तेऽक्षद्यूतादिभ्यः ।४।४।१९॥

अक्षद्यूतेन निर्वृत्तमाक्षद्यूतिकं वैरम् ॥

१५६९–निर्वृत्तम्, इस अर्थमें तृतीयान्त अक्षद्यूतादि शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे–अक्षद्यूतेन निर्वृत्तम्=आक्षद्यूतिकम्, अर्थात् वैर ॥

१५७० क्त्रेर्मम्नित्यम् ।४।४।२०॥

क्त्रिप्रत्ययान्तप्रकृतिकात्तृतीयान्तान्निर्वृत्तेर्थे मप्स्यान्नित्यम्। कृत्या निर्वृत्तं कृत्रिमम्। पक्त्रिमम् ॥ भावप्रत्ययान्तादिमब्वक्तव्यः ॥ * ॥ पाकेन निर्वृत्तं पाकिमम्। त्यागिमम् ॥

१५७०–क्त्रिप्रत्ययान्त प्रकृतिके तृतीयाविभक्त्यन्त प्रातिपदिकके उत्तर 'निर्वृत्तम्' इस अर्थमें नित्य मप् प्रत्यय हो, जैसे–कृत्या निर्वृत्तम्=कृत्रिमम्। पक्त्रिमम्।

भाववाच्यमें विहित प्रत्ययान्त शब्दके उत्तर इमप् प्रत्यय हो * जैसे–पाकेन निर्वृत्तम्=पाकिमम्। त्यागिमम् ॥

१५७१ अपमित्ययाचिताभ्यां कक्कनौ ।४।४।२१॥

अपमित्येति ल्यबन्तम्। अपमित्य निर्वृत्तम् आपमित्यकम्। याचितेन निर्वृत्तं याचितकम् ॥

१५७१–अपमित्य और याचित शब्दके उत्तर क्रमसे कक् और कन् प्रत्यय हो, अपमित्य शब्द ल्यप्प्रत्ययान्त है, इस कारण इस स्थानमें तृतीयान्तके उत्तर उक्त प्रत्यय न होकर प्रथमान्तके उत्तर होगा, जैसे–अपमित्य निर्वृत्तम्=आपमित्यकम्। याचितेन निर्वृत्तम्=याचितकम् ॥

१५७२ संसृष्टे ।४।४।२२॥

दध्ना संसृष्टं दाधिकम् ॥

१५७२–'संसृष्टम्' इस अर्थमें तृतीयान्त शब्दके उत्तर ठक् प्रत्यय हो, जैसे–दध्ना संसृष्टम्=दाधिकम् ॥

१५७३ चूर्णादिनिः ।४।४।२३॥

चूर्णैः संसृष्टाश्चूर्णिनोऽपूपाः ॥

१५७३–'संसृष्टम्' इस अर्थमें तृतीयान्त चूर्ण शब्दके उत्तर इनि प्रत्यय हो, जैसे–चूर्णैः संसृष्टाः=चूर्णिनः अपूपाः ॥

१५७४ लवणाल्लुक् ।४।४।२४॥

लवणेन संसृष्टो लवणः सूपः। लवणं शाकम्॥

१५७४–'संसृष्टम्' इस अर्थमें तृतीयान्त लवण शब्दके उत्तर उक्त प्रत्ययका लुक् हो, जैसे–लवणेन संसृष्टः=लवणः, अर्थात् सूपः। लवणं शाकम् ॥

१५७५ मुद्गादण् ।४।४।२५॥

मौद्ग ओदनः ॥

१५७५–'संसृष्टम्' इस अर्थमें तृतीयान्त मुद्ग शब्दके उत्तर अण् प्रत्यय हो, जैसे–मुद्गेन संसृष्टः=मौद्गः, अर्थात् ओदन ॥

१५७६ व्यञ्जनैरुपसिक्ते ।४।४।२६॥

ठक्। दध्ना उपसिक्तं दाधिकम् ॥

१५७६–उपसिक्त अर्थ होनेपर व्यञ्जनवाचक तृतीयान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे–दध्ना उपसिक्तम्=दाधिकम् ॥

१५७७ ओजःसहोऽम्भसा वर्तते ।४।४।२७॥

ओजसा वर्तते औजसिकः शूरः। साहसिकश्चौरः। आम्भसिको मत्स्यः ॥

१५७७–'वर्तते' इस अर्थमें तृतीयान्त ओजस्, सहस् और अम्भस् शब्दके उत्तर ठक् प्रत्यय हो, जैसे–ओजसा वर्तते=औजसिकः, अर्थात् शूर। साहसिकः, अर्थात् चौर। आम्भसिकः, अर्थात् मत्स्य ॥

१५७८ तत्प्रत्यनुपूर्वमीपलोमकूलम् । ४ । ४ । २८ ॥

द्वितीयान्तादस्माद्वर्तत इत्यस्मिन्नर्थे ठक् स्यात् । क्रियाविशेषणत्वाद्द्वितीया । प्रतीपं वर्तते प्रातीपिकः । आन्वीपिकः । प्रातिलोमिकः । आनुलोमिकः । प्रातिकूलिकः । आनुकूलिकः ॥

१५७८—द्वितीयान्त प्रति, अनुपूर्वक ईप, लोम और कूल शब्दके उत्तर 'वर्त्तते' इस अर्थमें ठक् प्रत्यय हो, इस स्थलमें क्रियाविशेषणमें द्वितीया हुई है, जैसे—प्रतीपं वर्त्तते=प्रातीपिकः । आन्वीपिकः । प्रातिलोमिकः । आनुलोमिकः । प्रातिकूलिकः । आनुकूलिकः ॥

१५७९ परिमुखं च । ४ । ४ । २९ ॥

परिमुखं वर्तते पारिमुखिकः । चात्पारिपार्श्विकः ॥

१५७९—द्वितीयान्त परिमुख शब्दके उत्तर ' वर्त्तते ' इस अर्थमें ठक् प्रत्यय हो, जैसे—परिमुखं वर्त्तते=पारिमुखिकः । चकारसे ' पारिपार्श्विकः ' यह पद भी सिद्ध हुआ ॥

१५८० प्रयच्छति गर्ह्यम् । ४ । ४ । ३० ॥

द्विगुणार्थं द्विगुणं तत्प्रयच्छति द्वैगुणिकः । त्रैगुणिकः ॥ वृद्धेर्वृधुषिभावो वक्तव्यः ॥ * ॥ वार्धुषिकः ॥

१५८०—'प्रयच्छति ' इस अर्थमें गर्ह्यवाचक द्वितीयान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे—द्विगुणार्थम्—द्विगुणम्, तत्प्रयच्छति=द्वैगुणिकः । त्रैगुणिकः ।

वृद्धि शब्दके स्थानमें वृधुषिभाव (वृधुषि आदेश) हो * जैसे—वार्धुषिकः ॥

१५८१ कुसीददशैकादशात् ष्ठन्ष्ठचौ । ४ । ४ । ३१ ॥

गर्ह्यार्थाभ्यामाभ्यामेतौ स्तः प्रयच्छतीत्यर्थे । कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं तत्प्रयच्छतीति कुसीदिकः । कुसीदिकी । एकादशार्थत्वादेकादश ते च ते वस्तुतो दश चेति विग्रहेऽकारः समासान्त इहैव सूत्रे निपात्यते । दशैकादशिकः । दशैकादशिकी । दशैकादशान्प्रयच्छतीत्युत्तमर्ण एवेहापि तद्धितार्थः ॥

१५८१—गर्ह्यार्थक कुसीद और दशैकादश शब्दके उत्तर ' प्रयच्छति ' इस अर्थमें क्रमसे ष्ठन् और ष्ठच् प्रत्यय हो, कुसीद शब्दसे वृद्धि जानना, तदर्थ द्रव्यको भी कुसीद कहते हैं, तत्प्रयच्छति, अर्थात् वह जो दान करे उसको ' कुसीदिकः ' कहते हैं । कुसीदिकी । एकादशार्थत्वके कारण एकादश ते च ते दश च, इस विग्रहमें समासान्त अकार इस सूत्रमें ही निपातनसे सिद्ध हुआहै, जैसे—दशैकादशिकः । दशैकादशिकी । ' दशैकादशान् प्रयच्छति ' इस अर्थमें तद्धितार्थ उत्तमर्ण ही है, अधमर्ण नहीं ॥

१५८२ उञ्छति । ४ । ४ । ३२ ॥

बदराण्युञ्छति बादरिकः ॥

१५८२—उञ्छति अर्थात् भूमिमें गिरे हुए शस्यादिको एक एक करके इकट्ठा करताहै, इस अर्थमें द्वितीयान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे—बदराण्युञ्छति, इस बाक्यमें बादरिकः ॥

१५८३ रक्षति । ४ । ४ । ३३ ॥

समाजं रक्षति सामाजिकः ॥

१५८३—'रक्षति ' इस अर्थमें द्वितीयासमर्थ प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे—समाजं रक्षति, इस विग्रहमें सामाजिकः ॥

१५८४ शब्ददर्दुरं करोति । ४ । ४ । ३४ ॥

शब्दं करोति शाब्दिकः । दार्दुरिकः ॥

१५८४—द्वितीयान्त शब्द और दर्दुर शब्दके उत्तर 'करोति' इस अर्थमें ठक् प्रत्यय हो, जैसे—शब्दं करोति=शाब्दिकः । दार्दुरिकः । दर्दुर शब्दसे भाण्ड जानना " दर्दुरस्तोयदे भेके वाद्ये भाण्डादिभेदयोः " ॥

१५८५ पक्षिमत्स्यमृगान्हन्ति ४ । ४ । ३५ ॥

स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणं मत्स्यपर्यायेषु मीनस्यैव । पक्षिणो हन्ति पाक्षिकः । शाकुनिकः । मायूरिकः । मात्स्यिकः । मैनिकः । शाकुलिकः । मार्गिकः । हारिणिकः । सारङ्गिकः ॥

१५८५—'हन्ति ' इस अर्थमें द्वितीयान्त पक्षिवाचक, मत्स्यवाचक और मृगवाचक शब्दोंके उत्तर ठक् प्रत्यय हो, पक्ष्यादि शब्दसे स्वरूप और उनके पर्याय और विशेषका ग्रहण है, परन्तु मत्स्यपर्यायके मध्यमें मीन शब्दका ही ग्रहण है, जैसे—पक्षिणो हन्ति=पाक्षिकः । शाकुनिकः । मायूरिकः । मात्स्यिकः । मैनिकः । शाकुलिकः । मार्गिकः । हारिणिकः । सारङ्गिकः ॥

१५८६ परिपन्थं च तिष्ठति । ४ । ४ । ३६ ॥

अस्माद्द्वितीयान्तात्तिष्ठति हन्ति चेत्यर्थे ठक् स्यात् । पन्थानं वर्जयित्वा व्याप्य वा तिष्ठति पारिपन्थिकश्चौरः । परिपन्थं हन्ति पारिपन्थिकः ॥

१५८६—द्वितीयान्त परिपन्थ शब्दके उत्तर ' तिष्ठति ' और ' हन्ति ' इस अर्थमें ठक् प्रत्यय हो, जैसे—पन्थानं वर्जयित्वा व्याप्य वा तिष्ठति, इस वाक्यमें पारिपन्थिकः चौरः । परिपन्थं हन्ति=पारिपन्थिकः ॥

१५८७ माथोत्तरपदपदव्यनुपदं धावति । ४ । ४ । ३७ ॥

दण्डाकारो माथः पन्था दण्डमाथः । दण्ड-

माथं धावति दाण्डमाथिकः । पादविकः । आनुपदिकः ॥

१५८७–माथोत्तरपद, अर्थात् माथ शब्द उत्तर पद है जिसका ऐसा जो शब्द और पदवी शब्द और अनुपद शब्दके उत्तर 'धावति' इस अर्थमें ठक् प्रत्यय हो, माथ शब्दसे पन्था जानना, जैसे–दण्डाकारो माथः पन्थाः, इस विग्रहमें दण्डमाथः, दण्डमाथं धावति, इस विग्रहमें दाण्डमाथिकः । पादविकः । आनुपदिकः ॥

१५८८ आक्रन्दाट्ठञ्च । ४ । ४ । ३८ ॥

अस्माट्ठञ् स्यात् चाट्ठक् धावतीत्यर्थे । आक्रन्दं दुःखिनां रोदनस्थानं धावति आक्रन्दिकः ॥

१५८८–द्वितीयान्त आक्रन्द शब्दके उत्तर 'धावति' इस अर्थमें ठञ् और चकारसे ठक् प्रत्यय हो, जैसे–आक्रन्दं–दुःखिनां रोदनस्थानं धावति, इस विग्रहमें आक्रन्दिकः, अर्थात् आर्त्तत्राता ॥

१५८९ पदोत्तरपदं गृह्णाति ।४।४।३९॥

पूर्वपदं गृह्णाति पौर्वपदिकः । औत्तरपदिकः ॥

१५८९–द्वितीयान्त पदोत्तर पद, अर्थात् पद शब्द अन्तमें है जिसके ऐसे शब्दके उत्तर 'गृह्णाति' इस अर्थमें ठक् प्रत्यय हो, जैसे–पूर्वपदं गृह्णाति=पौर्वपदिकः । औत्तरपदिकः ॥

१५९० प्रतिकण्ठार्थललामं च।४।४।४०।

एभ्यो गृह्णात्यर्थे ठक् स्यात् । प्रतिकण्ठं गृह्णाति प्रातिकण्ठिकः । आर्थिकः । लालामिकः॥

१५९०–'गृह्णाति' इस अर्थमें प्रतिकण्ठ, अर्थ, ललाम शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे–प्रतिकण्ठं गृह्णाति, इस विग्रहमें प्रातिकण्ठिकः । आर्थिकः । लालामिकः ॥

१५९१ धर्मं चरति । ४ । ४ । ४१ ॥

धार्मिकः ॥ अधर्माच्चेति वक्तव्यम् ॥ * ॥ आधर्मिकः ॥

१५९१–द्वितीयान्त धर्म शब्दके उत्तर 'चरति' इस अर्थमें ठक् प्रत्यय हो, जैसे–धर्मं चरति=धार्मिकः ।

अधर्म शब्दके उत्तर भी ठक् प्रत्यय हो*जैसे–आधर्मिकः। इस स्थलमें चरति शब्दसे अनुष्ठानमात्र अर्थ नहीं किन्तु स्वारसिकी प्रवृत्तिरूप अर्थ जानना, इसलिये अतिदुराचारी व्यक्ति कदाचित् दैववशसे धर्मानुष्ठानमें प्रवृत्त होनेपर भी वह धार्मिक नहीं कहेजातेहैं, और दैवात् अधर्ममें प्रवृत्त धार्मिक व्यक्ति भी अधार्मिक नहीं कहेजातेहैं ॥

१५९२ प्रतिपथमेति ठंश्च । ४ ।४।४२॥

प्रतिपथमेति प्रातिपथिकः ॥

१५९२–'एति' इस अर्थमें द्वितीयान्त प्रतिपथ शब्दके उत्तर ठन् प्रत्यय हो, जैसे–प्रतिपथमेति, इस विग्रहमें प्रातिपथिकः ॥

१५९३ समवायान्समवैति ।४।४।४३॥

सामवायिकः । सामूहिकः ॥

१५९३–द्वितीयान्त समवाय अर्थात् समूहवाचक शब्दके उत्तर 'समवैति' इस अर्थमें ठक् प्रत्यय हो, जैसे–समवायान् समवैति=सामवायिकः । सामूहिकः ॥

१५९४ परिषदो ण्यः । ४ । ४ । ४४ ॥

परिषदं समवैति पारिषद्यः ॥

१५९४–'समवैति' इस अर्थमें द्वितीयान्त परिषद् शब्दके उत्तर ण्य प्रत्यय हो, जैसे–परिषदं समवैति, इस विग्रहमें पारिषद्यः ॥

१५९५ सेनाया वा । ४ । ४ । ४५ ॥

ण्यः स्यात्पक्षे ठक् । सैन्याः । सैनिकाः ॥

१५९५–उक्त अर्थमें द्वितीयान्त सेना शब्दके उत्तर विकल्प करके ण्य प्रत्यय हो,विकल्प पक्षमें ठक् प्रत्यय होगा,जैसे–सेनाः समवयन्ति=सैन्याः, सैनिकाः ।

१५९६ संज्ञायां ललाटकुक्कुट्यौ पश्यति । ४ । ४ । ४६ ॥

ललाटं पश्यति लालाटिकः सेवकः । कुक्कुटीशब्देन तत्पातार्हः स्वल्पदेशो लक्ष्यते । कौक्कुटिको भिक्षुः ॥

१५९६–'पश्यति' इस अर्थमें संज्ञा होनेपर द्वितीयान्त ललाट और कुक्कुटी शब्दके उत्तर ठक् प्रत्यय हो,जैसे–ललाटं पश्यति=लालाटिकः,अर्थात् सेवक । कुक्कुटी शब्दसे कुक्कुटीके पतनयोग्य स्वल्प स्थान जानना, कौक्कुटिकः,अर्थात् भिक्षुक । कौक्कुटिक शब्दसे संन्यासी जानना, क्योंकि, संन्यासी कुक्कुटीपतनयोग्य अर्थात् पदन्यासपरिमितमात्र देशको देखता देखता चलताहै, और स्थानमें दृष्टि नहीं करताहै ॥

१५९७ तस्य धर्म्यम् । ४ । ४ । ४७ ॥

आपणस्य धर्म्यमापणिकम् ॥

१५९७–'धर्म्यम्' इस अर्थमें षष्ठयन्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे–आपणस्य धर्म्यम्, इस वाक्यमें आपणिकम् ॥

१५९८ अण् महिष्यादिभ्यः।४।४।४८॥

महिष्या धर्म्यं माहिषम् । याजमानम् ॥

१५९८–'धर्म्यम्' इस अर्थमें षष्ठयन्त महिष्यादि शब्दोंके उत्तर अण् प्रत्यय हो, जैसे–महिष्या धर्म्यम्=माहिषम् । याजमानम् ॥

१५९९ ऋतोऽञ् । ४ । ४ । ४९ ॥

यातुर्धर्म्यं यात्रम् ॥ नराच्चेति वक्तव्यम्॥*॥ नरस्य धर्म्या नारी ॥ विशसितुरिड्लोपश्चाञ्च वक्तव्यः ॥ * ॥ विशसितुर्धर्म्यं वैशस्त्रम् ॥ विभाजयितुर्णिलोपश्चाञ्च वाच्यः ॥ * ॥ विभाजयितुर्धर्म्यं वैभाजित्रम् ॥

१५९९-'धर्म्यम्' इस अर्थमें षष्ठ्यन्त ऋकारान्त शब्दके उत्तर अञ् प्रत्यय हो, जैसे-यातुर्धर्म्यम्=यात्रम् ।

नर शब्दके उत्तर अञ् प्रत्यय हो * जैसे--नरस्य धर्म्या=नारी ।

विशसितृ शब्दावयव इट्का लोप और उसके उत्तर अञ् प्रत्यय भी हो * जैसे-विशसितुर्धर्म्यम्=वैशस्त्रम् ।

विभाजयितृशब्दावयव णिका लोप और अञ् प्रत्यय हो * जैसे-विभाजयितुर्धर्म्यम्=वैभाजित्रम् ॥

१६०० अवक्रयः । ४ । ४ । ५० ॥

षष्ठ्यंताट्ठक् स्यादवक्रयेऽर्थे । आपणस्यावक्रय आपणिकः । राजग्राह्यं द्रव्यमवक्रयः ॥

१६००-अवक्रय अर्थमें षष्ठीविभक्त्यन्त शब्दके उत्तर ठक् प्रत्यय हो, जैसे-आपणस्य अवक्रयः=आपणिकः । राजग्राह्य द्रव्यका नाम अवक्रय है ॥

१६०१ तदस्य पण्यम् । ४ । ४ । ५१॥

अपूपाः पण्यमस्य आपूपिकः ॥

१६०१-'अस्य पण्यम्' इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-अपूपाः पण्यम् अस्य= आपूपिकः ॥

१६०२ लवणाट्ठञ् । ४ । ४ । ५२ ॥

लावणिकः ॥

१६०२-'अस्य पण्यम्' इस अर्थमें प्रथमान्त लवण शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-लावणिकः ॥

१६०३ किसरादिभ्यः ष्ठन् ।४।४।५३॥

किसरं पण्यमस्य किसरिकः । षित्त्वान्ङीष् । किसरिकी । किसर, उशीर, नलद,-इत्यादि- किसरादयः सर्वे सुगन्धिद्रव्यविशेषवाचिनः ॥

१६०३-'अस्य पण्यम्' इस अर्थमें प्रथमान्त किसरादि शब्दोंके उत्तर ष्ठन् प्रत्यय हो, जैसे-किसरं पण्यमस्य=किसरिकः । षकार इत् होनेके कारण स्त्रीलिङ्गमें ङीष् प्रत्यय होगा, जैसे-किसरिकी । किसर, उशीर, नलद इत्यादि किसरादि सब शब्द सुगन्धिद्रव्यविशेषवाचक हैं ॥

१६०४ शलालुनोऽन्यतरस्याम् । ४ । ४ । ५४ ॥

ष्ठन् स्यात् पक्षे ठक् । शलालुकः । शलालुकी । शालालुकः । शालालुकी । शलालुः सुगन्धिद्रव्यविशेषः ॥

१६०४-उक्त अर्थमें शलालु शब्दके उत्तर विकल्प करके ठन् प्रत्यय हो, विकल्प पक्षमें ठक् प्रत्यय होगा, जैसे- शलालुकः, शलालुकी । शालालुकः, शालालुकी । शलालुशब्दसे सुगन्धिद्रव्यविशेष जानना ॥

१६०५ शिल्पम् । ४ । ४ । ५५ ॥

मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः ॥

१६०५-'शिल्पमस्य'इस अर्थमें प्रथमान्त समर्थ प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-मृदङ्गवादनं शिल्पमस्य= मार्दङ्गिकः, यहां उत्तर पदका लोप इसलिये माना है कि, मृदङ्ग बजानेवालेका ही बोध हो,बनानेवालेका नहीं ॥

१६०६ मड्डुकझर्झरादणन्यतरस्याम् । ४ । ४ । ५६ ॥

मड्डुकवादनं शिल्पमस्य माड्डुकः । माड्डुकिकः । झार्झरः । झार्झरिकः ॥

१६०६-मड्डुक और झर्झर शब्दके उत्तर 'शिल्पमस्य' इस अर्थमें विकल्प करके अण् प्रत्यय हो, पक्षमें ठक् होगा, जैसे-मड्डुकवादनं शिल्पमस्य=माड्डुकः, माड्डुकिकः । झार्झरः, झार्झरिकः ॥

१६०७ प्रहरणम् । ४ । ४ । ५७ ॥

तदस्येत्येव । असिः प्रहरणमस्य आसिकः । धानुष्कः ॥

१६०७-'अस्य प्रहरणम्' इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-असिः प्रहरणमस्य=आसिकः । धानुष्कः ॥

१६०८ परश्वधाट्ठञ्च । ४ । ४ । ५८ ॥

पारश्वधिकः ॥

१६०८-'अस्य प्रहरणम्' इस अर्थमें प्रथमान्त परश्वधादि शब्दके उत्तर ठञ् और चकारसे ठक् प्रत्यय हो, जैसे- पारश्वधिकः ॥

१६०९ शक्तियष्ट्योरीकक् ।४ ।४।५९ ॥

शाक्तीकः । याष्टीकः ॥

१६०९-उक्त अर्थमें शक्ति और यष्टि शब्दके उत्तर ईकक् प्रत्यय हो, जैसे-शक्तिः प्रहरणमस्य=शाक्तीकः । याष्टीकः ॥

१६१० अस्ति नास्ति दिष्टं मतिः । ४ । ४ । ६० ॥

तदस्येत्येव । अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः । नास्तीति मतिर्यस्य स नास्तिकः । दिष्टमिति मतिर्यस्य स दैष्टिकः ॥

१६१०-अस्ति मतिरस्य, नास्ति मतिरस्य, दिष्टं मतिरस्य, इन अर्थोंमें क्रमसे प्रथमान्त अस्ति, नास्ति और दिष्ट शब्दके उत्तर ठक् प्रत्यय हो, जैसे-अस्ति परलोक इत्येवं मतिर्यस्य सः=आस्तिकः । नास्तीति मतिर्यस्य सः=नास्तिकः । दिष्टमिति मतिर्यस्य सः=दैष्टिकः ॥

१६११ शीलम् । ४ । ४ । ६१ ॥

अपूपभक्षणं शीलमस्य आपूपिकः ॥

१६११-'शीलमस्य' इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-अपूपभक्षणं शीलमस्य= आपूपिकः ॥

१६१२ छत्रादिभ्यो णः । ४ । ४ । ६२ ॥

गुरोर्दोषाणामावरणं छत्रं तच्छीलमस्य छात्रः ॥

१६१२–प्रथमान्त छत्रादि शब्दोंके उत्तर 'शीलमस्य' इस अर्थमें ण प्रत्यय हो, जैसे–गुरोर्दोषाणामावरणं छत्रं तत् शीलमस्य=छात्रः ॥

१६१३ कार्मस्ताच्छील्ये । ६ । ४ । १७२ ॥

कार्म इति ताच्छील्ये णे टिलोपो निपात्यते। कर्मशीलः कार्मः । नस्तद्धित इत्येव सिद्धे अण्कार्यं ताच्छीलिके णेपि। तेन चौरी तापसीत्यादि सिद्धम् । ताच्छील्ये किम् । कार्मणः ॥

१६१३–तच्छील अर्थमें ण प्रत्यय परे रहते कर्मन् शब्दके निपातनसे टिका लोप हो, जैसे–कर्मशीलः कार्म्मः, अर्थात् कर्मशीलः ।

'कार्मः' यहां "नस्तद्धिते ६७९" इस सूत्रसे टिलोप सिद्ध होनेपर प्रकृत सूत्रसे टिलोपविधानका क्या प्रयोजन ? इसपर कहतेहैं कि, यही टिलोपविधान व्यर्थ होकर ज्ञापन करताहै कि, ताच्छीलिक ण प्रत्यय परे रहते भी अण्प्रत्ययप्रयुक्त कार्य्य हो, इस ज्ञापनसे "अन्" इस सूत्रसे प्रकृतिभाव होजाता, इसलिये सूत्र है । फल यह हुआ कि, 'चौरी, तापसी'इत्यादि पद सिद्ध हुए,नहीं तो "टिड्ढाण०" इससे ङीप् नहीं होता । ताच्छील्यार्थ न होनेपर टिका लोप न होगा, जैसे–कार्मणः ॥

१६१४ कर्माऽध्ययने वृत्तम् । ४ । ४ । ६३ ॥

प्रथमान्तात्षष्ठ्यर्थे ठक् स्यादध्ययने वृत्ता या क्रिया सा चेत्प्रथमान्तस्यार्थः। ऐकान्यिकः। यस्याध्ययने प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारणरूपं स्खलितमेकं जातं सः ॥

१६१४–अध्ययनमें जो कर्म निष्पन्न हो वह यदि प्रथमान्तका अर्थ हो तो षष्ठ्यर्थमें प्रथमान्त पदके उत्तर ठक् प्रत्यय हो, जैसे–एकमन्यत् कर्म वृत्तम् अध्ययने अस्य सः=ऐकान्यिकः । अध्ययनमें प्रवृत्त जिसको परीक्षाकालमें विपरीत-उच्चारणरूप एक स्खलित हुआहै, उसको ऐकान्यिक कहतेहैं ॥

१६१५ बह्वच्पूर्वपदाट्ठच् । ४ । ४ । ६४ ॥

प्राग्विषये । द्वादशान्यानि कर्माण्यध्ययने वृत्तान्यस्य द्वादशान्यिकः । द्वादशाऽपपाठा अस्य जाता इत्यर्थः ॥

१६१५–पूर्वसूत्रोक्त अर्थमें बहुत स्वरोंसे युक्त पूर्वपद रहते प्रथमान्त पदके उत्तर ठच् प्रत्यय हो, जैसे–द्वादशान्यानि कर्माणि अध्ययने प्रवृत्तानि अस्य=द्वादशान्यिकः, अर्थात् अध्ययनसमयमें जिसके बारह दूसरे कर्म उत्पन्न हों उसको द्वादशान्यिक कहतेहैं ॥

१६१६ हितं भक्षाः । ४ । ४ । ६५ ॥

अपूपभक्षणं हितमस्मै आपूपिकः ॥

१६१६–'अस्मै हितम्'इस अर्थमें प्रथमान्त समर्थ भक्ष्यवाचक शब्दके उत्तर ठक् प्रत्यय हो, जैसे–अपूपभक्षणं हितमस्मै=आपूपिकः ॥

१६१७ तदस्मै दीयते नियुक्तम् । ४ । ४ । ६६ ॥

अग्रभोजनं नियतं दीयते अस्मै आग्रभोजनिकः ॥

१६१७–'अस्मै दीयते नियुक्तम्' इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे–अग्रभोजनं नियतं दीयतेऽस्मै, इस विग्रहमें आग्रभोजनिकः ॥

१६१८ श्राणामांसौदनाट्टिठन् । ४ । ४ । ६७ ॥

श्राणा नियुक्तं दीयतेऽस्मै श्राणिकः । श्राणिकी । मांसौदनग्रहणं सङ्घातविगृहीतार्थम् । मांसौदनिकः । मांसिकः । औदनिकः ॥

१६१८–'नियुक्तं दीयतेऽस्मै' इस अर्थमें प्रथमान्त श्राणा, मांस और ओदन शब्दके उत्तर टिठन् प्रत्यय हो, जैसे–श्राणा (यवागू) नियुक्तं दीयतेऽस्मै, इस विग्रहमें श्राणिकः । श्राणिकी । मांसौदन शब्दका ग्रहण संघातार्थ और विगृहीतार्थ, अर्थात् मांसौदन शब्द और मांस और ओदन शब्दके उत्तर प्रत्ययविधानके निमित्त है, जैसे–मांसौदनिकः । मांसिकः । औदनिकः ॥

१६१९ भक्तादणन्यतरस्याम् । ४ । ४ । ६८ ॥

पक्षे ठक् । भक्तमस्मै नियुक्तं दीयते भाक्तः। भाक्तिकः ॥

१६१९–प्रथमान्त भक्त शब्दके उत्तर 'अस्मै नियुक्तं दीयते' इस अर्थमें विकल्प करके अण् प्रत्यय हो, विकल्प पक्षमें ठक् प्रत्यय होगा, जैसे–भक्तमस्मै नियुक्तं दीयते, इस विग्रहमें भाक्तः, भाक्तिकः ॥

१६२० तत्र नियुक्तः । ४ । ४ । ६९ ॥

आकरे नियुक्त आकरिकः ॥

१६२०–'नियुक्तः' इस अर्थमें सप्तम्यन्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे–आकरे नियुक्तः=आकरिकः ॥

१६२१ अगारान्ताट्ठन् । ४ । ४ । ७० ॥

देवागारे नियुक्तो देवागारिकः ॥

१६२१–अगार शब्द अन्तमें रहते 'नियुक्तः' इस अर्थमें सप्तम्यन्त प्रातिपदिकके उत्तर ठन् प्रत्यय हो, जैसे–देवागारे नियुक्तः–देवागारिकः ॥

१६२२ अध्यायिन्यदेशकालात् । ४ । ४ । ७१ ॥

निषिद्धदेशकालवाचकाट्ठक् स्यादध्येतरि ।

श्मशानेऽधीते श्माशानिकः । चतुर्दश्यामधीते चातुर्दशिकः ॥

१६२२-अध्यायिनि, अर्थात् अध्ययनकर्त्ता अर्थमें सप्तम्यन्त निषिद्ध देश और कालवाचक शब्दके उत्तर ठक् प्रत्यय हो, जैसे-श्मशाने अधीते=श्माशानिकः । चतुर्दश्यामधीते=चातुर्दशिकः ॥

१६२३ कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति । ४ । ४ । ७२ ॥

तत्रेत्येव । वंशकठिने व्यवहरति वांशकठिनिकः । वंशा वेणवः कठिना यस्मिन्देशे स वंशकठिनस्तस्मिन्देशे या क्रिया यथानुष्ठेया तां तथैवानुतिष्ठतीत्यर्थः । प्रास्तारिकः । सांस्थानिकः ॥

१६२३-सप्तम्यन्त-कठिन शब्द अन्तमें है जिसके ऐसे शब्द, प्रस्तार शब्द और संस्थान शब्दके उत्तर 'व्यवहरति' इस अर्थमें ठक् प्रत्यय हो, जैसे-वंशकठिने व्यवहरति, इस विग्रहमें वांशकठिनिकः । वंशा वेणवः कठिना यस्मिन्देशे स वंशकठिनस्तस्मिन् देशे या क्रिया यथानुष्ठेया तां तथैव अनुतिष्ठतीत्यर्थः (जिस देशमें वंश अर्थात् वेणु कठिन हों उसको वंशकठिन कहतेहैं, उस देशमें जो क्रिया जिस प्रकार अनुष्ठित होनी उचित है, उसको जो उसी प्रकार अनुष्ठान करै उसको 'वांशकठिनिक' कहतेहैं) । प्रस्तारे व्यवहरति=प्रास्तारिकः । सांस्थानिकः ॥

१६२४ निकटे वसति । ४ । ४।७३ ॥

नैकटिको भिक्षुः ॥

१६२४-'वसति' इस अर्थमें सप्तम्यन्त निकट शब्दसे ठक् प्रत्यय हो,जैसे-निकटे वसति=नैकटिकः,अर्थात् भिक्षुक॥

१६२५ आवसथात् ष्ठल् । ४ ।४।७४ ॥

आवसथे वसति आवसथिकः।षित्त्वान्ङीष् । आवसथिकी ॥

आकर्षात्पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च ।
आवसथात्किसरादेः षितः षडेते ठगधिकारे॥

षडिति सूत्रषट्केन विहिता इत्यर्थः।प्रत्ययास्तु सप्त ॥

॥ इति ठकोवधिः समाप्तः ॥

१६२५-'वसति' इस अर्थमें सप्तम्यन्त आवसथ शब्दके उत्तर ष्ठल् प्रत्यय हो, जैसे-आवसथे वसति=आवसथिकः । ष इत् होनेके कारण स्त्रीलिङ्गमें ङीष् होगा, जैसे-आवसथिकी । ठगधिकारके मध्यमें "आकर्षात् ष्ठल् १५५७", "पर्पादिभ्यः ष्ठन् १५५८", "भस्त्रादिभ्यः ष्ठन् १५६६", "कुसीददशैकादशात्ष्ठन्ष्ठचौ १५८१", "किसरादेः ष्ठन् १६०३", "आवसथात् ष्ठल् १६२५" इन छै सूत्रोंसे सात षित् प्रत्यय विहित हुएहैं ॥

॥ इति ठगधिकारः समाप्तः ॥

अथ प्राग्घितीयप्रकरणम् ।

१६२६ प्राग्घिताद्यत् । ४ । ४ । ७५ ॥

तस्मै हितमित्यतः प्राक् यदधिक्रियते ॥

१६२६-"तस्मै हितम् १६६५" इस सूत्रके पूर्वपर्यंत यत् प्रत्ययका अधिकार है ॥

१६२७ तद्वहति रथयुगप्रासङ्गम् । ४ । ४ । ७६ ॥

रथं वहति रथ्यः । युग्यः । वत्सानां दमनकाले स्कन्धे काष्ठमासज्यते स प्रासङ्गः, तं वहति प्रासंग्यः ॥

१६२७-'वहति' इस अर्थमें द्वितीयान्त रथ, युग और प्रासङ्ग शब्दके उत्तर यत् प्रत्यय हो, जैसे-रथं वहति=रथ्यः । युग्यः । प्रासङ्गं वहति=प्रासङ्ग्यः । वत्सोंके दमन कालमें उनके स्कंधदेशमें जो काष्ठ आरोपित होताहै, उसको प्रासङ्ग कहतेहैं ॥

१६२८ धुरो यड्ढकौ । ४ । ४ । ७७ ॥

हलि चेति दीर्घे प्राप्ते ॥

१६२८-द्वितीयान्त धुर् शब्दके उत्तर यत् और ढक् प्रत्यय हो । "हलि च ३५४" इस सूत्रसे दीर्घकी प्राप्ति होनेपर-॥

१६२९ न भकुर्छुराम् । ८ । २ । ७९ ॥

भस्य कुर्छुरोश्चोपधाया दीर्घो न स्यात् । धुर्यः। धौरेयः ॥

१६२९-भसंज्ञक, कुर् और छुर् शब्दोंकी उपधाको दीर्घ न हो, जैसे-धुर्यः । धौरेयः ॥

१६३० खः सर्वधुरात् । ४ । ४ ।७८ ॥

सर्वधुरां वहतीति सर्वधुरीणः ॥

१६३०-'वहति' इस अर्थमें द्वितीयान्त सर्वधुरा शब्दके उत्तर ख प्रत्यय हो, जैसे-सर्वधुरां वहति=सर्वधुरीणः ॥

१६३१ एकधुराल्लुक् च । ४ ।४।७९॥

एकधुरां वहति एकधुरीणः । एकधुरः ॥

१६३१-द्वितीयान्त एकधुरा शब्दके उत्तर 'वहति' इस अर्थमें ख प्रत्यय हो और उसका पक्षमें लुक् हो, जैसे-एकधुरां वहति, इस विग्रहमें एकधुरीणः, एकधुरः ॥

१६३२ शकटादण् । ४ । ४ । ८० ॥

शकटं वहति शाकटो गौः ॥

१६३२-द्वितीयान्त शकट शब्दके उत्तर उक्त अर्थमें अण् प्रत्यय हो, जैसे-शकटं वहति=शाकटः, अर्थात् गौः ॥

१६३३ हलसीराट्ठक् । ४ । ४ । ८१ ॥

हलं वहति हालिकः । सैरिकः ॥

१६३३-'वहति' इस अर्थमें द्वितीयान्त हल और सीर शब्दके उत्तर ठक् प्रत्यय हो, जैसे-हलं वहति= हालिकः। सैरिकः ॥

१६३४ संज्ञायां जन्या। ४। ४। ८२॥

जनी वधूः, तां वहति प्रापयति जन्या ॥

१६३४-संज्ञा होनेपर द्वितीयान्त जनी शब्दके उत्तर उक्त अर्थमें यत् प्रत्यय हो, जैसे-जनी वधूः, तां वहति प्रापयति, इस विग्रहमें जन्या, अर्थात् मातृवयस्या ॥

१६३५ विध्यत्यधनुषा। ४। ४।८३॥

द्वितीयान्ताद्विध्यतीत्यर्थे यत्स्यान्न चेत्तत्र धनुः करणम्। पादौ विध्यन्ति पद्याः शर्कराः॥

१६३५-धनुष करण न होनेपर द्वितीयान्त पदके उत्तर 'विध्यति' इस अर्थमें यत् प्रत्यय हो, जैसे-पादौ बिध्यन्ति= पद्याः शर्कराः ॥

१६३६ धनगणं लब्धा। ४। ४।८४॥

तृन्नन्तमेतत्। धनं लब्धा धन्यः। गणं लब्धा गण्यः ॥

१६३६-लब्धा (लाभ करनेवाला) इस अर्थमें द्वितीयान्त धन और गण शब्दके उत्तर यत् प्रत्यय हो, लब्धा यह पद तृन्नन्त है, जैसे-धनं लब्धा=धन्यः। गणं लब्धा=गण्यः ॥

१६३७ अन्नाण्णः। ४। ४। ८५॥

अन्नं लब्धा आन्नः ॥

१६३७-द्वितीयान्त अन्न शब्दके उत्तर उक्त अर्थमें ण प्रत्यय हो, जैसे-अन्नं लब्धा=आन्नः ॥

१६३८ वशं गतः। ४। ४। ८६॥

वश्यः परेच्छानुचारी ॥

१३३८-गत अर्थमें द्वितीयान्त वश शब्दके उत्तर यत् प्रत्यय हो, जैसे-वशं गतः=वश्यः, अर्थात् दूसरेकी इच्छानुसार करनेवाला ॥

१३३९ पदमस्मिन्दृश्यम्। ४।४।८७॥

पद्यः कर्दमः। नातिशुष्क इत्यर्थः ॥

१६३९-'अस्मिन् दृश्यम्' इस अर्थमें प्रथमान्त पद शब्दके उत्तर यत् प्रत्यय हो, जैसे-पदमस्मिन् दृश्यम्=पद्यः, अर्थात् अनतिशुष्क कर्दम ॥

१६४० मूलमस्याऽऽबर्हि। ४।४।८८॥

आबर्हणमाबर्हः उत्पाटनं तदस्यास्तीत्याबर्हि मूलमाबर्हि येषां ते मूल्या मुद्गाः ॥

१६४०-प्रथमान्त आबर्हिउपाधिक मूल शब्दके उत्तर 'अस्य' ऐसे षष्ठ्यर्थमें यत् प्रत्यय हो, आबर्हणमाबर्हः अर्थात् उत्पाटन, उत्पाटन इसका है इस अर्थमें आबर्हि पद सिद्ध हुआ, पश्चात् मूलमाबर्हि येषाम्, इस विग्रहमें मूल्या मुद्गाः ॥

१६४१ संज्ञायां धेनुष्या। ४।४।८९॥

धेनुशब्दस्य षुगागमो यप्रत्ययश्च स्वार्थे निपात्यते संज्ञायाम्। धेनुष्या बन्धके स्थिता॥

१६४१-संज्ञा होनेपर धेनु शब्दके उत्तर स्वार्थमें निपातनसे षुगागम और य प्रत्यय हो, जैसे-धेनुष्या बन्धके स्थिता॥

१६४२ गृहपतिना संयुक्ते ञ्यः। ४। ४। ९०॥

गृहपतिर्यजमानस्तेन संयुक्तो गार्हपत्योऽग्निः॥

१६४२-तृतीयान्त गृहपति शब्दके उत्तर संयुक्त अर्थमें ञ्य प्रत्यय हो, गृहपति शब्दसे यजमान जानना, जैसे-गृहपतिना संयुक्तः=गार्हपत्योऽग्निः ॥

१६४३ नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्याऽऽनाम्यसमसमितसम्मितेषु। ४। ४। ९१॥

नावा तार्यं नाव्यम्। वयसा तुल्यो वयस्यः। धर्मेण प्राप्यं धर्म्यम्। विषेण वध्यो विष्यः। मूलेन आनाम्यं मूल्यम्। मूलेन समो मूल्यः। सीतया समितं सीत्यं क्षेत्रम्। तुलया संमितं तुल्यम् ॥

१६४३-तृतीयान्त नौ आदि शब्दोंके उत्तर तार्यादि अर्थोंमें यत् प्रत्यय हो, अर्थात् तार्य अर्थमें नौ शब्दके उत्तर, तुल्य अर्थमें वयस् शब्दके उत्तर, प्राप्य अर्थमें धर्म शब्दके उत्तर, वध्य अर्थमें विष शब्दके उत्तर, आनाम्य अर्थमें मूल शब्दके उत्तर, सम अर्थमें मूल शब्दके उत्तर, और समित अर्थमें सीता शब्दके उत्तर, और सम्मित अर्थमें तुला शब्दके उत्तर यत् प्रत्यय हो, जैसे-नावा तार्यम्=नाव्यम्। वयसा तुल्यः=वयस्यः। धर्मेण प्राप्यम्=धर्म्यम्। विषेण वध्यः=विष्यः। मूलेन आनाम्यम्=मूल्यम्। मूलेन समः=मूल्यः। सीतया समितम्=सीत्यम्, अर्थात् क्षेत्र। तुलया सम्मितम्=तुल्यम् ॥

१६४४ धर्मपथ्यर्थन्यायादनपेते। ४।४।९२॥

धर्मादनपेतं धर्म्यम्। पथ्यम्। अर्थ्यम्। न्याय्यम् ॥

१६४४-अनपेत अर्थमें पंचम्यन्त समर्थ धर्म, पथिन्, अर्थ और न्याय शब्दके उत्तर यत् प्रत्यय हो, जैसे-धर्मादनपेतम्= धर्म्यम्। पथ्यम्। अर्थ्यम्। न्याय्यम् ॥

१६४५ छन्दसो निर्मिते।४।४।९३॥

छन्दसा निर्मितं छन्दस्यम्। इच्छया कृतमित्यर्थः ॥

१६४५-निर्मित अर्थमें तृतीयान्त समर्थ छन्दस् शब्दके उत्तर यत् प्रत्यय हो, जैसे-छन्दसा निर्मितम्=छन्दस्यम्, अर्थात् इच्छासे किया हुआ ॥

१६४६ उरसोऽण् च ।४।४।९४॥

चाद्यत् । उरसा निर्मितः पुत्र औरसः । उरस्यः ॥

१६४६-निर्मित अर्थमें तृतीयान्त समर्थ उरस् शब्दके उत्तर अण् और चकारसे यत् प्रत्यय हो, जैसे-उरसा निर्मितः=औरसः पुत्रः, उरस्यः ॥

१६४७ हृदयस्य प्रियः ।४।४।९५ ॥

हृद्यो देशः । हृदयस्य हृल्लेखेति हृदादेशः ॥

१६४७-प्रिय अर्थमें षष्ठ्यन्त समर्थ हृदय शब्दके उत्तर यत् प्रत्यय हो, जैसे-हृदयस्य प्रियः=हृद्यः, अर्थात् देशः, यहां हृदय शब्दके स्थानमें "हृदयस्य हृल्लेखयदण० ९८८" इस सूत्रसे हृद् आदेश हुआहै ॥

१६४८ बन्धने चर्षौ ।४।४।९६ ॥

हृदयशब्दात् षष्ठ्यन्ताद्बन्धने यत्स्याद्वेदेऽभिधेये । हृदयस्य बन्धनं हृद्यो वशीकरणमन्त्रः ॥

१६४८-बंधनार्थमें वेद वाच्य होनेपर षष्ठ्यन्त हृदय शब्दके उत्तर यत् प्रत्यय हो,जैसे-हृदयस्य बन्धनम्=हृद्यः, अर्थात् वशीकरण मंत्र ॥

१६४९ मतजनहलात्करणजल्पकर्षेषु ।४।४।९७॥

मतं ज्ञानं तस्य करणं भावः साधनं वा मत्यम् । जनस्य जल्पो जन्यः । हलस्य कर्षो हल्यः ॥

१६४९-करण, जल्प और कर्ष अर्थमें क्रमसे मत, जन और हल शब्दके उत्तर यत् प्रत्यय हो, जैसे-मतं ज्ञानं तस्य करणं भावः साधनं वा=मत्यम् । जनस्य जल्पः=जन्यः । हलस्य कर्षः=हल्यः ॥

१६५० तत्र साधुः ।४।४।९८॥

अग्रे साधुः अग्र्यः । सामसु साधुः सामन्यः। ये चाभावकर्मणोरिति प्रकृतिभावः । कर्मण्यः । शरण्यः ॥

१६५०-'साधुः' इस अर्थमें सप्तम्यन्त समर्थ प्रातिपदिकके उत्तर यत् प्रत्यय हो, जैसे-अग्रे साधुः अग्र्यः"ये चाभावकर्मणोः ११५४" इस सूत्रसे प्रकृतिभाव होगा, जैसे-सामसु साधुः=सामन्यः । कर्मण्यः । शरण्यः ॥

१६५१ प्रतिजनादिभ्यः खञ् । ४ । ४ । ९९ ॥

प्रतिजनं साधुः प्रातिजनीनः । सांयुगीनः । सार्वजनीनः ॥ वैश्वजनीनः ॥

१६५१-साधु अर्थमें सप्तम्यन्त प्रतिजनादि शब्दोंके उत्तर खञ् प्रत्यय हो,जैसे-प्रतिजने साधुः=प्रातिजनीनः । सांयुगीनः। सार्वजनीनः । वैश्वजनीनः ॥

१६५२ भक्ताण्णः ।४ । ४ । १००॥

भक्ते साधवो भाक्ताः शालयः ॥

१६५२-साधु अर्थमें सप्तम्यन्त भक्त शब्दके उत्तर ण प्रत्यय हो, जैसे-भक्ते साधवः=भाक्ताः शालयः ॥

१६५३ परिषदो ण्यः ।४।४।१०१॥

पारिषद्यः । परिषद इति योगविभागाण्णोऽपि । पारिषदः ॥

१६५३-सप्तम्यन्त परिषद् शब्दके उत्तर साधु अर्थमें ण्य प्रत्यय हो, जैसे-पारिषद्यः । "परिषदः" इस प्रकार भिन्न सूत्र करनेके कारण उसके उत्तर ण प्रत्यय होगा, जैसे-पारिषदः ॥

१६५४ कथादिभ्यष्ठक् ।४।४।१०२॥

कथायां साधुः काथिकः ॥

१६५४-सप्तम्यन्त कथादि शब्दोंके उत्तर साधु अर्थमें ठक् प्रत्यय हो, जैसे-कथायां साधुः=काथिकः ॥

१६५५ गुडादिभ्यष्ठञ् । ४ । ४।१०३॥

गुडे साधुर्गौडिक इक्षुः । साक्तुको यवः ॥

१६५५-सप्तम्यन्त गुडादि शब्दोंके उत्तर साधु अर्थमें ठञ् प्रत्यय हो, जैसे-गुडे, अर्थात् गुडविषये साधुः=गौडिकः, अर्थात् इक्षु (ईख) । साक्तुको यवः ॥

१६५६ पथ्यतिथिवसतिस्वपतेर्ढञ् । ४ । ४ । १०४ ॥

पथि साधु पाथेयम् । आतिथेयम् । वसनं वसतिस्तत्र साधुर्वासतेयी रात्रिः । स्वापतेयं धनम् ॥

१६५६-सप्तम्यन्त पथिन्, अतिथि, वसति और स्वपति शब्दके उत्तर साधु अर्थमें ढञ् प्रत्यय हो, जैसे-पथि साधु=पाथेयम् । आतिथेयम् । वसनं वसतिस्तत्र साधुः=वासतेयी रात्रिः । स्वापतेयं धनम् ॥

१६५७ सभाया यः ।४। ४ ।१०५॥

सभ्यः ॥

१६५७-साध्वर्थमें सप्तम्यन्त समर्थ सभा शब्दके उत्तर य प्रत्यय हो, जैसे-सभायां साधुः=सभ्यः ॥

१६५८ समानतीर्थे वासी।४।४।१०७॥

साधुरिति निवृत्तम् ॥ वसतीति वासी, समाने तीर्थे गुरौ वसतीति सतीर्थ्यः ॥

१६५८-वासी इस अर्थमें सप्तम्यन्त समर्थ समानतीर्थ शब्दके उत्तर यत् प्रत्यय हो, इस सूत्रसे साध्वर्थकी निवृत्ति हुई, वसतीति वासी,समाने तीर्थे गुरौ वसतीतिसतीर्थ्यः (एक तीर्थ अर्थात् एक गुरुके निकट वास करनेवाले व्यक्तिको परस्पर सतीर्थ्य कहतेहैं) । तीर्थ शब्द शास्त्र, यज्ञ, क्षेत्र, उपाय, गुरु, मंत्री, योनि और जलावतार (घाट) का वाचक है ॥

१६५९ समानोदरे शयित ओ चोदात्तः । ४ । ४ । १०८ ॥

समाने उदरे शयितः स्थितः समानोदर्यो भ्राता ॥

१६५९–'शयितः' इस अर्थमें सप्तम्यन्त समर्थ समानोदर शब्दके उत्तर यत् प्रत्यय हो और ओकार उदात्त हो, जैसे–समाने उदरे शयितः स्थितः=समानोदर्यः, अर्थात् भ्राता ॥

१६६० सोदराद्यः । ४ । ४ । १०९ ॥

सोदर्यः । अर्थः प्राग्वत् ॥

॥ इति प्राग्घितीयाः ॥

१६६०--सप्तम्यन्त समर्थ सोदर शब्दके उत्तर उक्त अर्थमें य प्रत्यय हो, जैसे--सोदर्यः । इसका अर्थ पूर्ववत् अर्थात् भ्राता जानना ॥

॥ इति प्राग्घितीयप्रकरणं समाप्तम् ॥

अथ छयदधिकारप्रकरणम् ।

१६६१ प्राक् क्रीताच्छः । ५ । १ । १ ॥

तेन क्रीतमित्यतः प्राक् छोऽधिक्रियते ॥

१६६१--"तेन क्रीतम् १७०२" इस सूत्रके पूर्वपर्य्यन्त जिस २ सूत्रमें प्रत्यय निर्दिष्ट नहीं है,केवल अर्थका ही निर्देश है, उस २ सूत्रमें छ प्रत्ययकी उपस्थिति हो, इसलिये समान अर्थमें प्रकृतिविशेषसे विहित यत् आदि प्रत्यय प्रकृत्यन्तरमें सावकाश छ प्रत्ययको तक्रकौण्डिन्य न्यायसे बाधतेहैं, नहीं तो छ प्रत्यय और यत् आदि प्रत्ययोंके सामीप्यका अविशेष होनेके कारण तव्यत्, तव्य और अनीयर् प्रत्ययके समान दोनों प्रत्यय पर्यायसे होजाते ॥

१६६२ उगवादिभ्यो यत् । ५ । १ । २ ॥

प्राक् क्रीतादित्येव । उवर्णान्ताद्गवादिभ्यश्च यत्स्यात् छस्यापवादः ॥ नाभि नभं च ॥ ॥ नभ्योक्षः । नभ्यमञ्जनम् । रथनाभावेवेदम् ॥ शुनः सम्प्रसारणं वा च दीर्घत्वम् ॥ ॥ शून्यम् । शुन्यम् ॥ ऊधसोऽनङ् च ॥ ऊधन्यः ॥

१६६२--"तेन क्रीतम् १७०२" इसके पूर्व अर्थोंमें चतुर्थ्यन्त उवर्णान्त और गवादि शब्दोंके उत्तर यत् प्रत्यय हो, यह सूत्र छ प्रत्ययका अपवादक है, जैसे--शङ्कवे हितम्=शंकव्यम् ।

नाभि शब्दके उत्तर यत् प्रत्यय हो और नाभि शब्दके स्थानमें नभ आदेश हो, जैसे--नभ्योऽक्षः । सच्छिद्र चक्रको नाभि कहतेहैं, और उसमें अनुप्रविष्ट काष्ठविशेषको अक्ष कहतेहैं, अक्ष तदनुगत होनेके कारण नाभिको हितकर है । नभ्यमञ्जनम् । अञ्जन शब्दसे तैलाभ्यङ्ग जानना, वह भी स्नेहन होनेके कारण नाभिको हितकर है,रथके नाभिमें ही यह विधि लगतीहै ।

श्वन् शब्दके उत्तर यत् प्रत्यय और श्वन् शब्दको सम्प्रसारण और विकल्प करके संप्रसारणको दीर्घ हो, जैसे--शून्यम्, शुन्यम् ।

ऊधस् शब्दके उत्तर यत् प्रत्यय हो और अनङ् आदेश हो, जैसे--ऊधन्यः ॥

१६६३ कम्बलाच्च संज्ञायाम् । ५ । १ । ३ ॥

यत्स्यात् । कम्बल्यमूर्णापलशतम् । संज्ञायां किम् । कम्बलीया ऊर्णा ॥

१६६३--संज्ञा होनेपर चतुर्थ्यन्त कम्बल शब्दके उत्तर यत् प्रत्यय हो, जैसे–कम्बल्यम्, अर्थात् ऊर्णापलशत । संज्ञा न होनेपर यत् प्रत्यय नहीं होगा, जैसे--कम्बलीया ऊर्णा ॥

१६६४ विभाषा हविरपूपादिभ्यः । ५ । १ । ४ ॥

आमिक्ष्यं दधि । आमिक्षीयम् । पुरोडाश्यास्तण्डुलाः । पुरोडाशीयाः । अपूप्यम् । अपूपीयम् ॥

१६६४--चतुर्थ्यन्त हविर्वाचक शब्द और अपूपादि शब्दोंके उत्तर हितार्थमें विकल्प करके यत् प्रत्यय हो, विकल्प पक्षमें छ प्रत्यय होगा, जैसे–आमिक्ष्यं दधि, आमिक्षीयम् । पुरोडाश्यास्तण्डुलाः, पुरोडाशीयाः । अपूप्यम्, अपूपीयम् ॥

१६६५ तस्मै हितम् । ५ । १ । ५ ॥

वत्सेभ्यो हितो वत्सीयो गोधुक् । शंकवे हितं शंकव्यं दारु । गव्यम् । हविष्यम् ॥

१६६५–' हितम्' इस अर्थमें चतुर्थ्यन्त समर्थ प्रातिपदिकसे छ प्रत्यय हो, जैसे–वत्सेभ्यो हितः=वत्सीयः गोधुक्, अर्थात् गायदूहनेवाला । शंकवे हितम्=शंकव्यम्, अर्थात् दारु । गव्यम् । हविष्यम् ॥

१६६६ शरीरावयवाद्यत् । ५ । १ । ६ ॥

दन्त्यम् । कण्ठ्यम् । नस्नासिकायाः । नस्यम् । नाभ्यम् ॥

१६६६–' हितम् ' इस अर्थमें चतुर्थ्यन्त शरीरावयववाचक शब्दके उत्तर यत् प्रत्यय हो, जैसे–दन्तेभ्यो हितम्=दन्त्यम् । कण्ठ्यम् ।

यत् और तस् प्रत्यय और क्षुद्र शब्द परे रहते नासिका शब्दके स्थानमें नस् आदेश हो, जैसे–नस्यम् । नाभ्यम् ॥

१६६७ ये च तद्धिते । ६ । १ । ६१ ॥

यादौ तद्धिते परे शिरश्शब्दस्य शीर्षन्नादेशः स्यात् । शीर्षण्यः । तद्धिते किम् । शिर इच्छति शिरस्यति॥ वा केशेषु ॥*॥ शीर्षण्याः शिरस्या वा केशाः ॥ अचि शीर्ष इति वाच्यम् ॥ * ॥ अजादौ तद्धिते शिरसः शीर्षादेशः । स्थूलशिरस इदं स्थौलशीर्षम् ॥

१६६७--यकारादि तद्धित प्रत्यय परे रहते शिरस् शब्दके स्थानमें शीर्षन् आदेश हो, जैसे--शीर्षण्यः । तद्धित प्रत्यय परे न रहते 'शिरः इच्छति=शिरस्यति' ऐसा होगा ।

केश वाच्य होनेपर शिरस् शब्दके स्थानमें विकल्प करके शीर्षन् आदेश हो* जैसे--शीर्षण्याः, शिरस्याः केशाः ।

अजादि तद्धित प्रत्यय परे रहते शिरस् शब्दके स्थानमें शीर्ष आदेश हो * जैसे--स्थूलशिरः इदम्=स्थौलशीर्षम् ॥

१६६८ खलयवमाषतिलवृषब्रह्मणश्च ।५।१।७॥

खलाय हितं खल्यम् । यव्यम् । माष्यम् । तिल्यम् । वृष्यम् । ब्रह्मण्यम् । चाद्रथ्या ॥

१६६८--चतुर्थ्यन्त खल, यव, माष, तिल, वृष और ब्रह्मन् शब्दके उत्तर हितार्थमें यत् प्रत्यय हो, जैसे--खलाय हितम्=खल्यम् । यव्यम् । माष्यम् । तिल्यम् । वृष्यम् । ब्रह्मण्यम् । चकारसे रथ शब्दके उत्तर भी यत् प्रत्यय होगा, जैसे--रथ्या ॥

१६६९ अजाविभ्यां थ्यन्।५।१।८॥

अजथ्या यूथिः । अविथ्या ॥

१६६९--चतुर्थ्यन्त अज और अवि शब्दके उत्तर थ्यन् प्रत्यय हो, जैसे--अजथ्या यूथिः । अविथ्या ॥

१६७० आत्मन्विश्वजनभोगोत्तरपदात्खः ।५।१।९।

१६७०--हितार्थमें चतुर्थ्यन्त समर्थ आत्मन्, विश्वजन और भोगोत्तर प्रातिपदिकोंके उत्तर ख प्रत्यय हो ॥

१६७१ आत्माध्वानौ खे।६।४।१६९॥

एतौ खे प्रकृत्या स्तः । आत्मने हितमात्मनीनम् । विश्वजनीनम्॥कर्मधारयादेवेष्यते॥*॥ षष्ठीतत्पुरुषाद्बहुव्रीहेश्चच्छ एव । विश्वजनीयम्॥ पञ्चजनादुपसंख्यानम् ॥ * ॥ पञ्चजनीनम् ॥ सर्वजनाट्ठञ् खश्च॥*॥ सार्वजनिकः । सर्वजनीनः ॥ महाजनाट्ठञ् ॥ * ॥ माहाजनिकः । मातृभोगीणः । पितृभोगीणः । राजभोगीनः ॥ आचार्यादणत्वं च ॥ * ॥ आचार्यभोगीनः ॥

१६७१--आत्मन् और अध्वन् यह दो शब्द ख प्रत्यय परे रहते प्रकृतिमें ही रहैं अर्थात् विकृत न हों, जैसे--आत्मने हितम्=आत्मनीनम् । विश्वजनीनम् ।

यह ख प्रत्यय कर्मधारयसंज्ञक शब्दके उत्तर ही इष्ट है* षष्ठीतत्पुरुष और बहुव्रीहिसंज्ञकके उत्तर ख प्रत्यय न होकर छ प्रत्यय ही होगा, जैसे--विश्वजनीयम् ।

पञ्चजन शब्दके उत्तर भी ख प्रत्यय हो * जैसे--पञ्चजनीनम् ॥

सर्वजन शब्दके उत्तर ठञ् और ख प्रत्यय हो* जैसे--सार्वजनिकः, सर्वजनीनः ॥

महाजन शब्दके उत्तर ठञ् प्रत्यय हो * जैसे--माहाजनिकः॥ मातृभोगीणः । पितृभोगीणः । राजभोगीनः ।

आचार्य शब्दके उत्तर नकारको णत्व न हो * जैसे--आचार्यभोगीनः ॥

१६७२ सर्वपुरुषाभ्यां णढञौ।५।१।१०

सर्वाण्णो वेति वक्तव्यम् ॥ * ॥ सर्वस्मै हितं सार्वम् । सर्वीयम् ॥ पुरुषाद्वधविकारसमूहतेनकृतेषु ॥ * ॥ भाष्यकारप्रयोगात्तेनेत्यस्य द्वन्द्वमध्ये निवेशः । पुरुषस्य वधः पौरुषेयः । तस्येदमित्याणि प्राप्ते । पुरुषस्य विकारः पौरुषेयः । प्राणिरजतादिभ्योऽञ् इत्यञि प्राप्ते । समूहेप्याणि प्राप्ते । एकाकिनोपि परितः पौरुषेयवृता इवेति माघः । तेन कृते ग्रन्थेऽणि प्राप्ते अग्रन्थे तु प्रासादादावप्राप्त एवेति विवेकः ॥

१६७२--सर्व और पुरुष शब्दके उत्तर ण और ढञ् प्रत्यय हो ।

सर्व शब्दके उत्तर विकल्प करके ण हो * जैसे--सर्वस्मै हितं=सार्वम्, सर्वीयम् ॥

पुरुष शब्दके उत्तर वध, विकार, समूह और तेन कृतम् इत्यादि अर्थमें उक्त प्रत्यय हो * भाष्यकारके प्रयोगके कारण 'तेन' इसका द्वन्द्वमध्यमें निवेश हुआहै, जैसे--पुरुषस्य वधः=पौरुषेयः ।

"तस्येदम् २५००" इस सूत्रसे अण् प्रत्ययकी प्राप्ति होनेपर, प्राणि और रजतादि शब्दके उत्तर अञ् प्रत्यय हो (१५३२) इस सूत्रसे अञ् प्रत्ययकी प्राप्ति होनेपर और समूहार्थमें अण् प्रत्ययकी प्राप्ति होनेपर भी माघमें--"एकाकिनोऽपि परितः पौरुषेयवृताविव" इस प्रकार प्रयोग हुआहै ।

तत्कर्तृक कृतग्रन्थ विषयमें अण् प्रत्ययकी प्राप्ति होनेपर और अग्रन्थ विषयमें प्रासादादि अर्थमें अण्की अप्राप्ति होनेपर बाध करके यह प्रत्यय होताहै, यह विवेक है ॥

१६७३ माणवचरकाभ्यां खञ् ५।१।११।

माणवाय हितं माणवीनम् । चारकीणम् ॥

१६७३--माणव और चरक शब्दके उत्तर हितार्थमें खञ् प्रत्यय हो, जैसे--माणवाय हितम्=माणवीनम् । चारकीणम् ॥

१६७४ तदर्थं विकृतेः प्रकृतौ । ५।१।१२॥

विकृतिवाचकाच्चतुर्थ्यन्तात्तदर्थायां प्रकृतौ वाच्यायां छप्रत्ययः स्यात् । अङ्गारेभ्य एतानि अङ्गारीयाणि काष्ठानि । प्राकारीया इष्टकाः । शंकव्यं दारु ॥

१६७४-विकृतिवाचक चतुर्थ्यन्त पदके उत्तर तदर्थ (उसके निमित्त) प्रकृति वाच्य होनेपर छ प्रत्यय हो, जैसे-अङ्गारेभ्यः एतानि=अङ्गारीयाणि काष्ठानि । प्राकारीया इष्टकाः । शंकव्यं दारु ॥

१६७५ छदिरुपधिबलेर्ढञ् ।५।१।१३॥

छादिषेयाणि तृणानि । बालेयास्तण्डुलाः ॥ उपधिशब्दात्स्वार्थे इष्यते ॥ * ॥ उपधीयत इत्युपधिः रथाङ्गं तदेव औपधेयम्॥

१६७५-छदिष् उपधि और बलि शब्दके उत्तर ढञ् प्रत्यय हो, जैसे-छादिषेयाणि तृणानि । बालेयास्तण्डुलाः ।

उपधि शब्दके उत्तर स्वार्थमें ही ढञ् प्रत्यय हो * जैसे-उपधीयते, इस वाक्यमें उपधि रथाङ्ग-तदेव औपधेयम् ॥

१६७६ ऋषभोपानहोर्ञ्यः ।५।१।१४॥

छस्यापवादः आर्षभ्यो वत्सः । औपानह्यो मुञ्जः । चर्म्मण्यप्ययमेव पूर्वविप्रतिषेधेन । औपानह्यं चर्म्म ॥

१६७६-ऋषभ और उपानह् शब्दके उत्तर ञ्य प्रत्यय हो, यह ञ्य प्रत्यय छ प्रत्ययका अपवाद है, जैसे-आर्षभ्यो वत्सः । औपानह्यो मुञ्जः । पूर्वविप्रतिषेधके कारण चर्म्म अर्थमें यह प्रत्यय ही होगा, जैसे-औपानह्यम् चर्म्म ॥

१६७७ चर्मणोऽञ् ।५।१।१५॥

चर्मणो या विकृतिस्तद्वाचकादञ् स्यात् । वर्ध्र्यै इदं वार्ध्रं चर्म । वारत्रं चर्म ॥

१६७७-चर्मके विकृतिवाचक शब्दके उत्तर अञ् प्रत्यय हो, जैसे-वर्ध्र्यै इदं=वार्ध्रं चर्म । वारत्रं चर्म ॥

१६७८ तदस्य तदस्मिन् स्यादिति ।५।१।१६॥

प्राकार आसामिष्टकानां स्यात् प्राकारीया इष्टकाः । प्रासादीयं दारु । प्राकारोऽस्मिन् स्यात् प्राकारीयो देशः । इति शब्दो लौकिकीं विवक्षामनुसारयति । तेनेह न । प्रासादो देवदत्तस्य स्यादिति ॥

१६७८-'तदस्य स्यात्' इसका वह होगा, 'तदस्मिन् स्यात्' वह इसमें होगा, इन दो अर्थोंमें अञ् प्रत्यय हो, जैसे-प्राकारः आसाम् इष्टकानां स्यात्, इस वाक्यमें प्राकारीया इष्टकाः । प्रासादीयं दारु । प्राकारोऽस्मिन्, इस विग्रहमें प्राकारीयः देशः ।

इस सूत्रमें इति शब्द लौकिक विवक्षाका अनुसरण कराता है, इस कारण 'प्रासादो देवदत्तस्य स्यादिति' इस स्थलमें अञ् प्रत्यय नहीं हुआ ॥

१६७९ परिखाया ढञ् ।५।१।१७॥

पारिखेयी भूमिः ॥

॥ इति छयतोः पूर्णोऽवधिः ॥

१६७९-परिखा शब्दके उत्तर ढञ् प्रत्यय हो, जैसे-पारिखेयी भूमिः ॥

॥ इति छयदधिकारः समाप्तः ॥

अथाऽऽर्हीयप्रकरणम् ।

१६८० प्राग्वतेष्ठञ् ।५।१।१८॥

तेन तुल्यमिति वतिं वक्ष्यति ततः प्राक् ठञधिक्रियते ॥

१६८०-"तेन तुल्यम्० १७७८" इस सूत्रसे पश्चात् वति प्रत्यय करेंगे, उसके पूर्वतक ठञ्का अधिकार चलेगा ॥

१६८१ आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ।५।१।१९॥

तदर्हतीत्येतदभिव्याप्य ठञधिकारमध्ये ठञोऽपवादष्ठगधिक्रियते गोपुच्छादीन्वर्जयित्वा ॥

१६८१-" तदर्हति १७२८ " इस सूत्रपर्यन्त ठञ्-अधिकारके मध्यमें गोपुच्छादि शब्दोंको त्याग कर ठञ्के अपवाद ठक् प्रत्ययका अधिकार चलेगा ॥

१६८२ असमासे निष्कादिभ्यः ।५।१।२०॥

आर्हादित्येतत्तेन क्रीतमिति यावत्सप्तदशसूत्र्यामनुवर्तते । निष्कादिभ्योऽसमासे ठक् स्यादार्हीयेष्वर्थेषु । नैष्किकम् । समासे तु ठञ् ॥

१६८२-'आर्हात्' इसकी "तेन क्रीतम्१७०२"इस सूत्रपर्यन्त १७ सूत्रोंमें अनुवृत्ति होगी । समास न होनेपर आर्हीय अर्थमें निष्कादि शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे-नैष्किकम् । समास होनेपर ठञ् प्रत्यय होगा ॥

१६८३ परिमाणान्तस्यासंज्ञाशाणयोः ।७।३।१७॥

उत्तरपदवृद्धिः स्यात् ञिदादौ । परमनैष्किकः । असमासग्रहणं ज्ञापकं भवतीत्यतः प्राक् तदन्तविधिरिति । तेन सुगव्यम् । यवापूप्यमित्यादि । इत ऊर्ध्वं तु संख्यापूर्वपदानां तदन्तग्रहणं प्राग्वतेरिष्यते तच्चालुकि।पारायणिकः। द्वैपारायणिकः । अलुकीति किम् । द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम् । द्विशूर्पेण क्रीते शूर्पादञ् मा भूत्, किंतु ठञ् । द्विशौर्पिकम् ॥

१६८३-संज्ञा न होनेपर ञित् आदि प्रत्यय परे रहते शाण शब्दसे भिन्न परिमाणवाचकशब्दअन्तवाले शब्दके उत्तरपदको वृद्धि हो, जैसे-परमनैष्किकः ।

संज्ञा होनेपर पञ्च कलायाः परिमाणमस्य 'पाञ्चकलायिकम्' इस स्थानमें "तदस्य परिमाणम् १७२३" इस सूत्रसे ठञ् प्रत्यय हुआहै ।

असमासग्रहण ज्ञापक होताहै कि, इसके पूर्वपर्यन्त तदन्त विधि हो, इस कारण सुगव्यम्, यवापूप्यम्—इत्यादि पद सिद्ध होतेहैं ।

इसके परे संख्यावाचकशब्दपूर्वक पदका तदन्तग्रहण वतिके पूर्वमें ही होगा, वह अलुक्‌विषयमें ही होगा, जैसे—पारायणिकः । द्वैपारायणिकः ।

अलुक् न होनेपर द्वाभ्यां शूर्पाभ्यां क्रीतं=द्विशूर्पम्, द्विशूर्पेण क्रीतम्, इस विग्रहमें शूर्प शब्दके उत्तर अञ् प्रत्यय न होकर ठञ् प्रत्यय होगा, जैसे—द्विशौर्पिकम् ॥

१६८४ अर्द्धात्परिमाणस्य पूर्वस्य तु वा । ७ । ३ । २६ ॥

अर्द्धात्परिमाणवाचकस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा ञिति णिति किति च । अर्द्धद्रोणेन क्रीतम् आर्द्धद्रौणिकम्।अर्द्धद्रौणिकम्।

१६८४—ञ्इत्, ण्इत् और क्इत् प्रत्यय परे रहते अर्द्ध शब्दके परे स्थित परिमाणवाचक उत्तरपदको नित्य वृद्धि हो और पूर्वपदको विकल्प करके वृद्धि हो, जैसे—अर्द्धद्रोणेन क्रीतम्, इस विग्रहमें आर्द्धद्रौणिकम् । अर्द्धद्रौणिकम् ॥

१६८५ नातः परस्य । ७ । ३ । २७ ॥

अर्द्धात्परस्य परिमाणाऽकारस्य वृद्धिर्न पूर्वपदस्य तु वा ञिदादौ । अर्द्धप्रस्थिकम् । आर्द्धप्रस्थिकम् । अतः किम् । अर्द्धकौडविकम् । तपरः किम् । अर्द्धखार्यां भवा अर्द्धखारी । अर्द्धखारीभार्य इत्यत्र वृद्धिनिमित्तस्येति पुंवद्भावनिषेधो न स्यात् ॥

१६८५—ञित् आदि प्रत्यय परे रहते अर्द्ध शब्दसे परे स्थित परिमाणवाचक शब्दके अकारको वृद्धि न हो, किन्तु पूर्वपदको विकल्प करके वृद्धि हो, जैसे—अर्द्धप्रस्थिकम्, आर्द्धप्रस्थिकम् ।

अकार न होनेपर अर्द्धकौडविकम् । तपर करण होनेके कारण अर्द्धखार्यां भवा=अर्द्धखारी, यहां निषेध न हुआ, नहीं तो 'अर्द्धखारीभार्यः' इस स्थलमें "वृद्धिनिमित्तस्य० ८४०" इस सूत्रसे पुंवद्भावका निषेध नहीं होता ॥

१६८६ शताच्च ठन्यतावशते।५।१।२१॥

शतेन क्रीतं शतिकम् । शत्यम् । अशते किम् । शतं परिमाणमस्य शतकः संघः । इह प्रत्ययार्थो वस्तुतः प्रकृत्यर्थान्न भिद्यते तेन ठन्यतौ न, किंतु कनेव । असमास इत्येव । द्विशतेन क्रीतं द्विशतकम् ॥

१६८६—शतभिन्नार्थमें 'तेन क्रीतम्' इस अर्थमें शत शब्दके उत्तर ठन् और यत् प्रत्यय हो, जैसे—शतेन क्रीतम्, इस विग्रहमें शतिकम्; शत्यम् ।

शत अर्थ होनेपर यथा—शतं परिमाणमस्य=शतकः, अर्थात् संघ । इस स्थलमें प्रत्ययार्थ वस्तुतः प्रकृतिके अर्थसे भिन्न नहीं होताहै, इस कारण ठन् और यत् प्रत्यय न होकर केवल कन् प्रत्यय ही हुआ ।

समास होनेपर यथा—द्विशतेन क्रीतं=द्विशतकम् ॥

१६८७ संख्याया अतिशदन्तायाः कन् । ५ । १ । २२ ॥

संख्यायाः कन् स्यादार्हीयेऽर्थे न तु त्यन्तशदन्तायाः । पञ्चभिः क्रीतः पञ्चकः । बहुकः । त्यन्तायास्तु साप्ततिकः । शदन्तायाः । चात्वारिंशत्कः ॥

१६८७—आर्हीय अर्थमें संख्यावाचक शब्दके उत्तर कन् प्रत्यय हो, तिप्रत्ययान्त और शदन्त शब्दके उत्तर नहीं होगा, जैसे—पञ्चभिः क्रीतः=पञ्चकः । बहुकः ।

तिप्रत्ययान्त होनेपर यथा—साप्ततिकः ।

शत्‌अन्तमें जैसे—चात्वारिंशत्कः ॥

१६८८ वतोरिड्वा । ५ । १ । २३ ॥

वत्वन्तात्कन इड्वा स्यात् । तावतिकः । तावत्कः ॥

१६८८—वतुप्रत्ययान्त शब्दके उत्तर कन् प्रत्ययको विकल्प करके इट् हो, जैसे—तावतिकः । तावत्कः ॥

१६८९ विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् । ५ । १ । २४ ॥

योगविभागः कर्तव्यः । आभ्यां कन् स्यात् । असंज्ञायां ड्वुन् स्यात्कनोपवादः । विंशकः । त्रिंशकः । संज्ञायां तु, विंशतिकः । त्रिंशत्कः ॥

१६८९—यहां योगविभाग करना चाहिये, विंशति और त्रिंशत् शब्दके उत्तर कन् प्रत्यय हो और संज्ञा न होनेपर उक्त दोनों शब्दोंके उत्तर ड्वुन् प्रत्यय हो, उक्त प्रत्यय कन् प्रत्ययका अपवादक है, जैसे—विंशकः । त्रिंशकः । संज्ञा होनेपर जैसे—विंशतिकः । त्रिंशत्कः ॥

१६९० कंसाट्टिठन् । ५ । १ । २५ ॥

टो ङीबर्थः । इकार उच्चारणार्थः। कंसिकः । कंसिकी ॥ अर्द्धाच्चेति वक्तव्यम्॥ * ॥ अर्द्धिकः । अर्द्धिकी ॥ कार्षापणाट्टिठन्वक्तव्यः ॥ प्रतिरादेशश्च वा ॥ * ॥ कार्षापणिकः । कार्षापणिकी । प्रतिकः । प्रतिकी ॥

१६९०—कंस शब्दके उत्तर टिठन् प्रत्यय हो, ट ङीबर्थ है, इकार उच्चारणार्थ है, जैसे—कंसिकः । कंसिकी ।

अर्द्ध शब्दके उत्तर टिठन् प्रत्यय हो * जैसे—अर्द्धिकः । अर्द्धिकी ।

कार्षापण शब्दके उत्तर टिठन् प्रत्यय हो और विकल्प करके कार्षापणको प्रति आदेश हो * जैसे—कार्षापणिकी कार्षापणिकः । प्रतिकः । प्रतिकी ॥

१६९१ शूर्पादञन्यतरस्याम्।५।१।२६॥

शौर्पम् । शौर्पिकम् ॥

१६९१–शूर्प शब्दके उत्तर विकल्प करके अञ् प्रत्यय हो, जैसे–शौर्पम्, शौर्पिकम् ॥

१६९२ शतमानविंशतिकसहस्रवसनादण् । ५ । १ । २७ ॥

एभ्योण् स्याट्ठञ्ठक्कनामपवादः । शतमानेन क्रीतं शातमानम् । वैंशतिकम् । साहस्रम् । वासनम् ॥

१६९२–शतमान, विंशतिक, सहस्र और वसन शब्दके उत्तर अण् प्रत्यय हो, यह अण् प्रत्यय ठञ्, ठक् और कन् प्रत्ययका अपवाद है, जैसे–शतमानेन क्रीतम्=शातमानम् । वैंशतिकम् । साहस्रम् । वासनम् ॥

१६९३ अध्यर्द्धपूर्वाद्द्विगोर्लुगसंज्ञायाम् । ५ । १ । २८ ॥

अध्यर्द्धपूर्वाद्द्विगोश्च परस्यार्हीयस्य लुक् स्यात् । अध्यर्द्धकंसम् । द्विकंसम् । संज्ञायां तु पाञ्चकलायिकम् ॥

१६९३–संज्ञा न होनेपर अध्यर्द्धशब्दपूर्वक द्विगु समासके उत्तर आर्हीय प्रत्ययका लुक् हो, जैसे–अध्यर्द्धकंसम् ।

संज्ञा होनेपर ' पाञ्चकलायिकम् ' ऐसा पद होगा ॥

१६९४ विभाषा कार्षापणसहस्राभ्याम् । ५ । १ । २९

लुग्वा स्यात् । अध्यर्द्धकार्षापणम् । अध्यर्द्धकार्षापणिकम् । द्विकार्षापणम् । द्विकार्षापणिकम् । औपसंख्यानिकस्य टिठनो लुक् । पक्षे अध्यर्द्धप्रतिकम् । द्विशतिकम् । अध्यर्द्धसहस्रम् । अध्यर्द्धसाहस्रम् । द्विसहस्रम् । द्विसाहस्रम् ॥

१६९४–कार्षापण और सहस्र शब्दके उत्तर विकल्प करके आर्हीय प्रत्ययका लुक् हो, जैसे–अध्यर्द्धकार्षापणम्, अध्यर्द्धकार्षापणिकम् । द्विकार्षापणम्, द्विकार्षापणिकम् । यहां औपसंख्यानिक टिठन् प्रत्ययका लुक् हुआ । पक्षमें अध्यर्द्धप्रतिकम् । द्विप्रतिकम् । अध्यर्द्धसहस्रम्, अध्यर्द्धसाहस्रम् । द्विसहस्रम्, द्विसाहस्रम् ॥

१६९५ द्वित्रिपूर्वान्निष्कात् । ५।१।३० ॥

लुग्वा स्यात् । द्विनिष्कम् । द्विनैष्किकम् । त्रिनिष्कम् । त्रिनैष्किकम् ॥ बहुपूर्वाच्चेति वक्तव्यम् ॥ * ॥ बहुनिष्कम् । बहुनैष्किकम् ॥

१६९५–द्वि और त्रिशब्दपूर्वक निष्क शब्दके उत्तर आर्हीय प्रत्ययका विकल्प करके लुक् हो, जैसे–द्विनिष्कम्, द्विनैष्किकम् । त्रिनिष्कम् , त्रिनैष्किकम् ।

बहुपूर्वक निष्क शब्दके उत्तर आर्हीय प्रत्ययका विकल्प करके लुक् हो * जैसे–बहुनिष्कम् , बहुनैष्किकम् ॥

१६९६ बिस्ताच्च । ५ । १ । ३१ ॥

द्वित्रिबहुपूर्वाद्बिस्तादार्हीयस्य लुग्वा स्यात् । द्विबिस्तम् । द्विबैस्तिकमित्यादि ॥

१६९६–द्वि, त्रि और बहुशब्दपूर्वक बिस्त शब्दके उत्तर आर्हीय प्रत्ययका विकल्प करके लुक् हो, जैसे–द्विबिस्तम्, द्विबैस्तिकम्–इत्यादि ॥

१६९७ विंशतिकात्खः । ५ । १।३२॥

अध्यर्द्धपूर्वाद्द्विगोरित्येव । अध्यर्द्धविंशतिकीनम् । द्विविंशतिकीनम् ॥

१६९७–अध्यर्द्धपूर्वक और द्विगु समासके परे स्थित विंशतिक शब्दके उत्तर ख प्रत्यय हो, जैसे–अध्यर्द्धविंशतिकीनम् । द्विविंशतिकीनम् ॥

१६९८ खार्या ईकन् । ५ । १ । ३३ ॥

अध्यर्द्धखारीकम् । द्विखारीकम् ॥ केवलायाश्चेति वक्तव्यम् ॥ * ॥ खारीकम् ॥

१६९८–अध्यर्द्धशब्दपूर्वक और द्विगुसमासके परे स्थित खारी शब्दके उत्तर ईकन् प्रत्यय हो, जैसे–अध्यर्द्धखारीकम् । द्विखारीकम् ।

केवलखारी शब्दके उत्तर भी ईकन् प्रत्यय हो * जैसे–खारीकम् ॥

१६९९ पणपादमाषशताद्यत्।५।१।३४॥

अध्यर्द्धपण्यम् । द्विपण्यम् । अध्यर्द्धपाद्यम् । द्विपाद्यम् । इह पादः पदिति न, यस्येतिलोपस्य स्थानिवद्भावात् । पद्यत्यतदर्थे इत्यपि न प्राण्यङ्गार्थस्यैव तत्र ग्रहणात् ॥

१६९९–अध्यर्द्धपूर्वक और द्विगुसमासके परे स्थित पण, पाद, माष और शत शब्दके उत्तर यत् प्रत्यय हो, जैसे–अध्यर्द्धपण्यम् । द्विपण्यम् । 'अध्यर्द्धपाद्यम् । द्विपाद्यम् ' इस स्थलमें " यस्येति च ३२१" इस सूत्रसे लोपके स्थानिवद्भावके कारण "पादः पत् ४१४" इस सूत्रसे पद् आदेश नहीं होता और "पद्यतदर्थे० ९९१" इस सूत्रमें प्राणिवाचक अङ्गार्थके ग्रहणके कारण इस सूत्रसे भी पद् आदेश नहीं होगा, प्राणिअङ्गार्थका ही उसमें ग्रहण है ।

१७०० शाणाद्वा । ५ । १ । ३५ ॥

यत्स्यात्पक्षे ठञ् । तस्य लुक् । अध्यर्द्धशाण्यम् । अध्यर्द्धशाणम् ॥

१७००–अध्यर्द्धपूर्वक शाण शब्दके उत्तर विकल्प करके यत् प्रत्यय हो, विकल्प पक्षमें ठञ् प्रत्यय होगा, इसका (१६९३) लुक् होगा, जैसे–अध्यर्द्धशाण्यम्, अध्यर्द्धशाणम् ॥

१७०१ द्वित्रिपूर्वादण् च।५।१।३६॥

शाणादित्येव । चाद्यत् । तेन त्रैरूप्यम् परिमाणान्तस्यासंज्ञाशाणयोरितिपर्युदासादा-

दिवृद्धिरेव । द्वैशाणम् । द्विशाण्यम् । द्विशाणम् । इह ठञादयस्त्रयोदश प्रत्ययाः प्रकृतास्तेषां समर्थविभक्तयोर्थाऽश्चाकाङ्क्षितास्त इदानीमुच्यन्ते॥

१७०१-द्वि और त्रि शब्द पूर्वमें रहते उसके परवर्ती शाण शब्दके उत्तर विकल्प करके अण् और यत् प्रत्यय हो, इससे 'त्रैरूप्यम्' अर्थात् तीन रूप होंगे, " परिमाणान्तस्यासंज्ञाशाणयोः १६८३ " इस सूत्रमें पर्युदासके कारण आदि पदको ही वृद्धि होगी, जैसे-द्वैशाणम् । द्विशाण्यम् । इस सूत्रमें ठञ्आदि तेरह प्रत्यय कहेहैं, उनकी समर्थविभक्ति और संपूर्ण अर्थ आकांक्षित हैं, इस समय उनका ही विषय कहा जायगा ॥

१७०२ तेन क्रीतम् । ५ । १।३७ ॥

ठञ् । गोपुच्छेन क्रीतं गौपुच्छिकम् । साप्ततिकम् । प्रास्थिकम् । ठक्, नैष्किकम् ॥

१७०२-'तेन क्रीतम्' (उससे खरीदा हुआ) इस अर्थमें ठञ् प्रत्यय हो, जैसे-गोपुच्छेन क्रीतम्=गौपुच्छिकम् । साप्ततिकम् । प्रास्थिकम् । ठक् जैसे-नैष्किकम् ॥

१७०३ इद्गोण्याः ।१।२।५० ॥

गोण्या इत्स्यात्तद्धितलुकि, लुकोपवादः । पञ्चभिर्गोणीभिः क्रीतः पटः पञ्चगोणिः॥

१७०३-तद्धित प्रत्ययका लुक् होनेपर गोणी शब्दको इत् आदेश हो, अर्थात् ईकारके स्थानमें इकार हो, यह सूत्र "लुक् तद्धितलुकि" इस सूत्रसे विहित लुक्का विशेषक है, जैसे-पञ्चभिः गोणाभिः क्रीतः पटः=पञ्चगोणिः ॥

१७०४ तस्य निमित्तं संयोगोत्पातौ । ५ । १ । ३८ ॥

संयोगः सम्बन्धः । उत्पातः शुभाशुभसूचकः। शतिकः शत्यो वा धनपतिसंयोगः ।शतिकं शत्यं वा दक्षिणाक्षिस्पन्दनम्,शतस्य निमित्तमित्यर्थः। वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम् ॥ * ॥ वातस्य शमनं कोपनं वा वातिकम् । पैत्तिकम् । श्लैष्मिकम् ॥ सन्निपाताच्चेति वक्तव्यम् ॥ * ॥ सान्निपातिकम् ॥

१७०४-संयोग (संबन्ध) और उत्पात (शुभाशुभसूचक) अर्थमें उनके निमित्त होनेपर शत शब्दके उत्तर ठञ् और यत् प्रत्यय हो, जैसे-शतिकः शत्यो वा धनपतिसंयोगः । शतिकम्, शत्यं वा दक्षिणाक्षिस्पन्दनम् ।

वात, पित्त और श्लेष्मन् शब्दके उत्तर शमन और कोपन अर्थमें ठञ् प्रत्यय हो * जैसे-वातस्य शमनं कोपनं वा=वातिकम् । पैत्तिकम् । श्लैष्मिकम् ।

सन्निपात शब्दके उत्तर ठञ् प्रत्यय हो * जैसे-सान्निपातिकम् ॥

१७०५ गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् । ५ । १ । ३९ ॥

गोर्निमित्तं संयोग उत्पातो वा गव्यः । द्व्यचः-धन्यः।यशस्यः। स्वर्ग्यः। गोद्व्यचः किम् । विजयस्य वैजयिकः । असंख्येत्यादि किम् । पञ्चानां पञ्चकम् । साप्तकम् । प्रास्थिकम् । खारीकम् । अश्वादि, आश्विकम् । आश्मिकम् ॥ ब्रह्मवर्चसादुपसंख्यानम् ॥ * ॥ ब्रह्मवर्चस्यम् ॥

१७०५-गो शब्द और संख्यावाचक, परिमाणवाचक, तथा अश्वादि अर्थात् अश्व, अश्मन्, गण, ऊर्णा, उमा, गङ्गा, क्षण, वर्षा और वसु शब्दसे भिन्न दोस्वरयुक्त शब्दके उत्तर 'तस्य निमित्तम्' इस अर्थमें विकल्प करके यत् प्रत्यय हो, जैसे-गोर्निमित्तं संयोग उत्पातो वा=गव्यः । द्व्यचः । धन्यः । यशस्यः । स्वर्ग्यः ।

गोद्व्यच्से भिन्न स्थलमें जैसे-विजयस्य=वैजयिकः ।

असंख्या इत्यादि न होनेपर जैसे-पञ्चानां=पञ्चकम् । साप्तकम् । प्रास्थिकम् । खारीकम् ।

अश्वादि जैसे-आश्विकम् । आश्मिकम् ।

ब्रह्मवर्चस शब्दके उत्तर यत् प्रत्यय हो * जैसे-ब्रह्मवर्चस्यम् ॥

१७०६ पुत्राच्छ च । ५ । १ ।४०॥

चाद्यत् । पुत्रीयः । पुत्र्यः ॥

१७०६-पुत्र शब्दके उत्तर छ और यत् प्रत्यय हों, जैसे-पुत्रीयः, पुत्र्यः ॥

१७०७ सर्वभूमिपृथिवीभ्यामणञौ । ५ । १ । ४१ ॥

सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः । पार्थिवः । सर्वभूमिशब्दोऽनुशतिकादिषु पठ्यते ॥

१७०७-षष्ठ्यन्त समर्थ सर्वभूमि और पृथिवी शब्दके उत्तर निमित्तार्थमें अण् और अञ् प्रत्यय हो, जैसे-सर्वभूमेर्निमित्तं संयोगः उत्पातो वा=सार्वभौमः । पार्थिवः । सर्वभूमि शब्दका अनुशतिकादि गणमें पाठ है ॥

१७०८ तस्येश्वरः । ५ । १ । ४२ ॥

१७०८-'तस्य ईश्वरः' (उसका ईश्वर) और-

१७०९ तत्रविदित इति च ।५।१।४३ ॥

सर्वभूमेरीश्वरः सर्वभूमौ विदितो वा सार्वभौमः । पार्थिवः ॥

१७०९-'तत्र विदितः" (इस स्थलमें वा विषयमें विदित) इन दो अर्थोंमें अण् और अञ् प्रत्यय हो, जैसे-सर्वभूमरीश्वरः=सर्वभूमौ विदितो वा=सार्वभौमः । पार्थिवः ॥

१७१० लोकसर्वलोकाट्ठञ् ।५।१।४४॥

तत्र विदित इत्यर्थे । लौकिकः । अनुशतिकादित्वादुभयपदवृद्धिः सार्वलौकिकः ॥

१७१०-लोक और सर्वलोक शब्दके उत्तर 'तत्र विदितः' इस अर्थमें ठञ् प्रत्यय हो, जैसे-लौकिकः । अनुशतिकादित्वके कारण दोनों पदोंको वृद्धि होगी, जैसे-सार्वलौकिकः ॥

१७११ तस्य वापः । ५ । १ । ४५ ॥

उप्यते अस्मिन्निति वापः क्षेत्रम् । प्रस्थस्य वापः प्रास्थिकम् । द्रौणिकम् । खारीकम् ॥

१७११-उसका 'वाप' अर्थात् क्षेत्र होनेपर प्रस्थादि शब्दोंके उत्तर अण् प्रत्यय हो, जिसमें जौआदि बोये जायं उसको वाप अर्थात् क्षेत्र कहतेहैं, जैसे-प्रस्थस्य वापः=प्रास्थिकम् । द्रौणिकम् । खारीकम् ॥

१७१२ पात्रात् ष्ठन् । ५ । १ । ४६ ॥

पात्रस्य वापः क्षेत्रं पात्रिकम् । पात्रिकी क्षेत्रभक्तिः ॥

१७१२-पात्र शब्दके उत्तर उक्त अर्थमें ष्ठन् प्रत्यय हो, जैसे-पात्रस्य वापः क्षेत्रम्=पात्रिकम् । पात्रिकी क्षेत्रभक्तिः ॥

१७१३ तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते । ५ । १ । ४७ ॥

वृद्धिर्दीयत इत्यादिक्रमेण प्रत्येकं सम्बन्धादेकवचनम् । पंचास्मिन् वृद्धिः आयः लाभः शुल्कमुपदा वा दीयते पंचकः । शतिकः । शत्यः । साहस्रः । उत्तमर्णेन मूलातिरिक्तं ग्राह्यं वृद्धिः । ग्रामादिषु स्वामिग्राह्यो भाग आयः । विक्रेत्रा मूल्यादधिकग्राह्यं लाभः । रक्षानिर्वेशो राजभागः शुल्कः । उत्कोच उपदा ॥ चतुर्थ्यर्थ उपसंख्यानम् ॥ * ॥ पञ्चास्मै वृद्ध्यादिर्दीयते पञ्चको देवदत्तः । सममब्राह्मणे दानमितिवदधिकरणत्वविवक्षा वा ॥

१७१३-'तदस्मिन् दीयते' इस अर्थमें वृद्धि, आय, लाभ, शुल्क और उपदा इनको 'दीयते' इसका कर्म होनेपर यथाविहित प्रत्यय हों, 'वृद्धिर्दीयते' इत्यादि क्रमानुसार प्रत्येकके संबन्धमें एकवचन हुआहै, जैसे-पञ्चास्मिन् वृद्धिः आयः लाभः शुल्कम् उपदा वा दीयते, इस वाक्यमें पञ्चकः । शतिकः । शत्यः । साहस्रः ।

उत्तमर्ण अर्थात् ऋणदातृकर्तृक मूल धनकी अपेक्षाके अतिरिक्त ग्राह्य धन (व्याज)को वृद्धि कहतेहैं ।

ग्रामादिमें स्वामीके ग्राह्य भागका नाम आय है ।

विक्रयकर्ता (बेचनेवाला) से मूल धनकी अपेक्षाके अतिरिक्त ग्राह्य धनादिको लाभ कहतेहैं ।

रक्षाके निमित्त राजोंके भागनिमित्त गृहीत धनादिको शुल्क (कर) कहतेहैं ।

उत्कोचको उपदा (घूस) कहतेहैं ।

चतुर्थीके अर्थमें भी प्रथमान्त समर्थसे उक्त प्रत्यय हों * जैसे-पञ्च अस्मै वृद्ध्यादिः दीयते=पञ्चको देवदत्तः । अथवा 'सममब्राह्मणे दानम्' इसके समान अधिकरणत्व विवक्षा जाननी ॥

१७१४ पूरणार्धाट्ठन् । ५ । १ । ४८ ॥

यथाक्रमं ठक्टिठनोरपवादः । द्वितीयो वृद्ध्यादिरस्मिन् दीयते द्वितीयिकः । तृतीयिकः । अर्द्धिकः । अर्द्धशब्दो रूपकस्यार्द्धे रूढः ॥

१७१४-पूरणप्रत्ययान्त और अर्द्ध शब्दके उत्तर पूर्वोक्त अर्थमें ठन् प्रत्यय हो, यह सूत्र यथाक्रम ठक् और टिठन् प्रत्ययका अपवादक है, जैसे-द्वितीयो वृद्ध्यादिः अस्मिन् दीयते, इस विग्रहमें द्वितीयिकः । तृतीयिकः । अर्द्धिकः । अर्द्ध शब्द रूपकके अर्द्धमें रूढ है ॥

१७१५ भागाद्यच्च । ५ । १ । ४९ ॥

चाट्ठन् । भागशब्दोपि रूपकस्यार्द्धे रूढः । भागो वृद्ध्यादिरस्मिन् दीयते भाग्यं, भागिकं शतम् । भाग्या, भागिका विंशतिः ॥

१७१५-भाग शब्दके उत्तर यत् और ठन् प्रत्यय हो, भाग शब्द भी रूपकके अर्द्धमें रूढ है, जैसे-भागो वृद्ध्यादिरस्मिन् दीयते=भाग्यम्, भागिकं शतम् । भाग्या, भागिका विंशतिः ॥ भाग शब्दसे वृद्ध्यादि जानना ॥

१७१६ तद्धरति वहत्यावहति भाराद्वंशादिभ्यः । ५ । १ । ५० ॥

वंशादिभ्यः परो यो भारशब्दस्तदन्तं यत्प्रातिपदिकं तत्प्रकृतिकाद्द्वितीयान्तादित्यर्थः । वंशभारं हरति वहत्यावहति वा वांशभारिकः । ऐक्षुभारिकः । भाराद्वंशादिभ्य इत्यस्य व्याख्यान्तरं भारभूतेभ्यो वंशादिभ्य इति । भारभूतान्वंशान् हरति वांशिकः । ऐक्षुकः ॥

१७१६-'तत् हरति वहति आवहति' इन अर्थोंमें वंशादि शब्दोंके परे स्थित जो भारशब्दान्त प्रातिपदिक, तत्प्रकृतिक द्वितीयान्त पदके उत्तर यथाविहित प्रत्यय हों, जैसे-वंशभारं हरति वहति आवहति वा=वांशभारिकः । ऐक्षुभारिकः । "भाराद्वंशादिभ्यः" इसका भारभूत वंशादि शब्दोंके उत्तर यथाविहित प्रत्यय हों, ऐसा व्याख्यान्तर है, इससे भारभूतान् वंशान् हरति=वांशिकः, ऐक्षुकः, ऐसे पद सिद्ध होतेहैं ॥

१७१७ वस्नद्रव्याभ्यां ठन्कनौ । ५ । १ । ५१ ॥

यथासंख्यं स्तः । वस्नं हरति वहत्यावहति वा वस्निकः । द्रव्यकः ॥

१७१७-पूर्वोक्तार्थमें वस्न और द्रव्य शब्दके उत्तर यथाक्रम ठन् और कन् प्रत्यय हो, जैसे-वस्नं हरति वहति आवहति वा=वस्निकः । द्रव्यकः ॥

१७१८ सम्भवत्यवहरति पचति । ५ । १ । ५२ ॥

प्रस्थं सम्भवति प्रास्थिकः कटाहः । प्रस्थं

स्वस्मिन्समावेशयतीत्यर्थः। प्रास्थिकी ब्राह्मणी। प्रस्थमवहरति पचति वेत्यर्थः ॥ तत्पचतीति द्रोणादण् च ॥ * ॥ चाट्ठञ् । द्रौणं पचतीति द्रौणी । द्रौणिकी ॥

१७१८–'सम्भवति', 'अवहरति' और 'पचति' अर्थमें प्रस्थ शब्दके उत्तर यथाविहित प्रत्यय हों, जैसे–प्रस्थं सम्भवति=प्रास्थिकः कटाहः, अर्थात् प्रस्थको अपनेमें समावेशित करताहै, इससे उसको प्रास्थिक कहतेहैं। प्रास्थिकी ब्राह्मणी, अर्थात् जो प्रस्थका अवहरण और पाक करतीहै।

वह पाक करताहै, इस अर्थमें द्रोण शब्दके उत्तर अण् और ठञ् प्रत्यय हो * जैसे–द्रोणं पचति, इस वाक्यमें द्रौणी, द्रौणिकी ॥

१७१९ आढकाचितपात्रात्खोऽन्यतरस्याम् । ५ । १ । ५३ ॥

पक्षे ठञ् । आढकं सम्भवति अवहरति पचति वा आढकीना।आढकिकी। आचितीना। आचितिकी । पात्रीणा । पात्रिकी ॥

१७१९–आढक, आचित और पात्र शब्दके उत्तर संभवति इत्यादि अर्थमें ख प्रत्यय हो, और विकल्प पक्षमें ठञ् प्रत्यय हो, जैसे–आढकं संभवति अवहरति पचति वा=आढकीना, आढकी । आचितीना, आचितिकी । पात्रीणा, पात्रिकी ॥

१७२० द्विगोः ष्ठंश्च । ५ । १ । ५४ ॥

आढकाचितपात्रादित्येव।आढकाद्यन्ताद्द्विगोः सम्भवत्यादिष्वर्थेषु ष्ठन्खौ वा स्तः पक्षे ठञ् । तस्याध्यर्द्धेति लुक् । षित्वान्ङीष् द्याढकिकी । द्याढकीना । द्विगोरिति ङीष् । द्याढकी । द्याचितिकी । द्याचितीना । अपरिमाणेति ङीब्निषेधात्, द्याचिता । द्विपात्रिकी । द्विपात्रीणा । द्विपात्री ॥

१७२०–द्विगुसमासान्त, आढक, आचित और पात्र शब्दके उत्तर सम्भावनादि अर्थमें विकल्प करके ष्ठन् और ख प्रत्यय हो, विकल्प पक्षमें ठञ् प्रत्यय होगा, "अध्यर्द्ध० १६९३" इस सूत्रसे उस ठञ् प्रत्ययका लुक् और षित्संज्ञक होनेके कारण स्त्रीलिङ्गमें ङीष् प्रत्यय होगा, जैसे–द्याढकिकी, द्याढकीना। द्विगुसमासान्तके उत्तर स्त्रीलिङ्गमें ङीप् प्रत्यय होगा (४७९), जैसे–द्याढकी। द्याचितिकी, द्याचितीना । "अपरिमाण० ४८०" इस सूत्रसे ङीप् प्रत्ययका निषेध भी होगा, जैसे–द्याचिता । द्विपात्रिकी, द्विपात्रीणा, द्विपात्री ॥

१७२१ कुलिजाल्लुक्खौ च ।५।१।५५॥

कुलिजान्ताद्द्विगोः सम्भवत्यादिष्वर्थेषु लुक्खौ वा स्तः। चात् ष्ठंश्च । लुगभावे ठञः श्रवणम् । द्विकुलिजी । द्वैकुलिजिकी । द्विकुलिजीना । द्विकुलिजिकी ॥

१७२१–कुलिजान्त द्विगु समासके उत्तर संभवत्यादि अर्थमें विकल्प करके ठञ् प्रत्ययका लुक् और ख प्रत्यय हो, सूत्रमें चकार होनेके कारण ठन् प्रत्यय भी हो,जैसे–द्विकुलिजी, द्वैकुलिजिकी । द्विकुलिजीना, द्विकुलिजिकी ॥

१७२२सोऽस्यांशवस्नभृतयः ५।१।५६॥

अंशो भागः। वस्नं मूल्यम् । भृतिर्वेतनम् । पञ्च अंशो वस्नो भृतिर्वाऽस्य पञ्चकः ॥

१७२२–वह इसका है, इस अर्थमें तथा अंश अर्थात् भाग, वस्न अर्थात् मूल्य और भृति अर्थात् वेतन, ऐसे अर्थोंमें यथाविहित प्रत्यय हों, जैसे–पञ्च अंशो वस्नो भृतिर्वा अस्य, इस विग्रहमें पञ्चकः ॥

१७२३ तदस्य परिमाणम् ।५।१।५७ ॥

प्रस्थं परिमाणमस्य प्रास्थिको राशिः ॥

१७२३–वह इसका परिमाण है, इस षष्ठ्यर्थमें संख्यावाचक प्रस्थ शब्दके उत्तर उक्त प्रत्यय हो, जैसे–प्रस्थं परिमाणमस्य, इस विग्रहमें प्रास्थिको राशिः ॥

१७२४ संख्यायाः संज्ञासंघसूत्राध्ययनेषु । ५ । १ । ५८ ॥

पूर्वसूत्रमनुवर्तते ॥ तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः ॥ * ॥ यद्वा द्व्येकयोरितिवत्संख्यामात्रवृत्तेः परिमाणिनि प्रत्ययः । पञ्चैव पञ्चकाः शकुनयः। पञ्च परिमाणमेषामिति वा। संघे–पञ्चकः। सूत्रे–अष्टकं पाणिनीयम् । संघशब्दस्य प्राणिसमूहे रूढत्वात्सूत्रं पृथगुपात्तम् । पञ्चकमध्ययनम् ॥ स्तोमे डविधिः ॥ * ॥ पञ्चदश मन्त्राः परिमाणमस्य पञ्चदशः । सप्तदशः। एकविंशः। सोमयागेषु छन्दोगैः क्रियमाणा पृष्ठ्यादिसंज्ञिका स्तुतिः स्तोमः ॥

१७२४–संज्ञा, संघ, सूत्र और अध्ययन अर्थ होनेपर 'तदस्य परिमाणम्' इस अर्थमें संख्यावाचक शब्दके उत्तर उक्त प्रत्यय हो।

संघादिके मध्यमें संज्ञा अर्थमें स्वार्थमें ही उक्त प्रत्यय हों * जैसे–पञ्चैव=पञ्चकाः शकुनयः, पञ्चपरिमाणमेषाम् इति वा । संघार्थमें–पञ्चकः । सूत्रमें जैसे–अष्टकं पाणिनीयम् ॥

संघ शब्दके प्राणिसमूहमें रूढत्वके कारण यह सूत्र पृथक् कहागयाहै, जैसे–पञ्चकमध्ययनम् ॥

स्तोमार्थमें ड प्रत्यय हो* जैसे–पञ्चदशपरिमाणमस्य=पञ्चदशः स्तोमः । सप्तदशः । एकविंशः । सोम यागमें सामगानेवालोंके द्वारा क्रियमाण पृष्ठ्यादि संज्ञिका स्तुतिको स्तोम कहतेहैं॥

१७२५ पंक्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् । ५ । १ । ५९ ॥

एते रूढिशब्दा निपात्यन्ते ॥

१७२५–पंक्ति, विंशति, त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टि, सप्तति, अशीति, नवति और शत,यह रूढिशब्द निपातनसे सिद्ध हों ॥

१७२६ पञ्चद्दशतौ वर्गे वा । ५।१।६० ॥

पञ्च परिमाणमस्य पञ्चद्वर्गः । दशत् । पक्षे । पञ्चकः । दशकः ॥

१७२६–वर्ग अर्थ होनेपर पञ्चत् और दशत् यह दो पद विकल्प करके निपातनसे सिद्ध हों, जैसे–पञ्च परिमाणमस्य= पञ्चद्वर्गः । दशत् । विकल्प पक्षमें पञ्चकः । दशकः ॥

१७२७ त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् । ५ । १ । ६२ ॥

त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि । चात्वारिंशानि ब्राह्मणानि ॥

१७२७–ब्राह्मणविषयमें संज्ञा होनेपर त्रिंशत् और चत्वारिंशत् शब्दके उत्तर डण् प्रत्यय हो, जैसे–त्रिंशदध्यायाः परिमाणं येषां ब्राह्मणानां=त्रैंशानि । चात्वारिंशानि ॥

१७२८ तदर्हति । ५ । १ । ६३ ॥

लब्धुं योग्यो भवतीत्यर्थे द्वितीयान्ताट्ठञादयः स्युः । श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः ॥

१७२८–इसके योग्य है, इस अर्थमें द्वितीयान्त शब्दके उत्तर ठञ् आदि प्रत्यय हों, जैसे–श्वेतच्छत्रमर्हति= श्वैतच्छत्रिकः ॥

१७२९ छेदादिभ्यो नित्यम् ।५।१।६४॥

नित्यमाभीक्ष्ण्यम् । छेदं नित्यमर्हति छैदिको वेतसः । छिन्नप्ररूढत्वात् ॥ विरागविरङ्गं च॥ *॥विरागं नित्यमर्हति वैरागिकः।वैरङ्गिकः॥

१७२९–'नित्यम् अर्हति' इस अर्थमें छेदादि शब्दके उत्तर ठञ् प्रत्यय हो, जैसे–छेदं नित्यमर्हति= छैदिको वेतसः । छेदनमात्रमें ही प्ररूढ होनेके कारण इसको छैदिक कहतेहैं ॥

विराग और विरंग शब्दके उत्तर विकल्प करके ठञ् प्रत्यय हो * जैसे–विरागं नित्यमर्हति, इस विग्रहमें वैरागिकः । वैरङ्गिकः ॥

१७३० शीर्षच्छेदाद्यच्च । ५ । १ ।६५॥

शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः । शैर्षच्छेदिकः । यट्ठकोः सन्नियोगेन शिरसः शीर्षभावो निपात्यते ॥

१७३०–'नित्यमर्हति' इस अर्थमें शीर्षच्छेद शब्दके उत्तर यत् और ठक् प्रत्यय हो, जैसे–शीर्षच्छेद्यः, शैर्षच्छेदिकः । यत् और ठक् प्रत्ययके सन्नियोगसे शिरस् शब्दके स्थानमें शीर्ष आदेश निपातनसिद्ध हुआ है ॥

१७३१ दण्डादिभ्यो यत् । ५।१।६६॥

एभ्यो यत् स्यात् । दण्डमर्हति दण्ड्यः।अर्घ्यः। वध्यः ॥

१७३१–दण्डादि शब्दके उत्तर यत् प्रत्यय हो, जैसे=दण्डमर्हति=दण्ड्यः । अर्घ्यः । वध्यः ॥

१७३२ पात्राद् घंश्च । ५ । १ । ६८ ॥

चाद्यत् तदर्हतीत्यर्थे पात्रियः । पात्र्यः ॥

१७३२–पात्र शब्दसे घञ् और यत् प्रत्यय हो, जैसे– पात्रियः, पात्र्यः ॥

१७३३कडङ्करदक्षिणाच्छ च।५।१।६९॥

चाद्यत् । कडं करोतीति विग्रहे अत एव निपातनात् खच् । कडंकरं माषमुद्गादिकाष्ठमर्हतीति कडंकरीयो गौः । कडंकर्यः । दक्षिणामर्हतीति दक्षिणीयः । दक्षिण्यः ॥

१७३३–'अर्हति' इस अर्थमें कडङ्कर और दक्षिणा शब्दके उत्तर छ और चकारद्वारा यत् प्रत्यय हो, कडं करोति, इस विग्रहमें इसी निपातनसे खच् प्रत्यय भी हुआ, कडङ्करं माषमुद्गादिकाष्ठम् अर्हति, इस विग्रहमें कडङ्करीयो गौः, कडङ्कर्यः । दक्षिणामर्हति, इस वाक्यमें दक्षिणीयः, दक्षिण्यः ॥

१७३४ स्थालीबिलात् । ५ । १ ।७०॥

स्थालीबिलमर्हति स्थालीबिलीयास्तण्डुलाः। स्थालीबिल्याः । पाकयोग्या इत्यर्थः ॥

१७३४–स्थालीबिल शब्दके उत्तर 'अर्हति' अर्थमें छ और यत् प्रत्यय हो,जैसे–स्थालीबिलमर्हन्ति,इस वाक्यमें स्थालीबिलीयाः तण्डुलाः, स्थालीबिल्याः, अर्थात् पाकयोग्य ॥

१७३५यज्ञर्त्विग्भ्यां घखञौ।५।१।७१॥

यथासंख्यं स्तः।यज्ञमृत्विजं वार्हति यज्ञियः । आर्त्विजीनो यजमानः ॥ यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम् ॥ * ॥ यज्ञियो देशः । आर्त्विजीन ऋत्विक् ॥

॥ इत्यार्हीयाणां ठगादीनां द्वादशानां पूर्णोवधिः ॥

१७३५–यज्ञ और ऋत्विज् शब्दके उत्तर यथाक्रम घ और खञ् प्रत्यय हो, अर्थात् यज्ञ शब्दके उत्तर घ और ऋत्विज् शब्दके उत्तर खञ् प्रत्यय हो,जैसे–यज्ञम् ऋत्विजं वाऽर्हति इस वाक्यमें यज्ञियः । आर्त्विजीनो यजमानः ॥

यज्ञ और ऋत्विज् शब्दके उत्तर यह उस कर्म करनेके योग्य है, इस अर्थमें यथाक्रम घ और खञ् प्रत्यय हो * जैसे– यज्ञियो देशः । आर्त्विजीन ऋत्विक् ॥

इस सूत्रतक आर्हीय ठगादि अर्थात् ठक्, यत्, छ, अण्, अन्, इन्, ठन, कन्, ख, डण्, छ, खञ्, घ, इन बारह तद्धित प्रत्ययोंकी विधि वर्णित हुई ॥

॥ इत्यार्हीयप्रकरणम् ॥

अथ ठञधिकारे कालाधिकारप्रकरणम् ।

अतः परं ठञेव ॥

इसके परे ठञ्का ही आधिकार चलैगा ।

१७३६ पारायणतुरायणचान्द्रायणं वर्तयति । ५ । १ । ७२ ॥

पारायणं वर्तयति पारायणिकश्छात्रः । तुरायणं यज्ञविशेषः । तं वर्तयति तौरायणिको यजमानः । चान्द्रायणिकः ॥

१७३६-पारायण, तुरायण, और चान्द्रायण शब्दके उत्तर 'वर्त्तयति' इस अर्थमें ठञ् प्रत्यय हो, जैसे-पारायणं वर्त्तयति=पारायणिकश्छात्रः । तुरायणं यज्ञविशेषः, तं वर्त्तयति=तौरायणिकः यजमानः । चान्द्रायणिकः ॥

१७३७ संशयमापन्नः । ५ । १ । ७३ ॥

संशयविषयीभूतोऽर्थः सांशयिकः ॥

१७३७-संशय शब्दके उत्तर तदापन्न अर्थमें ठञ् प्रत्यय हो, जैसे-संशयविषयीभूतोऽर्थः=सांशयिकः । संशय शब्द संशयविषयमें लाक्षणिकहै अर्थात् लक्षणा वृत्तिसे संशय शब्दसे सन्देहयुक्त वस्तु जानना । सन्दिहान व्यक्ति अर्थ नहीं है । संशयम् आपन्नो यस्मिन् सः=सांशयिकः ॥

१७३८ योजनं गच्छति । ५ । १।७४॥

यौजनिकः ॥ क्रोशशतयोजनशतयोरुपसंख्यानम् ॥ * ॥ क्रोशशतं गच्छति क्रौशशतिकः । यौजनशतिकः ॥ ततोऽभिगमनमर्हतीति च वक्तव्यम् ॥ * ॥ क्रोशशतादभिगमनमर्हतीति क्रौशशतिको भिक्षुः । यौजनशतिक आचार्यः ॥

१७३८-'गच्छति' इस अर्थमें द्वितियान्त समर्थ योजन शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-यौजनिकः ।

क्रोशशत और योजनशत शब्दके उत्तर ठञ् प्रत्यय हो * जैसे क्रोशशतं गच्छति=क्रौशशतिकः । यौजनशतिकः ।

'अभिगमन करताहै' इस अर्थमें क्रोशशतादि शब्दके उत्तर ठञ् प्रत्यय हो * जैसे-क्रोशशतादभिगमनर्हति=क्रौशशतिको भिक्षुः । यौजनशतिक आचार्यः ॥

१७३९ पथः ष्कन् । ५ । १ । ७५ ॥

षो ङीषर्थः॥पन्थानं गच्छति पथिकः॥पथिकी॥

१७३९-पथिन् शब्दके उत्तर 'गच्छति' अर्थमें ष्कन् प्रत्यय हो, षकार इत् ङीप् प्रत्ययार्थ है, जैसे-पन्थानं गच्छति पथिकः । स्त्रीलिङ्गमें पथिकी ॥

१७४० पन्थो ण नित्यम्।५।१।७६॥

पन्थानं नित्यं गच्छति । पान्थः । पान्था ॥

१७४०-' नित्यं गच्छति' इस अर्थमें पथिन् शब्दके उत्तर ण प्रत्यय हो, ''पथः पन्थ च'' इस पूर्वोक्त सूत्रसे पथिन् शब्दके स्थानमें पन्थ आदेश होनेपर उसके उत्तर ण प्रत्यय होगा, जैसे-पान्थः । पान्था ॥

१७४१ उत्तरपथेनाहृतं च।५।१।७७॥

उत्तरपथेनाहृतम् औत्तरपथिकम् । उत्तरपथेन गच्छति औत्तरपथिकः ॥ आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वादुपसंख्यानम् ॥ * ॥ वारिपथिकम् ॥

१७४१-'आहृतम्' इस अर्थमें और चकारसे 'गच्छति' अर्थमें तृतीयान्त उत्तरपथ शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-उत्तरपथेनाहृतम्, इस विग्रहमें औत्तरपथिकम् । उत्तरपथेन गच्छति=औत्तरपथिकः ॥

आहृत प्रकरणमें वारि, जंगल और कान्तार शब्द पूर्वमें रहते परवर्ती पथिन् शब्दके उत्तर ठञ् प्रत्यय हो * जैसे-वारिपथिकम् ॥

१७४२ कालात् । ५ । १ । ७८ ॥

व्युष्टादिभ्योणित्यतः प्रागधिकारोऽयम् ॥

१७४२-''व्युष्टादिभ्योऽण् १७६१'' इस सूत्रके पूर्वपर्यन्त ''कालात्'' इस सूत्रका अधिकार चलैगा ॥

१७४३ तेन निर्वृत्तम्। ५। १।७९ ॥

अह्ना निर्वृत्तमाह्निकम् ॥

१७४३-' निर्वृत्तम् ' इस अर्थमें ठञ् प्रत्यय हो, जैसे-अह्ना निर्वृत्तम्, इस वाक्यमें आह्निकम् ॥

१७४४ तमधीष्टो भृतो भूतो भावी। ५ । १ । ८० ॥

अधीष्टः सत्कृत्य व्यापारितः । भृतो वेतनेन क्रीतः । भूतः । स्वसत्तया व्याप्तकालः । भावी तादृश एवानागतकालः । मासमधीष्टो मासिकोऽध्यापकः । मासं भृतो मासिकः कर्मकरः । मासं भूतो मासिको व्याधिः । मासं भावी मासिक उत्सवः ॥

१७४४-'अधीष्टः, भृतः, भूतः भावी' ऐसे अर्थमें ठञ् प्रत्यय हो, अधीष्ट अर्थात् सत्कारपूर्वक कार्यमें नियोजित वा सत्कारपूर्वक ठहरना, भृत अर्थात् वेतनद्वारा खरीदा हुआ, भूत शब्दसे सत्ताद्वारा व्याप्य काल, भावी अनागत कालको कहतेहैं, जैसे-मासम् अधीष्टः=मासिकः अध्यापकः । मासं भृतो=मासिकः कर्मकरः । मासं भूतः=मासिको व्याधिः । मासं भावी=मासिकः उत्सवः ॥

१७४५ मासाद्वयसि यत्खञौ । ५ । १ । ८१ ॥

मासं भूतो मास्यः । मासीनः ॥

१७४५–वयस् अर्थमें द्वितीयान्त समर्थ मास शब्दके उत्तर यत् और खञ् प्रत्यय हो, जैसे–मासं भूतो=मास्यः, मासीनः॥

१७४६ द्विगोर्यप् । ५ । १ । ८२ ॥

मासाद्वयसीत्यनुवर्तते । द्वौ मासौ भूतो द्विमास्यः ॥

१७४६–द्विगुसमास मासान्त शब्दके उत्तर वयस् अर्थमें यप् प्रत्यय हो, जैसे–द्वौ मासौ भूतः–द्विमास्यः ॥

१७४७ षण्मासाण्ण्यच्च।५।१।८३ ॥

वयसीत्येव । यबप्यनुवर्तते । चाट्ठञ् । षाण्मास्यः । षण्मास्यः । षाण्मासिकः ॥

१७४७–षण्मास शब्दके उत्तर वयस् अर्थमें ण्यत् और यप् प्रत्यय हो, सूत्रमें चकार होनेसे ठञ् प्रत्ययका भी समागम होगा, जैसे–षाण्मास्यः, षण्मास्यः, षाण्मासिकः ॥

१७४८ अवयसि ठंश्च ।५।१।८४॥

चाण्ण्यत् । षण्मासिको व्याधिः । षाण्मास्यः।

१७४८–वयस्भिन्न अर्थमें षण्मास शब्दके उत्तर ठन् और ण्यत् प्रत्यय हो, जैसे–षण्मासिको व्याधिः, षाण्मास्यः ॥

१७४९ समायाः खः ।५।१। ८५ ॥

समामधीष्टो भृतो भूतो भावी वा समीनः॥

१७४९–अधीष्ट, भृत, भूत और भावी अर्थमें समा शब्दके उत्तर ख प्रत्यय हो, जैसे–समामधीष्टो भृतो भूतो भावी वा=समीनः ॥

१७५० द्विगोर्वा । ५ । १ । ८६ ॥

समायाः ख इत्येव । तेन परिजय्येत्यतः प्राङ् निर्वृत्तादिषु पंचस्वर्थेषु प्रत्ययाः । द्विसमीनः । द्वैसमिकः ॥

१७५०–द्विगुसमासनिष्पन्न समान्त शब्दके उत्तर विकल्प करके ख प्रत्यय हो, "तेन परिजय्य० १७५७" इस सूत्रके पूर्वपर्यन्त निर्वृत्तादि पांच अर्थोंमें समस्त प्रत्यय हों, जैसे–द्विसमीनः, द्वैसमिकः ॥

१७५१ रात्र्यहःसंवत्सराच्च ।५।१।८७ ॥

द्विगोरित्येव । द्विरात्रीणः । द्वैरात्रिकः । द्व्यहीनः । द्वैयह्निकः । समासान्तविधेरनित्यत्वान्न टच् । द्विसंवत्सरीणः ॥

१७५१–द्विगुसमासनिष्पन्न रात्रि, अहन् और संवत्सर शब्दके उत्तर उक्त प्रत्यय हों, जैसे–द्विरात्रीणः, द्वैरात्रिकः । द्व्यहीनः, द्वैयह्निकः, यहां समासान्त विधिके अनित्यत्वके कारण टच् प्रत्यय नहीं हुआ । द्विसंवत्सरीणः ॥

१७५२ संख्यायाः संवत्सरसंख्यस्य च । ७ । ३ । १५ ॥

संख्याया उत्तरपदस्य वृद्धिः स्याद् ञिदादौ। द्विसांवत्सरिकः । द्वे षष्टी भृतो द्विषाष्टिकः । (संख्यायाः) परिमाणान्तस्येत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याऽग्रहणार्थम् । तेन द्वैसमिक इत्युत्तरपदवृद्धिर्न ॥

१७५२–ञित्आदि तद्धित प्रत्यय परे रहते संख्यावाचक शब्दके परवर्ती द्विगुसमासमें संवत्सर और संख्यावाचक शब्दको वृद्धि हो, जैसे–द्विसांवत्सरिकः । द्वे षष्टी भृतो द्विषाष्टिकः।"परिमाणान्तस्य०"इस सूत्रसे संवत्सर शब्दको वृद्धि सिद्ध थी, तथापि संवत्सर शब्दका ग्रहण केवल परिमाणवाचकके ग्रहणविषयमें कालपरिमाणके अग्रहणके निमित्त है, इस कारण 'द्वैसमिकः' इस स्थलमें उत्तरपदको वृद्धि नहीं हुई ॥

१७५३ वर्षाल्लुक् च ।५।१ । ८८॥

वर्षशब्दान्ताद् द्विगोर्वा खः । पक्षे ठञ् वा च लुक् । त्रीणि रूपाणि । द्विवर्षीणो व्याधिः । द्विवार्षिकः । द्विवर्षः ॥

१७५३–द्विगुसमासनिष्पन्न वर्षशब्दान्त प्रातिपदिकके उत्तर विकल्प करके ख प्रत्यय हो, पक्षमें ठञ् और विकल्प करके लुक् होगा, इस कारण तीन रूप होंगे, जैसे–द्विवर्षीणो व्याधिः, द्विवार्षिकः, द्विवर्षः ॥

१७५४ वर्षस्याऽभविष्यति।७।३।१६॥

उत्तरपदस्य वृद्धिः स्यात् । द्विवार्षिकः । भविष्यति तु द्वैवर्षिकः । अधीष्टभृतयोरभविष्यतीति प्रतिषेधो न । गम्यते हि तत्र भविष्यत्ता न तु तद्धितार्थः । द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः ॥

१७५४–भविष्यद्भिन्न अर्थमें उत्तरपदस्थित वर्ष शब्दके अकारको वृद्धि हो, जैसे–द्विवार्षिकः ।

भविष्यदर्थमें द्वैवर्षिकः, इस प्रकार होगा । अधीष्ट और भृत अर्थमें 'अभविष्यति' यह प्रतिषेध नहीं होगा, कारण कि, उस स्थलमें भविष्यत्ता गम्यमान होनेपर भी तद्धितार्थ वह नहीं है, जैसे–द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यति, इस विग्रहमें द्विवार्षिकः मनुष्यः ।

(परिमाणान्तस्याऽसंज्ञाशाणयोः । ७ । ३ । १७ ॥

द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः । द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम् । द्विनैष्किकम् । असंज्ञेति किम् । पञ्च कलायाः परिमाणमस्य पाञ्चकलायिकम् । तद्धितान्तः संज्ञा । द्वैशाणम् । कुलिजशब्दमपि केचित्पठन्ति । द्वैकुलिजिकः ॥ सू० १६८३)

असंज्ञामें तथा शाण शब्द उत्तरपदमें न होनेपर, परिमाणान्त शब्दके उत्तर पदको वृद्धि हो, (१६८३) जैसे-द्वौ कुडवौ प्रयोजनमस्य=द्विकौडविकः । द्वाभ्यां सुवर्णाभ्यां क्रीतम्=द्विसौवर्णिकम् । द्विनैष्किकम् ।

असंज्ञा कहनेसे पञ्च कपलायाः परिमाणमस्य=पाञ्चकलायिकम्, ऐसा होगा ।

तद्धितान्त शब्द ही संज्ञाभूत है, इस कारण उत्तरपदको वृद्धि नहीं हुई, द्वैशाणम् ।

कोई २ इस स्थलमें कुलिज शब्दका भी पाठ करतेहैं, जैसे-द्वैकुलिजिकः ॥

१७५५ चित्तवति नित्यम् । ५ । १ । ८९ ॥

वर्षशब्दान्ताद् द्विगोः प्रत्ययस्य नित्यं लुक् स्यात् चेतने प्रत्ययार्थे । द्विवर्षो दारकः ॥

१७५५-यदि प्रत्ययार्थ चेतन पदार्थ हो तो द्विगुसमासनिष्पन्न वर्षशब्दान्त प्रातिपदिकके उत्तर तद्धित प्रत्ययका लुक् हो, जैसे-द्विवर्षो दारकः ॥

१७५६ षष्टिकाः षष्टिरात्रेण पच्यन्ते । ५ । १ । ९० ॥

बहुवचनमतन्त्रम् । षष्टिको धान्यविशेषः । तृतीयान्तात्कन् रात्रशब्दलोपश्च निपात्यते ॥

१७५६-' षष्टिकाः षष्टिरात्रेणपच्यन्ते ' इस अर्थमें ' षष्टिकः ' पद निपातनसे सिद्ध हुआहै, बहुवचन अतंत्र अर्थात् अविवक्षित जानना, षष्टिक शब्दसे धान्यविशेष जानना, तृतीयान्त षष्टिरात्र शब्दके उत्तर कन् प्रत्यय हो, और रात्रि शब्दका निपातनसे लोप हो ॥

१७५७ तेन परिजय्यलभ्यकार्यसुकरम् । ५ । १ । ९३ ॥

मासेन परिजय्यो जेतुं शक्यो मासिको व्याधिः। मासेन लभ्यं कार्यं सुकरं वा मासिकम् ॥

१७५७-तृतीयान्त पदके उत्तर परिजय्य, लभ्य, कार्य और सुकर अर्थमें ठञ् प्रत्यय हो, जैसे-मासेन परिजय्यो (जेतुं शक्यः)=मासिको व्याधिः । मासेन लभ्यं कार्यं सुकरं वा=मासिकम् ॥

१७५८ तदस्य ब्रह्मचर्यम् । ५ । १ । ९४ ॥

द्वितीयान्तात्कालवाचिनोऽस्येत्यर्थे प्रत्ययः स्यात् । अत्यन्तसंयोगे द्वितीया । मासं ब्रह्मचर्यमस्य स मासिको ब्रह्मचारी । आर्द्धमासिकः। यद्वा । प्रथमान्तादस्येत्यर्थे प्रत्ययः । मासोऽस्येति मासिकं ब्रह्मचर्यम् ॥ महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम् ॥ * ॥ महानाम्न्यो नाम विदा मघवन्नित्याद्या ऋचः । तासां ब्रह्मचर्यमस्य महानाम्निकः । हरदत्तस्तु भस्याढ इति पुंवद्भावान्माहानामिक इत्याह ॥ चतुर्मासाण्ण्यो यज्ञे तत्र भव इत्यर्थे ॥ * ॥ चतुर्षु मासेषु भवन्ति चातुर्मास्यानि यज्ञकर्माणि ॥ संज्ञायामण् ॥ * ॥ चतुर्षु मासेषु भवति चातुर्मासी । पौर्णमासी । अण्णन्तत्वान्ङीप् ॥

१७५८-ब्रह्मचर्य होनेपर द्वितीयान्त कालवाचक प्रातिपदकके उत्तर ' अस्य ' इस अर्थमें ठञ् प्रत्यय हो, इस स्थलमें अत्यंतसंयोगमें द्वितीया हुई, जैसे-मासं ब्रह्मचर्यमस्य=मासिको ब्रह्मचारी । आर्द्धमासिकः ।

अथवा प्रथमान्त कालवाचक प्रातिपदिकके उत्तर ' अस्य ' इस अर्थमें ठञ् प्रत्यय हो, जैसे-मासोऽस्येति=मासिकं ब्रह्मचर्यम् ।

षष्ठ्यन्त महानाम्न्यादि शब्दके उत्तर ठञ् प्रत्यय हो * जैसे-महानाम्न्यो नाम "विदा मघवन्" इत्याद्या ऋचः, तासां ब्रह्मचर्यमस्य=माहानाम्निकः, इस स्थलमें महानाम्नी शब्दके संज्ञात्व और अभाषितपुंस्कत्वके कारण पुंवद्भाव नहीं होगा, किन्तु हरदत्तके मतमें "भस्याढे०" इससे पुंवद्भावके कारण 'माहानामिकः' ऐसा होगा ।

'तत्र भवः ' इस अर्थमें यज्ञ होनेपर चतुर्मास शब्दके आगे ण्य प्रत्यय हो * जैसे-चतुर्षु मासेषु भवन्ति=चातुर्मास्यानि यज्ञकर्माणि ।

संज्ञा होनेपर अण् प्रत्यय हो * चतुर्षु मासेषु भवति=चातुर्मासी । पौर्णमासी । अण्णन्त होनेके कारण स्त्रीलिङ्गमें ङीप् प्रत्यय हुआ ॥

१७५९ तस्य च दक्षिणा यज्ञाख्येभ्यः । ५ । १ । ९५ ॥

द्वादशाहस्य दक्षिणा द्वादशाहिकी । आख्याग्रहणादकालादपि । आग्निष्टोमिकी । वाजपेयिकी ॥

१७५९-' तस्य दक्षिणा ' इस अर्थमें यज्ञसंज्ञक शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-द्वादशाहस्य दक्षिणा=द्वादशाहिकी । आख्या शब्दका ग्रहण करनेसे कालवाचकके उत्तर न होनेपर भी होगा, जैसे-आग्निष्टोमिकी । वाजपेयिकी ॥

१७६० तत्र च दीयते कार्यं भववत् । ५ । १ । ९६ ॥

प्रावृषि दीयते कार्यं वा प्रावृषेण्यम् । शारदम् ॥

॥ इति कालाधिकारस्य पूर्णोऽवधिः ॥

१७६०-' तत्र च दीयते कार्यम् ' ऐसे अर्थमें भववत् प्रत्यय हो, जैसे-प्रावृषि दीयते कार्यं वा=प्रावृषेण्यम् । शारदम् ॥

॥ इति ठञधिकारे कालाधिकारप्रकरणम् ॥

अथ ठञधिकारप्रकरणम् ।

१७६१ व्युष्टादिभ्योऽण् । ५। १। ९७ ॥

व्युष्टे दीयते कार्यं वा वैयुष्टम् । व्युष्ट, तीर्थ, संग्राम, प्रवास इत्यादि ॥

१७६१–व्युष्टादि शब्दके उत्तर अण् प्रत्यय हो, जैसे–व्युष्टे दीयते कार्यं वा=वैयुष्टम् । व्युष्टादि शब्द जैसे–व्युष्ट,तीर्थ, संग्राम, प्रवास–इत्यादि ॥

१७६२ तेन यथाकथाचहस्ताभ्यां णयतौ । ५ । १ । ९८ ॥

यथाकथाचेत्यव्ययसंघातात्तृतीयान्ताद्धस्तशब्दाच्च यथासंख्यं णयतौ स्तः ॥ अर्थाभ्यां तु यथासंख्यं नेष्यते ॥ * ॥ यथाकथाच दीयते कार्यं वा याथाकथाचम् । अनादरेण देयं कार्यं वेत्यर्थः । हस्तेन दीयते कार्यं वा हस्त्यम् ॥

१७६२–'यथाकथाच' इस अव्ययशब्दके संघातके उत्तर और तृतीयान्त 'हस्त' शब्दके उत्तर यथाक्रम ण और यत् प्रत्यय हो, किन्तु–

दोनों अर्थोंके उत्तर यथासंख्य अर्थात् क्रमकी इच्छा नहीं करनी * जैसे–यथाकथाच दीयते कार्यं वा,इस विग्रहमें 'याथाकथाचम्' इसका अर्थ अनादरपूर्वक देना अथवा करना जानना । हस्तेन दीयते कार्यं वा=हस्त्यम् ॥

१७६३ सम्पादिनि । ५ । १ । ९९ ॥

तेनेत्येव । कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकं मुखम् । कर्णालंकाराभ्यामवश्यं शोभत इत्यर्थः ॥

१७६३–उसके द्वारा संपादित, यह अर्थ होनेपर ठञ् प्रत्यय हो, जैसे–कर्णवेष्टकाभ्यां सम्पादि=कार्णवेष्टकिकम्, अर्थात् मुख,दोनों कानोंके अलंकारसे अत्यन्त शोभित होताहै ॥

१७६४ कर्मवेषाद्यत् । ५ । १ ।१०० ॥

कर्मणा सम्पादि कर्मण्यं शौर्यम् । वेषेण सम्पादि वेष्यो नटः । वेषः कृत्रिम आकारः ॥

१७६४–तत्कर्तृकसंपादितार्थमें कर्म और वेष शब्दके उत्तर यत् प्रत्यय हो, जैसे–कर्मणा सम्पादि=कर्मण्यं शौर्यम् । वेषेण सम्पादि=वेष्यो नटः । कृत्रिम आकारको वेष कहतेहैं ॥

१७६५ तस्मै प्रभवति सन्तापादिभ्यः । ५ । १ । १०१ ॥

सन्तापाय प्रभवति सान्तापिकः।सांग्रामिकः॥

१७६५–' तस्मै प्रभवति ' इस अर्थमें सन्तापादि शब्दके उत्तर ठञ् प्रत्यय हो, जैसे–संतापाय प्रभवति, इस विग्रहमें सान्तापिकः । सांग्रामिकः ॥

१७६६ योगाद्यच्च । ५ । १ । १०२॥

चाट्ठञ् । योगाय प्रभवति योग्यः। यौगिकः॥

१७६६–'तस्मै प्रभवति' इस अर्थमें चतुर्थ्यन्त समर्थ योग शब्दके उत्तर यत् और ठञ् प्रत्यय हो, जैसे–योगाय प्रभवति=योग्यः, यौगिकः ॥

१७६७ कर्मण उकञ् ।५।१।१०३॥

कर्मणे प्रभवति कार्मुकम् ॥

१७६७–' तस्मै प्रभवति ' इस अर्थमें कर्मन् शब्दके उत्तर उकञ् प्रत्यय हो, जैसे–कर्मणे प्रभवति कार्मुकम् ॥

१७६८ समयस्तदस्य प्राप्तम् । ५। १ । १०४ ॥

समयः प्राप्तोऽस्य सामयिकम् ॥

१७६८–'तदस्य प्राप्तम्' इस अर्थमें समय शब्दके उत्तर ठञ् प्रत्यय हो, जैसे–समयः प्राप्तोऽस्य=सामयिकम् ॥

१७६९ ऋतोरण् । ५ १ । १०५ ॥

ऋतुः प्राप्तोस्य आर्तवम् ॥

१७६९–'तदस्य प्राप्तम् ' इस अर्थमें ऋतु शब्दके उत्त अण् प्रत्यय हो, जैसे–ऋतुः प्राप्तोऽस्य=आर्तवम् ॥

१७७० कालाद्यत् । ५ ।१।१०७ ॥

कालः प्राप्तोस्य काल्यं शीतम् ॥

१७७०–उक्त अर्थमें काल शब्दके उत्तर यत् प्रत्यय हो, जैसे–काल्यं शीतम् ॥

१७७१ प्रकृष्टे ठञ् । ५।१।१०८ ॥

कालादित्येव । तदस्येति च । प्रकृष्टो दीर्घः कालोऽस्येति कालिकं वैरम् ॥

१७७१–'तदस्य' इस अर्थमें प्रकृष्ट अर्थात् दीर्घकालवाचक काल शब्दके उत्तर ठञ् प्रत्यय हो, जैसे–प्रकृष्टो दीर्घः कालोऽस्येति=कालिकं वैरम् ॥

१७७२ प्रयोजनम् । ५ । १।१०९ ॥

तदस्येत्येव । इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकम् । प्रयोजनं फलं कारणं च ॥

१७७२–'तदस्य प्रयोजनम्' इस अर्थमें ठञ् प्रत्यय हो, जैसे–इन्द्रमहः प्रयोजनमस्य=ऐन्द्रमहिकम् । प्रयोजन शब्दसे फल और कारण जानना ॥

१७७३ विशाखाषाढादण्मन्थदण्डयोः । ५ । १ । ११० ॥

आभ्यामण् स्यात्प्रयोजनमित्यर्थे क्रमान्मन्थदण्डयोरर्थयोः। विशाखा प्रयोजनमस्य वैशाखो मन्थः । आषाढो दण्डः ॥ चूडादिभ्य उपसंख्यानम् ॥ * ॥ चूडा–चौडम् । श्रद्धा–श्राद्धम् ॥

१७७३–'प्रयोजनमस्य' इस अर्थमें क्रमसे मन्थ और दण्ड अर्थ होनेपर विशाखा और आषाढा शब्दके उत्तर अण्

प्रत्यय हो, जैसे-विशाखा प्रयोजनमस्य=वैशाखो मन्थः। आषाढो दण्डः।

चूडादि शब्दके उत्तर अण् प्रत्यय हो * जैसे-चूडा-चौडम्। श्रद्धा-श्राद्धम्॥

१७७४ अनुप्रवचनादिभ्यश्छः। ५।१।१११॥

अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयम्॥

१७७४-'प्रयोजनमस्य' इस अर्थमें अनुप्रवचनादिके उत्तर छ प्रत्यय हो, जैसे-अनुप्रवचनं प्रयोजनमस्य=अनुप्रवचनीयम्॥

१७७५ समापनात्सपूर्वपदात्। ५।१।११२॥

व्याकरणसमापनं प्रयोजनमस्य व्याकरणसमापनीयम्॥

१७७५-'प्रयोजनमस्य' इस अर्थमें पूर्वमें किसी एक शब्दके रहते समापन शब्दके उत्तर छ प्रत्यय हो, जैसे-व्याकरणसमापनं प्रयोजनम् अस्य=व्याकरणसमापनीयम्॥

१७७६ ऐकागारिकट् चौरे।५।१।११३॥

एकमसहायमगारं प्रयोजनमस्य मुमुषिषोः स ऐकागारिकश्चौरः॥

१७७६-'प्रयोजनमस्य' इस अर्थमें एकागार शब्दके उत्तर चौर अर्थ होनेपर ठञ् प्रत्यय तथा टकार अनुबन्ध हो, जैसे-एकमसहायमगारं प्रयोजनमस्य मुमुषिषोः सः=ऐकागारिकः चौरः॥

१७७७ आकालिकडाद्यन्तवचने। ५।१।११४॥

समानकालावाद्यन्तौ यस्येत्याकालिकः।समानकालस्याऽऽकाल आदेशः। आशुविनाशीत्यर्थः। पूर्वदिने मध्याह्नादावुत्पद्य दिनान्तरे तत्रैव नश्वर इति वा॥ आकालाट्ठंश्च॥ *॥ आकालिका विद्युत्॥

॥ इति ठञः पूर्णोविधिः॥

१७७७-आदि और अन्त होनेपर समानकाल शब्दके उत्तर ठञ् प्रत्यय हो और समानकाल शब्दको आकाल आदेश हो और टकार अन्त्यमें अनुबन्ध हो, समानकालौ आद्यन्तौ यस्य=आकालिकः, इस स्थलमें समानकाल शब्दके स्थानमें आकाल आदेश हुआहै, इसका अर्थ शीघ्रविनाशशील। पूर्व दिवसमें मध्याह्नादि कालमें उत्पन्न होकर दूसरे दिन उसी समयमें ही जिसकी मृत्यु हो, उसको भी आकालिक कहतेहैं।

आकाल शब्दके उत्तर ठन् प्रत्यय भी हो * जैसे-आकालिका विद्युत्॥

॥ इति ठञधिकारप्रकरम्॥

१ टकार अनुबन्ध 'ऐकागारिकी' यहां ङीप् हो, इसलिये है॥

अथ भावकर्मार्थकप्रकरणम्।

१७७८ तेन तुल्यं क्रिया चेद्वतिः। ५।१।११५॥

ब्राह्मणेन तुल्यं ब्राह्मणवदधीते। क्रिया चेदिति किम्। गुणतुल्ये मा भूत्। पुत्रेण तुल्यः स्थूलः॥

१७७८-'तेन तुल्यम्' इस अर्थमें यदि क्रिया हो तो प्रातिपदिकके उत्तर वति प्रत्यय हो,जैसे-ब्राह्मणेन तुल्यं ब्राह्मणवत् अधीते।

क्रिया तुल्य रहे ऐसा क्यों कहा? तो गुणसे तुल्य होनेपर न हो, जैसे-पुत्रेण तुल्यः स्थूलः॥

१७७९ तत्र तस्येव। ५।१।११६॥

मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः। चैत्रस्येव चैत्रवन्मैत्रस्य गावः॥

१७७९-सप्तम्यन्त और षष्ठ्यन्त प्रातिपदिकके उत्तर इव अर्थमें वति प्रत्यय हो, जैसे-मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः, अर्थात् स्रुघ्नदेशमें मथुराकी समान प्राकार है। चैत्रस्येव=चैत्रवत् मैत्रस्य गावः, अर्थात् चैत्रकी समान मैत्रकी गाय हैं॥

१७८० तदर्हम्। ५।१।११७॥

विधिमर्हति विधिवत्पूज्यते। क्रियाग्रहणं मण्डूकप्लुत्यानुवर्तते। तेनेह न। राजानमर्हति छत्रम्॥

१७८०-द्वितीयान्त प्रातिपदिकसे 'अर्हम्' इस अर्थमें वति प्रत्यय हो, जैसे-विधिमर्हति=विधिवत् पूज्यते। इस सूत्रमें मण्डूकप्लुति न्यायसे क्रिया पदकी अनुवृत्ति होतीहै, इस कारण राजानमर्हति छत्रम्, इस स्थलमें राजवत् ऐसा पद नहीं हुआ॥

१७८१ तस्य भावस्त्वतलौ ५।१।११९॥

प्रकृतिजन्यबोधे प्रकारो भावः। गोर्भावो गोत्वम्। गोता। त्वान्तं क्लीबम्। तलन्तं स्त्रियाम्॥

१७८१-षष्ठ्यन्त प्रातिपदिकसे 'भावः' इस अर्थमें त्व और तल् प्रत्यय हों, प्रकृतिजन्य बोधमें प्रकार (विशेषण) का नाम भाव है, जैसे-गोर्भावः=गोत्वम्। गोता। त्वप्रत्ययान्त शब्द नपुंसकलिंग और तल्प्रत्ययान्त पद स्त्रीलिङ्ग होताहै॥

१७८२ आ च त्वात्। ५। १।१२०॥

ब्रह्मणस्त्व इत्यतः प्राक् त्वतलावधिक्रियेते। अपवादैः सह समावेशार्थं गुणवचनादिभ्यः कर्मणि विधानार्थं चेदम्। चकारो नञ्स्नञ्भ्यामपि समावेशार्थः। स्त्रिया भावः स्त्रैणम्। स्त्रीत्वम्। स्त्रीता पौंस्नम्। पुंस्त्वम्। पुंस्ता॥

१७८२-"ब्रह्मणस्त्वः ५। १। १३६" इस वक्ष्यमाण सूत्रके पूर्वपर्यन्त त्व और तल् प्रत्ययका अधिकार है, अपवाद अर्थात् विशेषविधिके साथ समावेशके निमित्त और गुणवाचक शब्दके उत्तर कर्म वाच्यमें विधानके निमित्त यह सूत्र कियाहै। चकारसे नञ् और स्नञ् इन दो प्रत्ययोंके भी साथ समावेशार्थ है जैसे-स्त्रिया भावः=स्त्रैणम्, स्त्रीत्वम्, स्त्रीता। पौंस्नम्, पुंस्त्वम्, पुंस्ता॥

१७८३ न नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणवटयुधकतरसलसेभ्यः। ५। १। १२१॥

इतः परं ये भावप्रत्ययास्ते नञ्तत्पुरुषान्न स्युश्चतुरादीन्वर्जयित्वा। अपतित्वम्। अपटुत्वम्। नञ्पूर्वात्किम्। बार्हस्पत्यम्। तत्पुरुषात्किम्। नास्य पटवः सन्तीत्यपटुस्तस्य भाव आपटवम्। अचतुरेति किम्। आचतुर्यम्। आसङ्गत्यम्। आलवण्यम्। आवटयम्। आयुध्यम्। आकत्यम्। आरस्यम्। आलस्यम्॥

१७८३-इस सूत्रके आगे जो भाव प्रत्यय हैं वह चतुर, संगत, लवण, वट, युध, कत, रस और लस एतदन्त तत्पुरुषसे भिन्न नञ्तत्पुरुषके उत्तर नहीं हों, जैसे-अपतित्वम्। अपटुत्वम्। नञ्पूर्वक तत्पुरुष न होनेपर, जैसे-बार्हस्पत्यम्। तत्पुरुष न होनेपर जैसे-नास्य पटवः सन्तीत्यपटुस्तस्य भावः=आपटवम्॥

चतुर आदि शब्दको छोडनेका भाव यह कि, आचतुर्यम्। आसङ्गत्यम्। आलवण्यम्। आवटयम्। आयुध्यम्। आकत्यम्। आरस्यम्। आलस्यम्, इनमें वक्ष्यमाण भावप्रत्यय हों॥

१७८४ पृथ्वादिभ्य इमनिज्वा। ५। १। १२२॥

वावचनमणादिसमावेशार्थम्॥

१७८४-पृथ्वादि शब्दोंके उत्तर विकल्प करके इमनिच् प्रत्यय हो, इस सूत्रमें वाशब्दके ग्रहण करनेसे अण् आदि प्रत्ययोंका समावेश होगा॥

१७८५र ऋतो हलादेर्लघोः। ६। ४। १६१॥

हलादेर्लघोर्ऋकारस्य रः स्यात् इष्ठेमेयस्सु॥

१७८५-इष्ठन्, इमन् और ईयस् प्रत्यय परे रहते व्यंजनवर्ण आदिमें है जिसके ऐसे लघुसंज्ञक ऋकारके स्थानमें र आदेश हो॥

१७८६ टेः। ६। ४। १५५॥

भस्य टेर्लोपः स्यादिष्ठेमेयस्सु। पृथोर्भावः प्रथिमा। पार्थवम्। म्रदिमा। मार्दवम्॥

१७८६-इष्ठन्, इमन् और ईयस् प्रत्यय परे रहते भसंज्ञक शब्दकी टिका लोप हो, यथा-पृथोर्भावः=प्रथिमा, पार्थवम्। म्रदिमा, मार्दवम्॥

१७८७ वर्णदृढादिभ्यः ष्यञ्च। ५। १। १२३॥

चादिमनिच्। शौक्ल्यम्। शुक्लिमा। दार्ढ्यम्॥ पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वम्॥*॥ द्रढिमा। षो ङीषर्थः। औचिती। याथाकामी॥

१७८७-वर्णवाचक शब्द और दृढादि शब्दोंके उत्तर ष्यञ् प्रत्यय हो, और चकारसे इमनिच् प्रत्यय हो, जैसे-शुक्लस्य भावः=शौक्ल्यम्, शुक्लिमा। दार्ढ्यम्।

पृथु, मृदु, भृश, कृश, दृढ और परिवृढ शब्दोंके ऋकारके स्थानमें ही र आदेश हो * जैसे-द्रढिमा। ष्यञ् प्रत्ययका षकार इत्संज्ञक होनेके कारण स्त्रीलिङ्गमें ङीष् होगा, जैसे-औचिती। याथाकामी॥

१७८८ गुणवचनब्राह्मणादिभ्यः कर्मणि च। ५। १। १२४॥

चाद्भावे। जडस्य कर्म भावो वा जाड्यम्। मूढस्य भावः कर्म वा मौढ्यम्। ब्राह्मण्यम्। अर्हतो नुम् च॥ *॥ अर्हतो भावः कर्म वा आर्हन्त्यम्। आर्हन्ती। ब्राह्मणादिराकृतिगणः॥

१७८८-गुणवाचक[1] शब्द और ब्राह्मणादि शब्दोंके उत्तर कर्म और चकारसे भाव वाच्यमें ष्यञ् प्रत्यय हो, जैसे-जडस्य भावः कर्म वा=जाड्यम्। मूढस्य भावः कर्म वा=मौढ्यम्। ब्राह्मण्यम्।

अर्हत् शब्दके उत्तर ष्यञ् प्रत्यय और नुम् आगम हो * जैसे-अर्हतो भावः कर्म वा=आर्हन्त्यम्। आर्हन्ती। ब्राह्मणादि आकृतिगण है॥

१७८९ यथातथयथापुरयोः पर्यायेण। ७। ३। ३१॥

नञः परयोरेतयोः पूर्वोत्तरपदयोः पर्यायेणादेरचो वृद्धिर्ञिदादौ। अयथातथाभावः आयथातथ्यम्। अयाथातथ्यम्। आयथापुर्यम्। अयाथापुर्यम्। आ पादसमाप्तेर्भावकर्माधिकारः॥ चतुर्वर्णादीनां स्वार्थ उपसंख्यानम्॥ *॥ चत्वारो वर्णाश्चातुर्वर्ण्यम्। चातुराश्रम्यम्। त्रैस्वर्यम्। षाड्गुण्यम्। सैन्यम्। सान्निध्यम्। सामीप्यम्। औपम्यम्। त्रैलोक्यमित्यादि॥ (सर्ववेदादिभ्यः स्वार्थे॥) सर्वे वेदाः सर्ववेदास्तानधीते सर्ववेदः। सर्वादेरिति लुक्। चतुर्वेदस्योभयपदवृद्धिश्च॥ स एव सार्ववैद्यः॥ *॥ चतुरो वेदानधीते चतुर्वेदः। स एव चातुर्वैद्यः। चतुर्विद्यस्येति पाठान्तरम्। चतुर्विद्य एव चातुर्वैद्यः॥

[1] शीत उष्ण आदि गुणोंका जिससे बोध हो उसको गुणवचन कहतेहैं॥

१७८९-जित् आदि तद्धित प्रत्यय परे रहते नञ्के परे स्थित यथातथ और यथापुर इन दो शब्दोंके पूर्व और उत्तर पदके आद्यच्को पर्याय (क्रम) से वृद्धि हो, जैसे-अयथातथाभावः=आयथातथ्यम्, अयाथातथ्यम् । आयथापुर्य्यम्, अयाथापुर्य्यम् । इस पादकी समाप्तिपर्यन्त भाव और कर्मका अधिकार है ।

चतुर्वर्णादि शब्दोंके उत्तर स्वार्थमें ष्यञ् प्रत्यय हो* जैसे-चत्वारो वर्णाः=चातुर्वर्ण्यम् । चातुराश्रम्यम् । त्रैस्वर्यम् । षाड्गुण्यम् । सैन्यम् । सान्निध्यम् । सामीप्यम् । औपम्यम् । त्रैलोक्यम्, इत्यादि । सर्वे वेदाः सर्ववेदाः, तानधीते सर्ववेदः । "सर्वादेः०" इससे लुक् हुआ । स एव=सार्ववेद्यः ।

चतुर्वेद शब्दके दोनों पदोंको वृद्धि हो* जैसे-चतुरो वेदानधीते=चतुर्वेदः, स एव=चातुर्वैद्यः "चतुर्विद्यस्य" ऐसा पाठान्तर है, इससे चतुर्विद्य एव=चातुर्वैद्यः ॥

१७९० स्तेनाद्यन्नलोपश्च ।५।१।१२५॥

नेति सङ्घातग्रहणम् । स्तेन चौर्ये पचाद्यच् । स्तेनस्य भावः कर्म वा स्तेयम् । स्तेनादिति योगं विभज्य स्तैन्यमिति ष्यञन्तमपि केचिदिच्छन्ति ॥

१७९०-स्तेन शब्दके उत्तर यत् प्रत्यय हो, और स्तेन शब्दके नकारका लोप हो, न शब्दसे संघातका ग्रहण जानना । चौर्यार्थक स्तेन धातुसे पचादित्वके कारण अच् प्रत्यय करके 'स्तेनः' यह सिद्ध हुआहै, स्तेनस्य भावः कर्म वा=स्तेयम् । कोई कोई आचार्य "स्तेनात्" ऐसा भिन्न सूत्र करके 'स्तैन्यम्' ऐसे ष्यञ्प्रत्ययान्त पदकी इच्छा करतेहैं ॥

१७९१ सख्युर्यः । ५ । १ । १२६ ॥

सख्युर्भावः कर्म वा सख्यम् ॥ दूतवणिग्भ्यां च ॥ * ॥ दूतस्य भावः कर्म वा दूत्यम् । वणिज्यमिति काशिका । माधवस्तु वणिज्याशब्दः स्वभावात् स्त्रीलिङ्गः । भाव एव चात्र प्रत्ययो न तु कर्मणीत्याह । भाष्ये तु दूतवणिग्भ्यां चेति नास्त्येव । ब्राह्मणादित्वाद्वाणिज्यमपि ॥

१७९१-सखि शब्दके उत्तर यत् प्रत्यय हो, जैसे-सख्युर्भावः कर्म वा=सख्यम् ।

दूत और वणिक् शब्दके उत्तर भी यत् प्रत्यय हो * जैसे-दूतस्य भावः कर्म वा=दूत्यम् । वणिज्यम्, यह पद काशिकाकारके मतमें है, माधव तो वणिज्या शब्द स्वभावसे ही स्त्रीलिङ्ग है, इस स्थलमें भावार्थमें ही प्रत्यय है, कर्मार्थमें नहीं यह कहतेहैं । भाष्यमें तो "दूतवणिग्भ्यांच" इस प्रकारका पाठ नहीं है । ब्राह्मणादित्वके कारण 'वाणिज्यम्' ऐसा पद भी होताहै ॥

१७९२ कपिज्ञात्योर्ढक् । ५ ।१।१२७॥

कापेयम् । ज्ञातेयम् ॥

१७९२-कपि और ज्ञाति शब्दके उत्तर ढक् प्रत्यय हो, जैसे-कापेयम् । ज्ञातेयम् ॥

१७९३ पत्यन्तपुरोहितादिभ्यो यक् । ५ । १ । १२८ ॥

सैनापत्यम् । पौरोहित्यम् ॥ राजाऽसे ॥ * ॥ राजशब्दोऽसमासे यकं लभत इत्यर्थः । राज्ञो भावः कर्म वा राज्यम् । समासे तु ब्राह्मणादित्वात् ष्यञ् । आधिराज्यम् ॥

१७९३-पति शब्द अन्तमें है जिसके ऐसे शब्द और पुरोहितादि शब्दोंके उत्तर यक् प्रत्यय हो, जैसे-सैनापत्यम् । पौरोहित्यम् ॥

असमासमें राजन् शब्दके उत्तर यक् प्रत्यय हो * जैसे-राज्ञो भावः कर्म वा=राज्यम् । समास होनेपर तो ब्राह्मणादिके मध्यमें पठित होनेके कारण ष्यञ् प्रत्यय होगा, जैसे-आधिराज्यम् ॥

१७९४ प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् । ५ । १ । १२९ ॥

प्राणभृज्जाति-आश्वम् । औष्ट्रम् । वयोवचन-कौमारम्, कैशोरम् । औद्गात्रम् । औन्नेत्रम् । सौष्ठवम् । दौष्ठवम् ॥

१७९४-प्राणयुक्त जातिवाचक शब्द, वयोवाचक शब्द और उद्गातृ आदि शब्दोंके उत्तर अञ् प्रत्यय हो, प्राणभृज्जाति, जैसे-आश्वम् । औष्ट्रम् । वयोवाचक, जैसे-कौमारम् । कैशोरम् । उद्गात्रादि, जैसे-औद्गात्रम् । औन्नेत्रम् । सौष्ठवम् । दौष्ठवम् ॥

१७९५ हायनान्तयुवादिभ्योऽण् । ५ । १ । १३० ॥

द्वैहायनम् । त्रैहायनम् । यौवनम् । स्थाविरम् ॥ श्रोत्रियस्य यलोपश्च ॥ * ॥ श्रौत्रम् । कुशलचपलनिपुणपिशुनकुतूहलक्षेत्रज्ञा युवादिषु ब्राह्मणादिषु च पठ्यन्ते । कौशलम् । कौशल्यमित्यादि ॥

१७९५-हायन शब्द अन्तमें है जिसके ऐसे शब्द और युवादि शब्दोंके उत्तर अण् प्रत्यय हो, जैसे-द्वैहायनम् । त्रैहायनम् । यौवनम् । स्थाविरम् ॥

श्रोत्रिय शब्दके यकारका लोप और अण् प्रत्यय हो* जैसे-श्रौत्रम् । कुशल, चपल, निपुण, पिशुन, कुतूहल, क्षेत्रज्ञ, यह शब्द युवादि गण और ब्राह्मणादि गणके मध्यमें पठित हैं, इससे 'कौशलम्, कौशल्यम्' इस प्रकार रूप होंगे ॥

१७९६ इगन्ताच्च लघुपूर्वात् ।५।१।१३१॥

शुचेर्भावः कर्म वा शौचम् । मौनम् । कथं काव्यम्, कविशब्दस्य ब्राह्मणादित्वात् ष्यञ् ॥

१७९६-लघु वर्ण पूर्वमें है जिनके ऐसे इकारान्त, उकारान्त, ऋकारान्त, और ऌकारान्त शब्दोंके उत्तर कर्म और भाव अर्थमें अण् प्रत्यय हो, जैसे-शुचेर्भावः कर्म वा=शौचम्

मौनम् । इस सूत्रके रहते 'काव्यम्' यह पद कैसे हुआ ? इस पर कहतेहैं कि, कवि शब्दको ब्राह्मणादिगणके मध्यमें पठित होनेके कारण उसके उत्तर ष्यञ् प्रत्यय हुआहै ॥

१७९७ योपधाद्गुरूपोत्तमाद्वुञ् ।५।१।१३२।

रामणीयकम् । आभिधानीयकम् ॥ सहायाद्वा ॥ * ॥ साहाय्यम् ॥ साहायकम् ॥

१७९७–यकारोपध जो गुरूपोत्तम (जिसके अन्तवर्णका पूर्ववर्ण गुरुसंज्ञक हो ऐसा) प्रातिपदिक उसके उत्तर वुञ् प्रत्यय हो, जैसे–रामणीयकम् । आभिधानीयकम् ।

सहाय शब्दके उत्तर विकल्प करके वुञ् प्रत्यय हो * विकल्प पक्षमें ष्यञ् प्रत्यय होगा, जैसे–साहायकम्, साहाय्यम् ॥

१७९८ द्वन्द्वमनोज्ञादिभ्यश्च ।५।१।१३३।

शैष्योपाध्यायिका । मानोज्ञकम् ॥

१७९८–द्वन्द्वसमास, निष्पन्न शब्द और मनोज्ञादि शब्दोंके उत्तर वुञ् प्रत्यय हो, जैसे–शैष्योपाध्यायिका । मानोज्ञकम् ॥

१७९९ गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु । ५ । १ । १३४ ॥

अत्याकारोऽधिक्षेपः तदवेतस्ते गोत्रचरणयोर्भावकर्मणी प्राप्तः । अवगतवान्वा । गार्गिकया श्लाघते । गार्ग्यत्वेन विकत्थत इत्यर्थः । गार्गिकयाऽत्याकुरुते । गार्गिकामवेतः ॥

१७९९–श्लाघा (प्रशंसा), अत्याकार (अवमान), और तदवेत (तदवगत), विषयमें गोत्रवाचक और चरणवाचक प्रातिपदिकके उत्तर भाव और कर्मार्थमें वुञ् प्रत्यय हो, तदवेतस्ते गोत्रचरणयोः भावकर्मणी प्राप्तः अवगतवान् (गोत्र और चरणके भाव तथा कर्मको प्राप्त हुआ अथवा उनके ज्ञानको प्राप्त हुआ) गार्गिकया श्लाघते, अर्थात् गार्ग्यगोत्रसम्भूत होनेके कारण प्रशंसित होताहै । गार्गिकया अत्याकुरुते । गार्गिकामवेतः ॥

१८०० होत्राभ्यश्छः । ५ ।१। १३५ ॥

होत्राशब्दः ऋत्विग्वाची स्त्रीलिंगः । बहुवचनाद्विशेषग्रहणम् । अच्छावाकस्य भावः कर्म वा अच्छावाकीयम् । मैत्रावरुणीयम् ॥

१८००–उक्त अर्थमें होत्रा शब्दके उत्तर छ प्रत्यय हो, होत्रा शब्द ऋत्विग्वाचक स्त्रीलिङ्ग है । बहुवचनके कारण विशेषका ग्रहण होताहै, जैसे–अच्छावाकस्य भावः कर्म वा= अच्छावाकीयम् । मैत्रावरुणीयम् ॥

१८०१ ब्रह्मणस्त्वः । ५ । १ । १३६ ॥

होत्रावाचिनो ब्रह्मन्शब्दात्त्वः स्यात् । छस्यापवादः । ब्रह्मत्वम् । नेति वाच्ये त्ववचनं तलो बाधनार्थम् । ब्राह्मणपर्यायाद्ब्रह्मन्शब्दात्तु त्वतलौ । ब्रह्मत्वम् । ब्रह्मता ॥

॥ इति नञ्स्नञोरधिकारः समाप्तः ॥

१८०१–होत्रावाचक ब्रह्मन् शब्दके उत्तर त्व प्रत्यय हो, यह छ प्रत्ययका अपवाद है, जैसे–ब्रह्मत्वम् । "ब्रह्मणो न" इसी प्रकार सूत्र करनेसे इष्ट सिद्ध होनेपर त्वग्रहण तल् प्रत्ययके बाधके निमित्त है, ब्राह्मणपर्याय ब्रह्मन् शब्दके उत्तर तो त्व और तल् प्रत्यय होगा, जैसे–ब्रह्मत्वम्, ब्रह्मता ॥ ॥ इति नञ्स्नञोरधिकारः समाप्तः ॥

(इति भावकर्मार्थकप्रकरणम्)

अथ पाञ्चमिकप्रकरणम् ।

१८०२ धान्यानां भवने क्षेत्रे खञ् । ५ । २ । १ ॥

भवत्यस्मिन्निति भवनम् । मुद्गानां भवनं क्षेत्रं मौद्गीनम् ॥

१८०२–उत्पत्तिका स्थान (खेत) वाच्य हो तो षष्ठयन्त समर्थ धान्यविशेषवाची शब्दोंके उत्तर खञ् प्रत्यय हो, जैसे–भवन्ति अस्मिन्, इस विग्रहमें भवनम्, मुद्गानां भवनं क्षेत्रं=मौद्गीनम् ॥

१८०३ व्रीहिशाल्योर्ढक् । ५ । २।२ ॥

व्रैहेयम् । शालेयम् ॥

१८०३–षष्ठयन्त व्रीहि और शालि शब्दके उत्तर उक्त अर्थमें ढक् प्रत्यय हो, जैसे–व्रैहेयम् । शालेयम् ॥

१८०४ यवयवकषष्टिकाद्यत् ।५।२।३॥

यवानां भवनं क्षेत्रं यव्यम् । यवक्यम् । षष्टिक्यम् ॥

१८०४–षष्ठयन्त यव, यवक और षष्टिक शब्दके उत्तर उक्त अर्थमें यत् प्रत्यय हो, जैसे–यवानां भवनं क्षेत्रम्=यव्यम् । यवक्यम् । षष्टिक्यम् ॥

१८०५ विभाषा तिलमाषोमाभङ्गाणुभ्यः । ५ । २ । ४ ॥

यद्वा स्यात्पक्षे खञ् । तिल्यम् । तैलीनम् । माष्यम् । माषीणम् । उम्यम् । औमीनम् । भङ्ग्यम् । भाङ्गीनम् । अणव्यम् । आणवीनम् ॥

१८०५–तिल, माष, उमा, भङ्ग और अणु शब्दके उत्तर उक्त अर्थमें विकल्प करके यत् प्रत्यय हो, पक्षमें खञ् प्रत्यय हो, जैसे–तिल्यम्, तैलीनम् । माष्यम्, माषीणम् । उम्यम्, औमीनम् । भङ्ग्यम्, भाङ्गीनम् । अणव्यम्, आणवीनम् ॥

१८०६ सर्वचर्मणः कृतः खखञौ । ५ । २ । ५ ॥

असामर्थ्येऽपि निपातनात्समासः । सर्वश्चर्मणा कृतः सर्वचर्मीणः । सार्वचर्मीणः ॥

१८०६–'कृत' अर्थमें सर्वचर्मन् शब्दके उत्तर ख और खञ् प्रत्यय हो, इस स्थलमें सर्व इस पदका कृतके साथ अन्वय है, चर्मन्के साथ नहीं है, इस कारण 'सर्वेण चर्मणा कृतः' ऐसा समास न होकर इसी सूत्रमें निपातनसे सर्वचर्मन्में समास होताहै, जैसे–सर्वः चर्मणा कृतः=सर्वचर्मीणः ॥ सार्वचर्मीणः ॥

१८०७ यथामुखसंमुखस्य दर्शनः खः । ५ । २ । ६ ॥

मुखस्य सदृशं यथामुखं प्रतिबिम्बम् । निपातनात्सादृश्येऽव्ययीभावः । समं सर्वं मुखं संमुखम् । समशब्दस्यान्तलोपो निपात्यते यथामुखं दर्शनो यथामुखीनः । सर्वस्य दर्शनः संमुखीनः ॥

१८०७–दर्शन अर्थमें यथामुख और सम्मुख शब्दके उत्तर ख प्रत्यय हो । मुखस्य सदृशं यथामुखं प्रतिबिम्बम्, यहां निपातसे सादृश्यार्थमें अव्ययीभाव हुआ । समं सर्वं मुखं सम्मुखम्,यहां सम शब्दके अन्तका लोप निपातनसिद्ध है । यथामुखं दर्शनः=यथामुखीनः । सर्वस्य मुखस्य दर्शनः= सम्मुखीनः ॥

१८०८ तत्सर्वादेः पथ्यंगकर्मपत्रपात्रं व्याप्नोति । ५ । २ । ७ ॥

सर्वादेः पथ्याद्यन्ताद् द्वितीयान्तात्खः स्यात् । सर्वपथान् व्याप्नोति सर्वपथीनः । सर्वांगीणः । सर्वकर्मीणः । सर्वपत्रीणः । सर्वपात्रीणः ॥

१८०८–सर्व शब्द आदिमें रहते द्वितीयान्त पथिन्, अङ्ग, कर्म, पत्र और पात्रशब्दके उत्तर 'व्याप्नोति (व्याप्त होताहै)' इस अर्थमें ख प्रत्यय हो, जैसे–सर्वपथान् व्याप्नोति=सर्वपथीनः । सर्वाङ्गीणः । सर्वकर्मीणः । सर्वपत्रीणः । सर्वपात्रीणः ॥

१८०९ आप्रपदं प्राप्नोति । ५।२ । ८ ॥

पादस्याग्रं प्रपदं तन्मर्यादीकृत्य आप्रपदम् । आप्रपदीनः पटः ॥

१८०९–'प्राप्नोति (प्राप्त होताहै)' इस अर्थमें आप्रपद शब्दके उत्तर ख प्रत्यय हो । पादके अग्रभागको प्रपद कहतेहैं और तदवधिकको आप्रपद कहतेहैं । आप्रपदं प्राप्नोति, इस वाक्यमें आप्रपदीनः,अर्थात् पटः ॥

१८१० अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु । ५ । २ । ९ ॥

अनुरायामे सादृश्ये च । अनुपदं बद्धा अनुपदीना उपानत् । सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः । अयानयः स्थलविशेषः । तन्नेय अयानयीनः शारः ॥

१८१०–बद्धा अर्थमें अनुपद शब्दके उत्तर, भक्षयति अर्थमें सर्वान्न शब्दके उत्तर,और नेय अर्थमें अयानय शब्दके उत्तर ख प्रत्यय हो । अनु शब्दसे आयाम और सादृश्य जानना । अनुपदं बद्धा, इस विग्रहमें अनुपदीना अर्थात् उपानत् । सर्वान्नानि भक्षयति, इस विग्रहमें सर्वान्नीनः अर्थात् भिक्षुः । अयानय शब्दसे स्थलविशेष जानना । अयानयं नेयः, इस विग्रहमें अयानयीनः अर्थात् शारः ॥

१८११ परोवरपरम्परपुत्रपौत्रमनुभवति । ५ । २ । १० ॥

परांश्चावरांश्चानुभवतीति परोवरीणः । अवरस्योत्वं निपात्यते । परांश्च परतरांश्चाऽनुभवति परम्परीणः । प्रकृतेः परम्परभावो निपात्यते । पुत्रपौत्राननुभवति पुत्रपौत्रीणः । परम्पराशब्दस्तु अव्युत्पन्नं शब्दान्तरं स्त्रीलिंगं तस्मादेव स्वार्थे ष्यञि पारपर्म्यम् । कथं पारोवर्यवदिति । असाधुरेव । खप्रत्ययसन्नियोगेनैव परोवरेतिनिपातनात् ॥

१८११–'अनुभवति (अनुभव करताहै)' इस अर्थमें द्वितीयान्त परोवर, परम्पर और पुत्रपौत्र शब्दके उत्तर ख प्रत्यय हो, जैसे–परांश्चावरांश्चानुभवति,इस विग्रहमें परोवरीणः। अवर शब्दके अकारके स्थानमें निपातनसे उकार होताहै । परांश्च परतरांश्चानुभवति=परम्परीणः । प्रकृतिको परम्परभाव निपातनसिद्ध अर्थात् पर इस प्रकृतिके स्थानमें परम्पर आदेश हो । पुत्रपौत्राननुभवति, इस विग्रहमें पुत्रपौत्रीणः । परम्परा शब्द तो अव्युत्पन्न शब्दान्तर स्त्रीलिङ्ग है, उसीके उत्तर स्वार्थमें ष्यञ् प्रत्यय करके पारम्पर्यम्, यह पद सिद्ध हुआहै । ख प्रत्ययके सन्नियोगमें परोवर यह शब्द निपातनसिद्ध है, इस कारण 'पारोवर्यवत्' यह पद असाधु है ॥

१८१२ अवारपाराऽत्यन्ताऽनुकामं गामी । ५ । २ । ११ ॥

अवारपारं गामी अवारपारीणः।अवारीणः। पारीणः । पारावारीणः । अत्यन्तं गामी अत्यन्तीनः । भृशं गन्तेत्यर्थः । अनुकामं गामी अनुकामीनः यथेष्टं गन्ता ॥

१८१२–'गामी' अर्थ होनेपर अवारपार, अत्यन्त, अनुकाम, इन सम्पूर्ण शब्दोंके उत्तर ख प्रत्यय हो, जैसे–अवार-

१ द्यूतके पाशोंके दहिने तरफ घूमनेको 'अय' कहतेहैं,नहीं जो अय उसको 'अनय' कहतेहैं, अयसहित अनयको 'अयानय' कहतेहैं । दक्षिण तथा वाम भागसे चलनेवाले युग्मादि स्थानोंमें स्थित पाशे जिस स्थानमें औरके पाशोंसे न आक्रांत हों उसे लक्षणासे 'अयानय' कहतेहैं ॥

पारं गामी=अवारपारीणः । अवारीणः । पारीणः । पारावारीणः । अत्यन्तं गामी=अत्यन्तीनः अर्थात् शीघ्रगमनशीलः। अनुकामं गामी=अनुकामीनः अर्थात् यथेष्टगमनकारी ॥

१८१३ समांसमां विजायते ।५।२।१२॥

यलोपोऽवशिष्टविभक्तेरलुक् च पूर्वपदे निपात्यते । समांसमीना गौः । समांसमीना या यैव प्रतिवर्षं प्रसूयते ॥ खप्रत्ययानुत्पत्तौ यलोपो वा वक्तव्यः ॥*॥ समांसमां विजायते । समायांसमायां वा ॥

१८१३-विपूर्वक 'जनी-प्रादुर्भावे' धातुका अर्थ गर्भविमोचन अर्थात् प्रसव है, तो प्रसवको सम्पूर्णवत्सरव्यापकत्वके अभावके कारण इस स्थलमें अत्यन्त संयोगमें होनेवाली (५५८) द्वितीया विभक्तिकी प्राप्तिका अभाव है, इस कारण इस स्थलमें सप्तमी ही विभक्ति होतीहै, इस आशयसे कहाहै कि, 'विजायते (गर्भमोचन करतीहै)' इस अर्थमें ख प्रत्यय और प्रकृतिभागमें समायांसमायाम्, इस प्रकार रहते निपातनसे पूर्व पदके यकारमात्रका लोप और अवशिष्ट विभक्त्यंशका अलुक् करके 'समाम्' ऐसा हुआ और उत्तर पदकी विभक्तिका "सुपो धातुप्रातिपदिकयोः" इस सूत्रसे लुक् करके,समांसमा+ईन=समांसमीना अर्थात् गौः। जो गाय प्रतिवर्ष प्रसूता हो ।

ख प्रत्ययकी अनुत्पत्तिमें दोनों पदोंके यकारका लोप विकल्पसे हो*जैसे-समांसमां विजायते, समायां समायां वा ॥

१८१४ अद्यश्वीनावष्टब्धे । ५ । २।१३॥

अद्य श्वो वा विजायते अद्यश्वीना वडवा। आसन्नप्रसवेत्यर्थः । केचित्तु विजायत इति नानुवर्तयन्ति।अद्यश्वीनं मरणम् । आसन्नमित्यर्थः॥

१८१४-अवष्टब्ध अर्थात् आसन्न अर्थमें 'अद्यश्वीना' पद निपातनसे सिद्ध हो, जैसे-अद्य श्वो वा विजायते, इस विग्रहमें अद्यश्वीना वडवा, अर्थात् आसन्नप्रसवा । कोई २ पंडित 'विजायते' इस पदकी अनुवृत्ति नहीं करते, उनके मतमें अद्यश्वीनं मरणम् (आसन्न मरण) ऐसा होगा ॥

१८१५ आगवीनः ।५।२। १४॥

आङ्पूर्वाद्गोः कर्मकरे खप्रत्ययो निपात्यते। गोः प्रत्यर्पणपर्यन्तं यः कर्म करोति स आगवीनः ।

१८१५-कर्मकर अर्थमें आङ्पूर्वक गो शब्दके उत्तर निपातनसे ख प्रत्यय हो, जैसे-आगवीनः, अर्थात् जो प्राणी गायके प्रत्यर्पणपर्यन्त कार्य करे, उसको आगवीन कहतेहैं ॥

१८१६ अनुग्वलंगामी । ५। २।१५॥

अनुगु, गोः पश्चात्पर्याप्तं गच्छति अनुगवीनो गोपालः ॥

१८१६-अनुगु शब्दके उत्तर 'अलंगामी' अर्थात् पर्याप्त जाताहै, इस अर्थमें निपातनसे ख प्रत्यय हो, जैसे-अनुगवीनः। अनुगु अर्थात् गायके पीछे २ जो प्राणी पर्याप्तभावसे गमन करे, उसको अनुगवीनः (ग्वाला) कहतेहैं ॥

१८१७ अध्वनो यत्खौ । ५ । २।१६॥

अध्वानमलं गच्छति अध्वन्यः । अध्वनीनः। ये चाभावकर्मणोः, आत्माध्वानौ खे इति सूत्राभ्यां प्रकृतिभावः ॥

१८१७-अध्वन् शब्दके उत्तर यत् और ख प्रत्यय हो, जैसे-अध्वानमलं गच्छति=अध्वन्यः । अध्वनीनः । 'ये चाभावकर्मणोः ११५४", "आत्माध्वानौ खे १६७१" इन दो सूत्रोंसे प्रकृतिभाव भी होगा ॥

१८१८ अभ्यमित्राच्छ च । ५।२।१७॥

चाद्यत्खौ । अभ्यमित्रीयः । अभ्यमित्र्यः । अभ्यमित्रीणः । अमित्राऽभिमुखं सुष्ठु गच्छतीत्यर्थः ॥

१८१८-अभ्यमित्र शब्दके उत्तर छ प्रत्यय हो और सूत्रमें चकार पढनेसे यत् और ख प्रत्यय हो, जैसे-अभ्यमित्रीयः । अभ्यमित्र्यः । अभ्यमित्रीणः । अर्थात् शत्रुके सम्मुख भलीभांति गमनकरनेवाला ॥

१८१९ गोष्ठात्खञ् भूतपूर्वे।५।२।१८॥

गोष्ठो भूतपूर्वः गौष्ठीनो देशः ॥

१८१९-भूतपूर्व अर्थमें गोष्ठ शब्दके उत्तर खञ् प्रत्यय हो, जैसे-गोष्ठो भूतपूर्वः=गौष्ठीनः अर्थात् देशः ॥

१८२० अश्वस्यैकाहगमः । ५ ।२।१९॥

एकाहेन गम्यते इत्येकाहगमः,आश्वीनोऽध्वा॥

१८२०-'एकाहगम (एक दिनमें जानेयोग्य)' इस अर्थमें षष्ठ्यन्त अश्व शब्दसे खञ् प्रत्यय हो, जैसे-अश्वस्य एकाहगमःआश्वीनः, अर्थात् अश्वके एकदिनमें गमन योग्य मार्ग ॥

१८२१ शालीनकौपीने अधृष्टाकार्ययोः । ५ । २ । २० ॥

शालाप्रवेशमर्हति शालीनः, अधृष्टः । कूपपतनमर्हति कौपीनं पापम्, तत्साधनत्वात्तद्वद्गोप्यत्वात्पुरुषलिङ्गमपि।तत्सम्बन्धात्तदाच्छादनमपि।

१८२१-अधृष्ट अर्थमें शालीन और अकार्य अर्थमें कौपीन यह ख प्रत्ययान्त शब्द निपातनसे सिद्ध होतेहैं, जैसे-शालाप्रवेशमर्हति=शालीनः अर्थात् अधृष्टः । कूपपतनमर्हति= कौपीनम्, अर्थात् पाप, तत्साधनत्व और तद्वत् गोप्यत्वके कारण पुरुषलिंग, और उसके सम्बन्धवशसे उसके आच्छादन वस्त्रको भी कौपीन कहतेहैं ॥

१८२२ व्रातेन जीवति । ५ । २ ।२१॥

व्रातेन शरीरायासेन जीवति न तु बुद्धिवैभवेन स व्रातीनः ॥

१८२२-'जीवति (जीताहै)' इस अर्थमें तृतीयान्त व्रात शब्दके उत्तर ख प्रत्यय हो, जैसे-व्रातेन शरीरायासेन जीवति (न तु बुद्धिवैभवेन) सः=व्रातीनः। जो प्राणी शारीरिक श्रमसे जीविका करै बुद्धिसे नहीं उसको 'व्रातीन' कहतेहैं ॥

१८२३ सात्तपदीनं सख्यम् ।५।२।२२॥

सप्तभिः पदैरवाप्यते साप्तपदीनम् ॥

१८२३-सख्य (मैत्री) अर्थमें 'साप्तपदीनम्' यह पद निपातनसे सिद्ध हो, अर्थात् अवाप्य सख्य रहते तृतीयान्त सप्तपद शब्दसे खञ् प्रत्यय हो, जैसे-सप्तभिः पदैरवाप्यते= साप्तपदीनम् ॥

१८२४ हैयङ्गवीनं संज्ञायाम् ।५।२।२३॥

ह्योगोदोहस्य हियङ्गुरादेशः विकारार्थे खञ् च निपात्यते। दुह्यत इति दोहः क्षीरम्। ह्योगोदोहस्य विकारो हैयङ्गवीनं नवनीतम् ॥

१८२४-संज्ञा होनेपर ह्योगोदोह शब्दके स्थानमें विकारार्थमें हियंगु आदेश और उसके उत्तर खञ् प्रत्यय निपातनसे हों, दुह्यते, इस विग्रहमें दोहः, अर्थात् दूध, ह्योगोदोहस्य विकारः=हैयंगवीनम्=अर्थात् नवीन मक्खन ॥

१८२५ तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ । ५ । २ ।२४॥

पीलूनां पाकः पीलुकुणः। कर्णस्य मूलं कर्णजाहम् ॥

१८२५-पाक और मूल अर्थमें क्रमसे षष्ठ्यन्त समर्थ पीलु आदि शब्दोंके उत्तर कुणप् और कर्णादि शब्दोंके उत्तर जाहच् प्रत्यय हो, जैसे-पीलूनां पाकः=पीलुकुणः। कर्णस्य मूलम्=कर्णजाहम् ॥

१८२६ पक्षात्तिः । ५ । २ ।२५॥

मूलग्रहणमात्रमनुवर्तते। पक्षस्य मूलं पक्षतिः॥

१८२६ मूल अर्थमें षष्ठ्यन्त पक्ष शब्दके उत्तर ति प्रत्यय हो, जैसे-पक्षस्य मूलम्, इस विग्रहमें पक्षतिः। इस सूत्रमें केवल मूलार्थकी अनुवृत्ति होतीहै ॥

१८२७ तेन वित्तश्चुञ्चुप्चणपौ । ५ । २ । २६ ॥

चकारः प्रत्यययोरादौ लुप्तनिर्दिष्टस्तेन चस्य नेत्संज्ञा। विद्यया वित्तो विद्याचुञ्चुः। विद्याचणः॥

१८२७-वित्त (जानागयाहै) इस अर्थमें तृतीयान्त पदके उत्तर चुञ्चुप् और चणप् प्रत्यय हो, चुञ्चुप् और चणप् इन दोनों प्रत्ययोंके आदिमें चकार लुप्तनिर्दिष्ट है, इस कारण चकारकी इत्संज्ञा नहीं हुई, जैसे-विद्यया वित्तः, इस विग्रहमें विद्याचुञ्चुः। विद्याचणः ॥

१८२८ विनञ्भ्यां नानाञौ न सह। ५ । २ । २७ ॥

असहार्थे पृथग्भावे वर्तमानाभ्यां स्वार्थे प्रत्ययौ। विना। नाना ॥

१८२८-असहार्थ अर्थात् पृथग्भावमें वर्तमान वि और नञ् शब्दके उत्तर स्वार्थमें ना और नाञ् प्रत्यय हो, जैसे-विना। नाना ॥

१८२९ वेः शालच्छङ्कटचौ ।५।२।२८॥

क्रियाविशिष्टसाधनवाचकात्स्वार्थे। विस्तृतम्-विशालम्। विशङ्कटम् ॥

१८२९-क्रियाविशिष्ट साधनवाचक वि शब्दके उत्तर स्वार्थमें शालच् और शंकटच् प्रत्यय हों, जैसे-विस्तृतम्=विशालम्। विशंकटम् ॥

१८३० संप्रोदश्च कटच्। ५।२ । २९ ॥

सङ्कटम्। प्रकटम्। उत्कटम्। चाद्विकटम्। अलाबूतिलोमाभंगाभ्यो रजस्युपसंख्यानम्॥ * ॥ अलाबूनां रजः अलाबूकटम् ॥ गोष्ठजादयः स्थानादिषु पशुनामभ्यः ॥ * ॥ गवां स्थानं गोगोष्ठम् ॥ संघाते कटच् ॥ * ॥ अवीनां संघातोऽविकटः ॥ विस्तारे पटच्॥ * ॥ अविपटः ॥ द्वित्वे गोयुगच् ॥ * ॥ द्वावुष्ट्रौ उष्ट्रगोयुगम् ॥ षड्त्वे षड्गवच् ॥ * ॥ अश्वषड्गवम्। स्नेहे तैलच् ॥ * ॥ तिलतैलम्। सर्षपतैलम्। भवने क्षेत्रे शाकटशाकिनौ ॥ * ॥ इक्षुशाकटम्। इक्षुशाकिनम् ॥

१८३०-सम्, प्र, उत् और चकारसे वि शब्दके उत्तर कटच् प्रत्यय हो, जैसे-संकटम्। प्रकटम्। उत्कटम्। विकटम्।

अलाबू, तिल, उमा और भङ्गा शब्दके उत्तर रजस् अर्थमें कटच् प्रत्यय हो * जैसे-अलाबूनाम् रजः-अलाबूकटम्, इत्यादि।

स्थानादि अर्थमें पशुनामवाचक शब्दके उत्तर गोष्ठच् आदि प्रत्यय हों, * जैसे-गवां स्थानम्=गोगोष्ठम्।

संघातार्थमें पशुवाचक शब्दके उत्तर कटच् प्रत्यय हो * जैसे-अवीनां संघातः=अविकटः।

विस्तार अर्थमें पटच् प्रत्यय हो * यथा-अविपटः ॥

द्वित्वार्थमें गोयुगच् प्रत्यय हो * जैसे-द्वावुष्ट्रौ= उष्ट्रगोयुगम्।

षड्त्व अर्थमें षड्गवच् प्रत्यय हो * जैसे-अश्वषड्गवम्।

स्नेहार्थमें तैलच् प्रत्यय हो * जैसे-तिलतैलम्। सर्षपतैलम्।

भवन और क्षेत्र अर्थमें शाकट् और शाकिन् प्रत्यय हो * जैसे-इक्षुशाकटम्। इक्षुशाकिनम् ॥

१८३१ अवात्कुटारच्च । ५ । २ ।३०॥

चात्कटच्। अवाचीनोवकुटारः। अवकटः ॥

१८३१-अव शब्दके उत्तर कुटारच् और चकारसे कटच् प्रत्यय हो, जैसे-अवाचीनः=अवकुटारः, अवकटः ॥

१८३२ नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः । ५ । २ । ३१ ॥

अवादित्येव । नतं नमनम् । नासिकाया नतम् अवटीटम् । अवनाटम् । अवभ्रटम् । तद्योगान्नासिका अवटीटा । पुरुषोऽप्यवटीटः ॥

१८३२--नासिकाके नत अर्थमें संज्ञा होनेपर अव शब्दके उत्तर टीटच्, नाटच् और भ्रटच् प्रत्यय हों, जैसे-नासिकाया नतम्=अवटीटम् । अवनाटम् । अवभ्रटम् । उस (नासिकानत) के योगके कारण नासिका 'अवटीटा' कहलातीहै और नतयुक्तनासिकायोगके कारण पुरुष ' अवटीट ' कहलाताहै ॥

१८३३ नेर्बिडज्बिरीसचौ। ५।२।३२ ॥

निबिडम् । निबिरीसम् ॥

१८३३-नि शब्दके उत्तर बिडच् और बिरीसच् प्रत्यय हों, जैसे-निबिडम् । निबिरीसम् ॥

१८३४ इनच् पिटच्चिकचि च।५।२।३३॥

नेरित्येव नासिकाया नतेऽभिधेये इनच्पिटचौ प्रत्ययौ प्रकृतेश्चिक चि इत्यादेशौ च ॥ कप्रत्ययचिकादेशौ च वक्तव्यौ ॥ * ॥ चिकिनम् । चिपिटम् । चिक्कम्॥ क्लिन्नस्य चिल् पिल् लश्चास्य चक्षुषी ॥ * ॥ क्लिन्ने चक्षुषी अस्य चिल्लः । पिल्लः ॥ चुल् च ॥ * ॥ चुल्लः ॥

१८३४-नि शब्दके उत्तर नासिकाके नमन अर्थमें इनच् और पिटच् प्रत्यय हो, और प्रकृति (नि) को चिक् और चि आदेश हों ।

क प्रत्यय और चिक् आदेश हो, यह भी कहना चाहिये* जैसे-चिकिनम् । चिपिटम् । चिक्कम् ।

' अस्य चक्षुषी ' इस अर्थमें क्लिन्न शब्दके स्थानमें चिल् और पिल् आदेश हों और उसके उत्तर ल प्रत्यय भी हो * जैसे=क्लिन्ने चक्षुषी अस्य=चिल्लः । पिल्लः ।

उक्त अर्थमें चुल् आदेश भी हो * जैसे-क्लिन्ने चक्षुषी अस्य=चुल्लः ॥

१८३५ उपाधिभ्यां त्यकन्नासन्नारूढयोः । ५ । २ । ३४ ॥

संज्ञायामित्यनुवर्तते पर्वतस्यासन्नं स्थलमुपत्यका । आरूढं स्थलमधित्यका ॥

१८३५-संज्ञा होनेपर आसन्न और आरूढ अर्थमें वर्त्तमान उप और अधि शब्दके उत्तर स्वार्थमें त्यकन् प्रत्यय हो, जैसे-पर्वतस्यासन्नं स्थलम्=उपत्यका । पर्वतस्यारूढं स्थलम्=अधित्यका । (इनमें " प्रत्ययस्थात्० ४६३७ " से इत्व तो नहीं होता, क्योंकि, ४६४ में " त्यकनश्च निषेधः " ऐसा वार्त्तिक है) ॥

१८३६ कर्मणि घटोऽठच् । ५।२।३५॥

घटत इति घटः । पचाद्यच् । कर्मणि घटते कर्मठः पुरुषः ॥

१८३६-' घटते ' इस अर्थमें पचादित्व (२८९६) के कारण अच् प्रत्यय होनेसे ' घटः ' सिद्ध होताहै । घट अर्थात् पटु, इस अर्थमें सप्तम्यन्त कर्मन् शब्दके उत्तर अठच् प्रत्यय हो, जैसे-कर्मणि घटते=कर्मठः, अर्थात् कर्मपटुः पुरुषः ॥

१८३७ तदस्य संजातं तारकादिभ्य इतच् । ५ । २ । ३६ ॥

तारकाः संजाता अस्य तारकितं नभः । आकृतिगणोऽयम् ॥

१८३७-'अस्य सञ्जातम्' इस अर्थमें प्रथमान्त तारकादि शब्दोंके उत्तर इतच् प्रत्यय हो, जैसे-तारकाः सञ्जाता अस्य=तारकितम्, अर्थात् नभः । तारकादि आकृतिगण है ॥

१८३८ प्रमाणे द्वयसज्दघ्नञ्मात्रचः। ५ । २ । ३७ ॥

तदस्येत्यनुवर्तते । ऊरू प्रमाणमस्य ऊरुद्वयसम् । ऊरुदघ्नम् । ऊरुमात्रम् ॥ प्रमाणे लः ॥ * ॥ शमः । दिष्टिः वितस्तिः ॥ द्विगोर्नित्यम् ॥ * ॥ द्वौ शमौ प्रमाणमस्य द्विशमम्॥ प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रज्वक्तव्यः ॥ * ॥ शममात्रम् । प्रस्थमात्रम् । पञ्चमात्रम् ॥ वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुलम् ॥ * ॥ तावदेव तावद्द्वयसम् । तावन्मात्रम् ॥

१८३८-प्रमाणार्थमें वर्त्तमान प्रथमान्त शब्दके उत्तर षष्ठ्यर्थमें द्वयसज्, दघ्नच् और मात्रच् प्रत्यय हों, जैसे-ऊरू प्रमाणमस्य=ऊरुद्वयसम् । ऊरुदघ्नम् । ऊरुमात्रम् ।

प्रमाण अर्थमें ल अर्थात् द्वयसच् आदि प्रत्ययोंका लुक् हो * जैसे-शमः प्रमाणमस्य=शमः । दिष्टिः । वितस्तिः ।

प्रमाणान्त द्विगु समासके उत्तर नित्य ही द्वयसच् आदि प्रत्ययोंका लुक् हो * जैसे-द्वौ शमौ परिमाणमस्य=द्विशमम् ।

प्रमाण, परिमाण और संख्यावाचक शब्दके उत्तर संशय अर्थमें मात्रच् प्रत्यय हो * जैसे-शममात्रम् । प्रस्थमात्रम् । पञ्चमात्रम् !

वतुप्रत्ययान्तके उत्तर स्वार्थमें द्वयसच् और मात्रच् प्रत्यय बहुल करके हों, जैसे-तावदेव=तावद्द्वयसम् । तावन्मात्रम् ॥

१८३९ पुरुषहस्तिभ्यामण् च । ५ । २ । ३८ ॥

पुरुषः प्रमाणमस्य पौरुषम् । पुरुषद्वयसम् । हास्तिनम् । हस्तिद्वयसम् ॥

१८३९-पुरुष और हस्तिन् शब्दके उत्तर प्रमाण अर्थमें अण् और द्वयसच् आदि प्रत्यय हों, जैसे-पुरुषः प्रमाणमस्य=पौरुषम् । पुरुषद्वयसम् । हास्तिनम् । हस्तिद्वयसम् ॥

१८४० यत्तदेतेभ्यः परिमाणे वतुप् । ५ । २ । ३९ ॥

यत्परिमाणमस्य यावान् । तावान् । एतावान् ॥

१८४०-यद्, तद् और एतद् शब्दके उत्तर परिमाण अर्थमें वतुप् प्रत्यय हो, जैसे-यत् परिमाणमस्य=यावान् । तावान् । एतावान् ॥

१८४१ किमिदंभ्यां वो घः । ५।२।४०॥

आभ्यां वतुप्स्याद्वस्य च घः । कियान् । इयान् ॥

१८४१-किम् और इदम् शब्दके उत्तर वतुप् प्रत्यय हो और वतुप् प्रत्ययके वकारके स्थानमें घ हो, जैसे-कियान् । इयान् ॥

१८४२ किमः संख्यापरिमाणे डति च । ५ । २ । ४१ ॥

चाद्वतुप् । तस्य च वस्य घः स्यात् । का संख्या येषां ते कति । कियन्तः ॥

१८४२-किम् शब्दके उत्तर संख्याके परिमाण अर्थमें डति प्रत्यय हो और चकारसे वतुप् प्रत्यय हो और वतुप प्रत्ययके वकारके स्थानमें घ आदेश हो, जैसे-का संख्या येषां ते=कति । कियन्तः ॥

१८४३ संख्याया अवयवे तयप् । ५ । २ । ४२ ॥

पञ्चावयवा अस्य पञ्चतयं दारु ॥

१८४३-अवयवार्थमें संख्यावाचक शब्दके उत्तर षष्ठ्यर्थमें तयप् प्रत्यय हो, जैसे-पञ्च अवयवा अस्य=पञ्चतयं दारु ॥

१८४४ द्वित्रिभ्यां तयस्यायज्वा । ५ । २ । ४३ ॥

द्वयम् । द्वितयम् । त्रयम् । त्रितयम् ॥

१८४४-द्वि और त्रि शब्दके उत्तर तयप् प्रत्ययके स्थानमें विकल्प करके अयच् आदेश हो, जैसे-द्वयम्, द्वितयम् । त्रयम्, त्रितयम् ॥

१८४५ उभादुदात्तो नित्यम् ।५।२।४४॥

उभशब्दात्तयपोऽयच् स्यात् स चाद्युदात्तः । उभयम् ॥

॥ इति पाञ्चमिकप्रकरणम् ॥

१८४५-उभ शब्दके उत्तर तयप् प्रत्ययके स्थानमें नित्य अयच् आदेश हो और वह अयच् आद्युदात्त हो, जैसे-उभयम् ॥

॥ इति पाञ्चमिकप्रकरणम् ॥

अथ मत्वर्थीयप्रकरणम् ।

१८४६ तदस्मिन्नधिकमिति दशान्ताड्डः । ५ । २ । ४५ ॥

एकादश अधिका अस्मिन्नेकादशम् ॥ शतसहस्रयोरेवेष्यते ॥ * ॥ नेह । एकादश अधिका अस्यां विंशतौ ॥ प्रकृतिप्रत्ययार्थयोः समानजातीयत्व एवेष्यते ॥ * ॥ नेह । एकादश माषा अधिका अस्मिन् सुवर्णशते ॥

१८४६-'तदस्मिन् अधिकम्' इस अर्थमें दशशब्दान्त शब्दके उत्तर ड प्रत्यय हो, जैसे-एकादश अधिका अस्मिन्=एकादशम् ।

शत और सहस्र शब्द वाच्य होनेपर ही यह विधि इष्ट है* इससे यहां न हुआ, एकादश अधिका अस्यां विंशतौ ।

प्रकृति और प्रत्ययार्थका समान जातीयत्व होनेपर ही यह विधि इष्ट है * इससे यहां नहीं हुआ, एकादश माषा अधिका अस्मिन् सुवर्णशते ॥

१८४७ शदन्तविंशतेश्च । ५ । २ । ४६ ॥

डः स्यादुक्तेर्थे । त्रिंशदधिका अस्मिन् त्रिंशं शतम् । विंशम् ॥

१८४७-उक्त अर्थमें शदन्त और विंशति शब्दके उत्तर ड प्रत्यय हो, जैसे-त्रिंशदधिका अस्मिन्=त्रिंशं शतम् । विंशम् ॥

१८४८ संख्याया गुणस्य निमाने मयट् । ५ । २ । ४७ ॥

भागस्य मूल्ये वर्तमानात्प्रथमान्तात्संख्यावाचिनः षष्ठ्यर्थे मयट् स्यात् । यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद्यवानाम् । गुणस्येति किम् । द्वौ व्रीहियवौ निमानमस्योदश्वितः । निमाने किम् । द्वौ गुणौ क्षीरस्य एकस्तैलस्य द्विगुणं क्षीरं पच्यते तैलेन ॥

१८४८-गुणका निमान, अर्थात् भागका मूल्य अर्थमें वर्तमान प्रथमान्त संख्यावाचक शब्दके उत्तर षष्ठ्यर्थमें मयट् प्रत्यय हो, जैसे-यवानां द्वौ भागौ निमानमस्य उदश्विद्भागस्य=द्विमयमुदश्विद् यवानाम् । 'गुणस्य' ऐसा कहनेसे व्रीहियवौ निमानमस्य उदश्वितः, यहां न हुआ । निमाने ऐसा क्यों कहा ? तो द्वौ गुणौ क्षीरस्य एकस्तैलस्य द्विगुणं क्षीरं पच्यते तैलेन, यहां न हो ॥

१८४९ तस्य पूरणे डट् । ५ । २ । ४८ ॥

एकादशानां पूरण एकादशः ॥

१८४९-पूरणार्थमें षष्ठ्यन्त संख्यावाचकसे डट् प्रत्यय हो, जैसे-एकादशानां पूरणः=एकादशः ॥

१८५० नान्तादसंख्यादेर्मट् ।५।२।४९॥

डटो मडागमः स्यात् । पञ्चानां पूरणः पञ्चमः । नान्तात्किम् । विंशः । असंख्यादेः किम् । एकादशः ॥

१८५०–संख्यावाचक शब्द आदिमें न हो ऐसे नकारान्त संख्यावाचक शब्दके उत्तर डट् प्रत्ययको मट्का आगम हो, जैसे–पञ्चानां पूरणः=पञ्चमः।नकारान्त न होनेपर मट्का आगम नहीं होगा, जैसे–विंशः । संख्यावाचक शब्द पूर्वमें होनेपर मडागम नहीं होगा, जैसे–एकादशः ॥

१८५१ षट्कतिकतिपयचतुरां थुक् । ५ । २ । ५१ ॥

एषां थुगागमः स्याड्डटि । षण्णां पूरणः षष्ठः। कतिथः । कतिपयशब्दस्यासंख्यात्वेऽप्यत एव ज्ञापकाड्डट् । कतिपयथः । चतुर्थः ॥ चतुरश्छयतावाद्यक्षरलोपश्च ॥ * ॥ तुरीयः । तुर्यः ॥

१८५१–डट् प्रत्यय परे रहते षट्, कति, कतिपय और चतुर् शब्दको थुक्का आगम हो, जैसे–षण्णां पूरणः=षष्ठः । कतिथः । इसी ज्ञापकके कारण कतिपय शब्दके असंख्यात्व होनेपर भी डट् प्रत्यय हुआ, जैसे–कतिपयथः । चतुर्थः ॥

चतुर् शब्दके उत्तर छ और यत् प्रत्यय और आद्य अक्षरका लोप हो * जैसे–तुरीयः । तुर्यः ॥

१८५२ बहुपूगगणसङ्घस्य तिथुक् । ५ । २ । ५२ ॥

डटीत्येव । पूगसङ्घयोरसंख्यात्वेऽप्यत एव डट् । बहुतिथः इत्यादि ॥

१८५२–डट् प्रत्यय परे रहते बहु, पूग, गण और संघ शब्दको तिथुक्का आगम हो, पूग और संघ शब्दको असंख्यात्व होनेपर भी इसी ज्ञापकके कारण डट् प्रत्यय हुआ, जैसे-बहुतिथः, इत्यादि ॥

१८५३ वतोरिथुक् । ५ । २ । ५३ ॥

डटीत्येव । यावतिथः ॥

१८५३–डट् प्रत्यय परे रहते वतुप्रत्ययान्त शब्दके उत्तर इथुक्का आगम हो, जैसे–यावतिथः ॥

१८५४ द्वेस्तीयः । ५ । २ । ५४ ॥

डटोपवादः । द्वयोः पूरणो द्वितीयः ॥

१८५४–द्वि शब्दके उत्तर उक्त अर्थमें तीय प्रत्यय हो, यह डट् प्रत्ययका विशेषक है, जैसे–द्वयोः पूरणः=द्वितीयः ॥

१८५५ त्रेः सम्प्रसारणं च ।५।२।५५॥

तृतीयः ॥

१८५५–त्रि शब्दके उत्तर तीय प्रत्यय हो और त्रि शब्दको सम्प्रसारण हो, जैसे–तृतीयः ॥

१८५६ विंशत्यादिभ्यस्तमडन्यतरस्याम् । ५ । २ । ५६ ॥

एभ्यो डटस्तमडागमो वा स्यात् । विंशतितमः । विंशः । एकविंशतितमः । एकविंशः ॥

१८५६–विंशत्यादि शब्दके उत्तर डट् प्रत्ययको विकल्प करके तमट्का आगम हो, जैसे–विंशतितमः, विंशः । एकविंशतितमः, एकविंशः ॥

१८५७ नित्यं शतादिमासार्धमाससंवत्सराच्च । ५ । २ । ५७ ॥

शतस्य पूरणः शततमः । एकशततमः । मासादेरत एव डट् । मासतमः ॥

१८५७–शतादि शब्द, मास, अर्द्धमास और संवत्सर शब्दके उत्तर डट्को नित्य तमडागम हो, जैसे–शतस्य पूरणः= शततमः । एकशततमः । मासादि शब्दके उत्तर इसी ज्ञापनसे डट् प्रत्यय हुआ, जैसे–मासतमः ।

१८५८ षष्ट्यादेश्चाऽसंख्यादेः५।२।५८॥

षष्टितमः । संख्यादेस्तु विंशत्यादिभ्य इति विकल्प एव । एकषष्टितमः । एकषष्टः ॥

१८५८–संख्यावाचक शब्द पूर्वमें न हो ऐसे षष्ट्यादि शब्दोंके उत्तर डट्को तमट्का आगम हो, जैसे–षष्टितमः । संख्यावाचक पूर्वमें होनेपर तो "विंशत्यादिभ्यः० १८५६" इस सूत्रसे विकल्प करके डट् प्रत्ययको तमट्का आगम होगा, जैसे–एकषष्टितमः, एकषष्टः ॥

१८५९मतौ छः सूक्तसाम्नोः।५।२।५९॥

मत्वर्थे छः स्यात् । अच्छावाकशब्दोऽस्मिन्नस्ति अच्छावाकीयं सूक्तम् । वारवन्तीयं साम॥

१८५९–सूक्त और साम होनेपर मत्वर्थमें प्रथमान्त प्रातिपदिकसे छ प्रत्यय हो,जैसे–अच्छावाक शब्दोऽस्मिन्नस्ति= अच्छावाकीयं सूक्तम् । वारवन्तीयं साम ॥

१८६०अध्यायानुवाकयोर्लुक्५।२।६०॥

मत्वर्थस्य छस्य । अत एव ज्ञापकात्तत्र छः । विधानसामर्थ्याच्च विकल्पेन लुक् । गर्दभाण्डः। गर्दभाण्डीयः ॥

१८६०–अध्याय और अनुवाक वाच्य होनेपर मत्वर्थमें विहित छ प्रत्ययका लुक् हो, इसी ज्ञापकके कारण इस स्थलमें छ प्रत्यय हुआ, उसका विधानसामर्थ्यके कारण विकल्प करके लुक् हुआ, जैसे–गर्दभाण्डः, गर्दभाण्डीयः ॥

१८६१ विमुक्तादिभ्योऽण् । ५ ।२।६१॥

मत्वर्थेऽण् स्यादध्यायानुवाकयोः । विमुक्तशब्दोऽस्मिन्नस्ति वैमुक्तः । दैवासुरः ॥

१८६१–अध्याय और अनुवाक वाच्य होनेपर विमुक्तादि शब्दोंके उत्तर मत्वर्थमें अण् प्रत्यय हो, जैसे–विमुक्तशब्दः अस्मिन्नस्ति=वैमुक्तः । दैवासुरः ॥

१८६२ गोपदादिभ्यो वुन् ।५।२।६२ ॥

मत्वर्थेऽध्यायानुवाकयोः । गोषदकः । इषेत्वकः ॥

१८६२–अध्याय और अनुवाक वाच्य होनेपर गोपदादि शब्दोंके उत्तर मत्वर्थमें वुन् प्रत्यय हो, जैसे-गोपदकः । इषेत्वकः ॥

१८६३ तत्र कुशलः पथः ।५।२।६३ ॥

वुन् स्यात् । पथि कुशलः पथिकः ॥

१८६३–'कुशल' इस अर्थमें सप्तम्यन्त पथिन् शब्दके उत्तर वुन् प्रत्यय हो, जैसे–पथि कुशलः=पथिकः ॥

१८६४ आकर्षादिभ्यः कन्।५।२।६४॥

आकर्षे कुशलः आकर्षकः । आकषादिभ्य इति रेफरहितो मुख्यः पाठः। आकषो निकषः ॥

१८६४–कुशलार्थमें आकर्षादि शब्दके उत्तर कन् प्रत्यय हो, जैसे–आकर्षे कुशलः=आकर्षकः । "आकषादिभ्यः" ऐसा रेफरहित पाठ मुख्य है । आकषो निकषः (आकष निकष पत्थरको कहतेहैं) ॥

१८६५ धनहिरण्यात्कामे ।५।२।६५ ॥

काम इच्छा । धने कामो धनको देवदत्तस्य । हिरण्यकः ॥

१८६५–कामार्थमें धन और हिरण्य शब्दके उत्तर कन् प्रत्यय हो, काम शब्दसे इच्छा जानना, जैसे–धने कामः= धनकः देवदत्तस्य । हिरण्यकः ॥

१८६६ स्वाङ्गेभ्यः प्रसिते ।५।२।६६ ॥

केशेषु प्रसितः केशकः तद्रचनायां तत्पर इत्यर्थः ॥

१८६६–प्रसितार्थमें स्वाङ्गवाचक शब्दके उत्तर कन् प्रत्यय हो, जैसे–केशेषु प्रसितः=केशकः । केशरचनामें तत्पर व्यक्तिको 'केशकः' कहतेहैं ॥

१८६७ उदराट्ठगाद्यूने ।५। २। ६७ ॥

अविजिगीषौ ठक् स्यात्कनोऽपवादः । बुभुक्षयाऽत्यन्तपीडित उदरे प्रसित औदरिकः । आद्यूने किम् । उदरकः । उदरपरिमार्जनादौ प्रसक्त इत्यर्थः ॥

१८६७–आद्यून अर्थात् अविजिगीषा अर्थ होनेपर प्रसितार्थमें उदर शब्दके उत्तर ठक् प्रत्यय हो, यह ठक्, कन् प्रत्ययका विशेषक है, जैसे–उदरे प्रसितः=औदरिकः, अर्थात् क्षुधासे अत्यन्त कातर । आद्यून अर्थ न होनेपर, उदरकः, अर्थात् उदर परिमार्जनादिमें प्रसक्त ॥

१८६८ सस्येन परिजातः ।५।२।६८ ॥

कन् स्मर्यते न तु ठक् । सस्यशब्दो गुणवाची न तु धान्यवाची। शस्येनेति पाठान्तरम्। सस्येन गुणेन परिजातः सम्बद्धः सस्यकः साधुः॥

१८६८–'सस्येन परिजातः' अर्थात् गुणसे युक्त, इस अर्थमें सस्य शब्दके उत्तर कन् प्रत्यय हो, ठक् प्रत्यय न हो, सस्य शब्द गुणवाची है, धान्यवाचक नहीं है, 'शस्येन' ऐसा पाठान्तर भी है । जैसे–सस्येन गुणेन परिजातः सम्बद्धः= सस्यकः, अर्थात् साधु ॥

१८६९ अंशं हारी । ५ । २ । ६९ ॥

हारीत्यावश्यके णिनिः । अत एव तद्योगे षष्ठी न । अंशको दायादः ॥

१८६९–'हारी' इस अर्थमें द्वितीयान्त अंश शब्दके उत्तर कन् प्रत्यय हो, 'हारी' इसमें हृ धातुके उत्तर आवश्यकमें णिनि प्रत्यय है, इस कारण तद्योग (णिनियोग) में षष्ठी नहीं हुई, जैसे–अंशको दायादः ॥

१८७० तन्त्रादचिरापहृते । ५।२।७० ॥

तन्त्रकः पटः । प्रत्यग्र इत्यर्थः ॥

१८७०–अचिरापहृत अर्थमें तंत्र शब्दके उत्तर कन् प्रत्यय हो, जैसे–तंत्रकः पटः, प्रत्यग्र अर्थात् नवीन वस्त्र ॥

१८७१ ब्राह्मणकोष्णिके संज्ञायाम् । ५ । २ । ७१ ॥

आयुधजीविनो ब्राह्मणा यस्मिन्देशे स ब्राह्मणकः । अल्पमन्नं यस्यां सा उष्णिका यवागूः । अन्नशब्दस्य उष्णादेशो निपात्यते ॥

१८७१–संज्ञा होनेपर 'ब्राह्मणकः' और 'उष्णिका' यह दो पद निपातनसे सिद्ध हों, आयुधजीवी ब्राह्मण जिस देशमें रहें उसको 'ब्राह्मणक' कहतेहैं । जिसमें अल्प अन्न है, उसको उष्णिका, अर्थात् यवागू (लप्सी) कहतेहैं, अन्न शब्दके स्थानमें निपातनसे उष्ण आदेश हुआहै ॥

१८७२ शीतोष्णाभ्यां कारिणि । ५ । २ । ७२ ॥

शीतं करोतीति शीतकोऽलसः । उष्णं करोतीति उष्णकः शीघ्रकारी ॥

१८७२–'कारी' अर्थमें शीत और उष्ण शब्दके उत्तर कन् प्रत्यय हो, जैसे–शीतं करोतीति=शीतिकः अर्थात् अलस । उष्णं करोतीति उष्णकः, अर्थात् शीघ्रकारी ॥

१८७३ अधिकम् । ५ । २ । ७३ ॥

अध्यारूढशब्दात्कन् उत्तरपदलोपश्च ॥

१८७३–अध्यारूढ शब्दके उत्तर कन् प्रत्यय और उत्तर पदका लोप हो, जैसे–अधिकम् ॥

१८७४ अनुकाभिकाभीकः कमिता । ५ । २ । ७४ ॥

अन्वभिभ्यां कन् अभेः पाक्षिको दीर्घश्च । अनुकामयते अनुकः। अभिकामयते अभिकः । अभीकः ॥

१८७४-कमितार्थमें अनु और अभि शब्दके उत्तर कन् प्रत्यय और अभि शब्दके इकारको पाक्षिक दीर्घ भी हो, जैसे-अनुकामयते=अनुकः । अभिकामयते=अभीकः, अभिकः, अर्थात् कामुक ॥

१८७५ पार्श्वेनान्विच्छति ।५।२।७५॥

अनृजुरुपायः पार्श्वं तेनान्विच्छति पार्श्वकः॥

१८७५-'अन्विच्छति' इस अर्थमें तृतीयान्त पार्श्व शब्दके उत्तर कन् प्रत्यय हो, जैसे-अनृजुरुपायः पार्श्वं तेन अन्विच्छति=पार्श्वकः ॥

१८७६ अयःशूलदण्डाजिनाभ्यां ठक्ठञौ । ५ । २ । ७६ ॥

तीक्ष्ण उपायोऽयःशूलं तेनान्विच्छति आयःशूलिकः साहसिकः । दण्डाजिनं दम्भः तेनान्विच्छति दाण्डाजिनिकः ॥

१८७६-'अन्विच्छति' इस अर्थमें तृतीयान्त अयःशूल और दण्डाजिन शब्दके उत्तर क्रमसे ठक् और ठञ् प्रत्यय हों, जैसे-तीक्ष्ण उपायोऽयःशूलम्, तेन अन्विच्छति=आयःशूलिकः, अर्थात् साहसिक । दण्डाजिनं दंभः तेन अन्विच्छति=दांडाजिनिकः ॥

१८७७ तावतिथं ग्रहणमिति लुग्वा । ५ । २ । ७७ ॥

कन् स्यात्पूरणप्रत्ययस्य च लुग्वा । द्वितीयकं द्विकं वा ग्रहणं देवदत्तस्य । द्वितीयेन रूपेण ग्रहणमित्यर्थः ॥ तावतिथेन गृह्णातीति कन्वक्तव्यो नित्यं च लुक् ॥*॥ षष्ठेन रूपेण गृह्णाति षट्को देवदत्तः । पञ्चकः ॥

१८७७-'ग्रहणम्' इस अर्थमें तृतीयान्त पूरणप्रत्ययान्तसे कन् प्रत्यय और पूरणप्रत्ययका विकल्प करके लुक् हो, जैसे-द्वितीयकं, द्विकं वा ग्रहणं देवदत्तस्य, अर्थात् द्वितीय रूपसे ग्रहण ।

तृतीयान्त पूरण प्रत्ययान्तसे 'गृह्णाति' इस अर्थमें कन् प्रत्यय और नित्य पूरण प्रत्ययका लुक् हो * जैसे-षष्ठेन रूपेण गृह्णाति=षट्को देवदत्तः । पञ्चकः ॥

१८७८ स एषां ग्रामणीः । ५ ।२।७८॥

देवदत्तो मुख्योऽस्य देवदत्तकः । त्वत्कः । मत्कः ॥

१८७८-'वह इसका ग्रामणी अर्थात् श्रेष्ठ है' इस अर्थमें कन् प्रत्यय हो, जैसे-देवदत्तो मुख्योऽस्य=देवदत्तकः । त्वत्कः । मत्कः ॥

१८७९ शृङ्खलमस्य बन्धनं करभे । ५ । २ । ७९ ॥

शृङ्खलकः करभः ॥

१८७९-'शृंखल इसका बंधन है' इस अर्थमें करभ वाच्य होनेपर शृंखल शब्दके उत्तर कन् प्रत्यय हो, जैसे-शृंखलकः करभः ॥

१८८० उत्क उन्मनाः । ५ । २ । ८० ॥

उद्गतमनस्कवृत्तेरुच्छब्दात्स्वार्थे कन् । उत्कः उत्कण्ठितः ॥

१८८०-उद्गतमनस्कवृत्ति उत् शब्दके उत्तर स्वार्थमें कन् प्रत्यय हो, जैसे-उत्कः, अर्थात् उत्कंठित ॥

१८८१ कालप्रयोजनाद्रोगे ।५।२।८१॥

कालवचनात्प्रयोजनवचनाच्च कन् स्याद्रोगे द्वितीयेऽहनि भवो द्वितीयको ज्वरः । प्रयोजनं कारणं रोगस्य फलं वा । विषपुष्पैर्जनितो विषपुष्पकः । उष्णं कार्यमस्य उष्णकः । रोगे किम् । द्वितीयो दिवसोऽस्य ॥

१८८१-रोगार्थमें कालवाचक और प्रयोजनवाचक शब्दके उत्तर कन् प्रत्यय हो, जैसे-द्वितीयेऽहनि भवः=द्वितीयकः ज्वरः । प्रयोजन शब्दसे कारण अथवा रोगका फल जानना, जैसे-विषपुष्पैर्जनितः=विषपुष्पकः । उष्णं कार्यमस्य=उष्णकः । रोग न होनेपर, जैसे-द्वितीयो दिवसोऽस्य ॥

१८८२ तदस्मिन्नन्नं प्राये संज्ञायाम् । ५ । २ । ८२ ॥

प्रथमान्तात्सप्तम्यर्थे कन् स्यात् यत्प्रथमान्तमन्नं चेत्प्रायविषयं तत् । गुडापूपाः प्रायेणान्नमस्यां गुडापूपिका पौर्णमासी ॥ वटकेभ्य इनिर्वाच्यः ॥ * ॥ वटकिनी ॥

१८८२-संज्ञा होनेपर प्रायविषयीभूत अन्नवाचक हो तो प्रथमान्त शब्दके उत्तर सप्तम्यर्थमें कन् प्रत्यय हो, जैसे-गुडापूपाः प्रायेणान्नमस्याम्=गुडापूपिका, अर्थात् पौर्णमासी।

वटक शब्दके उत्तर इनि प्रत्यय हो * जैसे-वटकिनी (फुलौरी वा बड़ा) ॥

१८८३ कुल्माषादञ् । ५ । २ । ८३ ॥

कुल्माषाः प्रायेणान्नमस्यां कौल्माषी ॥

१८८३-उक्त अर्थमें कुल्माष शब्दके उत्तर अञ् प्रत्यय हो, जैसे-कुल्माषा प्रायेणान्नमस्याम्=कौल्माषी । कुल्माष शब्दसे अर्द्धस्विन्न गोधूमादि जानना ॥

१८८४ श्रोत्रियंश्छन्दोऽधीते ।५।२।८४॥

श्रोत्रियः । वेत्यनुवृत्तेश्छान्दसः ॥

१८८४-'अध्ययन करताहै' इस अर्थमें द्वितीयान्त छन्दस् शब्दके उत्तर निपातनसे घन् प्रत्यय और छन्दस्को श्रोत्र आदेश हो, जैसे-श्रोत्रियः । इस सूत्रमें वा शब्दकी अनुवृत्ति आनेसे 'छान्दसः' यह पद सिद्ध हुआ ॥

१८८५ श्राद्धमनेन भुक्तमिनिठनौ। ५।२।८५॥

श्राद्धी। श्राद्धिकः ॥

१८८५-' अनेन भुक्तम् ' इस अर्थमें श्राद्ध शब्दके उत्तर इनि और ठन् प्रत्यय हो, जैसे-श्राद्धं भुक्तमनेन=श्राद्धी,=श्राद्धिकः । इस स्थलमें श्राद्ध शब्दसे श्राद्धसाधन द्रव्य जानना, पितृलोकके उद्देश्यसे कर्म नहीं जानना क्योंकि, उनका साक्षात् भोजन असम्भव है ॥

१८८६ पूर्वादिनिः । ५ । २ । ८६ ॥

पूर्वं कृतमनेन पूर्वी ॥

१८८६-' कृतम् ' इस अर्थमें पूर्व शब्दके उत्तर इनि प्रत्यय हो, जैसे-पूर्वी ॥

१८८७ सपूर्वाच्च । ५ । २ । ८७ ॥

कृतपूर्वी ॥

१८८७-'कृतम्' इस अर्थमें तृतीयान्त सपूर्वक पूर्व शब्दके उत्तर इनि प्रत्यय हो, जैसे-कृतपूर्वी ॥

१८८८ इष्टादिभ्यश्च । ५ । २ । ८८ ॥

इष्टमनेन इष्टी । अधीती ॥

१८८८-'इष्टम्' इस अर्थमें तृतीयान्त इष्टादि शब्दोंके उत्तर इनि प्रत्यय हो, जैसे-इष्टी । अधीती ॥

१८८९ छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि । ५ । २ । ८९ ॥

लोके तु परिपन्थिशब्दो न न्याय्यः ॥

१८८९-वेदमें शत्रुपर्याय पर्यवस्थातृ शब्दके उत्तर स्वार्थमें इनि प्रत्यय हो, और अवस्थातृ शब्दके स्थानमें निपातनसे पंथ और पर आदेश हो, जैसे-परिपंथी । परिपरी । लोकमें परिपन्थि शब्द उचित नहीं है ॥

१८९० अनुपद्यन्वेष्टा । ५ । २ । ९० ॥

अनुपदमन्वेष्टा । अनुपदी गवाम् ॥

१८९०-अन्वेष्टाअर्थमें अनुपद शब्दके उत्तर इनि प्रत्यय हो, जैसे-अनुपदमन्वेष्टा=अनुपदी गवाम् ॥

१८९१ साक्षाद्द्रष्टरि संज्ञायाम् । ५ । २ । ९१ ॥

साक्षाद्द्रष्टा साक्षी ॥

१८९१-संज्ञा होनेपर द्रष्टा अर्थमें साक्षात् शब्दके उत्तर इनि प्रत्यय हो, जैसे-साक्षात् द्रष्टा=साक्षी, यहां "अव्ययानां भमात्रे टिलोपः" इससे टिलोप हुआ ॥

१८९२ क्षेत्रियच् परक्षेत्रे चिकित्स्यः। ५ । २ । ९२ ॥

क्षेत्रियो व्याधिः । शरीरान्तरे चिकित्स्यः । अप्रतीकार्य इत्यर्थः ॥

१८९२-'पर क्षेत्रमें अर्थात् शरीरान्तरमें चिकित्स्य' इस अर्थमें 'क्षेत्रियच्' यह निपातनसे सिद्ध हो, अर्थात् सप्तम्यन्त परक्षेत्र शब्दके उत्तर चिकित्स्यार्थमें घच् प्रत्यय हो, और निपातनसे पर शब्दका लोप हो, जैसे-क्षेत्रियो व्याधिः, जो परक्षेत्रमें अर्थात् शरीरान्तरमें चिकित्स्य हो उसको क्षेत्रिय कहतेहैं अर्थात् अप्रतीकार्य्य व्याधि ॥

१८९३ इन्द्रियमिन्द्रलिंगमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा । ५ । २ । ९३ ॥

इन्द्र आत्मा तस्य लिङ्गं करणेन कर्तुरनुमानात् । इति शब्दः प्रकारार्थः । इन्द्रेण दुर्जयमिन्द्रियम् ॥

१८९३-इन्द्र लिङ्ग (चिह्न), इन्द्रदृष्ट, इन्द्रसृष्ट, इन्द्रजुष्ट, इन्द्रदत्त, इन अर्थोंमें इन्द्र शब्दके उत्तर निपातनसे घच् प्रत्यय हो, जैसे-इन्द्रियम् । इन्द्र शब्दसे आत्मा समझना, उसके अनुमापकको इन्द्रिय कहतेहैं, इस स्थलमें करणके कर्ताका अनुमान किया जाताहै। इति शब्द प्रकारार्थ है, इससे इन्द्रेण दुर्जयम्=इन्द्रियम्, ऐसा हुआ ॥

१८९४ तदस्यास्त्यस्मिन्निति मतुप् । ५ । २ । ९४ ॥

गावोऽस्यास्मिन्वा सन्ति गोमान् ॥

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ॥

सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥ १ ॥

१८९४-'अस्य अस्मिन् वा अस्ति' इस अर्थमें प्रथमान्त पदसे मतुप् प्रत्यय हो, जैसे-गावोऽस्य अस्मिन् वा सन्ति=गोमान् । भूमि, अर्थात् बाहुल्यार्थमें और निन्दार्थमें, प्रशंसार्थमें, नित्ययोगमें, अतिशयार्थमें, संसर्गार्थमें और अस्तिविवक्षामें मतुप् आदि प्रत्यय होतेहैं ॥

१८९५ रसादिभ्यश्च । ५ । २ । ९५ ॥

मतुप् । रसवान् । रूपवान् । अन्यमत्वर्थीयनिवृत्त्यर्थं वचनम् । रस, रूप, वर्ण, गन्ध, स्पर्श, शब्द, स्नेह, भाव ॥ गुणात्, एकाचः ॥ स्ववान् । गुणग्रहणं रसादीनां विशेषणम् ॥

१८९५-रसादि शब्दोंके उत्तर उक्त अर्थमें मतुप् प्रत्यय हो, जैसे-रसवान् । रूपवान् । यह सूत्र अन्य मत्वर्थीय प्रत्ययकी निवृत्तिके निमित्त है । रसादि-रस, रूप, वर्ण, गन्ध, स्पर्श, शब्द, स्नेह, भाव, इतनेहैं ।

(गुणात्) गुणग्रहण रसादिकोंका विशेषण है इससे गुणवाचक ही रसादिसे मतुप् प्रत्यय होगा ।

एकस्वरयुक्त शब्दके उत्तर मतुप् प्रत्यय हो, जैसे-स्ववान् ॥

१८९६ तसौ मत्वर्थे । १ । ४ । १९ ॥

तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे । वसोः संप्रसारणम् । विदुष्मान् ॥ गुणवचनेभ्यो मतुपो लुगिष्टः ॥ * ॥ शुक्लो गुणोऽस्यास्तीति शुक्लः पटः । कृष्णः ॥

१८९६–मत्वर्थ प्रत्यय परे रहते तकारान्त और सकारान्त शब्द भसंज्ञक हों। "वसोः सम्प्रसारणम्" इससे वस्वन्त अङ्गको संप्रसारण हुआ, जैसे–विदुष्मान्।

गुणवाचक शुक्लादि शब्दोंके उत्तर मतुप् प्रत्ययका लुक् हो * जैसे–शुक्लो गुणोऽस्यास्ति=शुक्लः पटः। कृष्णः, इत्यादि ॥

१८९७ मादुपधायाश्च मतोर्वोऽयवादिभ्यः। ८। २। ९॥

मवर्णाऽवर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जात्परस्य मतोर्मस्य वः स्यात्। किंवान्। ज्ञानवान्। विद्यावान्। लक्ष्मीवान्। यशस्वान्। भास्वान्। यवादेस्तु यवमान्। भूमिमान् ॥

१८९७–मवर्णान्त और अवर्णान्त और मवर्ण और अवर्णोपध यवादिभिन्न शब्दके उत्तर मतुप्के मकारके स्थानमें वकार हो, जैसे–किंवान्। ज्ञानवान्। विद्यावान्। लक्ष्मीवान्। यशस्वान्। भास्वान्। यवादि होनेपर जैसे–यवमान्। भूमिमान् ॥

१८९८ झयः। ८। २। १० ॥

झयन्तान्मतोर्मस्य वः स्यात्। अपदान्तत्वान्न जश्त्वम्। विद्युत्वान् ॥

१८९८–झयन्तसे परे स्थित मतुप् प्रत्ययके मकारके स्थानमें वकार हो, जैसे–विद्युत्वान्, यहां अपदान्तत्वके कारण (१८९६) जश्त्व नहीं हुआ ॥

१८९९ संज्ञायाम्। ८। २। ११ ॥

मतोर्मस्य वः स्यात्। अहीवती। मुनीवती। शरादीनां चेति दीर्घः ॥

१८९९–संज्ञार्थमें मतुप् प्रत्ययके मकारके स्थानमें वकार हो, जैसे–अहीवती, मुनीवती। यहां "शरादीनाञ्च १०४२" इस सूत्रसे दीर्घ होताहै ॥

१९०० आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती। ८। २। १२ ॥

एते षट् संज्ञायां निपात्यन्ते। आसनशब्दस्यासन्दीभावः। आसन्दीवान् ग्रामः। अन्यत्रासनवान्। अस्थिशब्दस्याष्ठीभावः। अष्ठीवान्नाम ऋषिः। अस्थिमानन्यत्र। चक्रशब्दस्य चक्रीभावः। चक्रीवान्नाम राजा। चक्रवानन्यत्र। कक्ष्यायाः सम्प्रसारणम्। कक्षीवान्नाम ऋषिः। कक्ष्यावानन्यत्र। लवणशब्दस्य रुमण्भावः। रुमण्वान्नाम पर्वतः। लवणवानन्यत्र। चर्मणो नलोपाभावो णत्वं च। चर्मण्वती नाम नदी। चर्मवत्यन्यत्र ॥

१९००–आसन्दीवत्, अष्ठीवत्, चक्रीवत्, कक्षीवत्, रुमण्वत्, चर्मण्वत्, यह छै मतुप्प्रत्ययान्त शब्द संज्ञामें निपातनसे सिद्ध हों, आसन शब्दके स्थानमें आसन्दी आदेश हुआ, जैसे–आसन्दीवान् ग्रामः। अन्यत्र 'आसनवान्' ऐसा होगा। अस्थि शब्दके स्थानमें अष्ठी आदेश हुआ, जैसे–अष्ठीवान्। अन्यत्र अस्थिमान्। चक्र शब्दके स्थानमें चक्री आदेश हुआ, जैसे–चक्रीवान् नाम राजा। अन्यत्र चक्रवान्। कक्ष्या शब्दको सम्प्रसारण (य–के स्थानमें ई) होकर कक्षीवान् नाम ऋषिः। अन्यत्र कक्ष्यावान्। लवण शब्दके स्थानमें रुमण् आदेश होकर रुमण्वान् नाम पर्वतः। अन्यत्र लवणवान्। चर्मन् शब्दके नकारके लोपका अभाव और णत्व होकर चर्मण्वती नाम नदी। अन्यत्र चर्मवती ॥

१९०१ उदन्वानुदधौ च।८।२। १३ ॥

उदकस्य उदन्भावो मतौ उदधौ संज्ञायां च। उदन्वान् समुद्रः ऋषिश्च ॥

१९०१--मतुप् प्रत्यय परे रहते उदधि अर्थात् समुद्र अर्थ और संज्ञामें उदक शब्दके स्थानमें उदन् आदेश हो, जैसे--उदन्वान् समुद्रः, ऋषिश्च ॥

१९०२ राजन्वान् सौराज्ये।८।२।१४॥

राजन्वती भूः। राजवानन्यत्र ॥

१९०२--सौराज्य होनेपर मतुप् प्रत्यय परे रहते राजन् शब्दके नकारका लोप न हो, जैसे--राजन्वती भूः। अन्यत्र राजवान् ॥

१९०३ प्राणिस्थादातो लजन्यतरस्याम्। ५। २। ९६ ॥

चूडालः। चूडावान्। प्राणिस्थात्किम्। शिखावान्दीपः। आतः किम्। हस्तवान्। प्राण्यङ्गादेव। नेह। मेधावान्। प्रत्ययस्वरेणैव सिद्धे अन्तोदात्तत्वे चूडालोसीत्यादौ स्वरितो वाऽनुदात्ते पदादाविति स्वरितबाधनार्थश्चकारः॥

१९०३--प्राणिस्थ आकारान्त शब्दके उत्तर विकल्प करके लच् प्रत्यय हो, जैसे- चूडालः। चूडावान्। प्राणिस्थ न होनेपर जैसे- शिखावान् दीपः। आकारान्त न होनेपर, हस्तवान्। प्राणीका अङ्ग होनेसे ही लच् प्रत्यय होगा, इससे 'मेधावान्' यहां न हुआ।

प्रत्यय स्वरसे अन्तोदात्तत्व सिद्ध होनेसे 'चूडालोऽसि' इत्यादि स्थलमें "स्वरितो वानुदात्ते पदादौ ३६५९" इस सूत्रसे स्वरितके बाधके निमित्त प्रत्ययमें चकार है ॥

१९०४ सिध्मादिभ्यश्च। ५। २।९७॥

लज्वा स्यात्। सिध्मलः। सिध्मवान्। अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थं न तु प्रत्ययविकल्पार्थम्। तेनाकारान्तेभ्य इनिठनौ न ॥ वातदन्तबललललाटानामूङ् च ॥ ॥ वातूलः ॥

१९०४--सिध्मादि शब्दोंके उत्तर विकल्प करके लच् प्रत्यय हो, विकल्प पक्षमें मतुप् होगा, जैसे--सिध्मलः, सिध्मवान्।

'अन्यतरस्याम्' पदका ग्रहण मतुप् समुच्चयार्थ है, प्रत्ययके विकल्पार्थ नहीं है, इस कारण अकारान्त शब्दके उत्तर इनि और ठन् प्रत्यय न हुआ।

वात, दन्त, बल और ललाट शब्दके उत्तर लच् प्रत्यय और ऊङ् आदेश हो * जैसे--वातूलः ॥

१९०५ वत्सांसाभ्यां कामबले ।५।२।९८॥

आभ्यां लज्वा स्याद्यथासंख्यं कामवति बलवति चार्थे । वत्सलः । अंसलः ॥

१९०५-कामवान् और बलवान् अर्थमें यथाक्रम वत्स और अंश शब्दके उत्तर विकल्प करके लच् प्रत्यय हो, जैसे-वत्सलः । अंसलः ॥

१९०६ फेनादिलच्च ।५।२।९९॥

चाल्लच् । अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमनुवर्तते । फेनिलः । फेनलः । फेनवान् ॥

१९०६--फेन शब्दके उत्तर इलच् प्रत्यय हो और चकारसे लच् प्रत्यय हो, यहां 'अन्यतरस्याम्' यह पद मतुप् प्रत्ययके समुच्चयार्थ अनुवृत्त है, जैसे--फेनिलः, फेनलः, फेनवान् ॥

१९०७ लोमादिपामादिपिच्छादिभ्यः शनेलचः ।५।२।१००॥

लोमादिभ्यः शः । लोमशः । लोमवान् । रोमशः । रोमवान् ॥ पामादिभ्यो न । पामनः ॥ अङ्गात्कल्याणे ॥ ॥ अङ्गना ॥ लक्ष्म्या अच्च ॥ ॥ लक्ष्मणः ॥ विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः ॥ ॥ विषुणः ॥ पिच्छादिभ्य इलच् ॥ पिच्छिलः । पिच्छवान् । उरसिलः । उरस्वान् ॥

१९०७--लोमादि शब्दोंके उत्तर श प्रत्यय हो, जैसे-लोमशः, लोमवान् । रोमशः, रोमवान् । पामादि शब्दोंके उत्तर न प्रत्यय हो, जैसे--पामनः ।

अङ्ग शब्दके उत्तर कल्याण अर्थमें न प्रत्यय हो, जैसे-अङ्गना ।

न प्रत्यय परे रहते लक्ष्मी शब्दके ईकारके स्थानमें अकार हो, जैसे--लक्ष्मणः ।

अकृतसंधिक विष्वक् शब्दके उत्तर न प्रत्यय हो और उत्तरपदका लोप हो, जैसे--विषुणः । पिच्छादि शब्दोंके उत्तर इलच् प्रत्यय हो, जैसे--पिच्छिलः, पिच्छावान् । उरसिलः, उरस्वान्, इत्यादि ॥

१९०८ प्रज्ञाश्रद्धार्चाभ्यो णः ।५।२।१०१॥

प्राज्ञो व्याकरणम् । प्राज्ञा । श्राद्धः । आर्चः ॥ वृत्तेश्च ॥ * ॥ वार्तः ॥

१९०८--प्रज्ञा, श्रद्धा और अर्चा शब्दोंके उत्तर ण प्रत्यय हो, जैसे--प्रज्ञा अस्यास्ति=प्राज्ञो व्याकरणम् । प्राज्ञा । श्राद्धः । आर्चः ।

वृत्ति शब्दके उत्तर भी ण प्रत्यय हो * जैसे--वार्तः ॥

१९०९ तपस्सहस्राभ्यां विनीनी ।५।२।१०२॥

विनीन्योरिकारो नकारपरित्राणार्थः । तपस्वी । सहस्री । असन्तत्वाददन्तत्वाच्च सिद्धे पुनर्वचनमणा बाधा मा भूदिति सहस्रात्तु ठनोपि बाधनार्थम् ॥

१९०९--तपस् और सहस्र शब्दके उत्तर यथाक्रम विनि और इनि प्रत्यय हों, विनि और इनि प्रत्ययका इकार नकारके परित्राणार्थ है, जैसे--तपोऽस्मिन् अस्तीति=तपस्वी । सहस्री ।

असन्तत्व और अकारान्तत्वके कारण उक्त दोनों शब्दोंके उत्तर उक्त दोनों प्रत्ययोंकी सिद्धि होजाती फिर सूत्र करनेकी क्या आवश्यकता है ? इसपर कहतेहैं कि, अण् प्रत्ययसे इसका बाध न हो इस कारण यह सूत्र है और सहस्र शब्दके उत्तर ठन् प्रत्ययके भी बाधनार्थ है ॥

१९१० अण् च ।५।२।१०३॥

योगविभाग उत्तरार्थः । तापसः । साहस्रः ॥ ज्योत्स्नादिभ्य उपसंख्यानम् ॥ * ॥ ज्यौत्स्नः । तामिस्रः ॥

१९१०--तपस् और सहस्र शब्दके उत्तर अण् प्रत्यय हो, "अण् च" ऐसा भिन्न सूत्रकरण उत्तरार्थ है । तापसः । साहस्रः ।

ज्योत्स्नादि शब्दोंके उत्तर भी अण् प्रत्यय हो * जैसे--ज्यौत्स्नः । तामिस्रः ॥

१९११ सिकताशर्कराभ्यां च ।५।२।१०४॥

सैकतो घटः । शार्करः ॥

१९११--सिकता और शर्करा शब्दके उत्तर अण् प्रत्यय हो, जैसे--सैकतः, अर्थात् घट । शार्करः ॥

१९१२ देशे लुबिलचौ च ।५।२।१०५॥

चादण् मतुप् च । सिकताः सन्त्यस्मिन्देशे सिकताः । सिकतिलः । सैकतः । सिकतावान् । एवं शर्करेत्यादि ॥

१९१२--देश होनेपर सिकता और शर्करा शब्दके उत्तर अण् प्रत्ययका लुप् हो, और इलच् प्रत्यय हो, चकारसे अण् और मतुप् प्रत्यय भी हो, जैसे--सिकताः सन्ति अस्मिन् देशे=सिकताः, सिकतिलः, सैकतः, सिकतावान् । इसी प्रकार शर्कराः, शर्करिलः, शार्करः, शर्करावान् ॥

१९१३ दन्त उन्नत उरच् ।५।२।१०६॥

उन्नता दन्ताः सन्त्यस्य दन्तुरः ॥

१९१३--ऊंचे अर्थमें प्रथमान्त दन्त शब्दके उत्तर उरच् प्रत्यय हो, जैसे--उन्नताः दन्ताः सन्ति अस्य=दन्तुरः ।

१९१४ऊषसुषिमुष्कमधोरः५।२।१०७।

ऊषरः । सुषिरः । मुष्कोण्डः । मुष्करः । मधु माधुर्यम्, मधुरः ॥ रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम् ॥ * ॥ खरः । मुखरः ॥ कुञ्जो हस्तिहनुः,कुञ्जरः॥नगपांसुपाण्डुभ्यश्च॥*॥ नगरम् । पांसुरः । पाण्डुरः । पाण्डरशब्दस्तु अव्युत्पन्न एव॥कच्छ्वा ह्रस्वत्वं च॥*॥कच्छुरः॥

१९१४–ऊष, सुषि, मुष्क और मधु शब्दके उत्तर र प्रत्यय हो, जैसे–ऊषरः । सुषिरः । मुष्करः । मुष्क शब्दसे अण्डकोष जानना । मधुरः । मधु शब्दसे माधुर्य जानना । ख, मुख और कुञ्ज शब्दके उत्तर र प्रत्यय हो* जैसे–खरः । मुखरः । कुञ्जरः । कुञ्ज शब्दसे हाथीकी हनु जानना ।

नग, पांशु और पाण्डु शब्दके उत्तर र प्रत्यय हो, जैसे–नगरम् । पांशुरः । पाण्डुरः । पाण्डर शब्द तो अव्युत्पन्न, अर्थात् व्युत्पत्तिसिद्ध नहीं है ।

कच्छू शब्दके उत्तर र प्रत्यय और ऊकारको ह्रस्व हो, जैसे–कच्छुरः ॥

१९१५ द्युद्रुभ्यां मः । ५।२।१०८ ॥

द्युमः । द्रुमः ॥

१९१५–द्यु और द्रु शब्दके उत्तर म प्रत्यय हो, जैसे–द्युमः । द्रुमः ॥

१९१६ केशाद्वोऽन्यतरस्याम् । ५। २। १०९ ॥

प्रकृतेनान्यतरस्यांग्रहणेन मतुपि सिद्धे पुनर्ग्रहणमिनिठनोः समावेशार्थम् । केशवः। केशी । केशिकः । केशवान् ॥ अन्येभ्योऽपि दृश्यते॥*॥ मणिवो नागविशेषः। हिरण्यवो निधिविशेषः ॥ अर्णसो लोपश्च ॥ * ॥ अर्णवः ॥

१९१६–केश शब्दके उत्तर विकल्प करके व प्रत्यय हो, प्रकृत 'अन्यतरस्याम्' ग्रहणसे मतुप् प्रत्ययकी सिद्धि होनेपर भी पुनर्ग्रहण इनि और ठन् प्रत्ययके समावेशार्थ है, इससे केश शब्दके उत्तर व प्रत्यय और इनि, ठन् और मतुप् प्रत्यय भी होगा, जैसे–केशवः, केशी, केशिकः, केशवान् ॥

अन्य शब्दोंके उत्तर भी उक्त प्रत्यय हो * जैसे–मणिवः नागविशेषः । हिरण्यवः निधिविशेषः ॥

अर्णस् शब्दके उत्तर व प्रत्यय हो,और सकारका लोप हो* जैसे–अर्णवः समुद्रः ॥

१९१७ गाण्डयजगात्संज्ञायाम् । ५। २। ११० ॥

ह्रस्वदीर्घयोर्यणा तन्त्रेण निर्देशः । गाण्डिवम् । गाण्डीवम् । अर्जुनस्य धनुः ॥ अजगवं पिनाकः ॥

१९१७–संज्ञा होनेपर गांडी और अजग शब्दके उत्तर व प्रत्यय हो । ह्रस्व और दीर्घको यण् करके तंत्रसे निर्देश है, जैसे–गाण्डिवम्, गाण्डीवम्, अर्जुनका धनुष । अजगवं पिनाकः ॥

१९१८ काण्डाण्डादीरन्नीरचौ । ५। २। १११ ॥

काण्डीरः । आण्डीरः ॥

१९१८–काण्ड और आण्ड शब्दके उत्तर ईरन् और ईरच् प्रत्यय हो, जैसे–काण्डीरः । आण्डीरः ॥

१९१९ रजःकृष्यासुतिपरिषदो वलच् । ५। २। ११२ ॥

रजस्वला स्त्री । कृषीवलः । वल इति दीर्घः। आसुतीवलः शौण्डिकः ॥ परिषद्वलः । पर्षदिति पाठान्तरम् । पर्षद्वलम् ॥ अन्येभ्योपि दृश्यते॥ ॥ * ॥ भ्रातृवलः । पुत्रवलः । शत्रुवलः । वल इत्यत्र संज्ञायामित्युनुवृत्तेर्नेह दीर्घः ॥

१९१९–रजस्, कृषि, आसुति और परिषद् शब्दके उत्तर वलच् प्रत्यय हो, जैसे–रजस्वला स्त्री । कृषीवलः, यहां वलच् प्रत्यय परे रहते "वले" इससे दीर्घ हुआ । आसुतीवलः शौंडिकः । परिषद्वलः । 'पर्षत्' ऐसा पाठान्तर भी है, इस कारण पर्षद् शब्दके उत्तर भी वलच् प्रत्यय होगा, जैसे–पर्षद्वलः ।

अन्य शब्दोंके उत्तर भी वलच् प्रत्ययका प्रयोग देखा जाता है * जैसे–भ्रातृवलः । पुत्रवलः । शत्रुवलः, "वले १०४०" इस सूत्रमें "संज्ञायाम्" इस पदकी अनुवृत्तिके कारण यहां दीर्घ नहीं हुआ ॥

१९२० दन्तशिखात्संज्ञायाम्५।२।११३।

दन्तावलो हस्ती । शिखावलः केकी ॥

१९२०–संज्ञा होनेपर दंत और शिखा शब्दके उत्तर वलच् प्रत्यय हो, जैसे–दन्तावलः, अर्थात् हस्ती । शिखावलः, अर्थात् मयूर (मोर) ॥

१९२१ ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः । ५। २। ११४ ॥

मत्वर्थे निपात्यन्ते । ज्योतिष उपधालोपो नश्च प्रत्ययः । ज्योत्स्ना । तमस उपधाया इत्वं रश्च, तमिस्रा । स्त्रीत्वमतन्त्रम् । तमिस्रम् । शृङ्गादिनच्, शृङ्गिणः । ऊर्जसो वलच् । तेन बाधा मा भूदिति विनिरपि । ऊर्जस्वलः । ऊर्जस्वी। ऊर्जोऽसुगागम इति वृत्तिस्तु चिन्त्या। ऊर्जस्वतीतिवदसुन्नन्तेनैवोपपत्तेः । गोशब्दान्मि-

निः, गोमी । मलशब्दादिनच्, मलिनः । ईमसच, मलीमसः ॥

१९२१-ज्योत्स्ना, तमिस्रा, शृङ्गिण, ऊर्जस्विन्, ऊर्जस्वल, गोमिन्, मलिन और मलीमस यह शब्द मत्वर्थमें निपातनसे सिद्ध हों । ज्योतिष् शब्दकी उपधाका लोप और उसके उत्तर न प्रत्यय हो, जैसे-ज्योत्स्ना । तमस् शब्दकी उपधाके स्थानमें इकार और र प्रत्यय हो, जैसे-तमिस्रा । इस सूत्रमें स्त्रीत्व अतंत्र अर्थात् अविवक्षित है, इस कारण 'तमिस्रम्' ऐसा भी होगा ।

शृङ्ग शब्दके उत्तर इनच् प्रत्यय हो, जैसे-शृङ्गिणः ।

ऊर्ज्जस् शब्दके उत्तर वलच् प्रत्यय हो, इस(वलच्)से बाधा न हो, इसलिये विनि प्रत्ययका भी विधान कियाहै, जैसे-ऊर्ज्जस्वलः, ऊर्ज्जस्वी । ऊर्ज्जस्वती शब्दके समान असुन्नन्तसे ही उपपत्ति होनेके कारण ऊर्ज्ज शब्दको असुक् आगम हो, ऐसी वृत्ति चिन्त्य है ।

गो शब्दके उत्तर मिनि प्रत्यय हो, जैसे-गोमी ।

मल शब्दसे इनच् प्रत्यय हो, जैसे-मलिनः ।

मल शब्दके उत्तर ईमसच् प्रत्यय भी हो, जैसे-मलीमसः ॥

१९२२ अत इनिठनौ । ५ । २ । ११५ ॥

दण्डी । दण्डिकः ॥

१९२२-अकारान्त शब्दके उत्तर इनि और ठन् प्रत्यय हो, जैसे-दण्डी, दंडिकः ॥

१९२३ व्रीह्यादिभ्यश्च । ५ । २ । ११६ ॥

व्रीही । व्रीहिकः । न च सर्वेभ्यो व्रीह्यादिभ्य इनिठनाविष्येते किं तर्हि ॥ शिखामालासंज्ञादिभ्य इनिः ॥ * ॥ यवखदादिभ्य इकः ॥ * ॥ अन्येभ्य उभयम् ॥

१९२३-व्रीह्यादि शब्दोंके उत्तर इनि और ठन् प्रत्यय हो, जैसे-व्रीही, व्रीहिकः । व्रीह्यादि गणके मध्यमें सबके उत्तर इनि और ठन् प्रत्यय नहीं होगा, किन्तु-

शिखा, माला और संज्ञादि (संज्ञा, वडवा, कुमारी, नौ, वीणा, बलाका,) शब्दोंके उत्तर इनि प्रत्यय हो *

यवखदादि शब्दोंके उत्तर इक प्रत्यय हो *

और इससे भिन्न और शब्दोंके उत्तर दोनों प्रत्यय हों ॥

१९२४ तुन्दादिभ्य इलच्च । ५ । २ । ११७ ॥

चादिनिठनौ मतुप् च । तुन्दिलः । तुन्दी । तुन्दिकः । तुन्दवान् । उदर, पिचण्ड, यव, व्रीहि ॥ स्वाङ्गाद्विवृद्धौ ॥ ॥ " विवृद्ध्युपाधिकात्स्वाङ्गवाचिन इलजादयः स्युः " । विवृद्धौ कर्णौ यस्य स कर्णिलः । कर्णी । कर्णिकः । कर्णवान् ॥

१९२४-तुन्दादि शब्दोंके उत्तर इलच् प्रत्यय हो और चकारसे इनि, ठन् और मतुप् प्रत्यय हों, जैसे-तुन्दिलः, तुन्दी, तुन्दिकः, तुन्दवान् । उदर, पिचंड, यव, व्रीहि, इतने तुन्दादि हैं ।

विवृद्धिउपाधिक स्वाङ्गवाचक शब्दोंके उत्तर इलच् आदि प्रत्यय हों, जैसे-विवृद्धौ कर्णौ यस्य सः=कर्णिलः, कर्णी, कर्णिकः, कर्णवान् ॥

१९२५ एकगोपूर्वाट्ठञ् नित्यम् । ५ । २ । ११८ ॥

एकशतमस्यास्तीति ऐकशतिकः । ऐकसहस्रिकः । गौशतिकः । गौसहस्रिकः ॥

१९२५-एक शब्द और गो शब्द पूर्वमें रहते शतादि शब्दके उत्तर नित्य ठञ् प्रत्यय हो, जैसे-एकशतमस्य अस्ति, इस विग्रहमें ऐकशतिकः । ऐकसहस्रिकः । गौशतिकः । गौसहस्रिकः ।

१९२६ शतसहस्रान्ताच्च निष्कात् । ५ । २ । ११९ ॥

निष्कात्परौ यौ शतसहस्रशब्दौ तदन्तात्प्रातिपदिकाट्ठञ् स्यान्मत्वर्थे । नैष्कशतिकः । नैष्कसहस्रिकः ॥

१९२६-निष्क शब्दके परे स्थित शत और सहस्र शब्दान्त प्रातिपदिकके उत्तर मत्वर्थमें ठञ् प्रत्यय हो, जैसे-नैष्कशतिकः । नैष्कसहस्रिकः ॥

१९२७ रूपादाहतप्रशंसयोर्यप् । ५ । २ । १२० ॥

आहतं रूपमस्यास्तीति रूप्यः कार्षापणः । प्रशस्तं रूपमस्यास्तीति रूप्यो गौः । आहतेति किम् । रूपवान् ॥ अन्येभ्योऽपि दृश्यते ॥ * ॥ हिम्याः पर्वताः । गुण्या ब्राह्मणाः ॥

१९२७-आहत और प्रशस्त अर्थमें रूप शब्दके उत्तर यप् प्रत्यय हो, जैसे-आहतं रूपमस्यास्ति, इस वाक्यमें रूप्यः कार्षापणः । प्रशस्तं रूपमस्यास्ति, इस विग्रहमें रूप्यो गौः ।

आहत अर्थ न होनेपर 'रूपवान्' ऐसा होगा ।

और शब्दोंके उत्तर भी देखा जाताहै * जैसे-हिम्याः पर्वताः । गुण्याः ब्राह्मणाः ॥

१९२८ अस्मायामेधास्रजो विनिः । ५ । २ । १२१ ॥

यशस्वी । यशस्वान् । मायावी । व्रीह्यादिपाठादिनिठनौ । मायी । मायिकः । किन्नन्तत्वात्कुः । स्रग्वी ॥ आमयस्योपसंख्यानं दीर्घश्च ॥ * ॥ आमयावी ॥ शृङ्गवृन्दाभ्यामारकन् ॥ शृङ्गारकः । वृन्दारकः । फलबर्हाभ्यामिनच् ॥ * ॥ फलिनः । बर्हिणः ॥

हृदयाच्चालुरन्यतरस्याम् ॥ * ॥ इनठनौ मतुप् च । हृदयालुः । हृदयी । हृदयिकः । हृदयवान् । शीतोष्णतृप्रेभ्यस्तदसहने ॥ * ॥ शीतं न सहते शीतालुः । उष्णालुः । स्फायितंचीति रक्,तृप्रः पुरोडाशः, तं न सहते तृप्रालुः । तृप्रं दुःखमिति माधवः ॥ हिमाच्चेलुः ॥ * ॥ हिमं न सहते हिमेलुः ॥ बलादूलः ॥ * ॥ बलं न सहते बलूलः । वातात्समूहे च ॥ * ॥ वातं न सहते वातस्य समूहो वा वातूलः ॥ तप्पर्वमरुद्भ्याम् ॥ * ॥ पर्वतः। मरुत्तः ॥

१९२८–असभागान्त शब्द और माया, मेधा और स्रज् शब्दके उत्तर विनि प्रत्यय हो, जैसे–यशस्वी, यशस्वान् । मायावी । व्रीह्यादिमध्यमें पाठके कारण इनि और ठन् प्रत्यय भी होगा, जैसे–मायी, मायिकः । क्विन्नन्तत्वके कारण चवर्गके स्थानमें कवर्ग हुआ, जैसे–स्रग्वी ।

आमय शब्दके उत्तर उक्त प्रत्ययका उपसंख्यान और दीर्घ हो * जैसे–आमयावी ।

शृङ्ग और वृन्द शब्दके उत्तर आरकन् प्रत्यय हो * जैसे–शृङ्गारकः । वृन्दारकः ।

फल और बर्ह शब्दके उत्तर इनच् प्रत्यय हो * जैसे–फलिनः । बर्हिणः ।

हृदय शब्दके उत्तर विकल्प करके आलु और चकारसे मतुप् प्रत्यय हो * विकल्प पक्षमें इनि और ठन् होगा, जैसे–हृदयालुः, हृदयी, हृदयिकः, हृदयवान् ।

असहन अर्थमें शीत,उष्ण और तृप्र शब्दके उत्तर आलु प्रत्यय हो * जैसे–शीतं न सहते=शीतालुः। उष्णालुः । "स्फायीतञ्चि०" इस सूत्रसे तृप्र शब्द सिद्ध हुआ। तृप्र शब्दसे पुरोडाश जानना, तृप्रं न सहते, इस वाक्यमें तृप्रालुः । माधवके मतमें तृप्र शब्दसे दुःख जानना ।

हिम शब्दके उत्तर एलु प्रत्यय हो * जैसे–हिमं न सहते हिमेलुः ।

बल शब्दके उत्तर समूहार्थमें भी ऊल प्रत्यय हो * जैसे–बलं न सहते=बलूलः ।

वात शब्दके उत्तर समूहार्थमें तथा चकारसे असहन अर्थमें ऊल प्रत्यय हो * जैसे–वातं न सहते,=वातस्य समूहो वा=वातूलः ।

पर्व और मरुत् शब्दके उत्तर तप् प्रत्यय हो * जैसे–पर्वतः । मरुत्तः ॥

१९२९ ऊर्णाया युस् । ५ । २ । १२३ ॥

सित्त्वात्पदत्वम् । ऊर्णायुः । अत्र छन्दसीति केचिदनुवर्तयन्ति । युक्तं चैतत् । अन्यथा हि, अहंशुभमोर्युस्इत्यत्रैवोर्णाग्रहणं कुर्यात् ॥

१९२९–ऊर्णा शब्दके उत्तर युस् प्रत्यय हो, जिसके उत्तर सकारइत् प्रत्यय हो, उसकी पद संज्ञा होतीहै । ऊर्णायुः इस स्थलमें कोई कोई " बहुलं छन्दसि " इस सूत्रसे ' छन्दसि ' इस पदकी अनुवृत्ति करतेहैं यह ठीक है, कारण कि,यह न होनेपर पृथक् सूत्र नहीं करनेसे तथा युस्ग्रहण नहीं करनेसे महालाघवके कारण १९४६ (' अहम् ' और 'शुभ' शब्दके उत्तर युस् प्रत्यय हो) इस वक्ष्यमाण सूत्रमें ही ऊर्णा शब्दका ग्रहण करते ॥

१९३० वाचो ग्मिनिः । ५ । २ । १२४ ॥

वाग्मी ॥

१९३०–वाच् शब्दके उत्तर ग्मिनि प्रत्यय हो, जैसे–वाग्मी ॥

१९३१ आलजाटचौ बहुभाषिणि । ५ । २ । १२५ ॥

कुत्सित इति वक्तव्यम् ॥ * ॥ कुत्सितं बहु भाषते वाचालः । वाचाटः। यस्तु सम्यग्बहु भाषते स वाग्मीत्येव ॥

१९३१–बहुभाषी अर्थ होनेपर वाच् शब्दके उत्तर आलच् और आटच् प्रत्यय हो ।

कुत्सित अर्थ होनेपर उक्त प्रत्यय हों,ऐसा कहना चाहिये* जैसे–कुत्सितं बहु भाषते, इस अर्थमें वाचालः । वाचाटः । अच्छी तरह बहुत बोलनेवाले मनुष्यको ' वाग्मी ' कहतेहैं ॥

१९३२ स्वामिन्नैश्वर्ये । ५ । २ । १२६ ॥

ऐश्वर्यवाचकात्स्वशब्दान्मत्वर्थे आमिनच् । स्वामी ॥

१९३२–ऐश्वर्यवाचक स्व शब्दके उत्तर मत्वर्थमें आमिनच् प्रत्यय हो, जैसे–स्वामी ॥

१९३३ अर्शआदिभ्योऽच् । ५ । २ । १२७ ॥

अर्शांस्यस्य विद्यन्ते अर्शसः। आकृतिगणोऽयम् ॥

१९३३–अर्शआदि शब्दके उत्तर मत्वर्थमें अच् प्रत्यय हो, जैसे–अर्शांस्यस्य विद्यन्ते,इस वाक्यमें अर्शसः । अर्शआदि आकृतिगण है ॥

१९३४ द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः । ५ । २ । १२८ ॥

द्वन्द्वः–कटकवलयिनी । शङ्खनूपुरिणी । उपतापो रोगः–कुष्ठी । किलासी। गर्ह्यं निन्द्यम्–ककुदावर्ती । काकतालुकी । प्राणिस्थात्किम् । पुष्पफलवान् घटः ॥ प्राण्यङ्गान्न ॥ * ॥ पाणिपादवती । अत इत्येव । चित्रकललाटिकावती । सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थम् ॥

१९३४–प्राणिस्थ अर्थात् प्राणीमें है, ऐसे अर्थमें द्वन्द्व समासनिष्पन्न शब्द, उपतापवाचक शब्द और गर्ह्य अर्थात् निन्द्यवाचक शब्दके उत्तर मत्वर्थमें इनि प्रत्यय हो ।

द्वन्द्व जैसे–कटकवलयिनी । शंखनूपुरिणी ।

उपताप शब्दसे रोग जानना, जैसे–कुष्ठी । किलासी ।

गर्ह्य शब्दसे निन्द्य जानना, जैसे-ककुदावर्ती । काकतालुकी ।

प्राणिस्थ न होनेपर जैसे--पुष्पफलवान् घटः ।

प्राण्यङ्गवाचकके उत्तर नहीं हो * जैसे--पाणिपादवती ।

आकारके उत्तर नहीं होगा, जैसे--चित्रकललाटिकावती ।

प्रत्ययके सिद्ध होनेपर पुनः कथन ठनादि प्रत्ययके बाधनार्थ है ॥

१९३५ वातातीसाराभ्यां कुक् च । ५ । २ । १२९ ॥

चादिनिः । वातकी । अतीसारकी ॥ रोगे चायमिष्यते ॥ * ॥ नेह । वातवती गुहा । पिशाचाच्च ॥ * ॥ पिशाचकी ॥

१९३५-वात और अतीसार शब्दके उत्तर कुक् और इनि प्रत्यय हो, जैसे--वातकी । अतीसारकी ।

रोगार्थमें ही उक्त कार्य्य हों * इससे रोग न होनेपर वातवती, अर्थात् 'गुफा' इस स्थलमें कुक्आदि प्रत्यय नहीं हुआ ।

पिशाच शब्दके उत्तर कुक्आदि प्रत्यय हो, जैसे-- पिशाचकी ॥

१९३६ वयसि पूरणात् ।५।२। १३० ॥

पूरणप्रत्ययान्तान्मत्वर्थे इनिः स्याद्वयसि द्योत्ये । मासः संवत्सरो वा पञ्चमोऽस्यास्तीति पञ्चमी उष्ट्रः । ठन्बाधनार्थमिदम् । वयसि किम् । पञ्चमवान् ग्रामः ॥

१९३६-वयःक्रम होनेपर पूरणप्रत्ययान्त शब्दके उत्तर मत्वर्थमें इनि प्रत्यय हो, जैसे-मासः, संवत्सरो वा, पञ्चमोऽस्यास्तीति=पञ्चमी उष्ट्रः । यह सूत्र ठन् प्रत्ययके बाधनार्थ है ।

वयस् न होनेपर जैसे-पञ्चमवान् ग्रामः ॥

१९३७ सुखादिभ्यश्च ।५। २ । १३१ ॥

इनिर्मत्वर्थे । सुखी । दुःखी॥माला क्षेपे ॥ ॥ माली ॥

१९३७-सुखादि शब्दके उत्तर मत्वर्थमें इनि प्रत्यय हो, जैसे-सुखी । दुःखी ।

माला शब्दके उत्तर क्षेप अर्थमें इनि प्रत्यय हो, जैसे-माली ॥

१९३८ धर्मशीलवर्णान्ताच्च।५।२।१३२॥

धर्माद्यन्तादिनिर्मत्वर्थे । ब्राह्मणधर्मी । ब्राह्मणशीली । ब्राह्मणवर्णी ॥

१९३८-धर्म, शील और वर्णान्त शब्दके उत्तर इनि प्रत्यय हो,जैसे-ब्राह्मणधर्मी । ब्राह्मणशीली । ब्राह्मणवर्णी॥

१९३९ हस्ताज्जातौ । ५ । २ । १३३ ॥

हस्ती । जातौ किम् । हस्तवान्पुरुषः ॥

१९३९-जाति अर्थमें हस्त शब्दके उत्तर इनि प्रत्यय हो, जैसे-हस्ती । जाति न होनेपर हस्तवान् पुरुषः ॥

१९४० वर्णाद्ब्रह्मचारिणि ।५।२।१३४॥

वर्णी ॥

१९४०-ब्रह्मचारी अर्थ होनेपर वर्ण शब्दके उत्तर इनि प्रत्यय हो, जैसे-वर्णी ॥

१९४१ पुष्करादिभ्यो देशे।५।२।१३५॥

पुष्करिणी । पद्मिनी । देशे किम् । पुष्करवान् करी ॥ बाहूरुपूर्वपदाद्बलात् ॥ ॥ बाहुबली । ऊरुबली ॥ सर्वादेश्च ॥ ॥ सर्वधनी । सर्वबीजी ॥ अर्थाच्चासन्निहिते ॥ ॥ अर्थी । सन्निहिते तु अर्थवान् ॥ तदन्ताच्च ॥ ॥ धान्यार्थी । हिरण्यार्थी ॥

१९४१-देश होनेपर पुष्करादिके उत्तर इनि प्रत्यय हो, जैसे-पुष्करिणी । पद्मिनी । देश न होनेपर पुष्करवान् करी ।

बाहु और ऊरु शब्द पूर्वमें रहते उसके परवर्ती बल शब्दके उत्तर इनि प्रत्यय हो * जैसे-बाहुबली । ऊरुबली ।

सर्व शब्द पूर्वमें रहते इनि प्रत्यय हो * जैसे-सर्वधनी । सर्वबीजी ।

असन्निहितार्थमें अर्थ शब्दके उत्तर इनि प्रत्यय हो, जैसे-अर्थी । सन्निहितार्थमें 'अर्थवान्' ऐसा पद होगा ।

अर्थ शब्द अन्तमें रहते उसके उत्तर इनि प्रत्यय हो, जैसे-धान्यार्थी । हिरण्यार्थी ॥

१९४२ बलादिभ्यो मतुबन्यतरस्याम् । ५ । २ । १३६ ॥

बलवान् । बली । उत्साहवान् । उत्साही ॥

१९४२-बलादि शब्दके उत्तर विकल्प करके मतुप प्रत्यय हो, जैसे-बलवान्, बली । उत्साहवान्, उत्साही ॥

१९४३ संज्ञायां मन्माभ्याम्।५।२।१३७॥

मन्नन्तान्मान्ताच्चेनिर्मत्वर्थे । प्रथिमिनी । दामिनी । होमिनी । सोमिनी । संज्ञायां किम् । सोमवान् ॥

१९४३-मन्भागान्त शब्द और मान्त शब्दके उत्तर मत्वर्थमें इनि प्रत्यय हो, जैसे-प्रथिमिनी । दामिनी । होमिनी । सोमिनी । संज्ञा न होनेपर 'सोमवान्' होगा ॥

१९४४ कंशंभ्यां बभयुस्तितुतयसः । ५ । २ । १३८ ॥

कं शमिति मान्तौ, कमित्युदकसुखयोः, शमिति सुखे । आभ्यां सप्त प्रत्ययाः स्युः । युसूयसोः सकारः पदत्वार्थः । कंवः । कंभः।कंयुः । कंतिः । कंतुः । कंतः । कंयः । शंवः । शंभः ।

शंयुः। शंतिः। शंतुः। शंतः। शंयः। अनुस्वारस्य वैकल्पिकः परसवर्णः। वकारयकारपरस्यानुनासिकौ वयौ ॥

१९४४-कम् और शम् शब्दके उत्तर ब, भ, युस्, ति, तु, त, यस्, यह सात प्रत्यय हों। कम् और शम्, यह दो पद मकारान्त हैं। कम् शब्दसे जल और शम् शब्दसे सुख जानना। युस् और यस् प्रत्ययके सकार पदत्वके कारण हैं। कँवः, कम्भः, कँयुः, कन्तिः, कन्तुः, कन्तः, कँयः। शँबः, शम्भः, शँयुः, शन्तिः, शन्तुः, शन्तः, शँयः। अनुस्वारको वैकल्पिक परसवर्ण होगा, वकार और यकार परे रहते व और य अनुनासिक होगा ॥

१९४५ तुन्दिबलिवटेर्भः। ५।२।१३९॥

वृद्धा नाभिस्तुन्दिः। मूर्धन्योपधोयमिति माधवः। तुन्दिभः। बलिभः। वटिभः। पामादित्वाद् बलिनोपि ॥

१९४५-तुन्दि, बलि और वटि शब्दके उत्तर भ प्रत्यय हो, वृद्ध नाभिको तुन्दि कहतेहैं, माधवके मतमें यह पद मूर्द्धन्योपध है, जैसे-तुन्दिभः। बलिभः। वटिभः। पामादित्वके कारण 'बलिनः' ऐसा पद भी होगा ॥

१९४६ अहंशुभमोर्युस्। ५।२।१४०॥

अहमिति मान्तमव्ययमहंकारे। शुभमिति शुभे। अहंयुः अहंकारवान्। शुभंयुः शुभान्वितः॥

॥ इति मत्वर्थीयाः ॥

१९४६-'अहम्' और 'शुभम्' के उत्तर युस् प्रत्यय हो, 'अहम्' शब्द मकारान्त अहङ्कारबोधक अव्यय है, 'शुभम्' शब्दसे शुभ जानना, जैसे-अहंयुः अहंकारवान्। शुभंयुः शुभान्वितः ॥

॥ इति मत्वर्थीयप्रकरणम् ॥

अथ प्राग्दिशीयप्रकरणम्।

१९४७ प्राग्दिशो विभक्तिः। ५।३।१॥

दिक्छब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः। अथ स्वार्थिकाः प्रत्ययाः। समर्थानामिति प्रथमादिति च निवृत्तम्। वेति त्वनुवर्तत एव ॥

१९४७-"दिक्छब्देभ्यः० १९७४" इस वक्ष्यमाण सूत्रके पूर्वपर्यन्त वक्ष्यमाणप्रत्ययसमूहोंकी विभक्ति संज्ञा हो। अब स्वार्थिक प्रत्यय कहतेहैं ॥

"समर्थानां प्रथमाद्वा" इस पूर्वोक्त सूत्रका अधिकार निवृत्त हुआ, परन्तु वा शब्दकी अनुवृत्ति तो चलेगी ॥

१९४८ किंसर्वनामबहुभ्योऽद्व्यादिभ्यः। ५। ३। २॥

किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रियते ॥

१९४८-'द्विआदि भिन्न किम् शब्द, सर्वनाम शब्द और बहु शब्दके उत्तर "प्राग्दिशः०" इस सूत्रतक अधिकार चलेगा ॥

१९४९ इदम इश्। ५। ३। ३॥

प्राग्दिशीये परे ॥

१९४९-प्राग्दिशीय प्रत्यय परे रहते इदम् शब्दके स्थानमें इश् आदेश हो ॥

१९५० एतेतौ रथोः। ५। ३। ४॥

इदम्शब्दस्य एत इत इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे। इशोपवादः ॥

१९५०-रेफादि और थकारादि प्राग्दिशीय प्रत्यय परे रहते इदम् शब्दके स्थानमें स्वार्थमें एत और इत आदेश हो। इस सूत्रमें एत और इत आदेश ईश् आदेशके विशेषक हैं ॥

१९५१ एतदोऽन्। ५। ३। ५॥

योगविभागः कर्तव्यः। एतदः एतेतौ स्तो रथोः। अन् एतद इत्येव। अनेकाल्त्वात्सर्वादेशः। न लोपः प्रातिपदिकान्तस्य ॥

१९५१-इस स्थलमें योगविभाग कर्तव्य हैं अर्थात् रेफादि और थकारादि प्राग्दिशीय प्रत्यय परे रहते एतद् शब्दके स्थानमें एत् और इत आदेश हो, यह "एतदः" इसका अर्थ करना। एतद् शब्दको अन् आदेश हो यह द्वितीय योग (अन्) का अर्थ करना। अनेकाल्त्वके कारण सर्वादेश होगा। प्रातिपदिकके अन्तस्थित (२३६) नकारका लोप होगा ॥

१९५२ सर्वस्य सोऽन्यतरस्यां दि। ५। ३। ६॥

प्राग्दिशीये दकारादौ प्रत्यये परे सर्वस्य सो वा स्यात् ॥

१९५२-दकारादि प्राग्दिशीय प्रत्यय परे रहते सर्व शब्दके स्थानमें विकल्प करके स आदेश हो ॥

१९५३ पञ्चम्यास्तसिल्। ५। ३। ७॥

पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल् स्याद्वा ॥

१९५३-पञ्चमीविभक्त्यन्त किमादि शब्दोंके उत्तर स्वार्थमें विकल्पसे तसिल् प्रत्यय हो ॥

१९५४ कु तिहोः। ७। २। १०४॥

किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः। कुतः। कस्मात्। यतः। ततः। अतः। इतः। अमुतः। बहुतः। द्व्यादेस्तु द्वाभ्याम् ॥

१९५४-तकारादि और हकारादि प्राग्दिशीय तद्धित प्रत्यय परे रहते किम् शब्दके स्थानमें कु आदेश हो, जैसे-कुतः। कस्मात्। यतः। ततः। अतः। इतः। अमुतः। बहुतः। द्विआदि होनेपर द्वाभ्याम् ॥

१९५५ तसेश्च । ५ । ३ । ८ ॥

किंसर्वनामबहुभ्यः परस्य तसेस्तसिलादेशः स्यात् । स्वरार्थं विभक्त्यर्थं च वचनम् ॥

१९५५-किम् शब्द, सर्वनाम शब्द और बहु शब्दके उत्तर तसिके स्थानमें तसिल् आदेश हो । यह सूत्र स्वरार्थ और विभक्त्यर्थ है ॥

१९५६ पर्यभिभ्यां च । ५ । ३ । ९ ॥

आभ्यां तसिल् स्यात्।सर्वोभयार्थाभ्यामेव॥*॥ परितः । सर्वत इत्यर्थः।अभितः उभयत इत्यर्थः॥

१९५६-परि और अभि शब्दके उत्तर स्वार्थमें तसिल् प्रत्यय हो ।

सर्वार्थ तथा उभयार्थमें ही यथाक्रम उक्त दोनों शब्दोंसे प्रत्यय हो* जैसे-परितः, सर्वत इत्यर्थः।अभितः, उभयत इत्यर्थः ॥

१९५७ सप्तम्यास्त्रल् । ५ । ३ । १० ॥

कुत्र । यत्र । तत्र । बहुत्र ॥

१९५७-सप्तमीविभक्त्यन्त किमादि शब्दोंके उत्तर स्वार्थमें त्रल् प्रत्यय हो, जैसे-कस्मिन्निति=कुत्र । यत्र । तत्र । बहुत्र ॥

१९५८ इदमो हः । ५ । ३ । ११ ॥

त्रलोपवादः । इशादेशः । इह ॥

१९५८-इदम् शब्दके उत्तर स्वार्थमें ह प्रत्यय हो, यह ह प्रत्यय त्रल् प्रत्ययका अपवाद है, १९४९ सूत्रसे इदम् शब्दके स्थानमें इश् आदेश हुआ, जैसे-अस्मिन्निति=इह ॥

१९५९ किमोऽत् । ५ । ३ । १२ ॥

वाग्रहणमपकृष्यते । सप्तम्यन्तात्किमोऽद्वा स्यात्पक्षे त्रल् ॥

१९५९-इस सूत्रमें वा शब्दकी अनुवृत्ति होतीहै, सप्तम्यन्त किम् शब्दके उत्तर विकल्प करके स्वार्थमें अत् प्रत्यय हो । विकल्प पक्षमें त्रल् प्रत्यय होगा ॥

१९६० क्वाति । ७ । २ । १०५ ॥

किमः क्वादेशः स्यादति । क्व । कुत्र ॥

१९६०-अत् प्रत्यय परे रहते किम् शब्दके स्थानमें क्व आदेश हो, जैसे-कस्मिन्निति=क्व, कुत्र ॥

१९६१ वाह च च्छन्दसि ।५।३।१३ ॥

कुहस्थः । कुह जग्मथुः ॥

१९६१-वेदमें किम् शब्दके उत्तर विकल्प करके स्वार्थमें ह प्रत्यय हो, जैसे-कुहस्थः । कुह जग्मथुः ॥

१९६२ एतदस्त्रतसोस्त्रतसौ चानुदात्तौ । २ । ४ । ३३ ॥

अन्वादेशविषये एतदोऽश् स्यात्स चानुदात्तस्त्रतसोः परतः, तौ चानुदात्तौ स्तः । एतस्मिन् ग्रामे सुखं वसामः, अथात्राधीमहे, अतो न गन्तास्मः ॥

१९६२-त्रल् और तस् प्रत्यय परे रहते अन्वादेशविषयमें एतद् शब्दके स्थानमें अश् आदेश हो, यह अश्, त्र और तस् परे अनुदात्त हो, जैसे-एतस्मिन् ग्रामे सुखं वसामः, अथात्राधीमहे, अतो न गन्तास्मः ॥

१९६३ इतराभ्योऽपि दृश्यन्ते । ५ । ३ । १४ ॥

पञ्चमीसप्तमीतरविभक्त्यन्तादपि तसिलादयो दृश्यन्ते । दृशिग्रहणाद्भवदादियोग एव । स भवान् । ततो भवान् । तत्र भवान् । तं भवन्तम् । ततो भवन्तम् । तत्र भवन्तम् । एवं दीर्घायुः । देवानां प्रियः । आयुष्मान् ॥

१९६३-पञ्चमी और सप्तमीविभक्त्यन्तसे अन्यविभक्त्यन्तके उत्तर भी तसिलादि प्रत्यय हों ।

दृशिका ग्रहण करनेके कारण भवत् आदिके योगमें ही उक्त प्रत्यय होगा,

जैसे-स भवान्=ततो भवान्, तत्र भवान् । तं भवन्तम्= ततो भवन्तम्, तत्र भवन्तम् । भवदादि जैसे-भवत्, दीर्घायुः, देवानांप्रियः, आयुष्मान् ॥

१९६४ सर्वैकान्यकिंयत्तदः काले दा । ५ । ३ । १५ ॥

सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात् । सर्वस्मिन् काले सदा । सर्वदा । एकदा । अन्यदा । कदा । यदा । तदा । काले किम् । सर्वत्र देशे ॥

१९६४-सप्तम्यन्त कालवाचक सर्व, एक, अन्य, किम्, यत् और तत् शब्दके उत्तर स्वार्थमें दा प्रत्यय हो, जैसे-सर्वस्मिन् काले सदा, सर्वदा । एकदा । अन्यदा । कदा । तदा ।

कालवाचक न होनेपर अर्थात् देशवाचक होनेपर दा प्रत्यय न होकर त्रल् प्रत्यय होगा, जैसे-सर्वस्मिन् देशे= सर्वत्र-इत्यादि ॥

१९६५ इदमो र्हिल् । ५ । ३ । १६ ॥

सप्तम्यन्तात्काले इत्येव । हस्यापवादः । अस्मिन् काले एतर्हि । काले किम् । इह देशे ॥

१९६५-सप्तम्यन्त कालवाचक इदम् शब्दके उत्तर र्हिल् प्रत्यय हो, यह र्हिल् प्रत्यय, ह प्रत्ययका विशेषक है, जैसे-एतस्मिन् काले=एतर्हि ।

कालवाचक न होकर देशवाचक होनेपर ह प्रत्यय होगा, जैसे-अस्मिन् देशे=इह ॥

१९६६ अधुना । ५ । ३ । १७ ॥

इदमः सप्तम्यन्तात्कालवाचिनः । स्वार्थेऽधुना प्रत्ययः स्यात् । इश् । यस्येति लोपः । अधुना॥

१९६६-सप्तम्यन्त कालवाचक इदम् शब्दके उत्तर स्वार्थमें अधुना प्रत्यय हो, जैसे-अस्मिन् काले=अधुना । इश् आदेश होनेपर यस्येति (३११) से इकारका लोप हुआ ॥

१९६७ दानीं च।५।३।१८॥

इदानीम् ॥

१९६७–सप्तम्यन्त कालवाचक इदम् शब्दके उत्तर स्वार्थमें दानीम् प्रत्यय हो, जैसे–अस्मिन्काले=इदानीम् ॥

१९६८ तदो दा च।५।३।१९॥

तदा। तदानीम्। तदो दावचनमनर्थकं विहितत्वात् ॥

१९६८–सप्तम्यन्त कालवाचक तद् शब्दके उत्तर स्वार्थमें दा और दानीम् प्रत्यय हो, यथा–तस्मिन्काले=तदा, तदानीम्। इस सूत्रसे दा प्रत्ययका विधान करना निरर्थक है,क्योंकि पहले सूत्र (१९६४) से ही दा प्रत्यय सिद्ध है ॥

१९६९ अनद्यतने र्हिलन्यतरस्याम्। ५।३।२१॥

कर्हि। कदा। यर्हि। यदा। तर्हि। तदा। एतस्मिन् काले एतर्हि ॥

१९६९–अनद्यतनमें सप्तम्यन्त किमादि शब्दों (किम्, यत्, तत्)के उत्तर विकल्प करके स्वार्थमें र्हिल् प्रत्यय हो, जैसे–कस्मिन्काले कर्हि, कदा। यर्हि, यदा। तर्हि, तदा। एतस्मिन् काले=एतर्हि ॥

१९७० सद्यः परुत्परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः।५।३।२२॥

एते निपात्यन्ते ॥ समानस्य सभावो द्यस् चाहनि ॥ * ॥ समानेऽहनि सद्यः ॥ पूर्वपूर्वतरयोः पर उदारी च संवत्सरे ॥ * ॥ पूर्वस्मिन्वत्सरे परुत्। पूर्वतरे वत्सरे परारि ॥ इदम इश् समसण् प्रत्ययश्च संवत्सरे॥ *।अस्मिन्संवत्सरे ऐषमः।परस्मादेद्यव्यहनि॥*॥ परस्मिन्नहनि परेद्यवि॥ इदमोऽश् द्यश्च ॥*॥ अस्मिन्नहनि अद्य॥ पूर्वादिभ्योऽष्टभ्योऽहन्येद्युस् ॥ पूर्वस्मिन्नहनि पूर्वेद्युः। अन्यस्मिन्नहनि अन्येद्युः। उभयोरह्नोरुभयेद्युः ॥ द्युश्चोभयाद्वक्तव्यः ॥ * ॥ उभयद्युः॥

१९७०–कालार्थमें सद्यः आदि पद निपातनसे सिद्ध हो।

'समानेऽहनि' इस अर्थमें समान शब्दके स्थानमें स आदेश और द्यस् प्रत्यय हो * जैसे समाने अहनि=सद्यः।

संवत्सरार्थमें पूर्व और पूर्वतर शब्दको पर आदेश और उनके उत्तर उत् और आरि प्रत्यय हो * जैसे–पूर्वस्मिन् संवत्सरे=परुत्। पूर्वतरे वत्सरे=परारि।

संवत्सरार्थमें सप्तम्यन्त इदम् शब्दके स्थानमें इश् आदेश और समसण् प्रत्यय हो * जैसे–अस्मिन् संवत्सरे=ऐषमः।

सप्तम्यन्त पर शब्दके उत्तर अहन् अर्थमें एद्यवि प्रत्यय हो * जैसे–परस्मिन् अहनि=परेद्यवि।

दिन होनेपर सप्तम्यन्त इदम् शब्दके स्थानमें अश् और द्य प्रत्यय हो * जैसे–अस्मिन् अहनि=अद्य।

'अहनि' अर्थमें पूर्वादि शब्दोंके उत्तर एद्युस् प्रत्यय हो * जैसे--पूर्वस्मिन् अहनि=पूर्वेद्युः। अन्यस्मिन् अहनि=अन्येद्युः। उभयोरह्नोः=उभयेद्युः। उभय शब्दके उत्तर द्युस् प्रत्यय भी हो, जैसे--उभयद्युः ॥

१९७१ प्रकारवचने थाल्।५।३।२३॥

प्रकारवृत्तिभ्यः किमादिभ्यस्थाल् स्यात्स्वार्थे। तेन प्रकारेण तथा। यथा ॥

१९७१--प्रकारवृत्तिवाचक किम् आदि शब्दोंके उत्तर स्वार्थमें थाल् प्रत्यय हो, जैसे--तेन प्रकारेण=तथा। येन प्रकारेण=यथा ॥

१९७२ इदमस्थमुः।५।३।२४॥

थालोऽपवादः ॥ एतदो वाच्यः ॥*॥ अनेन एतेन वा प्रकारेण इत्थम् ॥

॥ इति प्राग्दिशीयानां विभक्तिसंज्ञानां पूर्णोवधिः ॥

१९७२--इदम् शब्दके उत्तर प्रकारार्थमें थमु प्रत्यय हो, यह थमु प्रत्यय थाल् प्रत्ययका अपवाद है।

एतद् शब्दके उत्तर भी थमु प्रत्यय हो * जैसे–अनेन, एतेन वा प्रकारेण=इत्थम् ॥

१९७३ किमश्च।५।३।२५॥

केन प्रकारेण कथम् ॥

१९७३–किम् शब्दके उत्तर प्रकारार्थमें थमु प्रत्यय हो, जैसे–केन प्रकारेण=कथम् ॥

॥ इति प्राग्दिशीयप्रकरणम् ॥

अथ प्रागिवीयप्रकरणम्।

१९७४ दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः। ५।३।२७॥

सप्तम्याद्यन्तेभ्यो दिशि रूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थेऽस्तातिप्रत्ययः स्यात् ॥

१९७४–सप्तमी, पञ्चमी और प्रथमा विभक्त्यन्त दिक् अर्थमें रूढ इसी प्रकार दिक्, देश और कालवाचक शब्दके उत्तर स्वार्थमें अस्ताति प्रत्यय हो ॥

१९७५ पूर्वाधरावराणामसि पुरधवश्चैषाम्।५।३।३९॥

एभ्योऽस्तात्यर्थेऽसिप्रत्ययः स्यात्तद्योगे चैषां क्रमात्पुर्, अध्, अव्, इत्यादेशाः स्युः ॥

१९७५–पूर्व, अधर और अवर शब्दके उत्तर अस्तातिके अर्थमें असि प्रत्यय हो और उसके योगमें यथाक्रम पूर्व

शब्दके स्थानमें पुर्, अधर शब्दके स्थानमें अध् और अवर शब्दके स्थानमें अव् आदेश हो ॥

१९७६ अस्ताति च । ५ । ३ । ४० ॥

अस्तातौ परे पूर्वादीनां पुरादयः स्युः । पूर्वस्यां पूर्वस्याः पूर्वा वा दिक्, पुरः । पुरस्तात् । अधः । अधस्तात् । अवः । अवस्तात् ॥

१९७६-अस्ताति प्रत्यय परे रहते पूर्वादि शब्दके स्थानमें पुर्, अध् और अव् आदेश हो, जैसे-पूर्वस्यां पूर्वस्याः पूर्वा वा दिक्, इस विग्रहमें पुरः, पुरस्तात् । अधः, अधस्तात् । अवः, अवस्तात् ॥

१९७७ विभाषाऽवरस्य ।५। ३ । ४१ ॥

अवरस्यास्तातौ परेऽव् स्याद्वा । अवस्तात् । अवरस्तात् । एवं देशे काले च । दिशि रूढेभ्यः किम् । ऐन्द्र्यां वसति । सप्तम्याद्यन्तेभ्यः किम् । पूर्वं ग्रामं गतः । दिगादिवृत्तिभ्यः किम् । पूर्वस्मिन् गुरौ वसति । अस्ताति चेति ज्ञापकादसिरस्तातिं न बाधते ॥

१९७७-अस्ताति प्रत्यय परे रहते अवर शब्दके स्थानमें विकल्प करके अव् आदेश हो, जैसे-अवस्तात्, अवरस्तात् । देश और कालविषयमें भी ऐसा होगा ।

दिक् अर्थमें रूढ न होनेपर जैसे-ऐन्द्र्यां वसति ।

सप्तमी, पंचमी और प्रथमान्त न होनेपर जैसे-पूर्वं ग्रामं गतः ।

दिक् आदि वाचक न होनेपर जैसे-पूर्वस्मिन् गुरौ वसति । "अस्ताति च" इस ज्ञापकके कारण असि प्रत्यय अस्ताति प्रत्ययको बाधा नहीं देता ॥

१९७८ दक्षिणोत्तराभ्यामतसुच् । ५। ३ । २८ ॥

अस्तातेरपवादः । दक्षिणतः । उत्तरतः ॥

१९७८-दक्षिण और उत्तर शब्दके उत्तर अतसुच् प्रत्यय हो, यह अतसुच् प्रत्यय अस्ताति प्रत्ययका अपवाद है, जैसे-दक्षिणतः । उत्तरतः ॥

१९७९ विभाषा पराऽवराभ्याम् । ५। ३ । २९ ॥

परतः । अवरतः । परस्तात् । अवरस्तात् ॥

१९७९-पर और अवर शब्दके उत्तर विकल्प करके अतसुच् प्रत्यय हो, जैसे-परतः । अवरतः । परस्तात् । अवरस्तात् । इस प्रकार पद होंगे ॥

१९८० अञ्चेर्लुक् । ५ । ३ । ३० ॥

अञ्चत्यन्तादिक्शब्दादस्तातेर्लुक् स्यात् । लुक् तद्धितलुकि । प्राच्यां प्राच्याः प्राची वा दिक् प्राक् । उदक् । एवं देशे काले च ॥

१९८०-अञ्च् धातु अन्तमें है जिसके ऐसे दिग्वाचक शब्दके उत्तर अस्ताति प्रत्ययका लुक् हो, "लुक् तद्धित०" इस सूत्रसे स्त्रीप्रत्ययका लुक् होगा, जैसे-प्राच्यां प्राच्याः प्राची वा दिक्, इस विग्रहमें प्राक्, उदक् । देश और कालवाचकका भी इसी प्रकार जानना ॥

१९८१ उपर्युपरिष्टात् । ५ । ३ । ३१ ॥

अस्तातेर्विषये ऊर्ध्वशब्दस्योपादेशः स्याद्रिल्रिष्टातिलौ च प्रत्ययौ ॥ उपरि उपरिष्टाद्वा वसति आगतो रमणीयं वा ॥

१९८१-अस्ताति विषयमें ऊर्ध्व शब्दके स्थानमें उप आदेश हो और उसके उत्तर रिल् और रिष्टातिल् प्रत्यय भी हों, जैसे-उपरि, उपरिष्टात् वा वसति आगतो रमणीयं वा ॥

१९८२ पश्चात् । ५ । ३ । ३२ ॥

अपरस्य पश्चभावः आतिश्च प्रत्ययोस्तातेर्विषये॥

१९८२-अस्तातिविषयमें अपर शब्दके स्थानमें पश्च आदेश हो और उसके उत्तर आति प्रत्यय हो, यथा-अपरस्यां दिशि वसति=पश्चाद्वसति ॥

१९८३ उत्तराधरदक्षिणादातिः ५।३।३४॥

उत्तरात् । अधरात् । दक्षिणात् ॥

१९८३-अस्तातिविषयमें उत्तर, अधर और दक्षिण शब्दके उत्तर आति प्रत्यय हो, जैसे-उत्तरस्यां दिशि वसति= उत्तरात् । अधरात् । दक्षिणात् ॥

१९८४ एनबन्यतरस्यामदूरेऽपञ्चम्याः । ५ । ३ । ३५ ॥

उत्तरादिभ्य एनब्वा स्यादवध्यवधिमतोः सामीप्ये पञ्चम्यन्तं विना । उत्तरेण । अधरेण । दक्षिणेन । पक्षे यथास्वं प्रत्ययाः । इह केचिदुत्तरादीननुवर्त्य दिक्शब्दमात्रादेनपमाहुः । पूर्वेण ग्रामम् । अपरेण ग्रामम् ॥

१९८४-अवधि और अवधियुक्त वस्तुके सामीप्यमें उत्तरादि शब्दोंके उत्तर विकल्प करके एनप् प्रत्यय हो, परंतु पञ्चम्यन्तके उत्तर न हो, जैसे-उत्तरस्यां दिशि वसति=उत्तरेण वसति । दक्षिणेन । विकल्पपक्षमें यथायोग्य प्रत्यय होंगे। यहां कोई उत्तरादिकी अनुवृत्ति न करके दिक्शब्दमात्रसे एनप् प्रत्ययका विधान करतेहैं, यथा-पूर्वेण ग्रामम् । अपरेण ग्रामम् ॥

१९८५ दक्षिणादाच् । ५ । ३ । ३६ ॥

अस्तातेर्विषये । दक्षिणा वसति । अपञ्चम्या इत्येव । दक्षिणादागतः ॥

१९८५-अस्तातिविषयमें दक्षिण शब्दके उत्तर आच् प्रत्यय हो, जैसे-दक्षिणा वसति । पञ्चम्यन्तके उत्तर न हो, जैसे-दक्षिणात् आगतः, इस स्थलमें नहीं हुआ ॥

१९८६ आहि च दूरे । ५ । ३ । ३७ ॥

दक्षिणाद् दूरे आहिः स्यात् चादाच् । दक्षिणाहि । दक्षिणा ॥

१९८६–दूरार्थमें दक्षिण शब्दके उत्तर आहि और आच् प्रत्यय हो, जैसे–दक्षिणाहि वसति, दक्षिणा वसति ॥

१९८७ उत्तराच्च । ५ । ३ । ३८ ॥

उत्तराहि । उत्तरा ॥

१९८७–दूरार्थमें उत्तर शब्दके उत्तर आहि और आच् प्रत्यय हो, जैसे–उत्तराहि, उत्तरा ॥

१९८८ संख्याया विधार्थे धा।५।३।४२॥

क्रियाप्रकारार्थे वर्तमानात्संख्याशब्दात्स्वार्थे धा स्यात् । चतुर्धा । पञ्चधा ॥

१९८८–क्रियाप्रकारार्थमें वर्तमान संख्यावाचक शब्दके उत्तर स्वार्थमें धा प्रत्यय हो, जैसे–पञ्चधा, चतुर्धा ॥

१९८९ अधिकरणविचाले च।५।३।४३॥

द्रव्यस्य संख्यान्तरापादने संख्याया धा स्यात् । एकं राशिं पञ्चधा कुरु ॥

१९८९–द्रव्यके संख्यान्तरापादन अर्थमें संख्यावाचक शब्दके उत्तर धा प्रत्यय हो, जैसे–एकं राशिं पंचधा कुरु ॥

१९९० एकाद्धो ध्यमुञन्यतरस्याम् । ५ । ३ । ४४ ॥

ऐकध्यम् । एकधा ॥

१९९०–क्रियाप्रकारार्थमें वर्तमान एक शब्दके उत्तर विहित धा प्रत्ययको विकल्प करके ध्यमुञ् आदेश हो, जैसे–ऐकध्यम्, एकधा ॥

१९९१ द्वित्र्योश्च धमुञ् । ५ । ३ ।४५॥

आभ्यां धा इत्यस्य धमुञ् स्याद्वा द्वैधम् । द्विधा । त्रैधम् । त्रिधा ॥ धमुञन्तात्स्वार्थे ड-दर्शनम् ॥ * ॥ पथि द्वैधानि ॥

१९९१–द्वि और त्रि शब्दके उत्तर धा प्रत्ययके स्थानमें विकल्प करके धमुञ् प्रत्यय हो, जैसे–द्वैधम्, द्विधा । त्रैधम्, त्रिधा ।

धमुञ्प्रत्ययान्तके उत्तर स्वार्थमें ड प्रत्यय हो * जैसे–पथि द्वैधानि । त्रैधानि ॥

१९९२ एधाच्च । ५ । ३ । ४६ ॥

द्वेधा । त्रेधा ॥

१९९२–द्वि और त्रि शब्दके उत्तर एधाच् प्रत्यय हो, जैसे–द्वेधा । त्रेधा ॥

१९९३ याप्ये पाशप् । ५ । ३ । ४७ ॥

कुत्सितो भिषक् भिषक्पाशः ॥

१९९३–याप्य अर्थात् कुत्सितार्थमें पाशप् प्रत्यय हो, जैसे–कुत्सितो भिषक्=भिषक्पाशः ॥

१९९४ पूरणाद्भागे तीयादन्।५।३।४८॥

द्वितीयो भागो द्वितीयः। तृतीयः । स्वरे विशेषः ॥ तीयादीकक् स्वार्थे वा वाच्यः ॥ * ॥ द्वैतीयीकः । द्वितीयः । तार्तीयीकः । तृतीयः॥ न विद्यायाः॥*॥ द्वितीया, तृतीया, विद्येत्येव ॥

१९९४–पूरणार्थक तीयप्रत्ययान्त भागवाचक शब्दके उत्तर अन् प्रत्यय हो, जैसे–द्वितीयो भागः=द्वितीयः । तृतीयः । स्वरविषयमें विशेष होगा ।

तीयप्रत्ययान्तके उत्तर विकल्प करके स्वार्थमें ईकक् प्रत्यय हो * जैसे–द्वैतीयीकः, द्वितीयः । तार्तीयीकः, तृतीयः ।

विद्या अर्थमें तीयप्रत्ययान्त शब्दके उत्तर ईकक् प्रत्यय न हो * जैसे–द्वितीया, तृतीया वा विद्या ॥

१९९५ प्रागेकादशभ्योऽच्छन्दसि । ५ । ३ । ४९ ॥

पूरणप्रत्ययान्ताद्भागेऽन् । चतुर्थः । पञ्चमः ॥

१९९५–वेदसे भिन्न स्थलमें एकादश शब्दके पूर्वपर्यन्त पूरण प्रत्ययान्त संख्यावाचक शब्दके उत्तर अन् प्रत्यय हो, जैसे–चतुर्थः । पंचमः–इत्यादि ॥

१९९६ षष्ठाष्टमाभ्यां ञ च ।५।३।५०॥

चादन् । षष्ठो भागः षाष्ठः । षष्ठः । आष्टमः । अष्टमः ॥

१९९६–षष्ठ और अष्टम शब्दके उत्तर भागार्थमें ञ और अन् प्रत्यय हो, जैसे–षष्ठो भागः=षाष्ठः, षष्ठः । आष्टमः, अष्टमः ॥

१९९७ मानपश्वङ्गयोः कन्लुकौ च । ५ । ३ । ५१ ॥

षष्ठाष्टमशब्दाभ्यां क्रमेण कन्लुकौ स्तो माने पश्वङ्गे च वाच्ये । षष्ठको भागः मानं चेत् । अष्टमो भागः पश्वङ्गं चेत् । ञस्य अनो वा लुक् । चकाराद्यथाप्राप्तम् । षाष्ठः । षष्ठः । आष्टमः । अष्टमः । महाविभाषया सिद्धे लुग्वचनं पूर्वत्र ञानौ नित्याविति ज्ञापयति ॥

१९९७–परिमाण और पशुका अङ्ग होनेपर षष्ठ और अष्टम शब्दके उत्तर यथाक्रम कन् और लुक् हों । परिमाण होनेपर जैसे–षष्ठको भागः। पश्वङ्ग होनेपर जैसे–अष्टमो भागः। ञ और अन् प्रत्ययका विकल्प करके लुक् हुआहै, चकारसे यथाप्राप्त (ञ और अन्का श्रवण) होगा, जैसे–षाष्ठः, षष्ठः। आष्टमः, अष्टमः ॥

महाविभाषासे सिद्ध होनेपर भी पुनर्लुक्का ग्रहण पूर्व सूत्रमें ञ और अन् प्रत्ययकी नित्यता जताताहै ॥

१९९८ एकादाकिनिच्चासहाये।५।३।५२।

चात्कन्लुकौ । एकः । एकाकी । एककः ॥

१९९८-एक शब्दके उत्तर असहायार्थमें आकिनिच् प्रत्यय हो, और चकारसे कन् तथा लुक् हो, जैसे-एकः, एकाकी, एककः ॥

१९९९ भूतपूर्वे चरट् । ५ । ३ । ५३ ॥

आढ्यो भूतपूर्वः आढ्यचरः ॥

१९९९-भूतपूर्वार्थमें चरट् प्रत्यय हो, जैसे-आढ्यो भूतपूर्वः=आढ्यचरः ॥

२००० षष्ठ्या रूप्य च । ५ ।३।५४॥

षष्ठ्यन्ताद्भूतपूर्वेऽर्थे रूप्यः स्याच्चरट् च । कृष्णस्य भूतपूर्वो गौः कृष्णरूप्यः । कृष्णचरः । तसिलादिषु रूप्यस्यापरिगणितत्वान्न पुंवत् । शुभ्राया भूतपूर्वः शुभ्रारूप्यः ॥

२०००-षष्ठीविभक्त्यन्त पदके उत्तर भूतपूर्वार्थमें रूप्य और चरट् प्रत्यय हो, जैसे-कृष्णस्य भूतपूर्वो गौः=कृष्णरूप्यः, कृष्णचरः । तसिलादि प्रत्ययके बीचमें रूप्य प्रत्ययके अपरिगणितत्वके कारण पुंवद्भाव नहीं होगा, जैसे-शुभ्राया भूतपूर्वः शुभ्रारूप्यः ॥

२००१ अतिशायने तमबिष्ठनौ । ५ । ३ । ५५ ॥

अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः । अयमेषामतिशयेनाढ्यः । आढ्यतमः । लघुतमः । लघिष्ठः ॥

२००१-अतिशयविशिष्टार्थवृत्तिके उत्तर स्वार्थमें तमप् और इष्ठन् प्रत्यय हो,जैसे-अयमेषामतिशयेन आढ्यः=आढ्यतमः। लघुतमः, लघिष्ठः ॥

२००२ तिङश्च । ५ । ३ । ५६ ॥

तिङन्तादतिशये द्योत्ये तमप् स्यात् ॥

२००२-तिङन्त शब्दके उत्तर अतिशयार्थमें तमप् प्रत्यय हो ॥

२००३ तरतमपौ घः । १ । १ । २२ ॥

एतौ घसंज्ञौ स्तः ॥

२००३-तरप् और तमप् प्रत्यय घसंज्ञक हों ॥

२००४ किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे । ५ । ४ । ११ ॥

किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे । किन्तमाम् । प्राह्णेतमाम् । पचतितमाम् । उच्चैस्तमाम् । द्रव्यप्रकर्षे तु, उच्चैस्तमस्तरुः ॥

२००४-द्रव्यप्रकर्ष न होनेपर किम् शब्द, एदन्त शब्द, तिङन्त पद और अव्यय शब्दके उत्तर जो घ,तदन्त प्रातिपदिकके उत्तर आमु प्रत्यय हो, जैसे-किन्तमाम् । प्राह्णेतमाम् । पचतितमाम् । उच्चैस्तमाम् । द्रव्यप्रकर्ष होनेपर जैसे-उच्चैस्तमः तरुः ॥

२००५ द्विवचनविभज्योपपदे तरबीयसुनौ । ५ । ३ । ५७ ॥

द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः । पूर्वयोरपवादः । अयमनयोरतिशयेन लघुर्लघुतरः । लघीयान् । उदीच्याः प्राच्येभ्यः पटुतराः । पटीयांसः ॥

२००५-दोके मध्यमें एकके अतिशय होनेपर विभजनीय उपपदमें वर्तमान सुबन्त और तिङन्त पदके उत्तर तरप् और ईयसुन् प्रत्यय हो, यह पूर्वसूत्रोक्त तमप् और इष्ठन्के विशेषक हैं, जैसे-अयमनयोरतिशयेन लघुः=लघुतरः, लघीयान् । उदीच्याः प्राच्येभ्यः पटुतराः । पटीयांसः ॥

२००६ अजादी गुणवचनादेव । ५ । ३ । ५८ ॥

इष्ठन्नीयसुनौ गुणवचनादेव स्तः । नेह । पाचकतरः । पाचकतमः ॥

२००६-गुणवाचक शब्दके ही उत्तर इष्ठन् और ईयसुन् प्रत्यय हो, इससे पाचकतरः, पाचकतमः, यहां नहीं हुआ ॥

२००७ तुश्छन्दसि । ५ । ३ । ५९ ॥

तृन्तृजन्तादिष्ठन्नीयसुनौ स्तः ॥

२००७-वेदमें तृन् और तृच्प्रत्ययान्तके उत्तर इष्ठन् और ईयसुन् प्रत्यय हो ॥

२००८ तुरिष्ठेमेयःसु । ६ । ४ । १५४ ॥

तृशब्दस्य लोपः स्यादिष्ठेमेयस्सु परेषु । अतिशयेन कर्ता करिष्ठः । दोहीयसी धेनुः ॥

२००८-इष्ठन्, इमन्, ईयसुन्, प्रत्यय परे रहते तृ प्रत्ययका लोप हो, जैसे-अतिशयेन कर्ता=करिष्ठः । दोहीयसी धेनुः ॥

२००९ प्रशस्यस्य श्रः । ५ । ३ । ६० ॥

अस्य श्रादेशः स्यादजाद्योः ॥

२००९-अजादि प्रत्यय परे रहते प्रशस्य शब्दके स्थानमें श्र आदेश हो ॥

२०१० प्रकृत्यैकाच् । ६ । ४ । १६३ ॥

इष्ठादिष्वेकाच् प्रकृत्या स्यात् । श्रेष्ठः । श्रेयान् ॥

२०१०-इष्ठादि प्रत्यय परे रहते एकाच् शब्द प्रकृतिमें ही रहै, जैसे-अयमतिशयेन प्रशस्यः=श्रेष्ठः, श्रेयान् ॥

२०११ ज्य च । ५ । ३ । ६१ ॥

प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः। ज्येष्ठः ॥

२०११-इष्ठन् और ईयसुन् प्रत्यय परे रहते प्रशस्य शब्दके स्थानमें ज्य आदेश हो, जैसे-अयमनयोरतिशयेन प्रशस्यः=ज्येष्ठः ॥

२०१२ ज्यादादीयसः । ६ । ४ । १६० ॥

आदेः परस्य । ज्यायान् ॥

२०१२–ज्य शब्दके उत्तर ईयसुन् प्रत्ययके स्थानमें आत् हो, जैसे–(आदेः परस्य ४४) ज्यायान् ॥

२०१३ वृद्धस्य च । ५ । ३ । ६२ ॥

ज्यादेशः स्यादजाद्योः । ज्येष्ठः । ज्यायान्॥

२०१३–इष्ठन् और ईयसुन् प्रत्यय परे रहते वृद्ध शब्दके स्थानमें ज्य आदेश हो, जैसे–अयमेषामतिशयेन वृद्धः=ज्येष्ठः। अयमनयोरतिशयेन वृद्धः=ज्यायान् ॥

२०१४ अन्तिकबाढयोर्नेदसाधौ । ५ । ३ । ६३ ॥

अजाद्योः । नेदिष्ठः । नेदीयान् । साधिष्ठः । साधीयान् ॥

२०१४–अन्तिक और बाढ शब्दको इष्ठन् और ईयसुन् प्रत्यय परे रहते यथाक्रम नेद और साध आदेश हों, जैसे–अतिशयेनान्तिकः=नेदिष्ठः, नेदीयान् । साधिष्ठः, साधीयान् ॥

२०१५ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः।६।४।१५६॥

एषां यणादिपरं लुप्यते पूर्वस्य च गुण इष्ठादिषु । स्थविष्ठः । दविष्ठः । यविष्ठः । ह्रसिष्ठः। क्षेपिष्ठः । क्षोदिष्ठः । एवमीयस् । ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वाद् ह्रसिमा। क्षेपिमा। क्षोदिमा॥

२०१५–इष्ठादि प्रत्यय परे रहते स्थूल, दूर, युव, ह्रस्व, क्षिप्र और क्षुद्र शब्दके यणुयुक्त अन्तस्थित अर्थात् य, व, र, ल, भागका लोप हो और पूर्व स्वरको गुण हो, जैसे–स्थविष्ठः । दविष्ठः । यविष्ठः । ह्रसिष्ठः । क्षेपिष्ठः । क्षोदिष्ठः । ईयसुन्, इमन् परे भी ऐसे कार्य्य होंगे । ह्रस्व, क्षिप्र और क्षुद्र शब्दके पृथ्वादि गणमें पाठके कारण ह्रसिमा, क्षेपिमा, क्षोदिमा ऐसा भी होगा ॥

२०१६ प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः । ६ । ४ । १५७ ॥

प्रियादीनां क्रमात्प्रादयः स्युरिष्ठादिषु । प्रेष्ठः। स्थेष्ठः । स्फेष्ठः । वरिष्ठः । बंहिष्ठः । गरिष्ठः । वर्षिष्ठः । त्रपिष्ठः । द्राघिष्ठः । वृन्दिष्ठः । एवमीयसुन् । प्रेयान् । प्रियोरुबहुलगुरुदीर्घाणां पृथ्वादित्वात्प्रेमेत्यादि ॥

२०१६–इष्ठादि प्रत्यय परे रहते प्रिय, स्थिर, स्फिर, ऊरु, बहुल, गुरु, वृद्ध, तृप्र, दीर्घ और वृन्दारक शब्दोंके स्थानमें यथाक्रम प्रस्थ, स्फ, वर्, बंहि, गर्, वर्षि, त्रप्, द्राघि और वृन्द आदेश हों, जैसे–अतिशयेन प्रियः=प्रेष्ठः । स्थेष्ठः । स्फेष्ठः । वरिष्ठः । बंहिष्ठः । गरिष्ठः । वर्षिष्ठः । त्रपिष्ठः । द्राघिष्ठः । वृन्दिष्ठः । ईयसुन्, इमन् प्रत्यय परे रहते भी ऐसा आदेश होगा, जैसे–प्रेयान् । प्रिय, ऊरु, बहुल, गुरु और दीर्घ शब्दके उत्तर पृथ्वादित्वके कारण इमनिच् प्रत्यय होकर प्रेमा–इत्यादि पद होंगे ॥

२०१७ बहोर्लोपो भू च बहोः।६।४।१५८।

बहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः । भूमा । भूयान् ॥

२०१७–बहु शब्दके परे स्थित इमनिच् और ईयसुन् प्रत्ययका लोप हो और बहु शब्दके स्थानमें भू आदेश हो, जैसे–अतिशयेन बहुः=भूमा, भूयान् (आदेः परस्य.४४) ॥

२०१८ इष्ठस्य यिट् च । ६ । ४ । १५९॥

बहोः परस्य इष्ठस्य लोपः स्यात् यिडागमश्च। भूयिष्ठः ॥

२०१८–बहु शब्दके परे स्थित इष्ठन् प्रत्ययका लोप हो और बहु शब्दके उत्तरको यिट्का आगम हो, जैसे–भूयिष्ठः । (यिट्में टका लोप होगा) ॥

२०१९ युवाल्पयोः कनन्यतरस्याम्। ५ । ३ । ६४ ॥

एतयोः कनादेशो वा स्यादिष्ठेयसोः । कनिष्ठः । कनीयान् । पक्षे यविष्ठः । अल्पिष्ठ इत्यादि ॥

२०१९–युवन् और अल्प शब्दके स्थानमें इष्ठन्, ईयसुन् प्रत्यय परे रहते विकल्प करके कन् आदेश हो, जैसे–अयमेषामातिशयेन युवा=कनिष्ठः, कनीयान् । पक्षे यविष्ठः । अल्पिष्ठः–इत्यादि ॥

२०२० विन्मतोर्लुक् ।५।३।६५ ॥

विनो मतुपश्च लुक् स्यादिष्ठेयसोः । अतिशयेन स्रग्वी । स्रजिष्ठः । स्रजीयान् । अतिशयेन त्वग्वान् । त्वचिष्ठः । त्वचीयान् ॥

२०२०–इष्ठन् और ईयसुन् प्रत्यय परे रहते विन् और मतुप्का लुक् हो, जैसे–अतिशयेन स्रग्वी=स्रजिष्ठः, स्रजीयान्। अतिशयेन त्वग्वान्=त्वचिष्ठः, त्वचीयान् ॥

२०२१ प्रशंसायां रूपप्।५।३।६६॥

सुबन्तात्तिङन्ताच्च । प्रशस्तः पटुः पटुरूपः । प्रशस्तं पचति पचतिरूपम् ॥

२०२१–प्रशंसार्थमें सुबन्त और तिङन्त पदके उत्तर रूपप् प्रत्यय हो, जैसे–प्रशस्तः पटुः=पटुरूपः । प्रशस्तं पचति= पचतिरूपम् ॥

२०२२ ईषदसमाप्तौ कल्पब्देश्यदेशीयरः । ५ । ३ । ६७ ॥

ईषदूनो विद्वान् विद्वत्कल्पः । यशस्कल्पम् । यजुष्कल्पम् । विद्वद्देश्यः । विद्वद्देशीयः । पचतिकल्पम् ॥

२०२२-ईषत् असमाप्ति (ईषदून) अर्थमें कल्पप्, देश्य, देशीयर् प्रत्यय हों, जैसे-ईषदूनो विद्वान्=विद्वत्कल्पः। यशस्कल्पम् । यजुष्कल्पम् । विद्वद्देश्यः । विद्वद्देशीयः। पचतिकल्पम् ॥

२०२३ विभाषा सुपो बहुच् पुरस्तात्तु । ५ । ३ । ६८ ॥

ईषदसमाप्तिविशिष्टेर्थे सुबन्ताद्बहुज्वा स्यात्स च प्रागेव न तु परतः । ईषदूनः पटुर्बहुपटुः । पटुकल्पः । सुपः किम् । यजतिकल्पम् ॥

२०२३-ईषत् ऊनार्थमें सुबन्तसे विकल्प करके बहुच् प्रत्यय हो, यह बहुच् प्रत्यय पूर्वमें ही हो परमें न हो, जैसे-ईषदूनः पटुः=बहुपटुः । पक्षमें कल्पप् प्रत्यय होगा, जैसे--पटुकल्पः । सुबन्त न होनेपर जैसे-यजतिकल्पम् ॥

२०२४ प्रकारवचने जातीयर् ।५।३।६९॥

प्रकारवति चायम् । थाल् तु प्रकारमात्रे । पटुप्रकारः पटुजातीयः ॥

२०२४--प्रकार (सादृश्य और भेद) विशिष्ट अर्थमें जातीयर् प्रत्यय हो, यह सूत्र प्रकारविशिष्टविषयक है क्योंकि, केवल प्रकारमें थाल् प्रत्यय पूर्वसूत्रसे होगा, जैसे--पटुप्रकारः= पटुजातीयः ॥

२०२५ प्रागिवात्कः ।५।३।७०॥

इवे प्रतिकृताविव्यतः प्राक् काऽधिकारः ॥

२०२५-" इवे प्रतिकृतौ २०५१ " इस वक्ष्यमाण सूत्रके पूर्वपर्यन्त क प्रत्ययका अधिकार चलैगा ॥

२०२६ अव्ययसर्वनाम्नामकच् प्राक् टेः । ५ । ३ । ७१ ॥

तिङश्चेत्यनुवर्तते ॥

२०२६-अव्यय और सर्वनाम शब्दोंकी और तिङन्तकी टिके पूर्वमें अकच् प्रत्यय हो ॥

२०२७ कस्य च दः । ५ । ३ । ७२॥

कान्ताव्ययस्य दकारोऽन्तादेशः स्यादकच्च ॥

२०२७-ककारान्त अव्यय शब्दको दकार अन्तादेश हो और टिके पूर्वमें अकच् प्रत्यय हो, " तिङश्च २००२" की अनुवृत्ति होतीहै ॥

२०२८ अज्ञाते । ५ । ३ । ७३ ॥

कस्यायमश्वोऽश्वकः । उच्चकैः । नीचकैः । सर्वके । विश्वके ॥ ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच् ॥ * ॥ युवकयोः । आवकयोः । युष्मकासु । अस्मकासु । युष्मकाभिः । अस्मकाभिः । ओकारेत्यादि किम् । त्वयका । मयका । अकच्प्रकरणे तूष्णीमः काम्वक्तव्यः ॥ * ॥ मित्त्वादन्त्यादचः परः । तूष्णीकामास्ते ॥ शीले को मलोपश्च ॥ * ॥ तूष्णीं शीलस्तूष्णीकः । पचतकि । जल्पतकि । धकित् । हिरकुत् ॥

२०२८-अज्ञातार्थमें अकच् प्रत्यय हो, जैसे- कस्यायम् अश्वः=अश्वकः । उच्चकैः । नीचकैः । सर्वके । विश्वके ।

ओकार, सकार और भकारादि सुप् प्रत्यय परे रहते सर्वनाम शब्दकी टिके पूर्वमें अकच् प्रत्यय हो * जैसे- युवकयोः । आवकयोः । युष्मकासु । अस्मकासु । युष्मकाभिः । अस्मकाभिः । ओकारादि सुप् परे न होनेपर त्वयका । मयका ।

अकच्प्रकरणमें ' तूष्णीम् ' शब्दके उत्तर काम् प्रत्यय हो * प्रत्ययका मकार इत्संज्ञक होनेके कारण अन्त्य अच्के परे होगा, तूष्णीकामास्ते ।

शीलार्थमें ' तूष्णीम् ' शब्दके उत्तर क प्रत्यय हो और मकारका लोप हो * जैसे-तूष्णींशीलः=तूष्णीकः ।

पचतकि । जल्पतकि । धकित् । हिरकुत् ॥

२०२९ कुत्सिते । ५ । ३ । ७४ ॥

कुत्सितोऽश्वोऽश्वकः ॥

२०२९-कुत्सितार्थमें क प्रत्यय हो, जैसे--कुत्सितोऽश्वः= अश्वकः ॥

२०३० संज्ञायां कन् ।५।३।७५॥

कुत्सिते कन् स्यात्तदन्तेन चेत्संज्ञा गम्यते । शूद्रकः । राधकः । स्वरार्थं वचनम् ॥

२०३०-यदि तदन्त पदसे संज्ञा गम्यमान हो तो कुत्सितार्थमें शब्दके उत्तर कन् प्रत्यय हो, जैसे-शूद्रकः । राधकः । यह सूत्र स्वरार्थ है ॥

२०३१ अनुकम्पायाम् ।५।३।७६ ॥

पुत्रकः । अनुकम्पितः पुत्र इत्यर्थः ॥

२०३१-अनुकम्पार्थमें कन् प्रत्यय हो, जैसे-पुत्रकः, अर्थात् अनुकंपित पुत्र ॥

२०३२ नीतौ च तद्युक्तात् ।५।३।७७॥

सामदानादिरूपा नीतिस्तस्यां गम्यमानायामनुकम्पायुक्तात्कप्रत्ययः स्यात् । हन्त ते धानकाः । गुडकाः । एहकि । अद्धकि । पूर्वेणानुकम्प्यमानात् प्रत्ययः, अनेन तु परम्परासम्बन्धेपीति विशेषः ॥

२०३२-साम दानादि उपायको नीति कहतेहैं,नीति अर्थ होनेपर अनुकम्पायुक्त शब्दके उत्तर कन् प्रत्यय हो, जैसे- हन्त ते धानकाः गुडकाः । एहकि । अद्धकि । पूर्व सूत्रसे अनुकम्प्यमानके उत्तर कन् प्रत्यय हुआ परंतु इससे परम्परा संबंधमें भी होगा, यही विशेष है ॥

२०३३ बह्वचो मनुष्यनाम्नष्ठज्वा । ५ । ३ । ७८ ॥

पूर्वसूत्रद्वयविषये ॥

२०३३–पहले दोनों सूत्रोंके विषयमें बहुस्वरयुक्त मनुष्य-नामवाचक शब्दके उत्तर विकल्प करके ठच् प्रत्यय हो ॥

२०३४ घनिलचौ च । ५।३।७९ ॥

तत्रैव ॥

२०३४–पूर्वसूत्रोक्त विषयमें घन् और इलच् प्रत्यय हो ॥

२०३५ ठाजादावूर्ध्वं द्वितीयादचः । ५ । ३ । ८३ ॥

अस्मिन्प्रकरणे यष्ठोऽजादिप्रत्ययश्च तस्मिन्प्रत्यये परे प्रकृतेर्द्वितीयादच ऊर्ध्वं सर्वं लुप्यते। अनुकम्पितो देवदत्तो देविकः। देवियः। देविलः। देवदत्तकः । अनुकम्पितो वायुदत्तो वायुकः । ठग्रहणमुको द्वितीयत्वे कविधानार्थम्॥वायुदत्तः। वायुकः । पितृकः ॥ चतुर्थादच ऊर्ध्वस्य लोपो वाच्यः ॥ * अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिकः ॥ अनजादौ च विभाषा लोपो वक्तव्यः ॥ * ॥ देवकः । देवदत्तकः ॥ लोपः पूर्वपदस्य च ॥ * ॥ दत्तिकः । दत्तियः। दत्तिलः । दत्तकः ॥ विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः ॥ * ॥ दत्तः । देवः । देवदत्तः ॥ भामा । सत्या । सत्यभामा ॥ उवर्णाल्ल इलस्य च ॥*॥भानुलः। भानुदत्तः ॥ ऋवर्णादपि॥*॥ सवितृलः । सवित्रियः ॥

चतुर्थादनजादौ च लोपः पूर्वपदस्य च ।
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च ॥ १ ॥

२०३५–इस प्रकरणमें जो ठ और अजादि प्रत्यय कहेहैं, वह प्रत्यय परे रहते प्रकृतिके दूसरे अच्के परवर्ती सम्पूर्ण अंशका लोप हो, जैसे–अनुकम्पितो देवदत्तः=देविकः,देवियः । देविलः, देवदत्तकः । अनुकम्पितो वायुदत्तः=वायुकः "इसुसुक्तान्तात् कः " इस सूत्रसे विहित उक्के द्वितीयत्वमें क विधानके निमित्त ठ ग्रहण हुआहै, जैसे–वायुदत्तः–वायुकः । पितृकः ।

चतुर्थ अच्के परे स्थित अंशका लोप हो * यथा–अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिकः ।

अजादि न होनेपर विकल्प करके लोप हो * यथा–देवकः, देवदत्तकः ।

पूर्वपदका भी लोप हो * यथा–दत्तिकः, दत्तियः, दत्तिलः, दत्तकः ।

प्रत्ययके विना भी पूर्व और उत्तर पदका लोप विकल्प करके हो * जैसे–दत्तः, देवः, देवदत्तः । भामा, सत्या, सत्यभामा ।

उवर्णके उत्तर इलच् प्रत्ययका भी ल हो * जैसे–भानुदत्तः–भानुलः ।

ऋवर्णके उत्तर पूर्वपदका लोप हो * जैसे–सवितृलः । सवित्रियः ।

अनजादि विषयमें चतुर्थ अच्के उत्तरपदका लोप हो, इसी प्रकार प्रत्यय परे न रहते भी लोप हो, उवर्णान्तके उत्तर इलको ल आदेश हो, यह कारिकाका अर्थ है ॥

२०३६ प्राचामुपादेरडज्वुचौ च । ५ । ३ । ८० ॥

उपशब्दपूर्वात्प्रातिपदिकात्पूर्वविषये अडच् वुच् एतौ स्तः । चाद्यथा प्राप्तम् । प्राचांग्रहणं पूजार्थम् । अनुकम्पितः उपेन्द्रदत्तः उपडः । उपकः । उपिकः । उपियः । उपिलः । उपेन्द्रदत्तकः । षड्रूपाणि ॥

२०३६–उपशब्दपूर्वक प्रातिपदिकके उत्तर पूर्व विषयमें अडच् और वुच् प्रत्यय हों, चकारसे यथाप्राप्त होगा। 'प्राचाम्' पदका ग्रहण पूजाके निमित्त है, जैसे–अनुकम्पितः उपेन्द्रदत्तः=उपडः, उपकः, उपिकः, उपियः, उपिलः, उपेन्द्रदत्तकः, यह छै रूप होंगे ॥

२०३७ जातिनाम्नः कन् ।५।३।८१ ॥

मनुष्यनाम्न इत्येव । जातिशब्दो यो मनुष्यनामधेयस्तस्मात्कन् स्यादनुकम्पायां नीतौ च । सिंहकः । शरभकः । रासभकः ॥ द्वितीयं संध्यक्षरं चेत्तदादेर्लोपो वक्तव्यः ॥*॥ कहोडः । कहिकः ॥ एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः ॥ * ॥ वागाशीर्दत्तः वाचिकः । कथं षडंगुलिदत्तः षडिक इति ॥ षषष्ठाजादिवचनात्सिद्धम् ॥ * ॥

२०३७–जातिवाचक शब्द जो मनुष्य नामवाचक हो, उस शब्दके उत्तर अनुकम्पा और नीति अर्थमें कन् प्रत्यय हो, जैसे–सिंहकः । शरभकः । रासभकः ।

यदि दूसरी संधिका अक्षर हो तो तदादिका लोप हो* कहोडः । कहिकः ।

एकाक्षरयुक्त पूर्वपदविशिष्ट शब्दके उत्तरपदका लोप हो* वागाशीर्दत्तः–वाचिकः ।

षडंगुलिदत्तः=षडिकः यह पद कैसे सिद्ध हुआ, कारण कि, उत्तरपदके लोप होनेपर अजादि प्रत्यय परे रहते " यचि भम् १।४।१८ " से भ संज्ञा होनेके कारण जश्त्वकी प्राप्ति नहीं है ? इसलिये वार्तिक कहतेहैं–

षषष्ठाजादिवचनात्सिद्धम् * अर्थात् षडंगुलिदत्त शब्दमें " एकाक्षर० " यह वार्तिक न होकर " ठाजादा० " इस सूत्रसे ही द्वितीय अच्से पर भागका लोप हो, इसलिये अकारसे व्यवधान होनेके कारण षान्तकी भ संज्ञा न होनेसे जश्त्व हुआ ॥

२०३८ शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् । ५ । ३ । ८४ ॥

एषां मनुष्यनाम्नां ठजादौ परे तृतीयादच ऊर्ध्वं लोपः स्यात् । पूर्वस्यापवादः। अनुकम्पितः शेवलदत्तः। शेवलिकः । शेवलियः । शेवलिलः । सुपरिकः । विशालिकः । वरुणिकः।अर्यमिकः ॥

२०३८–नीति और अनुकंपार्थमें अजादि प्रत्यय परे रहते शेवल, सुपरि, विशाल, वरुण, अर्यमन्–इत्यादि मनुष्य नामवाचक शब्दके तीसरे अच्के परभागका लोप हो, यह सूत्र पूर्व सूत्रका विशेषक है, जैसे–अनुकम्पितः शेवलदत्तः–शेवलिकः, शेवलियः, शेवलिलः । सुपरिकः । विशालिकः । वरुणिकः । अर्य्यमिकः ॥

२०३९ अजिनान्तस्योत्तरपदलोपश्च । ५ । ३ । ८२ ॥

अजिनान्तान्मनुष्यनाम्नोऽनुकम्पायां कन् तस्य चोत्तरपदलोपः । अनुकम्पितो व्याघ्राजिनो व्याघ्रकः । सिंहकः ॥

२०३९–अजिन्शब्दान्त मनुष्यनामवाचक शब्दके उत्तर अनुकम्पार्थमें कन् प्रत्यय हो और उत्तरपदका लोप हो, जैसे– अनुकम्पितः व्याघ्राजिनः=व्याघ्रकः । सिंहकः ॥

२०४० अल्पे । ५ । ३ । ८५ ॥

अल्पं तैलं तैलिकम् ॥

२०४०–अल्पार्थमें कन् प्रत्यय हो, जैसे–अल्पं तैलं=तैलिकम् ॥

२०४१ ह्रस्वे । ५ । ३ । ८६ ॥

ह्रस्वो वृक्षो वृक्षकः ॥

२०४१–ह्रस्वार्थमें कन् प्रत्यय हो, जैसे–ह्रस्वो वृक्षः=ह्रस्वकः ॥

२०४२ संज्ञायां कन् । ५ । ३ । ८७ ॥

ह्रस्वहेतुका या संज्ञा तस्यां गम्यमानायां कन् । पूर्वस्यापवादः । वंशकः । वेणुकः ॥

२०४२–ह्रस्वहेतुक जो संज्ञा वह होनेपर कन् प्रत्यय हो, यह पूर्व सूत्रका अपवाद है, जैसे–वंशकः वेणुकः ॥

२०४३ कुटीशमीशुण्डाभ्यो रः ।५।३।८८

ह्रस्वा कुटी कुटीरः । शमीरः । शुण्डारः ॥

२०४३–ह्रस्वार्थमें कुटी, शमी और शुण्डा शब्दके उत्तर र प्रत्यय हो, जैसे–ह्रस्वा कुटी=कुटीरः । शमीरः । शुण्डारः ॥

२०४४ कुत्वा डुपच् । ५ । ३ । ८९ ॥

ह्रस्वा कुतूः कुतुपः । कुतूः कृत्तेः स्नेहपात्रं ह्रस्वा सा कुतुपः पुमान् ॥

२०४४–ह्रस्वार्थमें कुतू शब्दके उत्तर डुपच् प्रत्यय हो, जैसे–ह्रस्वा कतूः=कुतुपः । कुतू शब्दसे चमडेका बनाहुआ स्नेहपात्र अर्थात् तेलका वर्तन जानना । वह छोटा होनेसे कुतुप, (कुप्पी) कही जातीहै । कुतुप शब्द पुँल्लिङ्ग है ॥

२०४५ कासूगोणीभ्यां ष्टरच् ।५।३।९०॥

आयुधविशेषः कासूः । ह्रस्वा सा कासूतरी । गोणीतरी ॥

२०४५–ह्रस्वार्थमें कासू और गोणी शब्दके उत्तर ष्टरच् प्रत्यय हो, जैसे–ह्रस्वा कासूः=कासूतरी । कासू शब्दसे अस्त्रविशेष जानना । गोणितरी । गोणी शब्दसे धान्यादि पात्र (कुठिया वा खलिहान) जानना ॥

२०४६ वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे । ५ । ३ । ९१ ॥

वत्सतरः द्वितीयं वयः प्राप्तः । उक्षतरः । अश्वतरः । ऋषभतरः । प्रवृत्तिनिमित्ततनुत्वे एवायम् ॥

२०४६–तनुत्व अर्थात् वयोन्तर प्राप्ति होनेपर वत्स और उक्ष शब्दके उत्तर और अपकर्ष होनेपर अश्व और ऋषभ शब्दके उत्तर ष्टरप् प्रत्यय हो, जैसे–वत्सतरः, अर्थात् दूसरी उमरको प्राप्त हुआ बछड़ा । उक्षतरः । द्वितीयवयःप्राप्तको उक्षा कहतेहैं, उसको तनुत्व अर्थात् तीसरी उमरकी प्राप्ति । अश्वतरः । अश्वजातिका तनुत्व अर्थात् अन्यपितृकतारूप अपकर्ष । बोझ उठानेवाले बैलको ऋषभ कहतेहैं, उसके वहनमें अपकर्ष अर्थात् मंद शक्ति होनेपर उसको ' ऋषभतर ' कहतेहैं ॥

२०४७ किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच् । ५ । ३ । ९२ ॥

अनयोः कतरो वैष्णवः । यतरः । ततरः । महाविभाषया कः । यः । सः ॥

२०४७–किम्,यद् और तद् शब्दके उत्तर दोनोंके मध्यमें एकका निर्द्धारण होनेपर डतरच् प्रत्यय हो, जैसे–अनयोः कतरो वैष्णवः । यतरः । ततरः । महाविभाषासे पक्षमें, किम् शब्दसे 'कः', यद् शब्दसे 'यः' और तद् शब्दसे 'सः' हुआ ॥

२०४८ वा बहूनां जातिपरिप्रश्ने डतमच् । ५ । ३ । ९३॥

बहूनां मध्ये एकस्य निर्द्धारणे डतमच् वा स्यात् । जातिपरिप्रश्न इति प्रत्याख्यातमाकरे । कतमो भवतां कठः । यतमः । ततमः । वाग्रहणमकजर्थम् । यकः । सकः। महाविभाषया यः। सः । किमोऽस्मिन्विषये डतरजपि । कतरः ॥

२०४८–बहुतोंके मध्यमें एकके जातिनिर्द्धारण होनेपर किम् यद् और तद् शब्दके उत्तर विकल्प करके डतमच् प्रत्यय हो।

'जातिपरिप्रश्ने' यह पद भाष्यमें प्रत्याख्यात हुआहै, इस कारण 'कतमो भवताम् अध्यापकः। शूरः देवदत्तो वा' ऐसा प्रयोग संगत होताहै। कतमो भवतां कठः। यतमः। ततमः। वा शब्दका ग्रहण अकजर्थ है। यकः। सकः। महाविभाषासे 'यः, सः' ऐसा भी होगा।

इस विषयमें किम् शब्दके उत्तर डतरच् प्रत्यय भी हो, जैसे-कतरः॥

२०४९ एकाच्च प्राचाम्।५।३।९४॥

डतरच् डतमच्च स्यात्। अनयोरेकतरो मैत्रः। एषामेकतमः॥

२०४९-प्राचीन पंडितोंके मतमें एक शब्दके उत्तर डतरच् और डतमच् प्रत्यय हो, जैसे-अनयोरेकतरो मैत्रः। एषामेकतमः॥

२०५० अवक्षेपणे कन्।५।३।९५॥

व्याकरणेन गर्वितो व्याकरणकः। येनेतरः कुत्स्यते तदिहोदाहरणम्। स्वतः कुत्सितं तु कुत्सित इत्यस्य॥

॥ इति प्रागिवीयानां पूर्णोवधिः॥

२०५०-अवक्षेप अर्थात् गर्वित अर्थमें कन् प्रत्यय हो, जैसे-व्याकरणेन गर्वितः=व्याकरणकः। इस स्थलमें 'व्याकरणक' शब्दसे व्याकरणज्ञानवर्जितकी जो निन्दा करै उसको ही जानना, परन्तु स्वयम् कुत्सित होनेपर (२०२९) कन् प्रत्यय होगा।

॥ इति प्रागिवीयप्रकरणम्॥

अथ स्वार्थिकप्रकरणम्।

२०५१ इवे प्रतिकृतौ।५।३।९६॥

कन् स्यात्। अश्व इव प्रतिकृतिः अश्वकः। प्रतिकृतौ किम्। गौरिव गवयः॥

२०५१-इवार्थोपमानत्वविशिष्ट अर्थमें वर्तमान प्रातिपदिकके उत्तर कन् प्रत्यय हो, यदि उपमेय ही प्रतिकृति हो, मृत्तिकादिनिर्मित प्रतिमाको प्रतिकृति कहतेहैं, जैसे-अश्व इव प्रतिकृतिः=अश्वकः। प्रतिकृति न होनेपर गौरिव=गवयः यहां कन् न हुआ॥

२०५२ संज्ञायां च।५।३।९७॥

इवार्थे कन् स्यात्समुदायश्चेत्संज्ञा। अप्रतिकृत्यर्थमारम्भः। अश्वसदृशस्य संज्ञा अश्वकः। उष्ट्रकः॥

२०५२-संज्ञा होनेपर इवार्थमें कन् प्रत्यय हो, इस सूत्रका आरम्भ अप्रतिकृत्यर्थ है, जैसे-अश्वसदृशस्य संज्ञा=अश्वकः। उष्ट्रकः॥

२०५३ लुम्मनुष्ये।५।३।९८॥

संज्ञायां च विहितस्य कनो लुप्स्यान्मनुष्ये वाच्ये। चञ्चा तृणमयः पुमान्। चञ्चेव मनुष्यश्चञ्चा। वध्रिका॥

२०५३-मनुष्य होनेपर संज्ञार्थमें विहित कन् प्रत्ययका लुप् हो, जैसे-चञ्चा तृणमयः पुमान् (तृणमय पुरुषको चञ्चा कहतेहैं)। चञ्चा इव मनुष्यः=चञ्चा। वध्रिका॥

२०५४ जीविकार्थे चापण्ये।५।३।९९॥

जीविकार्थं यदविक्रीयमाणं तस्मिन्वाच्ये कनो लुप्स्यात्। वासुदेवः। शिवः। स्कन्दः। देवलकानां जीविकार्थासु देवप्रतिकृतिष्विदम्। अपण्ये किम्। हस्तिकान्विक्रीणीते॥

२०५४-जीविकार्थ जो विक्रीयमाण, तद्भिन्न अर्थ (विक्रयसे भिन्न जीविका) होनेपर कन् प्रत्ययका लुप् हो, जैसे-वासुदेवः। शिवः। स्कंदः। यह कार्य्य देवलादिके जीविकार्थमें देवताओंकी प्रतिकृति होनेपर होताहै, क्योंकि, देवल देवमूर्ति सेवासे ही निर्वाह करतेहैं, उसमें जो वासुदेवसे जीविका निर्वाह करै उसको 'वासुदेव' कहतेहैं।

पण्यार्थ होनेपर जैसे-हस्तिकान् विक्रीणीते, यहां कन् प्रत्ययका लोप न हुआ।

(इस सूत्रसे तथा भाष्यके उदाहरणोंसे मूर्तिपूजन सिद्ध होताहै, इससे वैदिक होना सिद्ध है, दयानंदने सैकडों सूत्र छोड दिये, इसका अर्थ भी उलटा कियाहै)॥

२०५५ देवपथादिभ्यश्च।५।३।१००॥

कनो लुप्स्यात्। देवपथः। हंसपथः। आकृतिगणोऽयम्॥

२०५५-देवपथादि शब्दके उत्तर कन् प्रत्ययका लुप् हो, जैसे-देवपथः। हंसपथः। देवपथादि आकृतिगण है॥

२०५६ वस्तेर्ढञ्।५।३।१०१॥

इवेत्यनुवर्तत एव। प्रतिकृताविति निवृत्तम्। वस्तिरिव वास्तेयम्। वास्तेयी॥

२०५६-वस्ति शब्दके उत्तर इवार्थमें ढञ् प्रत्यय हो, इस स्थलमें इव शब्दकी अनुवृत्ति हुई, प्रतिकृतिकी निवृत्ति भी हुई, जैसे-वस्तिरिव=वास्तेयम्। वास्तेयी॥

२०५७ शिलाया ढः।५।३।१०२॥

शिलाया इति योगविभागाड्ढञपीत्येके। शिलेव शिलेयम्। शैलेयम्॥

२०५७-शिला शब्दके उत्तर इवार्थमें ढ प्रत्यय हो, जैसे-शिलेव=शिलेयम्। कोई २ कहतेहैं "शिलायाः" ऐसे योगविभाग (भिन्नसूत्रकरण) के कारण शिला शब्दके उत्तर ढञ् प्रत्यय भी होगा, जैसे-शैलेयम्॥

२०५८ शाखादिभ्यो यः।५।३।१०३॥

शाखेव शाख्यः। मुख्यः। जघनमिव जघन्यः। अग्र्यः। शरण्यः॥

२०५८-शाखादि शब्दके उत्तर इवार्थमें य प्रत्यय हो, जैसे-शाखेव=शाख्यः। मुख्यः। जघनमिव=जघन्यः। अग्र्यः। शरण्यः॥

२०५९ द्रव्यं च भव्ये ।५।३।१०४॥

द्रव्यम् अयं ब्राह्मणः ॥

२०५९-भव्यार्थमें (अभिप्रेतार्थपात्रभूत विषयमें) वर्तमान द्रु शब्दके उत्तर इवार्थमें य प्रत्यय हो, अथवा भव्यार्थमें 'द्रव्य' शब्द निपातनसे सिद्ध हो, जैसे-द्रव्यमयं ब्राह्मणः, अर्थात् अभिप्रेतार्थ पात्रभूत ब्राह्मण ।

२०६० कुशाग्राच्छः । ५।३।१०५॥

कुशाग्रमिव कुशाग्रीया बुद्धिः ॥

२०६०-कुशाग्र शब्दके उत्तर इवार्थमें छ प्रत्यय हो, जैसे-कुशाग्रम् इव=कुशाग्रीया बुद्धिः ॥

२०६१ समासाच्च तद्विषयात् । ५।३।१०६ ॥

इवार्थविषयात् समासाच्छः स्यात् । काकतालीयो देवदत्तस्य वधः । इह काकतालसमागमसदृशश्चोरसमागम इति समासार्थः । तत्प्रयुक्तः काकमरणसदृशस्तु प्रत्ययार्थः । अजाकृपाणीयः । अतर्कितोपनत इति फलितोऽर्थः ॥

२०६१-इवार्थविषयीभूत समासके उत्तर छ प्रत्यय हो, जैसे-काकतालीयः देवदत्तस्य वधः । इस स्थलमें काकतालसमागमसदृश चौरसमागम यह समासार्थ है, परन्तु तत्प्रयुक्त काकमरणसदृश प्रत्ययार्थ है । अजाकृपाणीयः, अर्थात् अतर्कित भावमें उपनत ॥

२०६२ शर्करादिभ्योऽण् ।५।३।१०७॥

शर्करेव शार्करम् ॥

२०६२-शर्करादि शब्दके उत्तर इवार्थमें अण् प्रत्यय हो, जैसे-शर्करेव=शार्करम् ॥

२०६३ अंगुल्यादिभ्यष्ठक् ।५।३।१०८॥

अंगुलीव आंगुलिकः । भरुजेव भारुजिकः ॥

२०६३-अंगुल्यादि शब्दके उत्तर इवार्थमें ठक् प्रत्यय हो, जैसे-अंगुलीव=आंगुलिकः । भरुजेव=भारुजिकः ॥

२०६४ एकशालायाष्ठजन्यतरस्याम् । ५ । ३ । १०९ ॥

एकशालाशब्दादिवार्थे ठज्वा पक्षे ठक् । एकशालेव एकशालिकः । ऐकशालिकः ॥

२०६४-एकशाला शब्दके उत्तर स्वार्थमें ठच् और पक्षमें ठक् प्रत्यय हो, जैसे-एकशालेव=एकशालिकः, ऐकशालिकः ॥

२०६५ कर्कलोहितादीकक् ।५।३।११०॥

कर्कः शुक्लोऽश्वः स इव कार्कीकः । लौहितीकः स्फटिकः ॥

२०६५-कर्क और लोहित शब्दके उत्तर इवार्थमें ईकक् प्रत्यय हो, जैसे-कर्क इव=कार्कीकः । कर्क शब्दसे सफेद घोडा जानना । लौहितीकः, अर्थात् स्फटिक ॥

२०६६ पूगाञ्ञ्योऽग्रामणीपूर्वात् । ५ । ३ । ११२ ॥

इवार्थो निवृत्तः । नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः पूगास्तद्वाचकात्स्वार्थे ञ्यः स्यात् । लौहितध्वज्यः ॥

२०६६-ग्रामणी शब्द पूर्वमें न रहते पूगवाचक शब्दके उत्तर स्वार्थमें ञ्य प्रत्यय हो, इस सूत्रसे इवार्थकी निवृत्ति हुई, नानाजातीय अनियतवृत्ति अर्थ कामप्रधान जो संघ उसको 'पूग' कहतेहैं, उससे स्वार्थमें ञ्य प्रत्यय हो, जैसे-लौहितध्वज्यः ॥

(व्रातच्फञोरस्त्रियाम् । ५ । ३ । ११३ ॥ ११००)

व्रातः, कापोतपाक्यः । च्फञ्, कौञ्जायन्यः । ब्राध्नायन्यः ॥

स्त्रीलिङ्गभिन्नमें व्रातवाचक और च्फञ् प्रत्ययान्तसे ञ्य प्रत्यय हो (सू० ११००) व्रात यथा-कापोतपाक्यः । चफञ् जैसे-कौञ्जायन्यः । ब्राध्नायन्यः ॥

२०६७ आयुधजीविसङ्घाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात् । ५ । ३ । ११४ ॥

वाहीकेषु य आयुधजीविसङ्घस्तद्वाचिनः स्वार्थे ञ्यट् । क्षौद्रक्यः । मालव्यः । स्त्रियां ङीप् । क्षौद्रकी । आयुधेति किम् । मल्लाः । संघेति किम् । सम्राट् । वाहीकेषु किम् । शबराः । अब्राह्मणेति किम् । गोपालवाः । शालंकायनाः । ब्राह्मणे तद्विशेषग्रहणम् । राजन्ये स्वरूपग्रहणम् ।

२०६७-वाहीक अर्थमें जो आयुधजीविसमूह, तद्वाचक शब्दके उत्तर स्वार्थमें ञ्यट् प्रत्यय हो, ब्राह्मण और राजन्य शब्दके उत्तर न हो, जैसे-क्षौद्रक्यः । मालव्यः ।

टकार इत्संज्ञक होनेके कारण स्त्रीलिङ्गमें ङीप् होगा, जैसे-क्षौद्रकी ।

आयुधजीवी अर्थ न होनेपर मल्लाः ।

संघ न होनेपर सम्राट् ।

वाहीक अर्थ न होनेपर शबराः ।

अब्राह्मण न होनेपर गोपालवाः । शालङ्कायनाः ।

इस स्थलमें ब्राह्मणसे तद्विशेषग्रहण और राजन्यसे स्वरूपग्रहण होगा ॥

२०६८ वृकाट्टेण्यण् । ५।३।११५ ॥

आयुधजीविसंघवाचकात्स्वार्थे । वार्केण्यः । आयुधेति किम् । जातिशब्दान्मा भूत् ॥

२०६८-आयुधजीविसमूहवाचक वृक शब्दके उत्तर स्वार्थमें टेण्यण् प्रत्यय हो, जैसे-वार्केण्यः ।

आयुध कहनेसे जातिवाचकके उत्तर नहीं होगा ।

२०६९ दामन्यादित्रिगर्तषष्ठाच्छः। ५।३।११६॥

दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चायुधजीविसंघवाचिभ्यः स्वार्थे छः स्यात्। त्रिगर्तः षष्ठो वर्गो येषां ते त्रिगर्तषष्ठाः॥

आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी।
क्रौष्टुकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जालकिः॥१॥

दामनीयः। दामनीयौ। दामनयः। औलपि-औलपीयः। त्रिगर्त--त्रिगर्तीयः। कौण्डोपरथीयः। दाण्डकीयः॥

२०६९-आयुधजीविसंघवाचक दामान्यादि, त्रिगर्तषष्ठ शब्दोंके उत्तर स्वार्थमें छ प्रत्यय हो, त्रिगर्तः षष्ठो वर्गो येषां ते=त्रिगर्त्तषष्ठाः।

कौंडोपरथ, दाण्डकी, क्रोष्टुकि, जालमानि, ब्रह्मगुप्त और जालकि शब्द भी त्रिगर्त्त कहे जातेहैं।

दामनीयः। दामनीयौ। दामनयः। औलपि, औलपीयः। त्रिगर्त्त, त्रिगर्तीयः। कौंडोपरथीयः। दाण्डकीयः॥

२०७० पर्श्वादियौधेयादिभ्योऽणञौ। ५।३।११७॥

आयुधजीविसंघवाचिभ्य एभ्यः क्रमादणञौ स्तः स्वार्थे। पार्शवः। पार्शवौ। पर्शवः। यौधेयः। यौधेयौ। यौधेयाः॥

२०७०-आयुधजीविसंघवाचक पर्श्वादि और यौधेयादि शब्दोंके उत्तर स्वार्थमें क्रमसे अण् और अञ् प्रत्यय हों, जैसे-पार्शवः। पार्शवौ। पर्शवः। यौधेयः। यौधेयौ। यौधेयाः॥

२०७१ अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ्। ५।३।११८॥

अभिजिदादिभ्योऽणन्तेभ्यः स्वार्थे यञ् स्यात्। अभिजितोऽपत्यमाभिजित्यः। वैदभृत्यः। शालावत्यः। शैखावत्यः। शामीवत्यः। और्णावत्यः। श्रौमत्यः॥

२०७१-अभिजित्, विदभृत्, शालावत्, शिखावत्, शमीवत्, ऊर्णावत् और श्रुमत्, इन अण्प्रत्ययान्त शब्दोंके उत्तर स्वार्थमें यञ् प्रत्यय हो, जैसे-अभिजितोऽपत्यम्=आभिजित्यः। वैदभृत्यः। शालावत्यः। शैखावत्यः। शामीवत्यः। और्णावत्यः। श्रौमत्यः॥

२०७२ ञ्यादयस्तद्राजाः। ५।३।११९॥

पूगाञ्ञ्य इत्यारभ्य उक्ता एतत्संज्ञाः स्युः। तेनास्त्रियां बहुषु लुक्। लोहितध्वजाः। कपोतपाकाः। कौञ्जायनाः। ब्राध्नायना इत्यादि॥

२०७२-"पूगात् ञ्यः २०६६" इस सूत्रसे लेकर इस प्रकरणमें उक्त सम्पूर्ण प्रत्ययोंकी तद्राज संज्ञा हो, तद्द्वारा स्त्रीलिङ्गभिन्न स्थलमें बहुत अर्थमें प्रत्ययका लुक् होगा, जैसे-लोहितध्वजाः। कपोतपाकाः। कौञ्जायनाः। ब्राध्नायनाः-इत्यादि॥

२०७३ पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च। ५।४।१॥

लोपवचनमनैमित्तिकत्वार्थम्। अतो न स्थानिवत्। पादः पत्। तद्धितार्थ इति समासे कृते प्रत्ययः। वुन्नन्तं स्त्रियामेव। द्वौ द्वौ पादौ ददाति द्विपदिकाम्। द्विशतिकाम्। पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात्॥ द्विमोदिकिकाम्॥

२०७३-संख्यावाचक शब्द पूर्वमें रहते पाद और शत शब्दके उत्तर वीप्सार्थमें वुन् प्रत्यय और पाद,शतके अन्त्यवर्ण का लोप हो,इस सूत्रसे लोपविधान अनैमित्तिकत्वार्थ है, इस कारण स्थानिवद्भाव नहीं होगा। पाद शब्दके स्थानमें पद् आदेश हो (४१४)। तद्धितार्थमें (७२८) समास करनेपर प्रत्यय होगा। वुन्नन्त पद स्त्रीलिङ्ग हो, जैसे-द्वौ द्वौ पादौ ददाति=द्विपदिकाम्। द्विशतिकाम्। पाद और शत शब्दका ग्रहण अनर्थक है क्योंकि, यह कार्य्य अन्यत्र भी देखा जाताहै, द्विमोदिकिकाम्॥

२०७४ दण्डव्यवसर्गयोश्च। ५।४।२॥

वुन् स्यात्। अवीप्सार्थमिदम्। द्वौ पादौ दण्डितः द्विपदिकां द्विशतिकां व्यवसृजति ददातीत्यर्थः॥

२०७४-दंड और व्यवसर्ग अर्थमें वुन् प्रत्यय हो। यह सूत्र अवीप्सार्थ है। द्वौ पादौ दंडितः=द्विपदिकां व्यवसृजति, ददातीत्यर्थः॥

२०७५ स्थूलादिभ्यः प्रकारवचने कन्। ५।४।३॥

जातीयरोपवादः। स्थूलकः। अणुकः॥ चञ्चद्बृहतोरुपसंख्यानम्॥ * ॥ चञ्चत्कः। बृहत्कः॥ सुराया अहौ॥॥ सुरावर्णोऽहिः सुरकः॥

२०७५-स्थूलादि शब्दोंके उत्तर प्रकारार्थमें कन् प्रत्यय हो, यह सूत्र जातीयर् प्रत्ययका विशेषक है, जैसे-स्थूलकः। अणुकः॥

चञ्चत् और बृहत् शब्दके उत्तर भी अण् प्रत्यय हो * जैसे-चञ्चकः। बृहत्कः।

सुरा शब्दके उत्तर अहि अर्थात् सर्पार्थमें कन् प्रत्यय हो, जैसे-सुरावर्णोऽहिः=सुरकः॥

२०७६ अनत्यन्तगतौ क्तात् ।५।४।४ ॥

छिन्नकम् । भिन्नकम् । अभिन्नकम् ॥

२०७६-अनत्यन्त गति अर्थमें क्तप्रत्ययान्त शब्दके उत्तर कन् प्रत्यय हो, जैसे-छिन्नकम् । भिन्नकम्। अभिन्नकम्।

२०७७ न सामिवचने । ५ । ४ । ४ ॥

सामिपर्याये उपपदे क्तान्तान्न कन् । सामिकृतम् । अर्धकृतम् । अनत्यन्तगतेरिह प्रकृत्यैवाभिधानात्पूर्वेण कन्न प्राप्तः । इदमेव निषेधसूत्रमत्यन्तस्वार्थिकमपि कनं ज्ञापयति । बहुतरकम् ॥

२०७७-सामिपर्य्यायवाचक उपपद रहते क्त प्रत्ययान्त शब्दके उत्तर कन् प्रत्यय न हो,जैसे-सामिकृतम् । अर्द्धकृतम्। इस स्थलमें प्रकृतिसे ही अनत्यन्त गति (सर्वावयवसे सम्बन्धाभावके) अभिधानके कारण पूर्वसूत्रसे कन् प्रत्ययकी प्राप्ति नहीं थी, इसलिये यह निषेध सूत्र ही अत्यन्त स्वार्थिक जो कन् प्रत्यय उसको ज्ञापन करताहै, जैसे-बहुतरकम् ॥

२०७८ बृहत्या आच्छादने ।५।४।६ ॥

कन् स्यात् । द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा । आच्छादने किम् । बृहती छन्दः ॥

२०७८-आच्छादनार्थमें बृहती शब्दके उत्तर कन् प्रत्यय हो, जैसे-द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा। आच्छादन न होनेपर कन् प्रत्यय नहीं होगा, जैसे-बृहती छन्दः ॥

२०७९ अषडक्षाशितङ्ग्वलङ्कर्मालंपुरुषाध्युत्तरपदात्खः । ५ । ४ । ७ ॥

स्वार्थे । अषडक्षीणो मन्त्रः । द्वाभ्यामेव कृत इत्यर्थः । आशिता गावोऽस्मिन्निति आशितङ्गवीनमरण्यम् । निपातनात्पूर्वस्य मुम् । अलंकर्मणे अलंकर्मीणः । अलंपुरुषीणः । ईश्वराधीनः । नित्योऽयं खः । उत्तरसूत्रे विभाषाग्रहणात् ॥ अन्येऽपि केचित्स्वार्थिकाः प्रत्यया नित्यमिष्यन्ते तमबादयः प्राक्कनः, ञ्यादयः प्राग्वुनः, आमादयः प्राङ्मयटः, बृहतीजात्यन्ताः समासान्ताश्चेति ॥

२०७९-अषडक्ष,आशितंगु,अलङ्कर्मन्, अलंपुरुष शब्द और अधि शब्द उत्तर पदमें हैं जिनके ऐसे शब्दोंके उत्तर स्वार्थमें ख प्रत्यय हो, जैसे-अषडक्षीणो मंत्रः,द्वाभ्यामेव कृत इत्यर्थः। आशिता गावोऽस्मिन्=आशितङ्गवीनं शरण्यम्, यहां निपातनसे पूर्वपदको मुम्का आगम हुआ । अलङ्कर्मणे=अलङ्कर्मीणः । अलंपुरुषीणः । ईश्वराधीनः । पर सूत्रमें विभाषाग्रहणके कारण यह ख प्रत्यय नित्य है । ख भिन्न और भी कतिपय स्वार्थिक प्रत्यय नित्य इष्ट हैं । जैसे-"अतिशायने तमप्० ५।३।५५" इससे लेकर "अवक्षेपणे कन् ५।३।९५" इसके पूर्वपर्य्यन्त विहित प्रत्यय, "पूगाञ्ञ्योऽग्रामणीपूर्वात् ५।३।११२" इससे लेकर "पादशतस्य संख्यादेर्वीप्सायां वुन् ५।४।१" इसके पूर्वपर्य्यन्त विहित , "किमेत्तिङव्ययघादाम्० ५ । ४ । ११ " इससे लेकर " तत्प्रकृतवचने मयट् ५।४।२१" इसके पूर्वपर्य्यन्त विहित प्रत्यय और "बृहत्या आच्छादने ५।४।६" "अषडक्षा० ५।४।७" "जात्यन्ताच्छ बन्धुनि ५।४।९" इनसे विहित प्रत्यय और समासान्त प्रत्यय ऐसा भाष्य है ॥

२०८० विभाषाञ्चेरदिक् स्त्रियाम् । ५ । ४ । ८ ॥

अदिक्स्त्रीवृत्तेरञ्चत्यन्तात् प्रातिपदिकात्खः स्याद्वा स्वार्थे । प्राक्-प्राचीनम् । प्रत्यक्-प्रतीचीनम् । अवाक्-अवाचीनम् । निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः । अर्वन्तमञ्चतीति अर्वाक्, अर्वाचीनम् । अदिक्स्त्रियां किम् । प्राची दिक् । उदीची दिक् । दिग्ग्रहणं किम् । प्राचीना ब्राह्मणी । स्त्रीग्रहणं किम् । प्राचीनं ग्रामादाम्रः ॥

२०८०-दिक्रूप स्त्रीवृत्ति न हो ऐसे अञ्चु धात्वन्त प्रातिपदिकके उत्तर स्वार्थमें विकल्प करके ख प्रत्यय हो, जैसे-प्राक्, प्राचीनम् । प्रत्यक्, प्रतीचीनम् । अवाक्, अवाचीनम् । "निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः" ऐसे अभिधानके अनुसार अर्वत् शब्दसे निकृष्ट अर्थ जानना । अर्वन्तमञ्चति=अर्वाक्, अर्वाचीनम् । दिक्रूपस्त्रीवृत्ति होनेपर जैसे-प्राची दिक्, उदीची दिक् । दिक् शब्दका ग्रहण क्यों किया ? तो 'प्राचीना ब्राह्मणी' यहां उक्त प्रत्यय हो, नहीं तो अस्त्रीवृत्ति न होनेसे प्रत्यय नहीं होता । स्त्रीग्रहण क्यों किया ? तो 'प्राचीनं ग्रामादाम्रः' यहां हो ॥

२०८१ जात्यन्ताच्छ बन्धुनि । ५ । ४ । ९ ॥

ब्राह्मणजातीयः । बन्धुनि किम् । ब्राह्मणजातिः शोभना । जातिर्व्यञ्जकं द्रव्यं बन्धु ॥

२०८१-बंधु अर्थमें जात्यन्त शब्दके उत्तर छ प्रत्यय हो, जैसे-ब्राह्मणजातीयः । बंधु न होनेपर छ प्रत्यय न होगा, जैसे-ब्राह्मणजातिः शोभना । जातिव्यञ्जक द्रव्यको बंधु कहतेहैं ॥

२०८२ स्थानान्ताद्विभाषा सस्थानेनेति चेत् । ५ । ४ । १० ॥

सस्थानेन तुल्येन चेत् स्थानान्तमर्थवदित्यर्थः। पितृस्थानीयः पितृस्थानः । सस्थानेन किम् । गोः स्थानम् ॥

२०८२-यदि सस्थान अर्थात् तुल्यरूप अर्थसे स्थानान्त शब्द अर्थविशिष्ट हो तो उसके उत्तर विकल्प करके छ प्रत्यय हो, जैसे-पितृस्थानीयः, पितृस्थानः । तुल्यार्थमें वर्त्तमान न होनेपर छ प्रत्यय नहीं होगा, जैसे-गोः स्थानम् ॥

२०८३ अनुगादिनष्ठक् । ५ । ४ । १३ ॥

अनुगदतीत्यनुगादी, स एवानुगादिकः ॥